CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०३८

॥ अथ सामान्यनिरुक्तिविवेचनाप्रारम्भः ॥

अस्य ग्रन्थस्य पुनर्मुद्रणादयः सर्वेऽप्यधिकाराः यन्त्राधिकारिणा खिस्ताब्द १८६७ ऑक्ट २५ तम राजनियमानुसारेण स्वायत्तीकृताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तावना-

सन्ति बह्व्यो दीधिति-(शिरोमणि) व्याख्याः तासां सम्प्रति गादाधर्यैव प्रबला तस्या एवाध्ययनाध्यापनादिप्रचारस्य प्रायशो दृश्यत्वात्तदीयसामान्यनिरुक्तिस्थविषयेष्वेव सभायामूहापोहात्मकविचारस्य प्रायशो दर्शनेन तत्रत्यदुर्बोधविचारणीयोहापोहार्हविषयेषु गोलोकन्यायरत्नभट्टाचार्येण ये कोटिक्रमानुगमादिविषयाः व्यवसायशालिच्छात्राणां वादगोष्ठ्यां परिनिष्ठितपण्डितानामपि व्यामोहोत्पादकाः स्वशिष्येभ्योप्यत्यन्तगोप्यत्वेनोपदिष्टाः, ते चेतरागम्यदुरूहविषयास्तन्मुख्यशिष्येण पार्वतीचरणविद्यावाचस्पतिभट्टाचार्येण सार्धं परस्परमूहापोहाभ्यां वाचामगोचरकल्पनाकुशलैः प्रपञ्चप्रसिद्धश्रीवृन्दावननि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासिश्रीरङ्गाचार्यस्वामिभिरपूर्वयुक्तिवृन्दान्वेषणरसिकजनोपकृतये सामान्यनिरुक्ति-नवोनविवेचनात्मक-ग्रन्थरूपेणैकत्र सङ्कलिताः, ताम् उक्त-विवेचनां परमकारुणिकैः तर्कोभयमीमांसापारावारीण-श्रीवृन्दावननिवासिमहामहोपाध्यायश्रीसुदर्शनाचार्य्यैः स्वकृतविषमस्थलीयटिप्पण्यलंकृतां सम्परिष्कृतां च विहाणीवास्तव्यमहावनशास्त्रिप्रोत्साहितोऽहमत्यन्तमनोहरस्थूलसूक्ष्माक्षरैर्निजलक्ष्मीवेङ्कटेश्वरमुद्रणालये गादाधरीसामान्यनिरुक्ति-विवेचनेतिनाम्ना मुद्रितवान्, परं येषां महाशयानां तदादित्सा चेत्ते स्वनामग्राम-सूचनपूर्वकं कल्याणनगरीयलक्ष्मीवेङ्कटेश्वरमुद्रणालये पत्रं प्रेषयन्तु, यतस्तत्प्रेषणेऽहमुद्यतः स्यामिति ।

निवेदयिता-श्रीकृष्णदासात्मजो गङ्गाविष्णुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीरङ्गदेशिकनिर्मिता गादाधरीसामान्यानिरुक्ति-विवेचना ॥

श्रीमते रामानुजाय नमः ॥ अनुमितिपदस्यानुमितिसामान्यपरत्वेऽतिप्र-
सङ्गात्प्रकृतपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकमिति (गादाधरी) ॥

नन्वत्र प्रकृतहेतुकत्वनिवेशनं व्यर्थं प्रकृतपक्षसाध्यकत्वमात्रेणाप्यतिप्रसङ्गवारणसंभवात्। नच स्वरूपासिद्धिसंग्राहकं तदिति वाच्यम् लक्षणयानुमितिकारणज्ञानमात्रपरत्व इत्यत्र परामर्शस्याप्रतिबध्यत्वं वदता ग्रन्थकारेण पूर्वकल्पे स्वरूपासिद्ध्यसंग्रहस्याप्यभिप्रेतत्वात्। किञ्च प्रकृतहेतुकत्वनिवेशेऽपि कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरूपासिद्धिसंग्रहः प्रकृतहेतुकत्वंहि प्रकृतहेतुमत्तानिश्चयाव्यवहितोत्तरत्वं तच्च ह्रदो वह्निमान्धूमादित्यत्र ह्रदो वह्निमानित्याकारकानुमितावेवास्ति तत्रच स्वरूपासिद्धिप्रतिबध्यता नास्ति आचार्य्यव्यतिरिक्त-मतेनुमितेः पक्षांशे हेत्वनवगाहित्वादिति चेन्न। पर्वतो वह्निमान्महानसीयवह्नीतरवह्न्यभाववत्पर्वतका-लीनधूमादित्यत्र महानसीयवह्न्यभाववत्पर्वतरूपबाधसंग्रहाय तस्यावश्यकत्वात्। अन्यथा प्रकृत-हेतुकत्वानुपादाने शुद्धपर्वतो वह्निमानित्याकारकानुमितेरपि प्रकृतपक्षसाध्यकत्वेन तत्र महानसी-यवह्न्यभाववत्पर्वतरूपबाधनिश्चयप्रतिबध्यताया अभावेन तदसंग्रहापत्तेः। तन्निवेशेच साध्यव्याप्यता-वच्छेदकहेतुमत्तानिश्चयस्येतरविशेषबाधनिश्चयरूपतया तदनन्तरं जायमाना पर्वतो वह्निमान् महानसीय-

CC-0. In Public Domain. Digitization by eGangotri

वह्निमानिति समूहालम्बनानुमितिरेव तस्याश्च तादृशबाधनिश्चयप्रतिबध्यत्वेन तत्संग्रहः । नच तथापि यत्र तादृशहेतुमत्तानिश्चयात्पूर्वं पर्वतो महानसीयवह्न्यभाववानिति बाधनिश्चयः । तत्र पर्वतो वह्निमानित्येवानुमितिर्जायते तत्रच तादृशबाधनिश्चयप्रतिबध्यत्वं नास्तीति तदसंग्रहो दुर्वार एवेति वा-

१ तदऽसंग्रहे हेतोर्दुष्टत्वव्यवहारस्तु साधनाऽप्रसिद्धिमादाय पर्वतत्वावच्छेदेन निरुक्तवह्न्यभावस्य साधनतावच्छेदककुक्षौ प्रविष्टत्वात् सामानाधिकरण्येन तथात्वेतु सामान्यरूपेण तद्धर्मिणि तद्वत्ताबुद्धिंप्रति तदभाववत्तानिश्चयस्य प्रतिबन्धकत्वमिति प्राचीनमतानुरोधेन सामानाधिकरण्येनापि निरुक्तवह्निमत्पर्वतस्य साधनाऽप्रसिद्धित्वमिति श्रीरङ्गदेशिकपूज्यपादानामाशयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यम् । तथापि ज्ञानपक्षकविषयितया वह्न्यादिसाध्यकवह्न्यभाववद्धूमवत्कालीनमहानसीयवह्नीतरवह्न्यभाववत्तज्ज्ञानकालीनधूमादिहेतुकस्थले महानसीयवह्न्यभाववत्तज्ज्ञानात्मकबाधसंग्रहार्थं तस्यावश्यकत्वात् । तत्र प्रकृतहेतुकत्वानिवेशे ज्ञानं वह्निमदित्याकारकानुमितेरपि प्रकृतपक्षसाध्यकानुमितितया तत्र तादृशबाधनिश्चयप्रतिबध्यत्वाभावात् । प्रकृतहेतुकत्वनिवेशे तु तादृशहेत्ववगाहिपरामर्शानन्तरं ज्ञानं वह्निमदित्यनुमितिस्तु न जायते तादृशपरामर्शस्य धूमावच्छेदेन वह्न्यभावावगाहिनिश्चयविशिष्टप्रकृतपक्षे धूमविशेषावगाहिनिश्चयरूपतया तादृशानुमितिप्रतिबन्धकत्वात् । किन्तुं[1] म-

१ किन्तु महानसीयवह्निप्रकारकानुमितिरेव जायत इति वदतां श्रीरङ्गदेशिकपूज्यचरणानामयमाशयः महानसीयवह्नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संयोगादिसंबन्धेन वह्नेः साध्यत्वे धूमावच्छेदेन संयोगादिसम्बन्धेन वह्न्यभावावगाहिनिश्चयविशिष्टपक्षे हानसीयवह्निप्रकारकानुमितिरेव जायते तत्रच तादृशबाधनिश्चयप्रतिबध्यत्वं चास्तीति तत्संग्रहः ।

तरविशेषबाधविषयकत्वेन च तदनुमितिहेतुमत्ताज्ञानयोः कार्य्यकारणभावे बाधकाभावात् । नच तत्र साध्यव्याप्यहेतुम-त्ताज्ञानस्य नियमेन साध्याभावावच्छेदकतया गृहीतधर्मवत्तानिश्चयरूपत्वेन प्रतिबन्धकतावच्छेदकविषयतावत्त्वेन निरुक्तज्ञा-नस्य कारणत्वमप्रामाणिकमिति वाच्यम् । धूमवति वह्न्यभावोऽव्याप्यवृत्तिरित्याद्यव्याप्यवृत्तित्वज्ञानकाले निरुक्तपरामर्श-स्य कारणत्वे बाधकाभावादिति ज्ञेयः ।

प्रकारकानुमितित्वेन निरुक्तहेतुमत्तानिर्णयत्वेन कार्यकारणभावविरहेपि निरुक्तानुमितीयमहानसीयवह्निप्रकारतावत्त्वेन स्वे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताद्दशधूमावगाहिपरामर्शकाले संयोगादिसंवन्धेन वह्न्यादिसामान्यानुमितेरिव वह्निविशेषानुमितेरप्यसं- भवात् । विषयितया साध्यानुसरणम् । नचैवमप्येताद्दशपरामर्शकाले धूमवति वह्न्यभावोऽव्याप्यवृत्तिरिति ज्ञानं महानसीयवह्न्यभाववत्तज्ज्ञानमितिच ज्ञानं तदनन्तरं वह्निसामान्यानुमितिरेव जायते तत्रच ताद्दशबाधनिश्चयप्रातिबध्यत्वं नास्तीति कथं तत्संग्रह इति वाच्यम् । याद्दशाङ्करविशेषसाध्यकैताद्दशहेतुमति साध्यसामान्याभावेऽव्याप्यवृत्तित्वज्ञानं नास्ति तत्रत्यदोषसंग्रहस्यैवं विवक्षया सम्भवादिति ॥ श्रीः ॥ ॥ ॥ ॥ ॥

संबन्धिपदं संबन्धिद्वयसाधारणस्य तत्साक्षात्कारजनकसाक्षात्कारविषयता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मकनिरूपकत्वस्य लाभायेति तथाच प्रकृतपक्षतावच्छेदकावच्छिन्नोद्देश्य-
कप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुका-
नुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारविषयताश्रयग्रहनिष्ठप्रतिब-
ध्यतानिरूपितप्रतिबन्धकशालियथार्थज्ञानविषयत्वमिति पर्य्यवसितम् ॥
अत्रानुमितिनिष्ठकार्य्यतानिवेशे पर्वतो वह्निमानित्यत्र पर्वतो वह्निमान्ह्रदश्च तथेत्याकारकानुमितिनि-
ष्ठवह्निमद्ध्रदविषयकानुमितित्वावच्छिन्नकार्य्यतामादाय ह्रदो वह्निमानित्यसमूहालम्बनानुमितिप्रतिबन्धक-
प्रमाविषये वह्न्यभाववद्ध्रदेऽतिव्याप्तिः। तादृशानुमितित्वव्यापककार्य्यतानिवेशे नानाविधव्याप्त्यवगा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्निपरामर्शजन्यानुमितिनिष्ठैककार्य्यताविरहादसंभवः । अतस्तादृशानुमितित्वावच्छिन्नकार्य्यता निवेश्या अत्रच प्रकृतहेतुकत्वानिवेशे पर्वतो वह्निमान्धूमादित्यादौ वह्न्यभाववद्वृत्तिद्रव्येऽतिव्याप्तिः । पर्वतपक्षकवह्निसाध्यकानुमितित्वावच्छिन्ना या वह्निव्याप्यद्रव्यवान्पर्वत इति परामर्शकार्य्यता तत्साक्षात्कारजनकसाक्षात्कारविषयतादृशपरामर्शप्रतिबन्धकप्रमाविषयत्वात्तस्य तन्निवेशेतु न तादृशपरामर्शः उक्तसाक्षात्कारजनकसाक्षात्कारविषय इति न दोषः । नचैवमपि वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यद्रव्यवांश्चेत्याकारकसमूहालम्बनपरामर्शोत्तरपर्वतो वह्निमानित्याकारकानुमितौ या कार्य्यता सा वह्निव्याप्यधूमवान्पर्वत इति परामर्शनिरूपिता वह्निव्याप्यद्रव्यवान्पर्वत इति परामर्शनिरूपिता चोभयलिङ्गकानुमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तित्वावच्छिन्नैवेति तादृशकार्य्यतासाक्षात्कारजनकसाक्षात्कारविषयो द्रव्यलिङ्गकपरामर्शोपीत्युक्ताति-
व्याप्तिर्दुर्वारैवेति वाच्यम् । प्रकृतहेतुकत्वावच्छिन्नत्वस्यानुमितिनिष्ठकार्य्यतायां निवेशनीयत्वात् ।
तच्च प्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठनिरूपकतासंबन्धावच्छिन्नावच्छेदकतानिरूपकीभूता या
निश्चयनिष्ठोत्तरत्वसंबन्धावच्छिन्नावच्छेदकता तन्निरूपकत्वम् तथाच धूमत्वावच्छिन्नप्रकारतानिष्ठावच्छेद-
कताकनिश्चयनिष्ठावच्छेदकतानिरूपकीभूता य कार्यता तस्या धूमलिङ्गकपरामर्शनिरूपिततया द्रव्य-
लिङ्गकपरामर्शनिरूपितत्वाभावेन तादृशपरामर्शस्योक्तकार्य्यतासाक्षात्कारजनकसाक्षात्काराविषयत्वात् ।
नन्वत्र प्रकृतहेतुकत्वावच्छिन्नत्वस्य कार्य्यतायां निवेशे प्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठाऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छेदकताकनिश्चयनिष्ठावच्छेदकतानिरूपकीभूता या प्रकृतपक्षतावच्छेदकावाच्छिन्नोद्देश्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वावच्छिन्ना कार्य्यता तत्साक्षात्कारजनकसाक्षात्काविषयेत्यादिलक्षणं पर्य्यवासितम् । एवमपि पर्वतो वह्निमान्धूमादित्यादौ काञ्चनमयत्वाभाववद्धूमादावतिव्याप्तिः । वह्निव्याप्यकाञ्चनमयधूमवान्पर्वत इति परामर्शनिरूपिता या पर्वतो वह्निमानित्यनुमितित्वावच्छिन्ना कार्य्यता तस्या अपि प्रकृतहेतुतावच्छेदकीभूतधूमत्वावच्छिन्नप्रकारतानिष्ठावच्छेदकतानिरूपकावच्छेदकतानिरूपकत्वात् । तत्साक्षात्कारजनकसाक्षात्कारविषयताद्दशपरामर्शप्रतिबन्धककाञ्चनमयत्वाभाववान्धूम इति प्रमाविषयत्वात्तस्य। नच प्रकृतहेतुतावच्छेदकपर्याप्तावच्छेदकतानिरूपकप्रकारतानिष्ठा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽवच्छेदकतानिरूपकाऽवच्छेदकताकत्वेन कार्य्यता निवेशनीया काञ्चनमयधूमवान्पर्वत इति परामर्शो-त्तरानुमितिनिष्ठकार्य्यताच काञ्चनमयत्वधूमत्वधर्म्मद्वयपर्य्याप्तावच्छेदकतानिरूपकप्रकारतानिष्ठाऽवच्छेद-कतानिरूपकावच्छेदकताका नतु हेतुतावच्छेदकशुद्धधूमत्वपर्य्याप्तावच्छेदकतानिरूपकाऽवच्छेदकतानि-रूपकावच्छेदकतानिरूपकावच्छेदकताकेति नोक्तदोष इति वाच्यम्। सर्वत्र परामर्शनिष्ठा यानुमितिकार्य्य-तावच्छेदकता तन्निरूपितप्रकारतानिष्ठावच्छेदकतया निरूपितस्यावच्छेदकतात्वावच्छिन्नस्य हेतुतावच्छे-दकव्याप्त्योरेव पर्य्याप्तत्वादसंभवापत्तेः। नच हेतुतावच्छेदकनिष्ठावच्छेदकताभिन्ना सती व्याप्तिनिष्ठा-

१ अत्र चावच्छिन्नत्वसम्बन्धेन हेतुतावच्छेदकव्याप्त्योः प्रकारत्वांशेऽवच्छेदकत्वमभिमतमिति बोध्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिन्ना याऽवच्छेदकता

ऽवच्छेदकताभिन्ना सती प्रकारतात्वनिष्ठाऽवच्छेदकता तदनिरूपकप्रकारतानिष्ठावच्छेदकताकनिश्चय-
त्वावच्छिन्नावच्छेदकताकत्वं कार्यतायां निवेशनीयमिति वाच्यम्। नानाविधव्याप्तिष्वेकविधव्याप्तिनिवेशे
ऽन्वयव्यतिरेकव्याप्त्यन्यतरानिवेशेच साधारणानुपसंहारित्वादावव्याप्तेः। सकलविधव्याप्तिनिष्ठावच्छेद-
कताभेदनिवेशेच वह्निमान्गगनादित्यादौ वह्न्यसमानाधिकरणवह्न्यभावव्यापकीभूताभावप्रतियोगिगगने-
ऽतिव्याप्तिः। गगनव्यापकवह्निसमानाधिकरणवह्न्यभावव्यापकाभावप्रतियोगिगगनवानिति परामर्शस्य
पर्वतो वह्निमानित्यनुमितिंप्रति कारणतया तादृशानुमितिनिष्ठकार्य्यत्वस्य तादृशपरामर्शनिरूपितस्य ग-
गनाऽन्वयव्याप्तिव्यतिरेकव्याप्तिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकप्रकारतानिष्ठावच्छेदकतानि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपकनिश्चयनिष्ठावच्छेदकतानिरूपकत्वात् तत्साक्षात्कारजनकसाक्षात्कारविषयपरामर्शनिष्ठवह्निसामाना-
धिकरण्यप्रकारकवह्न्यभावव्यापकाभावप्रतियोगिगगनत्वावच्छिन्नविशेष्यकबुद्धित्वावच्छिन्ननिरूपितप्र-
तिबन्धकताशालिप्रमाविषयत्वात्तादृशगगनस्येति चेन्न । प्रकृतहेतुतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्य-
नुयोगितावच्छेदकधर्म्मवृत्तिविशेष्यत्वावच्छिन्नप्रकारतानिष्ठावच्छेदकतानिरूपकनिश्चयनिष्ठावच्छेदकता-
निरूपकत्वस्य कार्य्यतायां विवक्षणीयत्वात् । तादृशधर्म्मवृत्तित्वं च विशेष्यतायां स्वनिरूपिताव-
च्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन तथाच काञ्चनमयधूमविषयकपरामर्शवह्न्य-
भावव्यापकाभावप्रतियोगिगगनविषयकपरामर्शनिष्ठा या कार्य्यतावच्छेदकता तदवच्छेदकताश्रयीभूता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

या धूमगगनादिनिष्ठप्रकारता तदवच्छेदकव्याप्तिनिष्ठप्रकारतानिरूपितविशेष्यताच न हेतुतावच्छे-
दकतापर्य्याप्त्यनुयोगितावच्छेदकीभूतधूमत्वगगनत्वनिष्ठैकत्वनिष्ठेति नातिव्याप्तिः । ननु परामर्शाव्यव-
हितोत्तरत्वस्य कार्य्यतावच्छेदकघटकत्वे प्रकृतपक्षसाध्यकानुमितित्वस्य कार्य्यतावच्छेदकत्वे प्रयोज-
नाभावेन तदवच्छिन्नकार्य्यताघटितलक्षणस्यासम्भवः । नच परामर्शाव्यवहितोत्तरत्वावच्छिन्नंप्रति
परामर्शस्य समवायघटितसामानाधिकरण्येन कारणत्वे यदात्मनि परामर्शस्तदात्मनि तदुत्तरं यत् घटा-
त्मगतद्वित्वमुत्पद्यते तस्य घटेपि समवायेनोत्पत्त्या तत्र परामर्शस्य व्यभिचार इति वाच्यम् । अ-
नुमितित्वस्य कार्य्यताव-च्छेदकत्वमात्रेण तादृशव्यभिचारवारणसंभवेन पक्षसाध्यविषयतायाः कार्य्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावच्छेदककुक्षावप्रवेशादिति चेन्न। अप्रामाण्यज्ञानानां तत्तद्व्यक्त्यभावकूटस्य कारणतावच्छेदककुक्षौ निवेशपक्षे यत्र भावि ज्ञानं धूमाभाववति धूमप्रकारकमिति भ्रमत्वज्ञानं तदनन्तरंच पर्वतो वह्निव्याप्यधूमवान् घटव्याप्यपटवानिति परामर्शस्तदनन्तरं घटानुमितिवह्न्यनुमिती तत्र परामर्शद्वितीयक्षणे वह्न्यनुमितिवारणाय तादृशाप्रामाण्यज्ञानव्यक्त्यभावघटितकूटस्यैव तादृशपरामर्शकारणतावच्छेदककुक्षौ निवेशनीयतया तादृशकारणतावच्छेदकावच्छिन्नधूमपरामर्शस्य तादृशपरामर्शद्वितीयक्षणोत्पन्नघटानुमितौ व्यभिचारवारणाय तादृशाप्रामाण्यज्ञानव्यक्त्यभावघटितकूटस्य कार्य्यतावच्छेदककोटावपि निवेशनीयतया तादृशाप्रामाण्यज्ञानास्कन्दितधूमालोकविषयसमूहालम्बनपरामर्शोत्तरं पर्वते वह्न्यनुमितौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यभिचारवारणाय तादृशाप्रामाण्यज्ञानव्यक्त्यभावानां कार्य्यतावच्छेदककोटिप्रविष्टकूटान्तर्भावेपि उक्तस्थले तदनिवेशेन लाघवाय पक्षसाध्यावगाहित्वस्य कार्य्यतावच्छेदककोटौ निवेशौचित्यात् । नन्वेवं सति तादृशकार्य्यतावच्छेदकाविषयत्वावच्छिन्नत्वेन प्रतिबध्यतानिवेशेनैवातिव्याप्तिवारणसंभवे कार्य्यतासाक्षात्कारजनकसाक्षात्कारविषयताशालिग्रहनिष्ठत्वेन प्रतिबध्यतानिवेशनं व्यर्थमुत्तरकल्पानुसरणं चानुचितमिति चेन्न । पर्वतो वह्निमान्धूमादित्यादौ घटाभाववत्पर्वतेऽतिव्याप्तेः तत्र पर्वतो वह्निव्याप्यधूमघटवानित्येकत्र द्वयमिति रीत्या ज्ञानीया या घटत्वावच्छिन्नप्रकारतानिरूपितविशेष्यता तस्या अपि वह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यताभिन्नायाः कार्य्यतावच्छेदकतया तदवच्छिन्नप्रतिबध्यतानिरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितप्रतिबन्धकताशालिप्रमाविषयत्वस्य तत्र सत्त्वात् । नचैवं तादृशकार्य्यतानवच्छेदकविषयतानवच्छि-
न्नत्वस्य प्रतिबध्यतायां विवक्षणेनोक्तातिव्याप्तिर्घटाभाववत्पर्वतविषयकनिश्चयनिरूपितप्रतिबध्यतायाः ता-
दृशकार्य्यतानवच्छेदकघटत्वावच्छिन्नप्रकारत्वावच्छिन्नत्वादिति वाच्यम् । ह्रदो वह्निमान्धूमादित्यादौ
वह्न्यभाववद्ध्रदादावव्याप्त्यापत्तेस्तज्ज्ञानीयप्रतिबध्यतावच्छेदकत्वस्य महानसीयवह्निमान् ह्रद इत्याकार-
कज्ञानीयह्रदत्वावच्छिन्नविशेष्यतानिरूपितमहानसीयवह्नित्वावच्छिन्नप्रकारतायां सत्त्वात् । तस्याश्च ता-
दृशकार्य्यतायामनवच्छेदकत्वात् । एवं घटो गगनवानित्यादाववृत्तिगगनादावव्याप्तिः । तादृशदोषविष-
यकनिश्चयप्रतिबध्यत्वस्य तादृशकार्य्यतावच्छेदकविषयिताशून्यानिर्द्धर्मिमतावच्छेदककज्ञानसाधारणतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्य्यतावच्छेदकविषयित्वानवच्छिन्नत्वाभावात् । नच तादृशकार्य्यतानवच्छेदकविषयताशून्यज्ञानीयविषयत्वावच्छिन्नत्वेन प्रतिबध्यता निवेश्या तथाच तादृशकार्य्यतानवच्छेदकमहानसीयवह्नित्वावच्छिन्नविषयिताशून्यह्रदो वह्निमानित्यनुमितिमादाय तादृशनिर्द्धर्म्मितावच्छेदककज्ञानीयविषयताशून्यघटो गगनवानित्याकारकज्ञानमादाय च पूर्वोक्तस्थलद्वये च लक्षणसमन्वयः । वह्निव्याप्यधूमघटवान्पर्वत इत्याकारकज्ञानीयघटत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताया उक्तज्ञानीयत्वाभावादेव तदवच्छिन्नप्रतिबध्यतामादाय नोक्तातिव्याप्तिश्चेति वाच्यम् । तादृशकार्य्यतानवच्छेदकनिरवच्छिन्नविशेष्यताशून्यत्वस्य क्वापि ज्ञानेऽसत्त्वेनासम्भवापत्तेः । नच तथापि कार्य्यतानवच्छेदकविषयताशून्यत्वमित्यनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्य्यतावच्छेदकविषयताविशिष्टान्यविषयताशून्यत्वस्य विवक्षणान्नासम्भवः । विषयतावैशिष्ट्यं च स्व-

---

१ अत्राचार्यचरणतात्पर्यानभिज्ञाः पण्डितंमन्याः यत् प्रलपन्ति स्वतादात्म्यादिषडन्यतमशरीरे स्वावच्छेद्यनिरूपितत्वस्वावच्छेद्यनिरूपितावच्छेद्यत्वान्यतरनिवेशेनैव सर्वानर्थपरिहारे षडन्यतमत्वेन सम्बन्धनिवेशो निष्प्रयोजनकः तथाहि प्राथमिकसम्बन्धद्वयसंग्राह्यह्रदत्वावच्छिन्नविशेष्यताया ह्रदत्वादिनिष्ठनिरवच्छिन्नप्रकारतायाश्च सम्बन्धघटकस्वपदग्राह्यह्रदत्वनिष्ठावच्छेदकतां ह्रदत्वावच्छिन्नविशेष्यतां चादाय संग्रहो बोध्यः तथैवान्ययोर्द्वयोरपीति । तन्न समीचीनम् । स्वावच्छेद्यनिरूपितत्वादिशरीरे स्वावच्छेद्यस्य स्वावच्छेद्यत्वेन निवेशाऽयोगात् । नच तथा निवेशे क्षतिविरहः स्वावच्छेद्यत्वस्यानुगतस्याभावादऽतः किञ्चित्सम्बन्धनिष्ठावच्छेदकतानिरूपकस्वावच्छेद्यत्वेनैव तन्निवेशो वाच्यः तथाच ह्रद-

५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादात्म्यस्वावच्छिन्नत्वस्वानिरूपितत्वस्वानिरूपितावच्छेद्यत्वस्वावच्छेद्यानिरूपितत्वस्वावच्छेद्यानिरूपितावच्छेद्यत्वैतदन्यतमसम्बन्धेन अत्र प्रथमद्वितीयसम्बन्धनिवेशश्च ह्रदो वह्निमानित्यत्र ह्रदत्वावच्छिन्नविशेष्यताया ह्रदत्वनिरूपितनिरवच्छिन्नविशेष्यतायाश्च संग्रहाय तृतीयचतुर्थसम्बन्धनिवेशश्च धूमाभाववद्वृत्तिवह्निरूपव्यभिचारेऽव्याप्तिवारणाय। अन्यथा धूमाभाववद्वृत्तिवह्निमांस्तादृशालोकवान्धूमाभाववद्वृत्तिमानित्यादिनानाहेतुतावच्छेदकावगाहिहेतुतावच्छेदकानवगाहिनानाविधपरामर्शानामेकरूपेणैव का-

---

त्वावच्छिन्नकार्य्यतावच्छेदकविषयत्वावच्छेद्याया निरवच्छिन्नविशेष्यतायाः किञ्चित्सम्बन्धावच्छिन्नत्वासम्भवेन ह्रदत्वनिष्ठनिरवच्छिन्नप्रकारतादिसंग्राहकस्वतादात्म्यादि निवेश्यमिति विदुषां विमर्शः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणतया कार्य्यतावच्छेदककोटावेकधर्म्मावच्छिन्नंप्रति व्यापकसामानाधिकरण्यादिनानाविधव्याप्त्यवगाहि-
परामर्शकारणतायां व्यभिचारवारणाय प्रवेशनीयाव्यवहितोत्तरत्वशरीरे पूर्वोक्तपरामर्शानामेकरूपेणैव
प्रवेशात् हेतुतावच्छेदकवह्नित्वादिनिष्ठाया निरवच्छिन्नविशेष्यतानिरूपितप्रकारताया व्याप्तिप्रकारतानि-
रूपितधर्म्मितावच्छेदकतायाश्च तादृशानुमितिनिष्ठकार्य्यतानवच्छेदकतया तच्छून्यत्वस्य तादृशव्य-
भिचारज्ञानप्रतिबध्यज्ञानावृत्तितयाऽव्याप्त्यापत्तेः। पञ्चमषष्ठसम्बन्धनिवेशश्च पर्वतो वह्न्यभाववानित्यादौ
वह्निमत्पर्वतरूपबाधसंग्रहाय। अन्यथा वह्न्यभावव्याप्यहेतुमत्तापरामर्शस्य लाघवादवच्छिन्नप्रतियोगि-
ताकत्वसंबन्धावच्छिन्नवह्नित्वनिष्ठप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यत्वावच्छिन्नविधेयतात्वेन वह्न्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावत्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नं प्रत्येव कारणतया वह्निनिष्ठवह्नित्वनिरूपितानिरवच्छि-
न्नविशेष्यत्वप्रकारत्वतन्निरूपितविशेष्यत्वादीनां कार्यतानवच्छेदकतया तच्छून्यत्वस्य तादृशबाधज्ञान-
प्रतिबध्यज्ञानेऽसत्त्वेनाव्याप्त्यापत्तेरिति वाच्यम् । पर्वतो धूमवान्गगनादित्यादावाधेयत्वप्रतियोगित्वोभ-
याभाववद्गगनेऽतिव्याप्त्यापत्तेस्तादृशकार्य्यतानवच्छेदकविषयताशून्यत्वस्य गगनव्यापकधूमसामाना-
धिकरण्यधूमाभावव्यापकीभूताभावप्रतियोगित्ववद्गगनवान्पर्वत इत्याकारके व्याप्तिद्वयांश एकत्र द्वयमि-
ति रीत्या परामर्शे तादृशानुमितिकारणतासत्त्वेन तज्ज्ञानप्रतिबन्धकज्ञानविषयत्वस्य तत्र सत्त्वात् । य-
त्किंचित्कार्य्यतानवच्छेदकविषयताशून्यत्वस्य ज्ञानविशेषणत्वेन तद्दोषवारणेपि ह्रदो वह्निमान्धूमादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यादौ वह्न्यभाववदवृत्तिधूमतादृशालोकोभयाभाववद्ध्रदेतिव्याप्तिरशक्यपरिहारा एकत्र द्वयमिति रीत्या वह्न्यभाववदवृत्तिधूमालोकवानिति ज्ञाने उभयसाधारणसाध्याभाववदवृत्तित्वावच्छिन्नप्रकारताशालि-निश्चयाव्यवहितोत्तरत्वघटितधर्म्मावच्छिन्नयत्किंचित्कार्य्यतानवच्छेदकविषयताशून्यत्वस्याक्षतत्वात् । एवमव्यवहितोत्तरत्वस्य कार्य्यतावच्छेदककोटौ निवेशनीयतयाऽप्रामाण्यज्ञानानामनुगतरूपेणोत्तेजकता-मते पक्षसाध्यविषयतायाः प्रयोजनविरहेण कार्य्यतावच्छेदककुक्षावप्रवेशेन तादृशकार्य्यत्वाप्रसि-द्ध्याऽसम्भवस्य दुर्वारत्वाद्गौरवाच्चेति दिक् । अनुमितिनिष्ठकार्य्यतासाक्षात्कारजनकसाक्षात्कारीय-विषयताश्रयग्रहनिष्ठप्रतिबध्यतानिवेशे प्रकृतानुमितिनिष्ठकार्य्यतान्यानुमितिनिष्ठकार्य्यताविषयकसमू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्यालम्बनसाक्षात्कारजनकसाक्षात्कारविषयतां तादृशकार्य्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितज-
नकताश्रयसमूहालम्बनसाक्षात्कारविषयतां चादाय पर्वतो वह्निमानित्यादौ वह्न्यभाववद्ध्रदादावतिव्या-
प्तिरतस्तादृशकार्य्यताविषयकसाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकसाक्षात्कारीयविष-
यताश्रयग्रहनिष्ठप्रतिबध्यतानिवेशनीया । नन्वत्र प्रथमसाक्षात्कारनिवेशे किं प्रयोजनमिति चेन्न
अनुमितिनिष्ठकार्य्यताविषयकत्वावच्छिन्नजन्यतानिवेशेऽनुमितिः परामर्शकार्य्येत्यनुमितिनिष्ठकार्य्यत्व
विषयकत्वानुमितित्वाद्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदिका या प्रत्यक्षपरामर्शीयहेतुविषयता तदा-
दाय हेतुभूतभूतलं घटवदिति ज्ञाननिष्ठप्रतिबध्यतामादाय पर्वतो वह्निमानित्यादौ घटाभाववद्भूतलेऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिव्याप्तेः। साक्षात्कारत्वनिवेशेतु परामर्शकार्य्यतायास्तदनवच्छिन्नत्वेन नायं दोषः। द्वितीयसाक्षात्कारत्वानिवेशे तादृशकार्य्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूता याऽनुमितित्वेन भूतलं घटवदिति ज्ञाननिष्ठसाक्षात्कारविषयता तदाश्रयग्रहनिष्ठप्रतिबध्यतामादाय घटाभाववद्भूतलेऽतिव्याप्तिः। यद्धर्म्मावच्छिन्नविषयता तादृशजनकतावच्छेदिका तद्धर्म्माश्रयग्रहनिष्ठप्रतिबध्यतानिवेशे परामर्शघटकज्ञानत्वमादाय स एव दोषः। अतो यद्धर्म्मावच्छिन्नग्रहत्वव्यापिका तादृशजनकतेति विवक्षणीयं तथाचासम्भवः। अनुमितित्वावच्छिन्नग्रहत्वाश्रयानुमितिशाब्दादौ तादृशजनकताविरहात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः साक्षात्कारत्वनिवेशः। ननु वस्तुतस्तु तत्कार्य्यंताव्यक्तिसाक्षात्कारत्वावच्छिन्नंप्रति तदाश्रयव्यक्तिसा
क्षात्कारत्वेन तन्निरूपकव्यक्तिसाक्षात्कारत्वेनैव हेतुतया प्रकृतपक्षसाध्यहेतुकानुमितिनिष्ठकार्य्यंतानिष्ठाधे-
यतासम्बन्धावच्छिन्नावच्छेदकतानिरूपकविषयतानिष्ठावच्छेदकतानिरूपकजन्यतानिरूपितजनकतावच्छे-
दकविषयताश्रयग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतानिवेशे ऽनुमितिनिष्ठकार्य्यताविधेयकानुमिति-
त्वावच्छिन्नजन्यतानिरूपितसाध्यविषयतानिष्ठावच्छेदकतायां साध्यतावच्छेदकावच्छिन्नत्वस्यावच्छेद-
कतया साध्यस्याधेयतासम्बन्धेन नावच्छेदकत्वम्। भ्रमप्रमासाधारणसाध्यतावच्छेदकावच्छिन्नविषयताशा-
ल्यनुमितित्वस्यैव परामर्शजन्यतावच्छेदकत्वात्। एवंच प्रथमसाक्षात्कारत्वानिवेशे पर्वतो वह्निमानित्यादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटाभाववद्भूतले न प्रागुक्तरीत्यातिव्याप्तिः । एवं तादृशकार्य्यतासाक्षात्कारंप्रति तादृशानुमितित्वेनान्यावगाहिज्ञानस्य कारणत्वाभावेन द्वितीयसाक्षात्कारनिवेशस्यापि न सार्थक्यम् इति चेत् । अत्र कश्चित्। तद्व्यक्तेः स्वरूपतोभानमते प्रथमसाक्षात्कारत्वानिवेशे प्रागुक्तातिव्याप्तिः। स्वरूपतस्तद्व्यक्तिविधेयकानुमितिनिष्ठपरामर्शजन्यतायां साध्यविषयतायास्साध्यतावच्छेदकावच्छिन्नत्वेनावच्छेदकत्वासंभवेन साध्यनिष्ठविषयतात्वेनैवावच्छेदकत्वात्। द्वितीयसाक्षात्कारत्वानिवेशे तादृशकार्य्यतासाक्षात्कारत्वावच्छिन्नंप्रति तदाश्रयव्यक्तिसाक्षात्कारत्वेन हेतुत्वेपि तदाश्रयानुमितेर्भूतलं घटवदिति ज्ञानस्यचानुमितित्वेन यः साक्षात्कारस्तस्यापि हेतुतया तन्निरूपितानुमितित्वनिष्ठप्रकारतानिरूपितविशेष्यताया ए-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्येन तादृशजनकतावच्छेदकतादृशविषयताश्रयो भूतलं घटवदिति ज्ञानमिति तत्रातिव्याप्तिवारणाय यद्विषयताशालिसाक्षात्कारत्वव्यापिका तादृशजनकतेति वक्तव्यं तथाच साक्षात्कारत्वानिवेशेऽसंभवः अनुमितिशाब्दादौ जनकत्वाभावात् अतस्तन्निवेश इत्याह । वस्तुतः तादृशकार्य्यताविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतानिरूपितविषयतानिष्ठावच्छेदकतानिरूपिताधेयतासंबन्धावच्छिन्नावच्छेदकताश्रयग्रहनिष्ठप्रतिबध्यतानिवेशे न प्रागुक्तदोषावकाशः। परामर्शनिष्ठानुमितिकारणतायां हेतुविषयताया हेतुतावच्छेदकावच्छिन्नत्वेनैवावच्छेदकतया तादृशविषयतानिष्ठावच्छेदकतायां हेतोराधेयतासंबन्धेनावच्छेदकत्वाभावात् । अन्यथा हेतुतावच्छेदकरूपेणान्यावगाहिपरामर्शस्यानुमित्यजनकत्वापत्तेः । ए-

CC-0. In Public Domain. Digitization by eGangotri

वंच तादृशानुमितिनिष्ठकार्य्यताविषयकानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकतावच्छेदकता न हेतुभूतभूतलं घटवदित्याकारकज्ञाननिष्ठा एवंचानुमितिभूतलंघटवदित्याकारकज्ञानयोर्योऽनुमितित्वेन साक्षात्कारस्तस्य कार्य्यताविषयकसाक्षात्कारंप्रति कारणत्वेपि तदीयविषयताया अनुमितिनिष्ठत्वेनैव जनकतावच्छेदकतया तत्र भूतलं घटवदिति ज्ञानस्याधेयतासंबन्धेनानवच्छेदकतयाच पूर्वोक्तदोषाभावात् । तथापि साक्षात्कारत्वं विषयताविशेषो नातिरिक्त इति मताभिप्रायेण साक्षात्कारत्वनिवेशः । किंच व्याप्यधर्म्मपुरस्कारेण निवेशसंभवे व्यापकधर्म्मपुरस्कारेण निवेशस्यानुमितिग्रन्थे भट्टाचार्य्येणानङ्गीकृतत्वात्साक्षात्कारत्वनिवेशः । यद्वाऽऽधेयतासंबन्धावच्छिन्नावच्छेदकताश्रयग्रहनिष्ठप्रतिबध्य–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तालाभार्थमेव तन्निवेश इति दिक् । ननु तादृशकार्य्यताविशिष्टग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकयथार्थज्ञानविषयत्वम् लक्षणमास्तां कार्य्यतावैशिष्ट्यंच स्वाश्रयत्वस्वानिरूपितकारणतावत्त्वोभयसंबन्धेन तथाच पक्षे साध्यसाध्यव्याप्यहेत्ववगाह्यनुमित्यात्मकग्रहमादाय सर्वत्र लक्षणसमन्वय इति चेन्न । साधारण्यानुपसंहारित्वयोरव्याप्तेः अनुपसंहारित्वनिश्चयप्रतिबध्यत्वस्य तादृशोभयसंबन्धेन प्रकृतहेतुमत्तानिश्चयोत्तरप्रकृतपक्षसाध्यविषयकानुमितित्वघटितधर्म्मावच्छिन्नकार्य्यतावत्त्यां प्रकृतपक्षे प्रकृतसाध्यतन्निरूपितान्वयव्याप्तिविशिष्टहेत्ववगाह्यनुमितावसत्त्वात् साधारण्यविषयकनिश्चयप्रतिबध्यत्वस्य व्यतिरेकव्याप्त्यवगाहितादृशसमूहालम्बनानुमितावसत्त्वाच्च । नच कार्य्यतावैशिष्ट्यं ग्रहेऽनिवे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्य तादृशप्रतिबध्यतायां निवेश्यते वैशिष्ट्यंच स्वविशिष्टग्रहनिष्ठभेदप्रतियोगितावच्छेदकत्वसंबन्धा-
वच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसंबन्धेन स्ववैशिष्ट्यंच पूर्वोक्तोभयसंबन्धेन एवंच
तादृशकार्य्यत्वविशिष्टप्रतिबध्यता साधारण्यानिश्चयप्रतिबध्यता ऽनुपसंहारित्वनिश्चयप्रतिबध्यताच स्वत्व-
स्याऽननुगततया स्वपदेन यत्किंचित्कार्य्यताया एव ग्रहणसंभवात् प्रकृतहेतुनिश्चयोत्तरतादृशानुमिति-
त्वघटितधर्म्मावच्छिन्नयत्किञ्चित्कार्य्यताविशिष्टग्रहे सर्वत्र साधारण्यनिश्चयप्रतिबध्यत्वस्य तादृशयत्कि-
ञ्चित्कार्य्यताविशिष्टग्रहेऽनुपसंहारित्वनिश्चयप्रतिबध्यत्वस्यच सत्त्वात् । परम्परायाः संबन्धत्वास्वीकारे
तादृशसंबन्धस्य प्रकारमुद्रया निवेशः कार्य्यः तत्प्रकारश्च प्रकृतहेतुविषयकनिश्चयोत्तरप्रकृतपक्षसाध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयकानुमितित्वघटितधर्म्मावच्छिन्नकार्य्यतात्वसमानाधिकरणोभयावृत्तिधर्म्मनिष्ठनिरवच्छिन्नावच्छेदक-
तानिरूपकताद्दशोभयसम्बन्धावच्छिन्नकार्य्यतानिष्ठाऽवच्छेदकतानिरूपकग्रहनिष्ठावच्छेदकतानिरूपकवृ-
त्तित्वनिष्ठाऽवच्छेदकतानिरूपकभेदनिष्ठाऽवच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूपकाव-
च्छेदकत्वनिष्ठप्रतियोगिताकाभाववत्प्रतिबध्यतात्वेनेति स्वनिरूपितकारणतायाः सम्बन्धत्वानङ्गीकारे-
तु ताद्दशसमूहालम्बनात्मकग्रहनिष्ठाश्रयतानिरूपकनिरूपकतायां तन्निष्ठकारणतानिरूपकनिरूपकता-
यांच द्वयोरेकमिति रीत्या ताद्दशयत्किंचित्कार्य्यताव्यक्त्यवगाहिप्रतीतिसिद्धाभाव एव प्रतिबध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तायां निवेशनीयः । तत्प्रकारश्च तादृशकार्य्यतात्वसमानाधिकरणोभयावृत्तिधर्म्मनिष्ठनिरवच्छिन्नाव-
च्छेदकतानिरूपकाधेयतासंबन्धावच्छिन्नावच्छेदकतानिरूपकनिरूपकतानिष्ठावच्छेदकतानिरूपकानिरू-

१ अत्रैतन्निवेशे नानाधर्मावच्छिन्नधर्मिकव्याप्तिज्ञानानामेकरूपेण कारणतापक्षमवलम्ब्य व्यभिचारेऽव्याप्तिमुद्भा-
व्य यः पूर्वकल्पः परित्यक्तः स असंगतः धूमवान्वह्नेरित्यादौ वह्न्यभाववद्ध्रदावर्तिव्याप्तेस्समूहालम्बनानुमितिनिष्ठ-
कार्यतानिष्ठतद्व्यक्तित्वस्यापि धर्तुं शक्यत्वात् । नच विधेयताद्वयानिरूपकानुमितिनिष्ठकार्यतात्वसमानाधिकरणोभ-
यावृत्तित्वेन तस्य निवेशान्नातिव्याप्तिरिति वाच्यम् । पर्वतो वह्निमान्धूमादित्यत्र घटाभाववद्वृत्तिद्रव्येऽतिव्याप्तेरतत्र
वह्निव्याप्यधूमवान् घटव्याप्यद्रव्यवांश्चेत्याकारकसमूहालम्बनपरामर्शात् घटस्य बाधनिश्चयकाले वह्न्यनुमितेस्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पिततत्वनिष्ठावच्छेदकतानिरूपकाश्रयत्वनिष्ठावच्छेदकतानिरूपकज्ञाननिष्ठावच्छेदकतानिरूपकाधेयत्वनि-
ष्ठावच्छेदकतानिरूपकभेदनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूपकीभूता याऽवच्छे-
दकतात्वावच्छिन्ना प्रतियोगिता तन्निरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितेत्यादिनिरूपकत्वनिष्ठा-
वच्छेदकतानिरूपिता याऽधेयत्वसंबन्धावच्छिन्नाऽवच्छेदकता तन्निरूपकनिरूपकत्वनिष्ठाऽवच्छेदकतानि-
रूपकनिरूपितत्वनिष्ठाऽवच्छेदकतानिरूपककारणत्वनिष्ठावच्छेदकतानिरूपकज्ञाननिष्ठावच्छेदकतानि-

---

दृशविधेयताद्वयानिरूपकत्वेन तादृशानुमितिनिष्ठकार्यतामादाय घटाभाववद्वृत्तिद्रव्येऽतिव्याप्तेः समूहालम्बनानुमिति-
घटितलक्षणे विधेयताद्वयाऽनिरूपकत्वस्यानिवेशनीयत्वाच्चेति ध्येयम् ।

CC-0. In Public Domain. Digitization by eGangotri

रूपकवृत्तित्वनिष्ठाऽवच्छेदकतानिरूपकभेदनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूप-
कावच्छेदकतात्वावच्छिन्नप्रतियोगिताकाभाववत्प्रातिबध्यतेति । उभयावृत्तित्वं न स्वप्रतियोगिवृत्तित्व-
स्वसामानाधिकरण्योभयसंबन्धेन भेदविशिष्टान्यत्वं तादृशसंबन्धास्वीकारात्। परं त्वेकत्ववदन्यावृत्ति-
त्वं तच्चाप्रसिद्धमेकत्ववदन्याप्रसिद्धेः अत एकत्वादिव्यक्तेः स्वरूपतोभानमतमवलम्ब्य तद्व्यक्तिनिष्ठ-
निरवच्छिन्नावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूपक-
भेदनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकनिरूपितत्वनिष्ठावच्छेदकतानिरूपकवृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तित्वत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वं तथाच न पूर्वोक्तदोष इति वाच्यम् । तथापि धूमव्याप्यवान्

१ ननु धूमव्याप्तिनिष्ठप्रकारतानिरूपिताविशेष्यत्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयत्वेनैकरूपेण कारणत्वेपि तत्तज्ज्ञानधर्मिकाऽप्रामाण्यज्ञानानामननुगमान्नैकरूपावच्छिन्नत्वप्रयुक्तकारणताया ऐक्यमिति। नच धूमव्याप्याभाववति व्याप्यप्रकारताकमित्याद्यप्रामाण्यज्ञानाभावकूटविशिष्टनिश्चयत्वेन कारणत्वमिति वाच्यम् । तथा सति प्रथमतो भाविज्ञानं धूमव्याप्यालोकाभाववत्यालोकप्रकारताकमित्येतदप्रामाण्यज्ञानसत्त्वे धूमव्याप्यवह्निमानित्याकारकपरामर्शानन्तरं धूमवानित्यनुमितिर्न स्यात्तत्र तादृशाप्रामाण्यज्ञानाभावकूटान्तर्गतानिरुक्ताप्रामाण्यज्ञानाभावस्यासत्त्वात्तस्याप्यालोकावगाहिपरामर्शनिष्ठैकरूपावच्छिन्नजनकतायामुत्तेजकत्वादिति चेदत्रास्मद्गुरुचरणाः निश्चय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टनिश्चयीयनिरुक्तरूपावच्छिन्नविषयतावत्त्वेन कारणत्वस्य निर्दुष्टत्वात् निश्चये निश्चयवैशिष्ट्यंच स्वतादात्म्यस्वाभाववत्त्वोभयसम्बन्धेन अभावप्रतियोगितावच्छेदकसम्बन्धश्च स्वीयप्रकारतावच्छेदकरूपसम्बन्धनिष्ठाधेयत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपकावच्छेदकत्वनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकविशेष्यत्वनिष्ठावच्छेदकतानिरूपकप्रकारत्वनिष्ठावच्छेदकतानिरूपकप्रकारित्वनिष्ठप्रकारता तन्निरूपितविशेष्यत्वरूपः तथाच यज्ज्ञानधर्मिकाऽप्रामाण्यज्ञानं भवितव्यं तज्ज्ञानीयप्रकारतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावाधिकरणनिष्ठविशेष्यतानिरूपितप्रकारतानिरूपितप्रकारित्वनिष्ठप्रकारताया एव सम्बन्धघटकत्वात्सर्वं समञ्जसम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धूमव्याप्यवह्निमांस्तादृशालोकवानित्यादिज्ञानानामेकरूपेण कारणत्वे धूमाभाववद्वृत्तिर्वह्निरिति व्यभिचारनिश्चयप्रतिबध्यताया धूमव्याप्यवह्निमांस्तादृशघटवांस्तादृशपटवानित्यादिसमूहालम्बनज्ञानेषु तादृशकार्य्यतावत्सु असत्त्वेन व्यभिचारेऽव्याप्त्यापत्तेरिति दिक् ॥ श्रीः ॥

बाधसत्प्रतिपक्षस्वरूपासिद्ध्याश्रयासिद्धिष्वव्याप्तिवारणाय
प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षनिवेश इति ॥

नन्वत्र प्रकृतपक्षविषयकत्वानिवेशेऽसाधारणस्याप्यसंग्रहात् कथं तदनभिधानमिति चेन्न । पक्षविषयक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वानिवेशेपि तत्राव्याप्तिविरहात् । तथाहि प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यविषयकत्वे सति प्रकृतसाध्यनिरूपितव्याप्तिविशिष्टप्रकृतहेतुविषयकानुमितित्वव्यापकत्वं प्रतिबध्यतायां लक्षणे निविष्टं तच्च यदि स्वरूपसंबन्धेन तदाऽसाधारण्यासंग्रहः । पर्वतो वह्निमान्घटो वह्निमान्पटो वह्निमानित्यनुमितिषु पक्षे हेतुमत्ताज्ञानाकालीनासाधारण्यविषयकनिश्चयप्रतिबध्यत्वाभावात् । किंतु स्वनिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वसंबन्धेन व्यापकत्वं विवक्षणीयम् । तथाचासाधारण्यविषयकनिश्चयप्रतिबध्यतायाः स्वनिरूपितप्रतिबन्धकतावच्छेदकपक्षधर्म्मिकहेतुमत्ताज्ञानकालीनज्ञानीयासाधारण्यविषयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतायाः पर्वतघटादिधर्म्मिकवह्न्यनुमिति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षु सर्वत्र विद्यमानत्वात् वह्न्यभाववद्ध्रदादिरूपबाधादिनिश्चयप्रतिबध्यतायाः घटो वह्निमानित्या-
द्यनुमितिषूक्तसंबन्धेनासत्त्वाद्बाधाद्यसंग्रहः । नच पर्वतो वह्निमान्धूमादित्यत्र वह्निव्यापकीभूताभावप्रति-
योगित्वेऽतिव्याप्तिः । वह्निव्यापकीभूताभावनिरूपितत्वाभाववत्प्रतियोगित्वमित्याकारकबुद्धित्वावच्छिन्ना
या प्रतिबध्यता तस्याः स्वनिरूपितप्रतिबन्धकतावच्छेदकीभूता वह्निव्यापकीभूताभावप्रतियोगी धूम
इति ज्ञानीया वह्निव्यापकीभूताभावप्रतियोगित्वविषयता तदवच्छिन्ना या घटो धूमवान्पटो धूमवानित्या-
दिज्ञानकालीनवह्निव्यापकीभूताभावप्रतियोगी धूम इति निश्चयनिष्ठा प्रतिबन्धकता तन्निरूपितप्रतिबध्य-
तायाः घटो वह्निमान्पटो वह्निमानिति नानाविधामितिषु सत्त्वेन निरुक्तप्रतिबध्यतायाः उक्तप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिबध्यतावत्त्वरूपपरम्परासम्बन्धेनोक्तसमूहालम्बनानुमितित्वव्यापकत्वात् इति वाच्यम् । स्वनिरूपितप्रतिबन्धकतावच्छेदकविषयतानिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभाववदवच्छेदकतानिरूपकप्रतिबन्धकतानिरूपकप्रतिबध्यतायाः सम्बन्धत्वस्वीकारात् । एवं सति वह्निव्यापकीभूताभावनिरूपितत्वाभाववत्प्रतियोगित्वमिति बुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतायामवच्छेदकीभूता या वह्निव्यापकीभूताभावनिरूपितप्रतियोगित्वमिति निश्चयीया तादृशप्रतियोगित्वविषयता तत्र वह्निव्यापकीभूताभावप्रतियोगी धूम इति निश्चयीयधूमत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतावच्छेदकतादृशप्रतियोगिताविषयतायां वर्तमाना या वह्निमत्ताबुद्धिप्रतिबन्धकतावच्छेदकता तद्भे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दस्य सत्त्वात् तादृशविषयतात्वव्यापकावच्छेदकताकप्रतिबन्धकतानिरूपकप्रतिबध्यतायाः पर्वतो वह्निमानित्याद्यनुमितावसत्त्वेनातिव्याप्तिविरहात् । असाधारण्यनिश्चयप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयितासामान्यस्य घटपटादिपक्षकानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकतया तत्संग्रहः। नच ह्रदो वह्निमान् जलादित्यादौ जलाभाववान्वह्निमान् ह्रदो वह्निव्याप्यजलवानित्यनुमितेरपि लक्षणघटकतया तत्रचासाधारण्यनिश्चयप्रतिबध्यत्वं नास्ति तत्र पक्षतावच्छेदकावच्छिन्ने हेतुमत्ताज्ञानस्याहार्यतया तत्कालीनासाधारण्यनिश्चयस्याप्रतिबन्धकत्वात्कथमसाधारण्यसंग्रह इति वाच्यम् । किंचिद्धर्मविशिष्टानुमितित्वव्यापकत्वस्य प्रतिबध्यतायां विवक्षणीयत्वात् वैशिष्टयंच स्वावच्छिन्नविशेष्यतानि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपितसाध्यप्रकारतावत्त्वस्वावच्छिन्नविशेष्यतानिरूपितसाध्यव्याप्यहेतुप्रकारतावत्त्वोभयसम्बन्धेन तथा-
च जलाभाववान् वह्निमान् ह्रदो वह्निव्याप्यजलवानित्यनुमितिश्च न तादृशी पटो वह्निमान् घटो वह्नि-
मानित्यनुमितिश्च तादृशी तत्रचासाधारण्यनिश्चयप्रतिबध्यतायाः सत्त्वात्तत्संग्रहः। एतादृशपरम्पराया-
स्सम्बन्धत्वानङ्गीकारेतु तादृशप्रतिबध्यतायाः प्रकारमुद्रया निवेशोऽपि सुलभः तथाहि यत्किंचित्प्रतिब-
ध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयतासामान्यावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावान्नेति
प्रतीतिसिद्धो यः प्रकृतानुमितिनिष्ठो भेदस्तन्निरूपिताधिकरणनिष्ठप्रतियोगितानिरूपितप्रतिबध्यत्वानि-
ष्ठावच्छेदकतानिरूपितनिरूपितत्वनिष्ठावच्छेदकतानिरूपितप्रतिबन्धकत्वनिष्ठावच्छेदकतानिरूपितनिरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पकत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपिताव-
च्छेदकत्वनिष्ठप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताऽवच्छेदकत्वनिष्ठावच्छेदकतानिरूपितप्रतियोगित्व-
निष्ठावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितभेदनिष्ठावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितवृत्तित्वनिष्ठाव-
च्छेदकत्वनिष्ठावच्छेदकतानिरूपितविषयतानिष्ठावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठा-
वच्छेदकतानिष्ठावच्छेदकतानिरूपितप्रतिबन्धकत्वानिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपितनिरूपित-
त्वानिष्ठाऽच्छेदकत्वनिष्ठावच्छेदकतानिरूपितप्रतिबध्यतानिष्ठप्रतियोगितासम्बन्धावच्छिन्नाऽवच्छेदकता-
निष्ठावच्छेदकतानिरूपिताधेयतासम्बन्धावच्छिन्नावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभाववत्प्रतिबध्यता-

CC-0. In Public Domain. Digitization by eGangotri

या लक्षणे निवेश इति। अत्रोभयत्राभावोऽधिकन्यूनवारकपर्याप्तिघटितो बोध्यः किंच पक्षविषयकत्वानिवेशे-ऽसाधारण्येऽव्याप्तिशङ्कैव नावतरति यद्रूपावच्छिन्नविषयताशालिनिश्चयसामान्ये प्रकृतानुमित्यप्रतिबन्धक-त्वासाधारण्याविषयकत्वोभयाभाव इति लक्षणस्य सव्यभिचारे विवक्षणीयत्वात् इति दिक्॥ श्रीः॥

साध्याप्रसिद्ध्यव्याप्तिवारणप्रयोजनकत्वं तदुपादानस्येतितु न सत् व-ह्निर्न्न काञ्चनमय इति निर्णयस्य शुद्धवह्नित्वादिना वह्न्याद्यनुमित्यविरो-धित्वेपि द्वितीयदले प्रकृतसाध्यतावच्छेदकावच्छिन्नान्तर्भावसत्त्वादिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वत्र प्रत्येकदलखण्डनस्य ग्रन्थकारतात्पर्य्यविषयत्वे पक्षतावच्छेदकव्यावृत्तिकाले बाधस्वरूपासिद्ध्यो-
रव्याप्तिदानमसङ्गतं दलद्वयनिवेशखण्डनपरत्वे साध्याप्रसिद्ध्यव्याप्तिवारणंतु न सदिति खण्डनमयुक्तमि-
ति चेन्न। पक्षतावच्छेदकस्य सकृत् निवेशाभिप्रायेणाव्याप्त्यभिधानात्। तन्निवेशस्तु पक्षतावच्छेदकावि-
शिष्टानुमितित्वव्यापकप्रतिबध्यतेत्यादिरीत्या वैशिष्ट्यंच स्वावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेद-
कावच्छिन्नप्रकारताकत्वस्वावच्छिन्नविशेष्यतानिरूपितसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकावच्छि-
न्नप्रकारताकत्वोभयसंबन्धेन। नचैवंरीत्या साध्यतावच्छेदकस्यापि सकृन्निवेशसंभवेन तन्निवेशस्य सा-
ध्याप्रसिद्ध्यव्याप्तिवारकत्वं युक्तमेव तादृशरीतिस्तु स्वविशिष्टानुमितित्वव्यापकप्रतिबध्यतेत्यादिरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पा वैशिष्ट्यंच स्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वहेतुव्यापकत्वविषयता-
निरूपितस्वावच्छिन्नविषयतानिरूपिताधिकरणत्वविषयतानिरूपितधर्म्मिविषयतानिरूपितवृत्तित्वविषयता-
निरूपितहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितपक्षाविशेष्यताकत्वस्वावच्छिन्नविषयतानिरूपिताभाव-
विषयतानिरूपितव्यापकत्वविषयतानिरूपिताभावविषयतानिरूपितप्रतियोगित्वविषयतानिरूपितहेतुविष-
यतानिरूपितपक्षविषयताकत्वस्वाविशिष्टहेतुतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितपक्ष-
विशेष्यताकत्वैतच्चतुष्टयसम्बन्धेन स्ववैशिष्ट्यंच स्वावच्छिन्नप्रकारतानिरूपिताधिकरणत्वविषयतानि-
रूपितधर्म्मिविषयतानिरूपितवृत्तित्वविषयतानिरूपितत्वस्वावच्छिन्नप्रकारतानिरूपिताधिकरणत्वविषय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानिरूपितधर्म्मविषयतानिरूपितभेदविषयतानिरूपिताधिकरणविषयतानिरूपितवृत्तित्वविषयतानिरूपिताभावविषयतानिरूपितत्वोभयसंबन्धेनेति वाच्यम्। परम्परायास्संबन्धत्वानङ्गीकारात्। नच तथासति पक्षतावच्छेदकस्यापि सक्तान्निवेशो न संभवतीति वाच्यम्। अस्मन्मते पक्षतावच्छेदकस्य प्रकारविधया सक्तान्निवेशसंभवात्। तथाहि पक्षतावच्छेदकनिष्ठावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकताभिन्ना सती विशेष्यतात्वनिष्ठाऽवच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकविशेष्यतानिष्ठाऽवच्छेदकताभिन्ना सती साध्यतावच्छेदकावच्छिन्नप्रकारतात्वनिष्ठाऽवच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकतादृशप्रकारतानिष्ठावच्छेदकताभिन्ना सती साध्यव्याप्यहेतुनिष्ठप्रकारतानिष्ठाऽवच्छेदकताभिन्ना सती अनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मितित्वनिष्ठाऽवच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकानुमितिनिष्ठावच्छेदकताभिन्ना सती आ-
धेयतात्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकाऽऽधेयत्वनिष्ठाऽवच्छेदकताभिन्ना सती भे-
दत्वनिष्ठाऽवच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकभेदनिष्ठाऽवच्छेदकताभिन्ना सती प्रतियोगि-
तात्वनिष्ठाऽवच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकप्रतियोगित्वनिष्ठाऽवच्छेदकताभिन्ना सती
अवच्छेदकतात्वनिष्ठाऽवच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकप्रतियोगितानिरूपितप्रतियोगि-
त्वनिष्ठावच्छेदकतानिरूपितभेदनिष्ठाऽवच्छेदकतानिरूपितवृत्तित्वनिष्ठाऽवच्छेदकतानिरूपितानुमितिनि-
ष्ठाऽवच्छेदकतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतानिष्ठाऽवच्छेदकतानिरूपितविशेष्यत्वनिष्ठाऽव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकतानिरूपिता याऽवच्छिन्नत्वसम्बन्धावच्छिन्नाऽवच्छेदकता ताद्भिन्ना सती विशेष्यतात्वनिष्ठाऽव-
च्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकविशेष्यतात्वावच्छिन्नावच्छेदकताभिन्ना सती साध्यव्याप्य-
हेतुप्रकारतात्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकविशेष्यतानिष्ठावच्छेदकतानिरूपक-
तादृशहेतुप्रकारतानिष्ठाऽवच्छेदकतानिरूपकानुमितिनिष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठाऽवच्छेदकता-
निरूपकभेदनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठाऽवच्छेदकतानिरूपकावच्छेदकतात्वावच्छिन्नप्रति-
योगिताकाभाववत्प्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वमिति तन्मते साध्यता-
वच्छेदकं सकृन्निवेश्यैवं रीत्या प्रकारविधया निवेशासम्भवाद्भट्टाचार्योक्तं दूषणं दुरपह्नवमिति ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशव्याप्तिद्वयप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नप्र-
कारतायास्तत्साध्यकतद्धेतुकानुमितिजनकतावच्छेदकप्रका-
रतात्वेनानुगमय्य निवेशो न संभवतीति (गादाधरी) ॥

नन्वत्रैवमनुगमाऽसंभवेपि तत्तद्व्याप्त्यवगाहितां स्वातन्त्र्येणाऽनिवेश्य प्रकारान्तरेणानुगमः संभवति त-
थाहि प्रकृतहेतुमत्तानिश्चयोत्तरप्रकृतपक्षसाध्यकानुमितित्वावच्छिन्नकार्य्यताविशिष्टा या प्रतिबध्यता तन्नि-
रूपितप्रतिबन्धकतेत्यादि लक्षणम् तादृशकार्य्यतावैशिष्ट्यंच साध्यतावच्छेदकावच्छिन्नप्रकारतानिरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितपक्षतावच्छेदकावच्छिन्नविशेष्यताविशिष्टस्वनिरूपितकारणतावच्छेदकप्रकारतानिरूपितपक्षतावच्छे-
दकावच्छिन्नविशेष्यताशाल्यनुमितित्वव्यापकत्वसंबन्धेन तथाच अन्वयव्याप्तिविशिष्टहेतुविषयकपराम-
र्शनिरूपिततादृशानुमितित्वघटितधर्म्मावच्छिन्नकार्य्यताविशिष्टा प्रतिबध्यता तादृशव्याप्त्यवगाहिसमू-
हालम्बनानुमितिनिष्ठप्रतिबध्यतैव एवं व्यतिरेकव्याप्तिविशिष्टहेतुविषयकपरामर्शनिरूपिततादृशानुमिति-
त्वघटितधर्म्मावच्छिन्नकार्य्यताविशिष्टप्रतिबध्यताच तादृशव्याप्त्यवगाहिसमूहालम्बनानुमितिनिष्ठैवेति न
कुत्राप्यव्याप्तिः । नच साध्याभाववदवृत्तित्वरूपव्याप्त्यवगाहिपरामर्शस्य व्याप्त्यंशे निर्द्धर्म्मितावच्छे-
दककज्ञानसाधारण्याय हेतुतावच्छेदकमानिवेश्यैकरूपेण कारणत्वमते तादृशसकलहेतुतावच्छेदकावगा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्निपरामर्शनिरूपितकार्य्यताया ऐक्यात्तादृशकार्य्यताया धूमव्याप्यवह्न्यालोकाद्यवगाहिसमूहालम्बनानु-
मितिषु सत्त्वात् तत्र सर्वत्र धूमाभाववद्वृत्तिवह्न्यादिविषयकनिश्चयप्रतिबध्यताया अभावेन तादृशव्यभि-
चारे सर्वत्राव्याप्तिरिति वाच्यम् । स्वनिरूपितकारणतानिरूपितपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्य-
तानिष्ठाऽवच्छेदकतानिरूपितनिरूपितत्वसंबन्धावच्छिन्नप्रकारतानिष्ठाऽवच्छेदकतानिरूपितावच्छिन्नत्व-
संबन्धावच्छिन्नविशेष्यत्वनिष्ठाऽवच्छेदकतानिरूपितानिरूपितत्वसंबन्धावच्छिन्नाऽवच्छेदकताश्रयप्रकार-
तावच्छेदकतापर्य्याप्त्यधिकरणधर्म्मावच्छिन्नप्रकारतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यत्वाव-

---

१ अत्र विशेष्यतायां हेतुतावच्छेदकावच्छिन्नत्वमनिवेश्य प्रकारतायां तन्निवेशे पर्वतो वह्निमान् काञ्चनमयधूमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दित्यादौ हेत्वसिद्धावव्याप्तिस्तत्र पर्वतो वह्निमान् वह्निव्याप्यधूमवानित्यनुमितावपि काञ्चनमयत्वावगाहिपरामर्शनि-
रूपितकार्यताया निरुक्तसम्बन्धेन सत्त्वात् विशेष्यतायां तन्निवेशे पर्याप्तिनिवेशान्नाव्याप्तिः । तत्प्रकारश्च प्रकृतहेतुता-
वच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकधर्मवृत्तिविशेष्यतात्वावच्छिन्नेत्यादि तादृशधर्मवृत्तित्वंच स्वानिरूपिताव-
च्छेदकतात्वावच्छिन्नप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तथाच काञ्चनमयत्वानवगाहिसमूहालम्बनानु-
मितिनिरूपितपक्षविशेषणतापन्नहेतुविशेष्यताच तादृशकाञ्चनमयत्वधूमत्वगतद्वित्वरूपधर्मवृत्तिः प्रकारतावच्छेदकताप-
र्याप्तिस्तु न निवेशयितुं शक्यते पक्षविशेष्यतानिरूपितहेतुप्रकारतायां हेतुतावच्छेदकव्याप्त्योरेवावच्छेदकत्वात् । न्यून-
वारकपर्याप्तिनिवेशे पर्वतो महानसीयवह्निमान् धूमादित्यत्र व्यभिचारिण्यव्याप्तिः तत्र परामर्शनिरूपितकार्य्यतायाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्ना या विशेष्यता तच्छाल्यनुमितित्वव्यापकत्वस्य सं-
बन्धत्वात् तथाच धूमवान्वह्नेरित्यादौ पर्वतो धूमवान् धूमव्याप्यवह्निमानित्यनुमितावेव तादृशकार्य्यं-
ताविशिष्टानुमितित्वसत्त्वात् तत्रच तादृशव्यभिचारनिश्चयप्रतिबध्यत्वस्य सत्त्वान्नोक्ताव्याप्त्यवकाशः। न-
चैवमपि साधारणग्रन्थे साध्याभाववदवृत्तित्वसाध्यसामानाधिकरण्योभयाभाववद्धेतोरपि व्यभिचारत्वाभि-

---

पर्वतो महानसीयवह्निमान् तादृशवह्निव्याप्यमहानसीयधूमवानित्यनुमितावपि सत्त्वात् तत्र महानसीयवह्न्यभाववद्वृ-
त्तिधूम इति व्यभिचारनिश्चयप्रतिबन्धकत्वाभावात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धानात्तत्राव्याप्तिः तत्रहि साध्याभाववदवृत्तित्वसाध्यसामानाधिकरण्यवद्धेतुमान्पक्ष इत्याकारकताद्दशव्यभि-
चारनिश्चयप्रतिबध्यपरामर्शनिरूपितकार्यतानिरूपितकारणतानिरूपितमुख्यविशेष्यतानिष्ठावच्छेदकानि-
रूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतायाः साध्याभाववदवृ-
त्तित्वत्वावच्छिन्नप्रकारतायां सत्त्वात्तदवच्छेदकतापर्य्याप्त्यधिकरणताद्दशावृत्तित्वत्वावच्छिन्नप्रकारतानि-
रूपितप्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावाच्छिन्नविशेष्य-
ताशाल्यनुमितित्वस्य पर्वतो धूमवान्धूमाभाववदवृत्तिवह्निमानित्यनुमितावपि सत्त्वेन तत्र धूमा-
भाववदवृत्तित्वधूमसामानाधिकरण्योभयाभाववान् वह्निरिति व्यभिचारनिश्चयप्रतिबध्यत्वस्यासत्त्वादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति वाच्यम् । स्वनिरूपितकारणतानिरूपितमुख्यविशेष्यतानिष्ठाऽवच्छेदकतानिरूपितावच्छेदकता-
निरूपितावच्छेदकतानिरूपिता या प्रकारतानिष्ठानिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकता तन्निरू-
पितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकीभूतो यो धर्म्मस्तद्वृत्तिहेतुतावच्छे-
दकावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितपक्षविशेष्यताशाल्यनुमितित्वव्यापकत्वस्य सम्बन्धत्व-
स्वीकारात् । धर्म्मवृत्तित्वंच स्वनिष्ठनिरूप्यतानिरूपितप्रकारतात्वघटितधर्म्मावच्छिन्ननिरूपकताव-
च्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तथाच पर्वतो धूमवान्धूम-
भाववदवृत्तिवह्निमानित्यनुमितावेशादृशसम्बन्धेन तादृशकार्य्यता नास्त्येव धूमाभाववदवृत्तित्वधूमसामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाधिकरण्यवद्वह्निमान्पर्वत इति परामर्शनिरूपितकार्य्यतानिरूपितकारणतानिरूपितमुख्यविशेष्यता-
निष्ठावच्छेदकतानिरूपितावच्छेदकतानिरूपितविशेष्यतानिष्ठाऽवच्छेदकतानिरूपितावच्छेदकतानिरूपि-
तावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगिताऽवच्छेदकत्वस्याऽभावत्वावच्छिन्नविशेष्यत्वा-
च्छिन्नत्वताद्दृशप्रकारतात्वाधेयतात्वावच्छिन्नविशेष्यतावच्छिन्नत्वताद्दृशप्रकारतात्वैतद्गतसमुदायत्वे स-
त्त्वेन तत्रच धूमाभाववद्वृत्तिवह्निमानित्यनुमितीयहेतुतावच्छेदकावच्छिन्नविशेष्यताया निरुक्तसम्बन्धे-
नाभावत्वावच्छिन्नविशेष्यत्वावच्छिन्नत्वताद्दृशप्रकारतात्वगतद्वित्ववृत्तेरसत्त्वेन पर्वतो धूमवान्धूमाभाव-
वद्वृत्तित्वधूमसामानाधिकरण्यवद्वह्निमानित्यनुमितीयविशेष्यताया एव ताद्दृश्यास्तत्र सत्त्वेनाव्याप्तिवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रहात् । तादृशपरम्परायाः संसर्गत्वानङ्गीकारे प्रकारमुद्रयैव निवेशस्तत्प्रकारश्च प्रकृतपक्षसाध्यहेतुका-
नुमितित्वावच्छिन्नकार्य्यतात्वसमानाधिकरणोभयावृत्तिधर्म्मनिष्ठनिरवच्छिन्नाऽवच्छेदकतानिरूपककार्य्य-
तानिष्ठाऽवच्छेदकतानिरूपककारणतानिष्ठावच्छेदकतानिरूपकमुख्यविशेष्यतानिष्ठाऽवच्छेदकतानिष्ठाव-
च्छेदकतानिरूपकप्रकारतानिष्ठाऽवच्छेदकतानिष्ठाऽवच्छेदकतानिरूपकाविशेष्यतानिष्ठाऽवच्छेदकतानि-
ष्ठाऽवच्छेदकतानिरूपकप्रकारतानिष्ठाऽवच्छेदकतानिष्ठावच्छेदकतानिरूपिका सती अवच्छेदकतात्व-
निष्ठाऽवच्छेदकतानिरूपिका या प्रतियोगिता तन्निरूपकपर्य्याप्त्यनुयोगितावच्छेदकतावद्धर्म्मनि-
ष्ठावच्छेदकतानिरूपकानुयोगितानिरूपकपर्य्याप्तिनिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तनिरूपकत्वनिष्ठाऽवच्छेदकतानिरूपितनिरूपितत्वनिष्ठाऽवच्छेदकतानिरूपितनिरूप्यत्वनिष्ठावच्छेदक-
तानिरूपिताऽधेयतासम्बन्धावच्छिन्नाऽवच्छेदकताश्रयप्रकृतहेतुतावच्छेदकाऽवच्छिन्नविशेष्यत्वाऽवच्छिन्न-
प्रकारतानिरूपिता या प्रकृतपक्षताऽवच्छेदकाऽवच्छिन्ना विशेष्यता प्रकृतसाध्यतावच्छेदकावच्छिन्नप्र-
कारतानिरूपितप्रकृतपक्षतावच्छेदकाऽवच्छिन्नविशेष्यताविशिष्टतद्वदनुमितिनिष्ठभेदप्रतियोगितावच्छेद-
कत्वं नास्तीति सिद्धाभावः प्रतिबध्यतायां विशेषणमितीति चेन्न। साध्याभाववदवृत्तित्वरूपव्याप्त्यवगा-
हिनानालिङ्गपरामर्शानां हेतुतावच्छेदकमनिवेश्यैकरूपेणाकारणत्वमतेऽप्रामाण्यज्ञानानामनुगतरूपेणोक्ते-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जकतया पक्षसाध्यादिविषयतानां कार्य्यतावच्छेदकत्वानावश्यकतयाऽसम्भवापत्तेरिति दिक् ॥ श्रीः ॥

यथाश्रुतार्थपरतानिर्वाहाय लिङ्गोपधानमतमेवाश्रयत इत्यादि ॥

नन्वत्र प्रथमकल्पपरित्यागे लक्षणारूपदोष एव बिजमिति तदभिप्रायो ज्ञायते सच न सम्भवति तादृश-कार्य्यतानिरूपकसम्बन्धिग्रहनिष्ठप्रतिबध्यतानिवेशेऽतिव्याप्तेर्ग्रहत्वव्यापकप्रतिबध्यतानिवेशेऽव्याप्तेस्तद-वच्छिन्नप्रतिबध्यतानिवेशेऽसम्भवस्य चाथेत्यादिना भट्टाचार्य्योक्तस्य जागरूकत्वादिति चेन्न । प्रकृतपक्ष-साध्यहेतुकानुमितिकार्य्यताप्रतियोगिकयत्किंचित्सम्बन्धवद्ग्रहत्वव्यापकप्रतिबध्यताया एव लक्षणे निवेश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीयतया व्यापकत्वपक्षे भट्टाचार्य्योक्तबाधव्यभिचाराद्यव्याप्त्यभावात्[1] तादृशकार्य्यत्वप्रतियोगिकाश्रयत्व-

---

१ जनकतावदन्यप्रकृतपक्षसाध्यकानुमितिनिष्ठायाः प्रकृतहेतुमत्तानिश्चयाव्यवहितोत्तरत्वावच्छिनायाः कार्य्यतायास्तद्व्यक्तित्वेन प्रवेशात् तद्दोषाप्रसङ्गः । जनकतावत्त्वंच स्वनिरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकताककार्यतावत्त्वस्वाभाववद्वृत्तिकारणतानिरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकताककार्यतावत्त्वोभयसम्बन्धेन लिङ्गोपधानमते वह्निव्याप्यघटत्ववान् ह्रदो वह्निमान् इत्याद्यनुमितिंप्रति घटो वह्न्यभाववान् इत्यादिज्ञानस्य प्रतिबन्धकत्वं सामानाधिकरण्येन तदवत्ताज्ञानंप्रति अवच्छेदकावच्छेदेन तदभाववत्ताज्ञानस्य प्रतिबन्धकत्वादतो ह्रदो वह्निमान् घटत्वादित्यादौ वह्न्यभाववद्घटेतिव्याप्तिः । हेतुसमानाधिकरणसाध्याभावस्यापि व्यभिचारत्वेन लक्ष्यत्वेतु व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपसंबन्धवद्ग्रहत्वव्यापकत्वस्यानुमितिविरोधिदोषप्रतिबध्यतायां तादृशकार्य्यत्वप्रतियोगिकनिरूपकत्व-रूपसंबन्धवद्ग्रहत्वव्यापकत्वस्य परामर्शविरोधिदोषप्रतिबध्यतायांच सर्वत्र सत्त्वात्। नचैवं सति भट्टाचार्य्यमते प्रकारान्तरानुसरणे किं बीजमिति वाच्यम् । साध्याभाववदवृत्तिहेतुमत्ताज्ञानस्य हेतुतावच्छेदकविषयतामनिवेश्यैकरूपेण कारणतामवलम्ब्य भट्टाचार्य्येणैतल्लक्षणकरणात् । तथा सति तादृशका-

---

ह्न्यभावव्याप्यघटेऽतिव्याप्तिर्दुर्वारा तदभावव्याप्यवत्ताज्ञानस्य बाधज्ञानसमानयोगक्षेमसाधारणत्वात् अत्रवदन्ति-कल्पीयविशिष्टान्तराघटितत्वाभावादेव नातिव्याप्तिः तदभावश्च शुद्धपक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणत्वाप्रयोजकत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्य्यंताप्रतियोगिकनिरूपकत्वरूपसंबन्धस्य वह्नीन्धनादिहेतुविषयकपरामर्शेषु सत्त्वेन तत्रच सर्वत्र वह्नि-
धूमव्यभिचारीति व्यभिचारानिर्णयप्रतिबध्यत्वाभावेन तादृशव्यभिचारेऽव्याप्त्यापत्तेः। केचित्तुकारणतु
व्याप्तिज्ञानानां पृथक्कारणतामतस्यैवावलम्बनात्तत्रच तादृशकार्य्यत्वप्रतियोगिकोक्तान्यतरात्मकयत्किं-
चित्संबन्धविशिष्टग्रहत्वस्य तादृशनानाविधपरामर्शेष्वसत्त्वेन तथानिवेशेऽव्याप्तिविरहात्। नचैवं सति
प्रकृतपक्षादिविषयकानुमितित्वावच्छिन्नकार्य्यतानिवेशे ऽप्रामाण्यज्ञानानामेकरूपेणोत्तेजकत्वमतेऽसंभव-
स्तादृशानुमितित्वव्यापकपरामर्शनिरूपितकार्य्यतात्वप्रासिद्धेव अनुमितिनिष्ठकार्य्यतानिवेशे पर्वतो व-
ह्निमान्हृदश्च तथेत्याकारकानुमितिनिष्ठहृदविषयकपरामर्शकार्य्यतामादाय पर्वतो वह्निमानित्यादौ वह्न्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाववद्धदादावतिव्याप्तिरिति वाच्यम् । कार्य्यतायामनुमितिनिष्ठत्वस्यैव निवेशात् । उक्तातिव्याप्तिस्तु अनुमितौ विधेयताद्वयानिरूपकत्वविशेषणेन वारणीया । नच वह्निव्याप्यधूमवान् घटव्याप्यपटवांश्च पर्वत इति परामर्शानन्तरं घटानुमितिप्रतिबन्धकसत्त्वे पर्वतो वह्निमानित्यनुमितेरेवोदयात् विधेयताद्वया-निरूपकतन्निष्ठघटव्याप्यविषयकपरामर्शोत्तरत्वाऽवच्छिन्नकार्य्यताप्रतियोगिकानिरूपकत्वरूपसंबन्धाविशि-ष्टघटव्याप्यविषयकपरामर्शनिष्ठप्रतिबध्यतामादाय पर्वतो वह्निमान्धूमादित्यादौ घटाभाववद्वृत्तिपटेऽति-व्याप्तिरिति वाच्यम् । अव्यवहितोत्तरत्वावच्छिन्नकार्य्यतानिरूपितज्ञाननिष्ठकारणताविशिष्टान्यत्वेनानु-मितेर्विशेषणीयत्वात् । कारणतावैशिष्ट्यंच स्वनिरूपितकार्य्यतावत्त्वस्वाभाववज्ज्ञाननिष्ठकारणतानिरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिताव्यवहितोत्तरत्वावच्छिन्नकार्य्यतावत्त्वोभयसंबन्धेन तथाच तादृशानुमितौ परामर्शद्वयनिष्ठकारण-
तानिरूपितकार्य्यतासत्त्वात्तद्व्याप्तिः । कारणतायामव्यवहितोत्तरत्वावच्छिन्नकार्य्यतानिरूपितत्वविशे-
षणादीश्वरज्ञाननिष्ठकारणतामादाय न तादृशानुमित्यप्रसिद्धिः ज्ञाननिष्ठत्वविशेषणात्सिद्धिविशिष्टानु-
मितिं प्रतीच्छायाः कारणत्वमते इच्छादिकारणत्वमादाय न तादृशानुमित्यप्रसिद्धिः वैशिष्ट्यघटक-
प्रथमसम्बन्धनिवेशेनोदासीनानुमितिनिरूपितोदासीनपरामर्शनिष्ठकारणातामादाय नाप्रसिद्धिः द्वितीयस-
म्बन्धनिवेशात्परामर्शकारणतामादाय नाप्रसिद्धिः तादृशद्वितीयसम्बन्धघटककारणतायां ज्ञाननिष्ठत्ववि-
शेषणात्प्रागुक्तरीत्येच्छादिकारणतामादाय नाप्रसिद्धिः कार्य्यतायामव्यवहितोत्तरत्वावच्छिन्नत्वानिवेशाद्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषणज्ञानकार्य्यतामादाय नाप्रसिद्धिः । नच तथापि पर्वतो वह्निमान्धूमादित्यादौ वह्न्यभाववद्वृत्तिद्र-
व्येतिव्याप्तिः प्रकृतहेत्वंशे व्याप्त्यनवगाहिप्रकृतहेतुविषयकवह्निव्याप्यद्रव्यवान्पर्वत इति परामर्शोत्त-
रानुमितौ प्रकृतपक्षसाध्यहेतुकायां तादृशकारणताविशिष्टान्यत्वस्य सत्त्वात्तन्निष्ठकार्य्यत्वप्रतियोगि-
कनिरूपकत्ववत्तादृशपरामर्शत्वव्यापकप्रतिबध्यत्वस्यापि ग्रहणसम्भवादिति वाच्यम् । कारणताव-
दन्यप्रकृतपक्षसाध्यकानुमितिनिष्ठप्रकृतहेतुमत्तानिश्चयाव्यवहितोत्तरत्वावच्छिन्नकार्य्यतात्वेन तादृशका-
र्य्यताया लक्षणे निवेशनीयत्वात् । इदमत्र चिन्तनीयम् । एवंरीत्या पूर्वोक्तदूषणोद्धारेण पूर्वोक्तरीत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानाविधव्याप्तिप्रकारताः प्रातिस्विकरूपेणानिवेश्यानुगमसम्भवेनोक्तपक्षसाध्यहेतुकानुमितित्वावच्छिन्न- कार्य्यत्वाप्रसिद्ध्याऽसम्भवाभिधानमनुचितमिति ॥ श्रीः ॥

अव्यवहितोत्तरत्वसंबन्धेन तद्धर्म्मावच्छिन्नधर्म्मिकव्यभि-
चारज्ञानविशिष्टं यत्तदन्यत्वं वा कार्य्यतावच्छेदकमिति ॥

नन्वत्र कथं लक्षणशरीरम् यदि प्रकृतपक्षसाध्यहेतुकानुमितित्वव्यापकत्वघटितमेव प्रकृतहेतुकत्वंच प्र- कृतहेतुतावच्छेदकावच्छिन्नधर्म्मिकव्यभिचारज्ञानविशिष्टान्यत्वं तथाच तादृशव्यभिचारज्ञानविशिष्टान्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

प्रकृतपक्षसाध्यकानुमितित्वव्यापकप्रतिबध्यतेत्यादिलक्षणम् तथाच व्यभिचारे नाव्याप्तिरिति तदा स्वरूपासिद्ध्यसंग्रहः एकरूपेण स्वरूपासिद्धिज्ञानेप्यपररूपेण पक्षधर्म्मताज्ञानादनुमित्युत्पत्त्या स्वरूपासिद्धिनिश्चयप्रतिबध्यतायास्तादृशानुमितित्वाव्यापकत्वात् यदि चैवमेव स्वरूपासिद्धिज्ञानविशिष्टान्यत्वमपि विवक्षितमित्युच्यते तदा साधनाप्रसिद्धिविरोधानुपसंहारित्वादिज्ञानविशिष्टान्यत्वस्य निवेशनीयतया महागौरवमिति चेन्न। प्रकृतपक्षविशेष्यकसाध्यव्याप्यहेतुप्रकारकानुमितित्वव्यापकप्रतिबध्यता-

१ ननु पक्षतावच्छेदकतापर्याप्तिनिवेशनमावश्यकमन्यथा आश्रयसिद्धावव्याप्तेस्तन्निवेशे काञ्चनमयत्वाभाववत्तद्व्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरूपितप्रतिबन्धकताश्रयनिर्णयविशिष्टान्यप्रकृतपक्षसाध्यकानुमितित्वव्यापकप्रतिवध्यताघटितलक्षणस्य विवक्षितत्वात् इति दिक् ॥ श्रीः ॥

अभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्यत्र स्वरूपसम्बन्धावच्छिन्नप्रमे-

---

क्तित्ववत्कालीनह्रदपक्षकवह्निसाध्यकतद्व्यक्तित्ववद्धूमकालीनकाञ्चनमयधूमादित्यादावाश्रयासिद्धिसाधनाप्रसिद्ध्योरव्याप्तिः निरुक्तानुमितेस्तदभावावच्छेदकगृहीतधर्मविषयकत्वेनाहार्यत्वादिति चेन्न आहार्यमात्रस्थले प्रतिबन्धकताघटितलक्षणाव्याप्तेरिष्टत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

यत्वाऽवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रमेयत्वस्य भ्रमो वाच्यः प्रतियोगित्वांशे साध्यतावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वयोः साध्याभाववदवृत्तित्वरूपव्याप्तिघटकतया तदंशे तदुभयावगाहिव्यभिचारज्ञानस्यैव व्याप्तिज्ञानविरोधित्वादिति ॥

ननु साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारतानिरूपिताधिकरणविषयतानिरूपितवृत्तित्वविषयतानिरूपिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भावविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताशालिनि-श्चयत्वेनैव कारणत्वमास्ताम् एवञ्च स्वरूपसम्बन्धावच्छिन्नप्रमेयतात्वावच्छिन्नप्रतियोगित्वाप्रसिद्धावपि न भ्रमानुपपत्तिरिति चेन्न। महानसीयवह्न्यभाववदवृत्तिधूमवान्पर्वत इति परामर्शस्य तादृशरूपाक्रा-न्ततया ततः पर्वतो वह्निमानित्यनुमित्यापत्तेः। नचं साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितासम्ब-

---

१ ननु निष्कृष्टपर्याप्तिनिवेशेपि वह्निमहानसीयाभाववदवृत्तिधूमवान् पर्वत इति निश्चयस्यापि महानसीयत्ववह्नित्व-गतद्वित्वावच्छिन्नानुगिताकपर्याप्तिकावच्छेदकताकप्रकारताकनिश्चयत्वरूपकारणतावच्छेदकाक्रान्तत्वान्महानसीयवह्नि-मानित्यनुमित्यापत्तिरिति चेदत्र श्रीरङ्गदेशिककृपालब्धज्ञानाः सदन्ति पर्वतो महानसीयवह्निमानित्यत्र वह्नित्वनिष्ठावच्छेद-

CC-0. In Public Domain. Digitization by eGangotri.

न्धावच्छिन्नसाध्यतावच्छेदकपर्य्याप्तावच्छेदकताकप्रकारताघटितनिश्चयत्वं कारणतावच्छेदकमिति वाच्यम् । महानसीयत्वमुपलक्षणविधयाऽवगाहमानात्तादृशपरामर्शात्पर्वतो वह्निमानित्यनुमित्यनापत्तेः तादृशपरामर्शस्याभावांशे महानसीयत्ववह्नित्वधर्म्मद्वयावच्छिन्नप्रकारताकतया तादृशप्रकारतावच्छेदकतायाः धर्म्मद्वय एव पर्य्याप्तत्वात्साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताघटितधर्म्मस्य कारणतावच्छेदकत्वेतु महानसीयवह्नि-

---

कताकविशेष्यतानिरूपितमहानसीयत्वनिष्ठप्रकारताकबुद्धित्वरूपद्वित्वस्यैव स्वाश्रयनिरूपितविलक्षणविषयतासम्बन्धेन साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकत्वादिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याप्यधूमवान्पर्वत इति परामर्शात्पर्वतो वह्निमानित्यनुमितिवारणाय साध्यतावच्छेदकसंसर्गतावच्छेदकतापर्य्याप्तिर्निवेश्या तथाच महानसीयत्वमुपलक्षणविधयाऽवगाहमानतादृशपरामर्शीयाभावविशेष्यतानिरूपितसाध्यनिष्ठप्रकारतावच्छेदकसम्बन्धीभूतप्रतियोगितानिरूपितावच्छेदकतापर्य्याप्तिः शुद्धवह्नित्व एव अभावप्रतियोगितावच्छेदककुक्षौ उपलक्षणविधया प्रविष्टस्यावच्छेदकत्वाभावात् इति तादृशपरामर्शादनुमित्युपपत्तिरिति दिक् ॥ श्रीः ॥

लाघवात्प्रतियोगितासंसर्गकज्ञानस्यैवानुमितिजनकतयेति ॥

नन्तु कथं प्रतियोगितासंसर्गकज्ञानस्य हेतुत्वे लाघवं तत्प्रकारकज्ञानस्य तथात्व एव लाघवात् त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

त्संसर्गकज्ञानस्य तथात्वे साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितासम्बन्धा-वच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यताघटितपरामर्शत्वेनैव हेतुत्व-स्यावश्यकतया साध्यतावच्छेदकस्य द्विधा निवेशेन गौरवात् प्रतियोगिताप्रकारकज्ञानस्य कारणत्वेतु साध्यतावच्छेदकस्य संसर्गकुक्षावनिवेशेन लाघवात् । नच साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यताव-च्छेदकावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रकारतात्वेनैव साध्यप्रकारतायाः कारणतावच्छेदककुक्षौ प्र-वेशः नतु तादृशप्रकारतायां साध्यतावच्छेदकावच्छिन्नत्वस्यापीति वाच्यम् । अन्यनिष्ठप्रतियोगिताया अन्यस्य सम्बन्धत्वस्वीकारे वह्नित्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धेनाभावांशे घटाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 गाहिनो घटाभाववदवृत्तिधूमवानिति परामर्शाद्वह्निमानित्यनुमित्यापत्तेरिति चेन्न । प्रतियोगिताप्र-
 कारकज्ञानस्य कारणत्वे प्रतियोगितासंसर्गस्य तत्कुक्षिप्रविष्टसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्य-
तावच्छेदकावच्छिन्नत्वयोश्च संसर्गविषयतानां कारणतावच्छेदकशरीरे नीवेशनीयतया गौरवादिति ॥श्रीः॥

स्वावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसंब-
न्धेन साध्यतावच्छेदकवत्त्वमेवाभावस्य साध्याभाववदवृत्तित्वरूप-
व्याप्तिघटकं लाघवादित्यादि तथाच तादृशसम्बन्धावच्छिन्नसाध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

तावच्छेदकनिष्ठप्रकारतानिरूपिताऽभाववत्वावच्छिन्नविशेष्यत्वाव-
च्छिन्नप्रकारताघटितनिश्चयत्वेन कारणत्वमिति पर्यवसितम् ॥

ननु महानसीयवह्न्यनुमितितद्व्याप्यपरामर्शयोः कथं कार्य्यकारणभावः यदि महानसीयत्ववह्नित्व-धर्म्मद्वयनिष्ठप्रकारतानिरूपिताभाववत्वावच्छिन्नविशेष्यताघटितधर्म्मपुरस्कारेण तदा क्वचिन्महानसीयवह्निमान्क्वचिद्वाह्निमहानसीयवानिति कथमनुमितिः। नच व्याप्तिघटकसामानाधिकरण्यांशे साध्यस्य येन रूपेण परामर्शे भानं तेनैव रूपेणानुमितावपि भानमित्यनुमितिवैलक्षण्यमुपपद्यत इति वाच्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महानसीयवह्न्यभाववदवृत्तिवह्निमहानसीयसमानाधिकरणधूमवानिति परामर्शादपि वह्निमहानसीयवा-नित्यनुमित्यापत्तेरिति चेन्न। यत्र परामर्शेऽभावविशेषणतापन्नवह्न्यंशे वह्नित्वं धर्मितावच्छेदकीकृत्य म-

१ ननु महानसीयवह्निमान् वह्निमहानसीयवानित्याद्यनुमितीनां कारणतावच्छेदकानुगमेपि वह्निमानित्याद्यनुमितीनां कारणतावच्छेदकाननुगमो दुर्वारएव किंच कारणातावच्छेदकानुगतत्वं नचैतावता सिद्धमिति चेन्न। यद्धर्मविशिष्टविधेयताशाल्यनुमितित्वावच्छिन्नंप्रति तद्धर्मविशिष्टप्रतियोगिताकत्वसम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारताकनिश्चयत्वेनानुगमात् विधेयतायां यद्धर्मवैशिष्ट्यञ्च स्वावच्छिन्नावच्छेदकतानिरूपितत्वस्वावच्छिन्नत्वैतदुभयस्वावच्छिन्नत्वैतदन्यतरसम्बन्धेन प्रतियोगितायां तद्धर्मवैशिष्ट्यञ्च निरुक्तोभयस्वावच्छिन्नत्वान्यतरसम्बन्धेनेति सुधियो विदांकुर्वन्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

हानसीयत्वं भासते तत्र विशिष्टवैशिष्ट्यबोधमर्य्यादया महानसीयत्वस्य वह्नित्वांशे भानात् महानसी-
यत्वावच्छिन्नस्वनिष्ठावच्छेदकतानिरूपकप्रतियोगितासम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रकारतानिरूपिताभाव-
त्वाऽवच्छिन्नविशेष्यताघटितनिश्चयत्वेन महानसीयवह्निमानित्यनुमितिंप्रति कारणत्वं यत्र परामर्शे म-
हानसीयत्वं धर्म्मितावच्छेदकीकृत्य वह्नित्वं भासते तस्य वह्निमहानसीयाभाववदवृत्तिवह्निमहानसीयस-
मानाधिकरणधूमवानिति परामर्शस्य वह्नित्वावच्छिन्नस्वनिष्ठावच्छेदकतानिरूपकप्रतियोगितासम्बन्धा-
वच्छिन्नमहानसीयत्वनिष्ठप्रकारतानिरूपिताभावत्वाऽवच्छिन्नविशेष्यताघटितनिश्चयत्वेन वह्निमहानसीय-
वानित्यनुमितिंप्रति कारणत्वमिति न काप्यनुपपत्तिरिति ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वव्यधिकरणप्रकारावच्छिन्ना या या विषयता तत्तदनिरू-
पकत्वस्य सर्वांशे प्रमात्वस्य विवक्षणीयतयेति ॥ ॥

अत्र स्वव्यधिकरणप्रकारावच्छिन्नत्वं स्वव्याधिकरणनिष्ठप्रकारतानिरूपकत्वं स्वव्यधिकरणत्वञ्च न स्वानाधिकरणवृत्तित्वं घटो द्रव्यमितिज्ञानस्य प्रमात्वानुपपत्तेः किंतु स्वाधिकरणावृत्तित्वं तथाच स्वाधिकरणावृत्तिनिष्ठप्रकारतानिरूपिता या या विशेष्यता तत्तदनिरूपकत्वमिति पर्य्यवसितम्। नन्वत्र स्वा-

---

१ अनेन लक्षणशरीरप्रविष्टज्ञाने विषयताविशिष्टविषयताव्यापकत्वं निवेशितं विषयतावैशिष्टयञ्च स्वतादात्म्यस्वाधिक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

धिकरणावृत्तित्वं यदि संबन्धसामान्येन तदा ह्रदो वह्निमानिति ज्ञानस्य प्रमात्वापत्तिस्तज्ज्ञानीयविषयताधिकरणह्रदादौ कालिकादिसंबन्धेन वह्न्यादिरूपप्रकारसत्त्वेन घटो गगनवानित्यादिज्ञानीयविषयताया एव घटादिनिष्ठायाः स्वपदेन धर्त्तव्यत्वात्तदनिरूपकत्वस्योक्तभ्रमे सत्त्वात् । नच स्वाधिकरणनिरूपितप्रकारतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाभावो विवक्षणीयस्तथाच तादृशज्ञानीयविषयताधिकरण-

---

रणावृत्तिनिष्ठप्रकारतानिरूपकत्वोभयसम्बन्धेन व्यापकत्वंच निरूपितत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन तेन वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वेन निरूपकतासम्बन्धेन तादृशविषयतासामान्याभावाप्रसिद्धावपि प्रामाण्यवादे भट्टाचार्योक्तरीत्या विषयतानिरूपकत्वस्य अव्याप्यवृत्तित्त्वेपि न क्षतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रदादिनिरूपितप्रकारतावच्छेदकसंयोगसंबन्धावच्छिन्नवृत्तित्वाभावस्य वह्न्यादौ सत्त्वेन नोक्तज्ञानसंग्रह इति वाच्यम्। गुणः संयोगेन घटवानिति ज्ञानस्य प्रमात्वापत्तेस्तज्ज्ञानीयविषयताश्रयगुणनिरूपितसंयोगसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या तादृशविषयतायाः स्वपदेन धर्तुमशक्यत्वात्। नच प्रकारतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वीयस्वरूपसंबन्धेन स्वाधिकरणनिरूपितवृत्तित्वस्याभावः प्रकारताश्रयधर्म्मे विवक्षणीयः तथाच संयोगसंबन्धावच्छिन्नवृत्तित्वीयस्वरूपसंबन्धस्य गुणनिरूपितवृत्तित्वस्य व्यधिकरणतया तत्संबन्धावच्छिन्नतादृशविषयताश्रयगुणनिरूपितवृत्तित्वनिष्ठप्रतियोगिताकाभावस्य प्रकारीभूतघटे सत्त्वेन तदसंग्रह इति वाच्यम्। विशेषरूपेण संबन्धत्वस्वीकारे घटत्वप्रतियोगिकसमवायेन पटत्ववा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

न्पट इत्याकारकज्ञानस्य प्रमात्वापत्तेः प्रकारतावच्छेदकसमवायसंबन्धावच्छिन्नवृत्तित्वीयस्वरूपसंबन्धेन तज्ज्ञानीयविषयताश्रयपटनिरूपितवृत्तित्वस्य पटत्वरूपे प्रकारे सत्त्वात्। नच प्रकारतानिरूपितसंसर्गनिष्ठाऽवच्छेदकतानिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकधर्म्मा-

---

१ ननु प्रकारतात्वेन प्रकारताप्रवेशे समवायेन घटवान् पट इत्याकारकज्ञानीयप्रकारतायाः संग्रहेऽपि संयोगेन घटवान् गुण इत्यादिप्रकारताया विभिन्नसम्बन्धावच्छिन्नायाः संग्रहो दुर्वार एव विभिन्नसम्बन्धावच्छिन्नत्वेन प्रकारतात्वस्य भिन्नत्वादिति चेन्न। प्रकारतात्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्ननिरूपितसंसर्गनिष्ठाऽवच्छेदकतेत्यादिनिवेशादिति दिक्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकतानिरूपकसंसर्गनिष्ठाऽवच्छेदकतानिरूपकवृत्तित्वीयस्वरूपसं-
बन्धेन स्वाधिकरणनिरूपितवृत्तित्वाभावो विवक्षणीयः तथाचोक्तज्ञानीयपटत्वनिष्ठप्रकारतानिरू-
पितसमवायनिष्ठावच्छेदकतानिरूपिताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकं
यद्घटत्वप्रतियोगिकत्वसमवायत्वानिष्ठद्वित्वं तदवच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकघटत्वप्रति-
योगिकसमवायनिष्ठाऽवच्छेदकतानिरूपकवृत्तित्वीयस्वरूपसंबन्धस्य तज्ज्ञानीयविषयताश्रयपटनिरूपित-
वृत्तित्वस्य व्यधिकरणसंबन्धतया तत्संबन्धावच्छिन्नतदभावस्य पटत्वादिरूपप्रकारे सत्त्वान्न तत्संग्रह इ-
ति वाच्यम् । गुणीयसंयोगेन घटवान्गुण इति ज्ञानस्य प्रमात्वापत्तेस्तज्ज्ञानीयप्रकारतावच्छेदकता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

त्वाऽवच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकगुणप्रतियोगिकत्वसंयोगत्वनिष्ठद्वित्वावच्छिन्नानुयोगिताकपर्य्या-प्तिकावच्छेदकतावच्छेदकताकवृत्तित्वाप्रसिद्ध्या स्वपदेन तादृशज्ञानीयविषयताया धर्तुमशक्यत्वात् इति चेन्न । स्वनिरूपितप्रकारतावच्छेदकसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगि-तावच्छेदकधर्म्मावच्छिन्नानुयोगिताकपर्य्याप्तिकाऽवच्छेदकतानिरूपकावच्छेदकतानिरूपकीयस्वरूपसं-बन्धेन स्वाश्रयनिरूपितवृत्तित्वाभावस्य विवक्षणीयतया प्रकृते गुणप्रतियोगिकत्वसंयोगत्वनिष्ठतादृशप-र्य्याप्त्यनुयोगितावच्छेदकीभूतद्वित्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकतानिरूपकीभूता या संयोग-निष्ठसंसर्गविधयावच्छेदकता तन्निरूपकत्वस्य वृत्तित्वेऽप्रसिद्धावपि तज्ज्ञानीयघटत्वावच्छिन्नप्रकारत्वे त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

त्प्रसिद्धेः तादृशप्रकारत्वीयस्वरूपसंबन्धस्य वृत्तित्वव्यधिकरणसंबन्धतयोक्तदोषानवकाशात् । नच त-
द्व्यक्तित्वादिना घटत्वादिज्ञाने विषयितासंबन्धेन स्वरूपतो घटत्वप्रकारकज्ञानस्य प्रमात्वापत्तिस्त-
ज्ज्ञानीयतज्ज्ञाननिष्ठविषयतानिरूपितप्रकारतानिरूपितसंसर्गनिष्ठाऽवच्छेदकतानिरूपितावच्छेदकतात्वा-
वच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकं यद्विषयितात्वनिष्ठतद्व्यक्तित्वं तदवच्छिन्नानुयोगिताकपर्य्याप्तिका-
वच्छेदकतानिरूपकसंसर्गनिष्ठावच्छेदकतानिरूपकविषयितासंबन्धावच्छिन्नवृत्तित्वीयस्वरूपसंबन्धेन ता-
दृशज्ञाननिरूपितवृत्तित्वस्य घटत्वादिरूपप्रकारे सत्त्वेन स्वपदेन तादृशविषयताया धर्तुमशक्यत्वा-
दिति वाच्यम् । तादृशसंबन्धेन स्वाश्रयनिरूपितनिरवच्छिन्नवृत्तित्वाभाववन्निष्ठनिरवच्छिन्नप्रकारतानिरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

पितविशेष्यत्वानिरूपकत्वस्य विवक्षितत्वात् । एवंच तादृशज्ञाननिरूपिताविषयितासंबन्धावच्छिन्नवृत्ति-
त्वस्य घटत्वे सत्त्वेपि न तद्वृत्तित्वं निरवच्छिन्नमतो नोक्तदोषः । प्रकारतायां निरवच्छिन्नत्वविशेषणात् घ-
टत्वत्वेन घटत्वावगाहिज्ञाने विषयितासंबन्धेन घटत्ववत्वेन घटत्वप्रकारकज्ञानस्य नासंग्रहः । नचैवं सति ह्रदो
वह्निमानित्याकारकज्ञानस्य प्रमात्वापत्तिस्तज्ज्ञानीयवह्निनिष्ठप्रकारताया निरवच्छिन्नत्वाभावादिति वा-
च्यम् । स्वाश्रयनिरूपितवृत्तितानवच्छेदकधर्म्मावच्छिन्नप्रकारतानिरूपितविशेष्यत्वानिरूपकत्वस्य विव-
क्षणीयतया तज्ज्ञानीयविषयताश्रयह्रदनिरूपितवृत्तितानवच्छेदकवह्नित्वावच्छिन्नप्रकारतानिरूपितविशे-
ष्यतानिरूपकतया तदसंग्रहात् । अत्रच स्वाश्रयनिरूपितवृत्तिताप्रकारतावच्छेदकसंबन्धावच्छिन्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्राह्या अन्यथा पूर्वोक्तदोषात् एवं तादृशावच्छेदकत्वाभावो न स्वरूपसंबन्धेन किंतु स्वनिरूपित-
प्रकारतानिरूपितसंसर्गतानिरूपितावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकधर्म्मावच्छिन्नानु-
योगिताकपर्य्याप्तिकावच्छेदकतानिरूपकसंसर्गतानिरूपकनिरूपितावच्छेदकत्वीयस्वरूपसंबन्धेनातो न
प्रागुक्तरीत्या दोषावकाश इति यद्वा विशेष्यताविशिष्टप्रकारताशून्यत्वं सर्वांशे प्रमात्वं स्वव्यधिकरणप्र-

१ ननु सामानाधिकरण्यसम्बन्धेन गुणकर्मान्यत्वविशिष्टसत्तावान् गुण इत्यादिबुद्धेः प्रमात्वापत्तिः स्वरूपसम्ब-
न्धेन गुणकर्मान्यत्वविशिष्टसत्तानिष्ठनिरूपकतावैशिष्ट्यस्यैव सत्त्वादिति चेन्न। स्वावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छे-
दकताकत्वघटितसम्बन्धपञ्चकस्य निवेशात्। वस्तुतस्तु घटत्वप्रतियोगिकसमवायसम्बन्धेन प्रमेयाश्रयवान् घट इत्यादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारावच्छिन्नेत्यादिना विवक्षितं विशेष्यतावैशिष्ट्यंच स्वनिरूपितत्वस्वाश्रयनिष्ठाधिकरणतानिरूप-
कताविशिष्टान्यत्वोभयसंबन्धेन निरूपकतावैशिष्ट्यंच स्वावच्छेदकसंबन्धावच्छिन्नत्वस्वसामानाधिकरण्य-
स्वानवच्छेदकानवच्छिन्नत्वस्ववृत्तित्वैतच्चतुष्टयसंबन्धेन स्ववृत्तित्वंच स्वानवच्छेदकानवच्छिन्नत्वसंबन्धेन

ज्ञानस्य प्रमात्वानुपपत्तिर्दुर्वारा विशेष्यताविशिष्टप्रकारताशून्यत्वासम्भवादतः स्वाश्रयनिष्ठाधिकरणतानिरूपकताविशि-
ष्टान्यत्वकुक्षिप्रविष्टसम्बन्धचतुष्टयं परित्यज्य स्वनिरूपितनिरूपकतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकस्वा-
वच्छेदकसम्बन्धावच्छिन्नप्रकारताकविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजन्यतावत्त्वनिवेशः जन्यतावत्त्वंच स्वनिरू-
पितजनकतानवच्छेदकसावच्छिन्नविषयताशून्यज्ञानीयत्वसम्बन्धेनेति तर्ककुशलानां विमर्शः ।

CC-0. In Public Domain. Digitization by eGangotri

अत्र प्रथमसंबन्धानिवेशे ह्रदो वह्निमानित्याकारकज्ञानीयविषयतानिरूपितवह्निप्रकारतायां ह्रदनिरूपितकालिकसंबन्धावच्छिन्नवह्निनिष्ठनिरूपकतायास्सामानाधिकरण्यादिसंबन्धत्रयेण सत्त्वेन तादृशविषयतायाः स्वपदेन धर्तुमशक्यतया घटो गगनवानिति ज्ञानीयघटविषयताया एव तादृशत्वेन तदनिरूपकोक्तज्ञानस्य प्रमात्वापत्तिः। द्वितीयसंबन्धानिवेशे गुणो द्रव्यमित्यादिज्ञानस्य प्रमात्वापत्तिः गुणत्वनिष्ठनिरवच्छिन्ननिरूपकताया अन्यसंबन्धत्रयेण द्रव्यत्वनिष्ठप्रकारतायां सत्त्वात्। नच निरवच्छिन्ननिरूपकताया अवच्छेदकस्य द्रव्यत्वनिष्ठप्रकारतायाश्चावच्छेदकस्याप्रसिद्ध्या नायं दोष इति वाच्यम्। घटो द्रव्यमिति ज्ञानसंग्रहायोभयत्र स्वानवच्छेदकत्वस्याऽवच्छेदकतासंबन्धेन स्वाभाववत्त्वरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पस्य वक्तव्यत्वात् । तृतीयसम्बन्धानिवेशे स्वरूपतो घटत्वावगाहिज्ञाने घटत्ववत्वादिना विषयितासंम्बन्धेन घटत्वप्रकारकज्ञानस्य प्रमात्वापत्तिः एवं विशिष्टसत्तावान् गुण इति ज्ञानस्य प्रमात्वापत्तिः चतुर्थसंबन्धानिवेशे घटत्ववत्वेन घटत्वावगाहिज्ञाने विषयितासंबन्धेन स्वरूपतो घटत्वप्रकारकज्ञानस्य प्रमात्वापत्तिरिति दिक् ॥ श्रीः ॥

यथार्थेति व्यर्थमिति यथार्थपददानेपि सद्धेतुस्थलेऽतिव्याप्तिवारणसम्भवादिति ॥

नन्वत्र यथार्थपदानुपादाने दोषविषयकसंशये प्रतिबन्धकत्वाभावेनासंभव इति चेन्न । यथार्थपदोपादानेप्यविरुद्धभावाभावद्वयकोटिकसंशयाङ्गीकर्तृमते ह्रदो जलवान्वह्न्यभाववान्वेति संशयसम्भवात्तत्र चानु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मितिप्रतिबन्धकत्वाभावादसम्भवोऽतो ज्ञाने संशयान्यत्वं निवेशनीयम् एवंचासंभवाभावेन तद्वैयर्थ्यात्।किं-
च तादृशसंशयानङ्गीकारेपि संशयान्यत्वं विशेषणमावश्यकम् अन्यथा बाधग्रन्थे कपिसंयोगाभाववद्वृक्षस्य
भट्टाचार्य्येण बाधत्वाभिधानात्तत्रच कपिसंयोगाभाववान्न वा वृक्ष इत्याकारकसंशयस्य याथार्थ्यविशेषणेना-
वारणेनाव्याप्त्यापत्तेः । नच तथापि वह्निमान् ह्रदो वह्न्यभाववानित्याहार्य्यदोषविषयकनिश्चये प्रति-
बन्धकत्वाभावेनासम्भववारणाय याथार्थ्यविशेषणमावश्यकमिति वाच्यम् । याथार्थ्यविशेषणेनाप्रामाण्य-
ज्ञानास्कन्दितदोषज्ञानावारणादसंभववारणायाप्रामाण्यज्ञानाभावस्य ज्ञानविशेषणत्वावश्यकतया तत्तद-
प्रामाण्यज्ञानाभावनिवेशे गौरवेणानुगतरूपेणैवाप्रामाण्यज्ञानाभावो निवेशनीयस्तत्प्रकारश्चाभावविशिष्टा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

न्यत्वमिति अभावंवैशिष्ट्यंच स्वाभाववत्त्वस्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयतावत्त्वोभयसम्बन्धेन

---

१ नन्वभावविशिष्टान्यत्वघटकाऽभावोऽप्रामाण्यज्ञानाभावोऽवच्छिन्नत्वाभाव इच्छाप्रयोज्यत्वाभावश्च प्रविष्टस्तत्र तावदप्रामाण्यज्ञानाभावप्रतियोग्यप्रामाण्यज्ञानं द्विविधं ज्ञानत्वसामानाधिकरण्येन तदवच्छेदेन च तयोर्मध्ये प्राथमिकाभावस्य विशेष्यत्वसम्बन्धावच्छिन्नप्रतियोगिताकस्यैवोत्तेजकत्वं द्वितीयस्यतु स्वावच्छेदकक्षणावच्छिन्नस्वाधिकरणनिरूपितसमवायावच्छिन्नवृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकस्यैवोत्तेजकत्वं तथाच सम्बन्धाननुगमात्कथमुत्तेजकत्वं नच द्वयोर्मध्ये प्रत्येकसम्बन्धनिवेशादनुगमइति वाच्यम् प्राथमिकसम्बन्धमात्रनिवेशे पुरुषान्तरवृत्तिज्ञानस्य प्रतिबन्धकत्वाभावप्रसङ्गात् द्वितीयनिवेशे प्रथमक्षणे अपेक्षाबुद्ध्यात्मकवह्न्यभाववानित्याकारकं तदनन्तरं भाविज्ञानं निर्वह्नित्वाभाववति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंचैतादृशविशेषणेनैवोक्ताहार्य्यस्यापि वारणसंभवेन याथार्थ्यविशेषणस्य वैयर्थ्यात् । नच तथाप्युक्तविशेषणेनानियताहार्य्यवारणेपि नियताहार्य्यवारणं न सम्भवति समानाकारकज्ञानीयविषयताया ऐक्येपि नियताहार्यज्ञानीयविषयताया दोषविषयकानाहार्य्यज्ञानीयविषयतातो भेदस्य वक्ष्यमाणत्वात्तस्याः प्रतिबन्धकतानवच्छेदकत्वेन तज्ज्ञाने उक्तोभयसम्बन्धेनाभाववैशिष्ट्यस्याभावात् अतस्तद्व्यावृत्त्यर्थं

वह्न्यभावप्रकारताकं तदनन्तरं वह्न्यभाववानित्याकारकं तत्र पूर्वज्ञानस्याप्रतिबन्धकत्वप्रसङ्गादिति चेन्न निरुक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्यैवोत्तेजकत्वादिति विभावयन्तु विमत्सरतर्करसिकाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

याथार्थ्यविशेषणं सार्थकमिति वाच्यम् । तदुपादानेपि कपिसंयोगाभाववद्वृक्षरूपबाधेऽव्याप्तिः कपिसंयोगवान्वृक्षः कपिसंयोगाभाववानिति नियताहार्य्यस्य तद्विशेषणेनावारणात् तादृशाहार्य्यवारणाय वैशिष्ट्यघटकद्वितीयसम्बन्धश्च स्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयितानिरूपकतावच्छेदकधर्म्मावच्छिन्नविषयितावत्त्वरूपो वक्तव्यः एवंसति सर्वत्र नियताहार्य्यस्य वारणं संभवति तथाच तद्विशेषणस्य वैयर्थ्यात् । ननु सर्वमिदं तदास्याद्यद्याहार्य्यभेदस्य प्रतिबन्धकतावच्छेदकत्वं स्यात् तदेव न सम्भवति तथासति ह्रदो वह्निमानिति ज्ञानंप्रति ह्रदो वह्न्यभाववानिति निश्चयस्यांशिकाहार्य्यस्याप्रतिबन्धकत्वापत्तेः एवमेव संशयभेदोपि न प्रतिबन्धकतावच्छेदकः तथाचोक्तविशेषणेनाप्रामाण्यज्ञानास्कन्दितज्ञानवार-

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णेपि संशयाहार्य्ययोरवारणादसम्भववारणाय यथार्थेति सार्थकमेवेति चेन्न। आहार्य्यभेदस्य प्रतिबन्धकतावच्छेदकत्वाभावेपि आहार्य्यस्य प्रतिबन्धकत्ववारणार्थं विरोधिविषयतायामिच्छाऽप्रयोज्यत्वस्य संशयस्य प्रतिबन्धकतावारणार्थं विषयत्वानवच्छिन्नत्वस्यच वक्तव्यतयाऽभावपदेनेच्छाप्रयोज्यत्वाभावं विषयत्वावच्छिन्नत्वाभावं चोपादायोक्तोभयसम्बन्धेन तादृशाभाववैशिष्ट्यस्याहार्य्यसंशययोस्सत्त्वेन तद्वारणसम्भवात्। अत्र वैशिष्ट्यघटकस्वाभाववत्त्वञ्च स्वाश्रयविषयतानिरूपकत्वविशेष्यत्वान्यतरसम्बन्धेन विशेष्यत्वनिवेशादप्रामाण्यज्ञानास्कन्दितज्ञानवारणम् प्रथमसम्बन्धनिवेशादाहार्य्यसंशयवारणं बोध्यम्। नन्वेवमपि यथार्थेतिव्यर्थमित्यसंगतं तद्विशेषणसत्त्वेऽसम्भवस्यैवावश्यकत्वात् तथाहि तादृशसम्बन्धेना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

भावविशिष्टान्यदोषविषयकज्ञानमात्रस्य संशयाहार्य्याद्यनात्मकतया यथार्थत्वेन यद्विषयताशाल्यभाव-विशिष्टान्ययथार्थज्ञाननिष्ठभेदप्रतियोगितावच्छेदकतात्वस्य स्वंसमनियतयद्विषयताशाल्यभावविशिष्टा-

१ नन्वत्र दोषविषयकाभावविशिष्टान्यज्ञानम् ह्रदो वह्न्यभाववान् पर्वतश्च तथेत्याकारकमपि तत्र चोक्तयाथा-र्थ्यवद्भेदो वर्तत इति तादृशभेदप्रतियोगितात्वं तादृशावच्छेदकतायामस्ति तादृशदोषविषयकाभावविशिष्टान्योक्तयाथा-र्थ्यविशिष्टज्ञाने तादृशभेदाभावेन तादृशयाथार्थ्यज्ञाननिष्ठभेदप्रतियोगितावच्छेदकतात्वं यथार्थत्ववद्भेदप्रतियोगितावच्छे-दकतायां नास्तीति कथं समनियतत्वं तयोरिति चेदयं भावः अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्येदानीं निवि-

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यज्ञाननिष्ठभेदप्रतियोगितावच्छेदकतात्वापेक्षया गुरुतयाऽभावप्रतियोगितानवच्छेदकत्वेन तादृशाभा-वाप्रसिद्धेः इति चेन्न । याथार्थ्यस्याभावप्रतियोगितावच्छेदककुक्षावनिवेशात् यद्रूपावच्छिन्नविषयिताशा-ल्यभावविशिष्टान्यज्ञाननिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावस्यैव निवेशनीयत्वात् याथार्थ्यसामानाधिकरण्यस्यैव तादृशाभावप्रतियोगितावच्छेदकतायां निवेशात् । तन्निवेशप्रकारश्च य-

---

ष्टतयाऽव्यापकविषयताशून्यत्वस्यापि ज्ञानविशेषणतया दोषविषयकांऽऽशिकभ्रमस्याव्यापकविषयताशून्यत्वाभावेन दोष-विषयकयथार्थज्ञानस्यैव तादृशतया तत्रच याथार्थ्यवद्भेदाभावेन तयोस्समनियतत्वमस्त्येवेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धर्म्मनिष्ठाऽवच्छेदकताभिन्ना सत्यवच्छेदकतात्वनिष्ठाऽवच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका यद्धर्म्मनिष्ठाऽवच्छेदकतानिरूपिका याऽवच्छेदकतेत्येवंरीत्या न्यूनाधिकवारकपर्य्याप्तिघटितावच्छिन्नत्वनिष्ठाऽवच्छेदकतानिरूपकविषयितानिष्ठाऽवच्छेदकतानिरूपिका सती ज्ञानत्वनिष्ठाऽवच्छेदकतानिरूपिका सती अभावविशिष्टान्यत्वनिष्ठाऽवच्छेदकतानिरूपिका या याथार्थ्यसमानाधिकरणज्ञाननिष्ठाऽवच्छेदकता तन्निरूपकवृत्तित्वनिष्ठाऽवच्छेदकतानिरूपकभेदनिष्ठाऽवच्छेदकतानिरूपकप्रतियोगित्वनिष्ठाऽवच्छेदकतानिरूपकाऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकाभावत्वेनेति तथाच नासम्भवः। परंतु याथार्थ्यसामानाधिकरण्यघटिताभावत्वस्य तदघटिताभाववत्त्वघटिततया तद्वारणीयदोषावारकतया या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थार्थ्यस्य वैयर्थ्यमिति तदेवाभिहितम् । नचाभावविशिष्टान्यत्वमित्यत्र वैशिष्ट्यघटकस्वाभाववत्त्वस्य विशेष्यत्वस्वाश्रयविषयतानिरूपकत्वान्यतरसम्बन्धेन विवक्षणे याथार्थ्यस्य वैयर्थ्येपि विशेष्यत्वमात्रेण स्वाभाववत्त्वाविवक्षणे न तद्वैयर्थ्यं तादृशोभयसम्बन्धेनाभाववैशिष्ट्यस्याहार्य्यसंशययोरभावात् नह्यन्यत्र यत्किंचिद्विशेषणेन वारणीयदोषवारकस्य विशेषणान्तरस्य वैयर्थ्यं तथा चैतद्विवक्षाभिप्रायेणेत्युक्तमिति वाच्यम् । यथार्थपददानेप्यनियताहार्य्यवारणाय तादृशविवक्षाया आवश्यकतया तेनैव संशयनियताहार्य्यवारणसम्भवेन यथार्थपदप्रयोजनाभावात् । एवं भावद्वयकोटिकसंशयानङ्गीकारेपि न क्षतिरिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

केचित्त्वित्यादि यद्रूपावच्छिन्नविषयतासामान्यमनुमितिप्रतिबन्धक-
तावच्छेदकं तद्रूपविशिष्टप्रकारकप्रमाविशेष्यत्वमेव विवक्षणीयमिति ॥

तथाच यद्रूपावच्छिन्नविषयतासामान्यं प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकं तद्रूपवत्त्वमिति पर्य्यवसितम् । ज्ञायमानदोषस्य प्रतिबन्धकतया ज्ञानविषयत्वस्य तदवच्छेदकत्वाल्लक्षणसङ्गतिः अत्रच स्वरूपसम्बन्धरूपावच्छेदकत्वमेव लक्षणे प्रविष्टम् । नच स्वरूपसम्बन्धरूपावच्छेदकत्वपक्षे वक्ष्यमाणदोषग्रास इति वाच्यम् । ज्ञानभेदेपि समानाकारकज्ञानविषयताया ऐक्यमङ्गी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्य दोषस्य वक्ष्यमाणत्वात् अत्र तदनङ्गीकृत्य लक्षणकरणात् तथाचानाहार्य्यत्वादिकमपि निवेश-
नीयम् । नचैवं सत्यसम्भवः अव्याप्यवृत्तित्वज्ञानकालीनह्रदो वह्न्यभाववानित्यनाहार्य्याप्रामाण्यज्ञा-
नशून्यनिश्चये प्रतिबन्धकत्वाभावेन तादृशविषयतासामान्यस्यानवच्छेदकत्वादिति वाच्यम् । अव्याप्य-
वृत्तित्वज्ञानानास्कन्दिततत्वस्यापि ज्ञानविशेषणत्वात् । नचैवं कपिसंयोगीत्यादौ कपिसंयोगाभाववद्वृक्षे-
ऽतिव्याप्तिः अव्याप्यवृत्तित्वज्ञानाभावे तज्ज्ञानस्याप्यनुमितिप्रतिबन्धकत्वादिति वाच्यम् । अव्याप्य-
वृत्तित्वभ्रमानास्कन्दिततत्वस्य विशेषणत्वात् कपिसंयोगाभावो वृक्षेऽव्याप्यवृत्तिरिति ज्ञानस्य प्रमात्वेन
तज्ज्ञानकालीनकपिसंयोगाभाववद्वृक्षज्ञानस्योक्तसकलविशेषणविशिष्टतया तदीयविषयतायास्सामान्यान्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

र्गतायास्तादृशप्रतिबन्धकतानवच्छेदकत्वेनातिव्याप्तिविरहात्। नचैवमसाधारण्येऽव्याप्तिस्तद्विषयतासामान्यान्तर्गतपक्षधर्म्मताज्ञानासमानकालीनज्ञानीयविषयताया अतथात्वादिति वाच्यम् । अस्य दुष्टलक्षणतया दोषलक्षणत्वाभावेनाऽसाधारण्यनियतबाधस्वरूपासिद्ध्याद्यन्यतमदोषमादायैव दुष्टे लक्षणसमन्वयात् । नचैवं सत्ययमसाधारण्येन दुष्ट इति व्यवहारानुपपत्तिर्यद्यपीत्याद्युत्तरग्रन्थखण्डनासङ्गतिश्च तत्र तद्दोषघटितलक्षणस्य स्वारस्याभिधानादिति वाच्यम् । तादृशज्ञानीययद्धर्म्मावच्छिन्नविषयतात्वव्यापकः प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदकत्वासाधारण्यविषयताभिन्नत्वोभयाभाव इति विवक्षणेनादोषात् । ज्ञानभेदेन विषयताभेदानङ्गीकारेतु अनाहार्य्यत्ववि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्टयद्रूपावच्छिन्नविषयताशालिनिश्चयत्वव्यापकः प्रकृतानुमित्यप्रतिबन्धकत्वासाधारण्यविषयताशून्यत्वोभयाभाव इति विवक्षणीयम् एवञ्च पाषाणमयत्वविशिष्टपर्वते नातिव्याप्तिः पाषाणमयत्ववान्वह्न्यभाववानिति ज्ञानाकालीनपाषाणमयत्वविशिष्टपर्वतनिश्चये उभयाभावासत्त्वादिति दिक् ॥ श्रीः ॥

मूले-लिङ्गांशनिवेशस्यानतिप्रयोजनकतयेति ॥

ननु कथमनतिप्रयोजनकत्वं लिङ्गाज्ज्ञानं लिङ्गज्ञानमिति व्युत्पत्त्या ज्ञाने लिङ्गज्ञानजन्यत्वलाभेनानुमितित्वलाभात् यद्रूपावच्छिन्नविषयकानुमितित्वव्यापकं प्रकृतानुमितिप्रतिबन्धकत्वमिति लक्षणं पर्य्यवस्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

ति तथाच तत्राहार्य्यसंशयभेदानिवेशप्रयुक्तलाघवसम्पादनेन सप्रयोजनकत्वात् । नच घटोऽवृत्तिरित्यादौ घटावच्छिन्नरूपबाधेऽव्याप्तिः निर्द्धर्म्मितावच्छेदककानुमित्यनङ्गीकारेण तादृशदोषविषयकानुमित्यप्र-

१ ननु वटवानित्यत्र मतुबर्थस्सम्बन्धः आश्रयश्च तत्र प्रथमपदार्थे सम्बन्धे प्रतियोगितासम्बन्धेन प्रकृत्यर्थस्य तस्य चाश्रयत्वविशिष्टैकदेशाश्रयत्वेऽन्वय इति शाब्दबोधाङ्गीकारात् तत्रानुमितेरपि तत्समानार्थविषयकत्वम् उद्देश्यानुमित्यन्यूनातिरिक्तविषयकशाब्दजनकत्वमिति वदतां चिन्तामणिकाराणामभिप्रेतं तथाच सम्बन्धात्मकप्रथमपदार्थविशेष्यकघटप्रकारकानुमितेस्सधार्मितावच्छेदककत्वान्निर्धर्मितावच्छेदककानुमितिवर्णनमसंगतमिति चेन्न । मतुपो निरर्थकत्वाभिप्रायेण तथा वर्णनादिति ध्येयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धेः तथाच लक्षणेऽनुमितित्वप्रवेशो न संभवतीति वाच्यम् । घटवद्भूतलमित्यनुमितिमादायैव तत्र लक्षणसमन्वयसंभवात् । नचाऽव्यापकविषयताशून्यत्वविशेषणस्यावश्यकतया घटावच्छिन्नविषयताऽव्यापकभूतलादिविषयिताशालितादृशानुमितिमादाय लक्षणसमन्वयो न संभवतीति वाच्यम् । घटो घटवानित्यनुमितिमादायैव लक्षणसमन्वयात् तादृशानुमितिविषयतायाः सर्वस्या अपि घटावच्छिन्नविषयिताव्यापकत्वात् । नच तत्रापि घटांशे घटत्वस्य सामानाधिकरण्येन भानात्तद्विषयितैवाव्यापिकेति वाच्यम् । यद्रूपावच्छिन्नविषयिताव्यापकत्वं प्रतिबन्धकत्वे वक्तव्यं तद्रूपावच्छिन्नविषयिताऽव्यापकविषयिताशून्यत्वस्य लक्षणे न प्रवेशः किंतु किंचिद्रूपावच्छिन्नविषयिताऽव्यापकविषयिताशून्यत्वस्यैव त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाच ताद्दशविषयिताशून्ययद्रूपावच्छिन्नविषयिताशालिज्ञाननिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति
प्रतीतिसिद्धाभावस्यैव प्रतिबन्धकत्वांशे निवेशात् ह्रदो वह्निमानित्यादौ ताद्दशं रूपं वह्न्यभाववद्ध्र-
दत्वमेवेति तत्संग्रहः वह्न्यभावत्वाद्यवच्छिन्नविषयिताऽव्यापकविषयिताशून्यतदवच्छिन्नविषयिताशालि-
ज्ञानवृत्तिभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावश्च न प्रतिबन्धकतायामिति नैकदे-
शेऽतिव्याप्तिः एवं वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताऽव्यापकविषयिताशून्यवह्न्यभावत्वाद्यवच्छिन्नविष-
यिताशालिज्ञाननिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावश्च न प्रतिबन्धकतायामेत-
त्तत्त्वमग्रे स्फुटीभविष्यति तथाच प्रकृते घटवद्भूतलत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यघटाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नविषयिताशालिभूतलं घटवदित्यनुमितिनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावमादायैव लक्षणसंभवादिति चेन्न । महानसीयवह्नीतरवह्न्यभाववन्महानसकालीनपर्वतो वह्न्यभाववानित्यत्र वह्निमत्तादृशपर्वतरूपे बाधेऽव्याप्तिस्तत्र दोषविषयकानुमितेर्महानसीयवह्निमन्महानसविषयितारूपाव्यापकविषयिताशालित्वनियमात् । नच महानसीयवह्न्यभाववन्महानस इति बाधकालीनानुमितिमादाय तत्र लक्षणसमन्वयस्तत्र केवलवह्नेरेव भानादिति वाच्यम् । यादृशस्थले एकविशेषेतरबाधस्य पक्षतावच्छेदकता दोषानुमितेः प्राक् तद्विशेषस्य न बाधनिश्चयः तत्र यादृशदोषविषयकानुमितिरेव न तत्रचानुमितित्वघटितलक्षणासंभवाल्लिङ्गांशाऽविवक्षणादिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्प्रकारत्वेनानुमितिप्रतिबन्धकत्वमित्युक्तौ पक्षविशेषणकभ्रममा-
दाय वह्न्यभावादौ नातिप्रसङ्गः पर्वतादावतिप्रसङ्गसंभवेपि यत्संब-
न्धावच्छिन्नयन्निष्ठप्रकारताकत्वेनानुमितिप्रतिबन्धकत्वं तेन संबन्धे-
न तद्वत्त्वस्य दुष्टताव्यवहारनियामकत्वोपगमे पर्वतविशेषणकव-
ह्न्यभावज्ञानस्य विशेषणताविशेषावच्छिन्नाधेयतासंबन्धावच्छिन्नप-
र्वतादिनिष्ठप्रकारताकत्वेन प्रतिबन्धकत्वादित्यादि ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वत्र पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे नायं सद्धेतुरतस्तत्सामानाधिकरण्येनानुमितिस्थले एवातिव्याप्तिर्वक्तव्या तथाचाऽवच्छेदकावच्छेदेन बाधनिश्चयस्य विरोधितया तस्यच पर्वतत्वव्यापकवह्न्यभावप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारताकत्वेनैव प्रतिबन्धकतया तादृशसंबन्धाप्रसिद्ध्या तेन संबन्धेन तद्वत्त्वस्याप्रसिद्ध्या कथमतिव्याप्तिः। नच संसर्गतावच्छेदकतापर्य्याप्तिमनिवेश्य यद्धर्म्मावच्छिन्नयन्निष्ठसंसर्गताकयन्निष्ठप्रकारताप्रतिबन्धकतावच्छेदिका तद्धर्म्मावच्छिन्नतन्निष्ठसंसर्गताकतन्निष्ठनिरूपकतानिरूपिताधिकरणतावत्त्वस्य विवक्षणात्स्वरूपत्वावच्छिन्नस्वरूपनिष्ठसंसर्गताकवह्न्यभावत्वावच्छिन्नप्रकारता तादृशप्रतिबन्धकतावच्छेदिकेति तादृशसंसर्गतानिरूपक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

वह्न्यभावत्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वस्य धूमादौ सत्त्वादतिव्याप्तिरिति वाच्यम् । तथा-सति पक्षविशेषणकभ्रममादायाऽप्यतिव्याप्तिस्सम्भवति पर्वतत्वव्यापकवह्न्यभावप्रतियोगिकस्वरूपसं-बन्धावच्छिन्नाधेयतात्वावच्छिन्नसंसर्गतानिरूपकपर्वतप्रकारतायाः प्रतिबन्धकतावच्छेदकतया संसर्गता-वच्छेदककुक्षिप्रविष्टाधेयतात्वावच्छिन्नाधेयत्वनिष्ठसंसर्गतानिरूपकपर्वतनिष्ठनिरूपकतानिरूपिताधिकर-णत्वस्य धूमे सत्त्वात्संबन्धभेदेनाधेयताभेदेऽपि संयोगेन वह्न्यभावव्याप्यः पर्वत इति ज्ञानीयपर्वतत्व-व्यापकवह्न्यभावव्याप्यप्रतियोगिकसंयोगसंबन्धावच्छिन्नाधेयतासंबन्धेन पर्वतप्रकारताया अप्यवच्छेदक-तया संयोगसंबन्धावच्छिन्नाधेयतात्वावच्छिन्नसंसर्गताकनिरूपकताकत्वस्य धूमे सत्त्वात्तादृशभ्रममादाया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिव्याप्तिरतो यद्धर्म्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपकसंसर्गतानिरूपकप्रकारता तादृ-
शप्रतिबन्धकतावच्छेदिका तद्धर्म्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकसंसर्गताकनिरूपकताका-
धिकरणतावत्त्वं विवक्षणीयम् एवंसति पक्षविशेषणकभ्रममादाय नातिव्याप्तिस्तत्र संसर्गतावच्छेदकता-
त्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वस्य पर्वतत्वव्यापकवह्न्यभावव्याप्यप्रतियोगिकसंयोगसंबन्धाव-
च्छिन्नाधेयतात्वरूपसमुदायवृत्तिसमुदायत्व एव सत्त्वेन तदवच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकता-
कसंसर्गताकनिरूपकत्वस्याप्रसिद्धेः एवंसति पक्षविशेष्यकभ्रममादायापि नातिप्रसङ्गस्तत्रापि पर्वतत्व-
व्यापकवह्न्यभावादिप्रतियोगिकस्वरूपत्वादिरूपसमुदायगतसमुदायत्वरूपतादृशप्रतिबन्धकताऽवच्छेद--

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

कप्रकारतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यवच्छेदकधर्म्मावच्छिन्नपर्य्याप्तिकावच्छेदक-ताकसंसर्गताकनिरूपकत्वस्याप्रसिद्धत्वात् । यत्तु समानविषयकत्वेन प्रतिबध्यप्रतिबन्धकभावाभिप्रायेणेदं तथाच शुद्धस्वरूपसंबन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारताया अपि सामानाधिकरण्येनानुमितिप्रतिबन्धकतावच्छेदकतया पर्य्याप्तिनिवेशेपि पक्षविशेष्यकभ्रममादायातिव्याप्तिसङ्गतिरिति तन्न। वह्न्यभावव्याप्यः पर्वत इति पक्षविशेषणकभ्रममादायापि तत्सङ्गतेरिति चेन्न । अवच्छेदकावच्छेदेन बुद्धौ विधेयसंसर्गे उद्देश्यतावच्छेदकव्यापकविधेयप्रतियोगिकत्ववदुद्देश्यतावच्छेदकताघटकसंसर्गे विधेयव्याप्योद्देश्यतावच्छेदकप्रतियोगिकत्वभानस्य जगदीशेनानुमितावुक्ततया यत्सम्बन्धा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नयन्निष्ठावच्छेदकताकयत्सम्बन्धावच्छिन्नयन्निष्ठप्रकारता तादृशप्रतिबन्धकतावच्छेदिका तत्सम्बन्धा-
वच्छिन्नतन्निष्ठाऽवच्छेदकताकतत्सम्बन्धावच्छिन्नतन्निष्ठनिरूपकताकाधिकरणतावत्त्वविवक्षणे पक्षविशेष्य-
कभ्रममादायातिव्याप्तिस्संगच्छते वह्न्यभावव्याप्यपर्वतत्वप्रतियोगिकसमवायसंबन्धावच्छिन्नपर्वतत्वनिष्ठा-
ऽवच्छेदकतानिरूपकविशेष्यतानिरूपिताया वह्न्यभावत्वनिष्ठस्वरूपसंबन्धावच्छिन्नावच्छेदकतानिरूप-
कशुद्धस्वरूपसंबन्धावच्छिन्नप्रकारतायाः सामानाधिकरण्येनानुमितिप्रतिबन्धकतावच्छेदकतया स्वरू-
पसंबन्धावच्छिन्नवह्न्यभावत्वनिष्ठाऽवच्छेदकताकवह्न्यभावनिष्ठशुद्धस्वरूपसंबन्धावच्छिन्ननिरूपकताका-
धिकरणत्वस्य धूमे सत्त्वात् । नैवं पक्षविशेषणकभ्रममादायातिव्याप्तिस्तत्र वह्न्यभावव्याप्यत्वाद्यव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नविशेष्यतानिरूपिताया वह्न्यभावव्याप्यादिव्याप्यपर्वतत्वप्रतियोगिकसमवायावच्छिन्नपर्वतत्वनिष्ठाऽवच्छेदकतानिरूपकसंयोगादिसंबन्धावच्छिन्नाऽऽधेयतासंबन्धावच्छिन्नवपर्वतनिष्ठप्रकारतायाः सामानाधिकरण्येनानुमितिप्रतिबन्धकतावच्छेदकतया तादृशसंबन्धावच्छिन्नपर्वतत्वनिष्ठाऽवच्छेदकताकनिरूपकत्वाप्रसिद्धेरिति दिक् ॥ श्रीः ॥

विशिष्टदोषविषयकत्वस्य संशयादौ सत्त्वात्पुनरसंभव इति ॥

नन्वत्राभावे संयोगेन वह्नेः साध्यतायां संयोगसंबन्धावच्छिन्नप्रतियोगित्वसंबन्धेन वह्न्यभावस्य स्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपेण हेतुतायां वह्न्यभाववदभावे लक्षणसमन्वयोऽभावो वह्न्यभाववान्न वेति संशयेपि तत्स्थलीयानुमितित्वव्यापकपक्षतावच्छेदकाविशिष्टे तादृशहेत्ववगाहित्वघटितधर्म्मावच्छिन्नप्रतिबध्यतानिरूपितया अभावत्वावच्छिन्ने संयोगसंबन्धावच्छिन्नप्रतियोगितासंबन्धेन वह्न्यवगाहित्वघटितधर्म्मावच्छिन्नप्रतिबन्धकतायास्सत्त्वात्। तादृशसंशयस्याभावांशे तादृशसंबन्धेन वह्न्यवगाहित्वादितितु भ्रमः अभावो वह्निमान्वह्न्यभाववद्वृत्तितादृशवह्न्यभाववांश्चेति ज्ञानस्य व्याप्तिघटकाभावांशे संयोगसंबन्धावच्छिन्नप्रतियोगितासंबन्धेन वह्न्यवगाहित्वेनाहार्य्यतया तादृशानुमित्यप्रसिद्धेरिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

अनातिरिक्तवृत्तित्वंच स्वव्यापकतत्कत्वमिति ॥

नन्वत्र प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाभावेऽनाहार्याप्रामाण्यज्ञानानास्कन्दितदोषविषयकनिश्चयवृत्तित्वाभाव एव कुतो नोक्तः व्यापकत्वानिवेशेनात्र लाघवात् । नचाधिकरणभेदेनाभावभेदाङ्गीकर्तृनये घटादिवृत्तिप्रतिबन्धकत्वाभावस्य तादृशोदासीननिश्चयावृत्तित्वात्तादृशोदासीनेतिऽव्याप्तिरिति वाच्यम् । तादृशप्रतिबन्धकत्वाभावत्वे तादृशनिश्चयवृत्तितानवच्छेदकत्वविवक्षणे दोषाभावात् अधिकरणभेदेनाभावभेदाङ्गीकर्तृमतेपि तादृशाभावत्वस्यानुगतत्वादिति चेन्न । केवला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावत्वे निश्चयवृत्तित्वावच्छेदकत्वसत्त्वे विशिष्टाभावत्वे तदभावस्यासत्त्वेनासंभवतादवस्थ्यात् यदि ता- दृशप्रतिबन्धकताप्रतियोगिकत्वाभावत्वगतद्वित्वे तादृशनिश्चयवृत्तितावच्छेदकतात्वावच्छिन्नप्रतियोगिता- कपर्य्याप्त्यनुयोगितावच्छेदकत्वाभावो निवेश्यते तदा न लाघवप्रत्याशेति दिक् ॥ श्रीः ॥ ॥

यत्तु प्रतिबन्धकताशून्यतादृशनिश्चयावृत्तित्वमेवानति-

---

१ नन्वत्र लाघवाभावेपि तुल्यत्वेन विनिगमनाविरह इति चेन्न । अत्रोभयत्र न्यूनाधिकवारकपर्य्याप्तिसंकलि- ताभावस्य निविष्टत्वात् सिद्धान्तेचैकाभावस्य निवेशेन लाघवस्य जागरूकत्वादिति ध्येयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिक्तवृत्तित्वमित्यादिशुद्धह्रदत्वावच्छिन्नेनातिप्रसङ्गाच्चेति॥

नन्वत्र प्रतिबन्धकताशून्यतादृशनिश्चयावृत्तित्वमित्यनेन प्रकृतानुमितिप्रतिबन्धकताशून्यानाहार्य्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तिविषयितानिरूपकतानवच्छेदकं यद्रूपं तद्वत्त्वं विवक्षितं तथाच नोक्तातिव्याप्तिः ह्रदत्वस्य तादृशप्रतिबन्धकताशून्यतादृशनिश्चयवृत्तिविषयितानिरूपकतावच्छेदकत्वात्। नच ह्रदत्वे तादृशनिश्चयनिष्ठविषयितानिरूपकतावच्छेदकत्वसत्त्वे विशिष्टह्रदत्वे तादृशाभावस्य दुर्घटत्वादसंभव इति वाच्यम्। प्रतिबन्धकताशून्यतादृशनिश्चयनिष्ठविषयिताविशिष्टान्यधर्म्मविशिष्टवत्त्वस्य विवक्षणीयत्वात् धर्म्मे विषयितावैशिष्ट्यंच स्वनिरूपितनिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्य्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन सच धर्म्मः ह्रदत्वादिनिष्ठमेकत्वमेव नतु वह्न्यभाववद्ध्रदत्वगतसमुदायत्वमित्यसंभवाभावात् । नचासाधारण्ये व्याप्तिरसाधारण्यतावच्छेदकधर्म्मस्य वह्निव्यापकीभूताभावप्रतियोगित्ववज्जलत्वादेः पक्षधर्म्मताज्ञानासमानकालीनतादृशप्रतिबन्धकताशून्यासाधारण्यविषयकतादृशनिश्चयवृत्तिविषयितानिरूपकतावच्छेदकत्वादिति वाच्यम् । स्वमतेपि तादृशाव्याप्तेस्समानत्वात् यदिच स्वमते प्रकृतपक्षे प्रकृतहेतुमत्ताज्ञानसमानकालीनत्वप्रकृतानुमित्यप्रतिबन्धकत्वोभयाभावे यद्रूपावच्छिन्नविषयताशालिनिश्चयत्वव्यापकत्वं विवक्ष्यते तदैतन्मतेऽपि तादृशप्रतिबन्धकताशून्यासाधारण्यविषयताशून्यतादृशनिश्चयवृत्तिविषयितानिरूपकतानवच्छेदकत्वविवक्षणे न कश्चिद्दोष इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

चेन्न । ह्रदो वह्निमानित्यादौ कपिसंयोगाभाववत्कपिसंयोगवत्यतिव्याप्तेस्तद्विषयकज्ञानस्य नियताहार्य्यतया तादृशनिश्चयनिष्ठविषयितानिरूपकतानवच्छेदकत्वादिति दिक् ॥ श्रीः ॥

---

१ नन्वत्र प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशून्यो यः प्रकृतानुमितीयविषयताविशिष्टान्यो निश्चयस्तदवृत्तित्वस्य लक्षणघटकत्वान्नातिव्याप्तिः प्रकृतानुमितीयविषयितावैशिष्ट्यं च स्वनिरूपकतावच्छेदकधर्मावच्छिन्ननिरूपकताकविषयितावत्त्वस्वनिरूपकताऽवच्छेदकधर्मावच्छिन्नविषयितावज्ज्ञानाविषयकेच्छाप्रयोज्यविषयितावत्त्वान्यतरसम्बन्धेन तथाच ह्रदो वह्निमानित्यादौ ह्रदो वह्निमान्न वेत्यादिसंशयादिकमेव निरुक्तविषयिताविशिष्टं तदन्यं च घटवद्भूतलमित्यादिज्ञानं तदवृत्तित्वस्य वह्न्यभाववद्ध्रदत्वादौ सत्त्वाल्लक्षणसमन्वयः प्रकृतेच कपिसंयोगाभाववत्कपिसं-

CC-0. In Public Domain. Digitization by eGangotri

अथैवमपि जातित्वादिना ह्रदत्वादिविषयकस्य जातिमान्वह्न्यभाववानित्यादिज्ञानस्यापि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकतया तस्य ह्रदो वह्निमानित्याद्यनुमित्यविरोधितयाऽसंभव इति ॥ ॥

नन्वत्रासंभवाभिधानमसङ्गतं सामानाधिकरण्येन ह्रदे वह्नेः साध्यत्वेऽवच्छेदकावच्छेदेन बाधे लक्षणसयोगवत्त्वस्याऽतथात्वादिति चेन्न । एतत्कल्पे अभावस्य द्विधा निवेशेन उभयत्र न्यूनाधिकवारकपर्य्याप्तिनिवेशप्रयुक्तगौरवस्य दुर्वारत्वादिति ध्येयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

त्वात् तथाहि ह्रदत्वावच्छेदेन वह्न्यभावावगाहिज्ञाने ह्रदत्वव्यापकवह्न्यभावप्रतियोगिकस्वरूपस्य प्रकारसंबन्धतया तत्स्थलीयबाधे तादृशसंबन्धावच्छिन्नवह्न्यभावनिष्ठनिरूपकताकविषयितामादायैव लक्षणसमन्वयात् तादृशविषयितायाश्च जातिमान्वह्न्यभाववानिति ज्ञानेऽसत्त्वात् तत्राहि जातित्वावच्छिन्नव्यापकवह्न्यभावप्रतियोगिकस्वरूपमेव प्रकारसंबन्धस्तादृशसंसर्गकोटिप्रविष्टव्यापकत्वरूपाभावस्तु विलक्षण इति चेदत्र केचिदसंभवशब्देनाव्याप्तिरेवाभिहितेत्याहुः। अन्येतु व्यापकत्वरूपाभावगताभावत्वस्य प्रमेयत्वेन यत्र भानं ह्रदत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वीयप्रमेयविशिष्टवद्वह्न्यभावप्रतियोगिकस्वरूपसंबन्धेन वह्न्यभाववान्ह्रद इत्याकारकज्ञानस्य वारणासंभवेनासंभव एवेत्याहुः। वस्तुतस्तु

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्याप्तिशङ्कैव नावतरति अवच्छेदकावच्छेदेनोद्देश्यविधेयभावस्थलीयप्रतीतौ उद्देश्यतावच्छेदकता-पर्य्याप्त्यधिकरणधर्म्मनिरूपितव्यापकत्वमेव संसर्गशरीरे भासते नतु तदवच्छेदकावच्छिन्ननिरूपित-व्यापकत्वमपि तथासति अवच्छेदकाऽवच्छेदेन विरोधिधियः प्रतिबन्धकतावच्छेदकशरीरे धर्मितावच्छेदकावच्छिन्नत्वेन विशेष्यताया निवेशे प्रयोजनाभावः तद्धर्म्मावच्छिन्नव्यापकत्वघटितप्रकारतावच्छेदकसंसर्गकबुद्धेस्तद्धर्म्मावच्छिन्नविशेष्यकत्वनियमात् नचेष्टापत्तिः अवच्छेदकावच्छेदेन बाधस्य प्रतिब-

१ ननु ह्रदत्वावच्छिन्नव्यापकत्वघटितप्रकारतावच्छेदकसंसर्गकबुद्धित्वस्य ह्रदवृत्तिभेदप्रतियोगितावच्छेदकत्वाभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

न्धकतावच्छेदकविषयित्वानिरूपकधर्मितावच्छेदकघटिततया वह्न्यभाववद्ध्रदत्वावच्छिन्नस्य दोषत्वानु-
पपत्तेः एवंचोद्देश्यतावच्छेदकत्वपर्य्याप्त्यधिकरणघटितत्वस्य संसर्गत्वस्वीकारेऽवच्छेदकावच्छेदेन बा-
धनिश्चयप्रतिबन्धकतावच्छेदकशरीरे धर्मितावच्छेदकावच्छिन्नत्वेन धर्मिविशेष्यताया निवेश आवश्यकः

ववद्वह्न्यभावप्रतियोगिकस्वरूपसम्बन्धेन वह्न्यभाववानित्यादिज्ञाने सत्त्वेन तत्र ह्रदत्वावच्छिन्नविशेष्यताया असत्त्वा-
त्कथं तद्धर्मावच्छिन्नविशेष्यकत्वनियम इत्युपपद्यत इति चेदत्र नवीनविवेचनानिर्मातृश्रीरङ्गदेशिकचरणकृपालब्धविम-
र्शाः वदन्ति—तद्धर्मावच्छिन्नमित्यनेन ह्रदत्ववद्ध्रदवृत्तिभेदप्रतियोगितावच्छेदकत्वाभावरूपव्यापकत्वनिवेशः तथाच ह्र-
दत्वनिष्ठप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतायास्तत्र निविष्टत्वान्नानुपपत्तिगन्धोपीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यथा ह्रदो वह्निमानित्यादौ जातिमान्वह्न्यभाववानित्यादिनिश्चयान्तर्भावेण प्रतिबध्यप्रतिबन्धकभाव-व्यभिचारात् । तादृशनिश्चयस्यापि ह्रदत्वव्यापकवह्न्यभावप्रतियोगिकस्वरूपसम्बन्धेन वह्न्यभावप्रकार-कत्वात् । धर्मितावच्छेदकावच्छिन्नत्वेन विशेष्यतानिवेशेतु प्रतिबध्यज्ञानीयविशेष्यतावच्छेदकता यादृशी तादृश्या एव प्रतिबन्धकतावच्छेदकशरीरे नीवेशनीयतया न व्यभिचारः एवंच जातिमान्वह्न्य-भाववानिति ज्ञानेऽप्यवच्छेदकावच्छेदेन बाधे यां विषयतामादाय लक्षणं संगमनीयं तस्याः सत्त्वात् कथं सामानाधिकरण्येन साध्यकस्थले लक्षणसमन्वय इति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

जलवान्वह्निमानित्यादिस्थलीयदोषासंग्रहेणाविशेषितधर्म्मावच्छिन्न-
पक्षादिस्थलीयस्यापि किंचिद्विशिष्टतद्घटितदोषस्यासंग्रहेणच पक्ष-
तावच्छेदकाद्यंशेऽन्याऽप्रकारकत्वनिवेशस्याशक्यत्वादिति ॥

नन्वत्र पक्षतावच्छेदकाद्यंशे किंतावदन्याप्रकारकत्वं यदि पक्षतावच्छेदकनिष्ठविशेष्यतानिरूपित-प्रकारत्वानिरूपकत्वं तदा ह्रदो वह्न्यभाववानिति ज्ञानस्याप्यसंग्रहस्तस्यापि सामानाधिकरण्यसम्बन्धावच्छिन्नह्रदत्वनिष्ठविशेष्यतानिरूपितवह्न्यभावनिष्ठप्रकारतानिरूपकत्वात् तथाचासम्भवः । नच ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृशप्रकारतायां प्रकारत्वानवच्छिन्नत्वं षिशेषणं देयं दोषज्ञानीयह्रदत्वांशे सामानाधिकरण्येन वह्न्य-
भावप्रकारताया ह्रदत्वावच्छिन्नविशेष्यतानिरूपितप्रकारत्वावच्छिन्नतया न तदसंग्रहः जातिमान्वह्न्य-
भाववानिति ज्ञानस्य ह्रदत्वनिष्ठविशेष्यतानिरूपितजातित्वनिष्ठतादृशप्रकारतानिरूपकत्वात्तद्वारणं चे-
ति वाच्यम्। तादृशज्ञानवारणेपि प्रमेयत्वेन प्रकारतावच्छेदकावगाहिनो ह्रदो वह्नीयप्रमेयवत्त्वानिति ज्ञा-
नस्यावारणात् । नचादिपदग्राह्यप्रकारतावच्छेदकांशेऽन्याप्रकारकत्वं निवेश्यतामिति वाच्यम् । ह्रदो
वह्न्यभाववानिति ज्ञानस्यापि प्रकारतावच्छेदकीभूतवह्न्यंशे वह्नित्वप्रकारकत्वेनासंग्रहापत्तेरिति चेन्न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

विशेष्यताविशिष्टविशेषणत्वानिरूपकत्वस्य तत्त्वात् । विशेष्यतावैशिष्ट्यञ्च स्वनिरूपितत्वस्वा-

१ अथैवमपि विशिष्टे वैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदको धर्मः स्वविशेष्ये भासमानस्सन् विशेष्यतावच्छेदकेपि भासते धर्मिपारतन्त्र्येणेति युक्तिबलात् वह्नित्वस्याभावत्वांशे विशेषणत्वेन तन्निष्ठविशेषणताया निरुक्तोभयसम्बन्धेनाभावत्वनिष्ठविशेष्यताविशिष्टतया ह्रदो वह्न्यभाववानित्यादिज्ञानसंग्रहासम्भव इति चेन्न। विशिष्टस्य वैशिष्ट्यमिति व्युत्पत्तिसिद्धार्थं गृहीत्वा विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदको धर्मः स्वविशेष्ये भासमानस्सन् स्वविशेष्यविशेष्येपि भासत इति नियमात् वह्नित्वस्य विशेषणत्वे निरुक्तदोषासम्भवादिति विभावयन्तु तर्करसिकाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वच्छेद्यावच्छेदकतानिरूपकविषयतानिरूपितविशेषणत्वानवच्छिन्नत्वोभयसम्बन्धेन जातिमान्वह्न्य-
भाववानिति ज्ञानञ्च जातिनिष्ठविशेष्यतया निरूपिता तादृशविशेष्यत्वावच्छेद्यावच्छेदकतानि-
रूपकजात्यवच्छिन्नविशेष्यतानिरूपितवह्न्यभावनिष्ठविशेषणत्वानवच्छिन्नाच या जातित्वनिष्ठविशेषण-
ता तन्निरूपकमिति तदसंग्रहः ह्रदो वह्न्यभाववानिति ज्ञानञ्च न तादृशविशेषणतानिरूपकं ह्रद वह्न्य-
भाव निष्ठविशेष्यत्वावच्छेद्यावच्छेदकत्वाप्रसिद्धेः वह्निनिष्ठविशेष्यत्वावच्छेद्यावच्छेदकत्वप्रसिद्धावपि त-
न्निरूपकाभावत्वावच्छिन्नप्रकारतानिरूपितविशेषणत्वाप्रसिद्धेश्च विशेष्यताविशिष्टविशेषणतायां पक्षता-
वच्छेदकतावच्छेदकत्वानवच्छिन्नत्वस्य स्वनिरूपितावच्छेदकत्वावच्छिन्नत्वसम्बन्धावच्छिन्नपक्षतावच्छे-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दकत्वाभाववत्त्वस्य वा निवेशे जलवान्वह्न्यभाववानित्यादिस्थलीयदोषासंग्रहाभावेनाविशेषितधर्म्मावच्छिन्नेत्यादि तथाच ह्रदो वह्निमान्जातिमत इत्यादिस्थलीयव्यभिचारे वह्न्यभाववद्वृत्तिजातिमत्त्वव्याप्तिः तादृशव्यभिचारज्ञानस्य जातिवृत्तिविशेष्यतानिरूपिता तादृशविशेष्यत्वावच्छेद्याऽवच्छेदकतानिरूपकजात्यवच्छिन्नविशेष्यतानिरूपितवह्न्यभाववद्वृत्तित्वनिष्ठविशेषणत्वानवच्छिन्नाच या जातित्वनिष्ठविशेषणता तन्निरूपकत्वात् तस्यां चोक्तसम्बन्धेन पक्षतावच्छेदकत्वाभाववत्वस्यच सत्त्वादिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यद्रूपावच्छिन्नस्य यस्य यस्य विशिष्टघटकता तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयिताभिन्नकिंचिदवच्छिन्नविषयिताशून्यत्वं ज्ञाने निवेशनीयमिति ॥

अत्रकेचित् यस्य यस्येत्यनुपादाने ह्रदो वह्निमानित्यादौ बाधासंग्रहः अभावत्वेन ह्रदत्वावगाह्यभाववान् वह्न्यभाववानिति ज्ञानावारणात् तत्राभावत्वावच्छिन्नस्य विशिष्टघटकतयाऽभावत्वावच्छिन्नविषयताभिन्नघटकान्तरविषयताभिन्ना किंचिदवच्छिन्नविषयताघटत्वावच्छिन्नविषयतैव तदनिरूपकत्वस्य तादृशज्ञाने सत्त्वात् । यस्य यस्येत्युपादाने चाभावत्वाऽवच्छिन्नस्याभावस्य विशिष्टघटकत्वेपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

तेन रूपेण ह्रदत्वस्य विशिष्टाऽघटकतया तद्रूपावच्छिन्नतन्निष्ठविषयतानिरूपकत्वात्तज्ज्ञानवारणम् तथाच यद्रूपावच्छिन्नविषयितान्यापकरूपविशिष्टविषयताभिन्नकिंचिदवच्छिन्नविषयत्वानिरूपकत्वं तदर्थः विषयिताव्यापकत्वञ्च रूपे स्वविशिष्टविषयतावत्त्वसम्बन्धेन स्ववैशिष्ट्यञ्च विषयतायां स्वावच्छिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन विषयतायां रूपवैशिष्ट्यञ्च एतदुभयसम्बन्धेन अभावत्वावच्छिन्नह्रदत्वविषयताच न तादृशरूपविशिष्टाऽभावत्वसामानाधिकरण्याभावात् अतो न तत्संग्रह इति वदन्ति । तन्न सम्यक् । ह्रदो वह्न्यभाववानिति ज्ञाने वह्न्यभाववद्ध्रदवैशिष्ट्यावगाहिबुद्धिनियामिकाया विलक्षणविषयिताया अभाववान्वह्न्यभाववानिति ज्ञानेऽसत्त्वात् अन्यथा तादृशज्ञानानन्तरं वह्न्यभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ववद्ध्रदं जानामीत्यनुव्यवसायापत्तेः । नच जातिमान्वह्न्यभाववानिति ज्ञानानन्तरमपि तादृशानुव्यवसायाभावात्तत्रापि तादृशविषयिताया अभावप्रसङ्गः तथाच तादृशज्ञानमादाय दोषकथनासङ्गतिरिति वाच्यम् । जातिमान्वह्न्यभाववानिति ज्ञाने जातित्वादिघटितसमुदायवृत्तिसमुदायत्ववृत्तिनिरूपकताकविषयिताया एवाधिकन्यूनवारकपर्य्याप्तिघटितायास्तत्र सत्त्वात् जातित्वाऽघटितह्रदत्वादिघटितसमुदायत्ववृत्तिनिरूपकताकविषयितया वह्न्यभाववद्ध्रदं जानामीति विशिष्टबुद्धिनियामिकायास्तत्राऽसत्त्वान्न जातिमान्वह्न्यभाववानिति ज्ञानानन्तरं तादृशानुव्यवसायप्रसङ्गः अधिकन्यूनवारकपर्य्याप्तिघटितनिरूपकताकविषयिताया एव शिष्टबुद्धिनियामकत्वस्वीकारात् अधिकवारकपर्य्याप्त्यघटि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्ध्रदत्वादिघटितसमुदायवृत्तिसमुदायत्वावच्छिन्नानुयोगितापर्य्याप्तिकावच्छेदकताकविषयिताया अपि जातिमान्वह्न्यभाववानिति ज्ञानेपि सत्त्वात्तदादाय दोषाभिधानसङ्गतिः अभाववान्वह्न्यभाववानिति ज्ञानेऽभावत्वस्य ह्रदत्वनिष्ठनिरूपकताव्यधिकरणतयाताद्दशज्ञानवृत्तिविषयितानिरूपकतावच्छेदकसमुदायेऽप्रवेशेनाभावत्वाघटितह्रदत्वादिघटितसमुदाय एव निरूपकतावच्छेदकतापर्य्याप्तेस्ताद्दशज्ञानावगाहिताद्दशानुव्यवसायापत्तिरतस्ताद्दशविषयिता ताद्दशज्ञाने नास्त्येवेति वस्तुतो ह्रदः प्रमेयवह्नित्ववत्वानित्यादिस्थलीयबाधेऽव्याप्तिस्तत्र प्रमेयत्वेन ह्रदत्वावगाहिज्ञानावारणादतो यस्य यस्येत्युपादानं

१ नन्वत्र प्रमेयवह्निसाध्यकस्थलपरित्यागे बीजाभाव इति चेन्न। गुरुधर्मस्यभावप्रतियोगितानवच्छेदकत्वेन वह्न्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाच तादृ[2]शविशिष्टावच्छिन्नभेदप्रतियोगितावच्छेदकताविशिष्टविषयताभिन्नविषयत्वानिरूपकत्वं त-

भाववद्धृदस्य बाधत्वेनेष्टासिद्धेः। नच गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वं प्रतीतिबलात् अवच्छेदकत्वं साधितमवच्छेदकत्वनिरुक्तौ शिरोमणिनेति वाच्यम्। प्रमेयवह्न्यभाववद्धृदस्य शुद्धवह्न्यभाववद्धृदघटितत्वेन बाधत्वासम्भवादतस्तत्परित्याग इति ध्येयम्।

१ तादृशविशिष्टावच्छिन्न इत्यनेन दोषतावच्छेदकह्रदत्वविशिष्टोह्रदाद्यवच्छिन्नप्रतियोगिताको ह्रदवान्नेति प्रतीतिसिद्धो भेदो ग्राह्यः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

दर्थः विषयतायामवच्छेदकतावैशिष्ट्यं स्वावच्छेदकावच्छिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन असंग्राह्यज्ञानीयप्रमेयत्वावच्छिन्नह्रदत्वनिष्ठविषयताच न तादृशप्रतियोगितावच्छेदकताविशिष्टेति तदसंग्रहः अवच्छेदकतावैशिष्ट्यघटकावच्छेदकताच साक्षात् अतो ह्रदत्वनिष्ठाऽवच्छेदकतायां प्रमेयत्वस्य परम्परयाऽवच्छेदकत्वेपि न क्षतिरिति दिक् ॥ श्रीः ॥

---

१ एतादृशाव्यापकविषयताशून्यत्वनिवेशेऽप्यभावत्वेन ह्रदत्वावगाह्यऽभाववान् वह्न्यभाववानिति ज्ञानमादायासम्भववारणं कथमिति चेत् यद्यद्रूपावच्छिन्नस्येत्यादिपूर्वोक्तविशेषणस्यापि सत्त्वात् जातिमान् वह्निमानित्यादिस्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लीयवह्न्यभाववज्जातिमति बाधेऽव्याप्तिः घटत्वादिरूपवह्न्यभाववज्जातिमत्त्वावच्छिन्नविषयत्वाव्यापकविषयतात्वस्य चालनीन्यायेन घटत्वह्रदत्वरूपवह्न्यभाववज्जातिमत्त्वावच्छिन्नविषयत्वस्य सत्त्वात् तच्छून्यत्वस्य कुत्रापि दोषज्ञानेऽभावात् यदिच यद्रूपपदेन दोषतावच्छेदकमनुपादाय दोषविषयितानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकधर्ममादाय तद्विशिष्टविषयताघटितलक्षणस्य निर्दुष्टत्वम् एवंचेत्तर्हि प्रथमलक्षणेपि यथार्थेति व्यर्थमित्यसङ्गतम् अभाववान् वह्न्यभाववानित्यादिज्ञानवारणेन तस्य सार्थकत्वात् इति चेन्न। विषयितासम्बन्धेन यद्रूपावच्छिन्नविशिष्टनिश्चयत्वव्यापकं प्रकृतानुमितिप्रतिबन्धकत्वमिति लक्षणाभिप्रायेण तद्वैयर्थ्याभिधानात् प्रकारान्तरेण द्वितीयलक्षणकरणं तु शिष्यबुद्धिव्युत्पादनार्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

यद्रूपावच्छिन्नविषयतात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयताशून्यत्वस्य ज्ञानविशेषणतयेति ॥

यद्रूपावच्छिन्नविषयितावद्वृत्तिर्यः किंचिद्रूपावच्छिन्नविषयता नास्तीति प्रतीतिसिद्धः किंचिद्रूपनिष्ठाऽवच्छेदकताभिन्नावच्छिन्नतात्वनिष्ठाऽवच्छेदकताभिन्नावच्छेदकत्वानिरूपकतादृशाऽवच्छेदकतानिरूपकावच्छिन्नत्वनिष्ठाऽवच्छेदकताभिन्नविषयितात्वनिष्ठाऽवच्छेदकताभिन्नावच्छेदकत्वानिरूपकप्रतियोगिताकाभावस्तत्प्रतियोगिविषयिता नास्तीति प्रतीतिसिद्धाभावं तद्व्यक्तित्वेनोपादाय तन्निष्ठाऽवच्छेदक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताभिन्ना सती यद्रूपावच्छिन्नविषयितानिष्ठाऽवच्छेदकताभिन्ना तादृशनिश्चयत्वनिष्ठाऽवच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकेत्यादिरीत्या निश्चयनिष्ठाऽवच्छेदकतानिरूपकवृत्तित्वनिष्ठाऽवच्छेदकतानिरूपकभेदनिष्ठाऽवच्छेदकतानिरूपकप्रतियोगित्वनिष्ठाऽवच्छेदकतानिरूपकाऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकाभावः प्रतिबन्धकतायां निवेशनीय इति दिक् ॥ श्रीः ॥

नच सामान्यपदस्य व्यापकत्वार्थकतया प्रतिबन्धकतावच्छेदकतायां विशिष्टविषयितात्वव्यापकत्वं प्रवेश्यं तदपेक्षया प्रतिबन्धकतायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

विशिष्टविषयिताऽव्यापकत्वनिवेशनमेवोचितमिति वाच्यमिति ॥ ॥

नन्वत्र प्रतिबन्धकतावच्छेदकतायां विशिष्टविषयितात्वव्यापकत्वापेक्षया प्रतिबन्धकतायां विशिष्ट-विषयताव्यापकत्वनिवेशनमेवोचितामित्यनेन लाघवमभिप्रेतम् । तन्न सम्भवति । लाघवस्य विपरीत-त्वात् प्रतिबन्धकतायां व्यापकत्वनिवेशे विशिष्टविषयितावन्निश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं ना-स्तीति प्रतीतिसिद्धाभावस्य निवेशनीयतया तत्प्रतियोगितावच्छेदककुक्षौ निश्चयस्यापि निवेशा-त्तादृशाभावश्च गुरुशरीरः एतन्मते विशिष्टविषयितानिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिसिद्धाभावस्य निवेशात्तत्र निश्चयस्यावच्छेदककुक्षावनिवेशेन तादृशाभावो लघुशरीर इत्येतद्विवक्षाया एव लघुशरीरत्वात्। नचाहार्य्यादिविषयतायाः प्रतिबन्धकतावच्छेदकत्वाभावादसम्भववारणायानाहार्य्यनिश्चयीययद्रूपावच्छिन्नविषयितानिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावस्यैव निवेशनीयतया तदंशे तौल्यं प्रतिबन्धकतावच्छेदकतायां व्यापकत्वस्य नीवेशनीयतया लक्षणशरीरं गुर्वीति वाच्यम्। तन्मतेपि प्रतिबन्धकतायामेवाऽवच्छेदकतासम्बन्धेन व्यापकत्वस्य वक्तव्यत्वात्। न चैवंसति स्वमते तादृशनिश्चयनिष्ठान्यताभावाऽप्रतियोगित्वरूपव्यापकत्वनिवेशनं सम्भवति तन्मते वृत्त्यनियामकसम्बन्धस्यात्यन्ताभावप्रतियोगितानवच्छेदकत्वेनावच्छेदकतासम्बन्धावच्छिन्नप्रतियोगिताकात्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

न्ताभावाप्रसिद्धेः तादृशविषयितानिष्ठतत्सम्बन्धावच्छिन्नभेदप्रतियोगितावच्छेदकत्वाभावस्यैव निवेशनीय-
तया तादृशव्यापकत्वरूपाभावप्रतियोगितावच्छेदकत्वं प्रतियोगितायामपीति गौरवमिति वाच्यम्। तथापि
तादृशात्यन्ताभावाप्रतियोगित्वस्य कुत्राप्यसत्त्वात्तादृशात्यन्ताभावप्रतियोगितानिरूपितावच्छेदकतात्वा-
वच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितानवच्छेदकैकैकत्ववदुभयावृत्तिधर्म्मवत्त्वं विवक्षणीयम् धर्म्मे उभ-
यावृत्तित्वानुपादाने तादृशैकत्ववत्प्रमेयत्ववत्त्वमादायोदासीनेऽतिव्याप्तेस्तथाच स्वमते एव गौरवात्। नच
तथापि तन्मतेपि तादृशविषयितावृत्तितादृशप्रतिबन्धकतावद्घटोभयभेदं तादृशप्रतिबन्धकतावद्वह्नित्वा-
वच्छिन्नविषयित्वादिभेदं चादायासम्भववारणायोक्तविवक्षाऽवश्यकीति वाच्यम्। तथापि तादृशविषयि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावृत्तिभेदप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितानवच्छेदकैकत्ववत्त्वस्यैव
विवक्षणीयत्वात् तद्व्यक्तेः स्वरूपतो भानाङ्गीकारेण तद्व्यक्तिमान्नेत्याकारकभेदस्य तादृशविषयिता-
यामसत्त्वेन तादृशैकत्ववदुभयावृत्तिधर्म्मवत्त्वस्याऽविवक्षणीयतया लाघवस्याऽनपायादिति चेन्न । तद्व्य-
क्तेः स्वरूपतो भानानङ्गीकारे तादृशविवक्षायां विषयितावृत्तिर्यत्किञ्चित्प्रतिबन्धकताव्यक्तिमद्भेदमा-
दायासम्भववारणाय तादृशविषयितावृत्तिभेदप्रतियोगितावच्छेदकतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनु-
योगितानवच्छेदकैकत्ववद्धर्म्मवत्त्वस्य विवक्षणीयतया तादृशधर्म्मे उभयावृत्तित्वानुपादाने तादृशप्रमेय-
त्ववत्त्वमादायोदासीनेऽतिव्याप्तेः तथाच गौरवं दुष्परिहरमेवेति । अथवा स्वमते तादृशनिश्चयवृत्त्यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

भयावृत्तिधर्म्मेतरधर्म्मानवच्छिन्नप्रतियोगिताकात्यन्ताभावाप्रतियोगित्वं विवक्षणीयं तन्मते विषयितावृत्त्युभयावृत्तिधर्म्मेतरधर्मानवच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपकप्रतियोगिताकभेदप्रतियोगितातावच्छेदकत्वाभावो वक्तव्य इति गौरवमिति दिक् ॥ श्रीः ॥

---

१ नन्वत्रावच्छेदकतासम्बन्धस्यावच्छेदकतात्वेन प्रवेशो न सम्भवति तस्याननुगतत्वात् तथाच यत्किंचिदवच्छेदकतात्वेन निविशो भाव्यः तथा निवेशेऽसम्भवः तथाहि अप्रामाण्यज्ञानाभावनिष्ठस्वनिरूपितावच्छेदकतात्मकव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्यैव प्रतिबन्धकतायां सत्त्वेन तदभावरूपव्यापकत्वस्यासत्त्वादिति चेन्न। स्वनिरूपितनिरूपकत्वसम्बन्धावच्छिन्नावच्छेदकत्वस्यैव प्रतियोगितावच्छेदकताघटकत्वादिति ध्येयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताद्दशाहार्यज्ञानसमानाकारकानाहार्य्यज्ञानाप्रसिद्धेरिति ॥

अत्र तत्समानाकारत्वं नाम तद्वृत्तिमुख्यविशेष्यतावृत्तित्वम् मुख्यविशेष्यतावृत्तित्वञ्च स्ववृत्तिमुख्यविशेष्यतावत्त्वसम्बन्धेन मुख्यविशेष्यतावत्त्वञ्च स्वसमनियतत्वस्वनिरूपितविषयतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकधर्म्मवृत्तित्वोभयसम्बन्धेन धर्म्मवृत्तित्वञ्च स्वनिरूपितविषयतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन अत्र प्रथमसम्बन्धनिवेशाद्धटत्वेन घटपटावगाहिज्ञानयोः समानाकारत्वव्यावृत्तिः सामानाधिकरण्यमात्रनिवेशनेन तद्व्यावर्तनेपि घटत्वेनैकघटावगाहिज्ञानस्य ताद्दशनानाघटावगाहिज्ञानस्यच घटत्वेन घटपटावगाहिज्ञानस्य समानाकारकत्वापत्तिः अतस्तदुपेक्षणम् समनिय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

तत्वघटकदलद्वयमपि घटत्वेनैकानेकघटविषयकज्ञानयोर्वारणार्थमेव तज्ज्ञानवृत्तिमुख्यविशेष्यतावृत्तित्व-मित्यत्र मुख्यत्वानुपादाने घटवद्भूतलमित्याकारकज्ञानस्य घटवद्भूतलवान्देश इत्याकारकज्ञानसमानाका-रत्वापत्तिः तदीयघटत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यतायां स्वीयमुख्यविशेष्यताव-त्त्वसम्बन्धेनोक्तज्ञानस्य सत्त्वात् ज्ञानवृत्तिताघटकविशेष्यतायां मुख्यत्वानुपादाने उक्तोत्तरज्ञानस्य पू-र्वज्ञानसमानाकारत्वापत्तिः द्वितीयसम्बन्धानिवेशे घटत्वेन घटज्ञानस्य पटत्वेन घटज्ञानस्य घटो रूप-वान्घटो रसवानित्याकारकज्ञानयोश्च समानाकारत्वापत्तिरिति दिक् ॥ श्रीः ॥

१ ननु समानाकारकत्वस्य निरुक्तरूपत्वे ह्रदो जातिमानित्याकारकज्ञानस्य एकत्र द्वयमिति रीत्या जातिह्रदत्ववान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसति अनाहार्य्यज्ञानीयविशिष्टविषयितात्वव्याप-
कताया एव विवक्षणीयत्वादिति ॥ ॥

ह्रद इत्याकारकज्ञानेन समानाकारत्वापत्तिर्दुर्वारैव नचैवमिष्टापत्तिः अनुभवविरोधादिति चेन्न। स्वनिरूपितविषयता-त्वावच्छिन्नेत्यादिकमपहाय स्वनिरूपकवृत्त्यनुव्यवसायत्वावच्छिन्नजन्यतानिरूपितजनकतावद्वृत्तित्वस्य निवेशात् तथा-च जातिह्रदत्ववान् ह्रद इत्याकारकज्ञानवृत्त्यनुव्यवसायत्वावच्छिन्नजन्यतानिरूपितजनकताया जातिमान् ह्रद इत्याका-रकज्ञानेऽभावेन सर्वं निर्मलमिति ध्येयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

नन्वत्रानाहार्य्यत्वाऽनिवेशेपि नासम्भवः अनियताहार्य्यविषयतायां स्वरूपसम्बन्धरूपावच्छेदकत्व-
सत्त्वात् नियताहार्य्यविषयतामादायापि नासम्भवः आहार्य्यभेदनिवेशेऽप्येतत्कल्पेऽव्यापकविषयताशू-
न्यत्वनिवेशनमावश्यकमन्यथा ह्रदे वह्नेः सामानाधिकरण्येन साध्यतास्थले जात्यवच्छेदेन वह्न्यभावा-
वगाहिजातिमान्वह्न्यभाववानिति ज्ञानस्य ह्रदो जातिमानिति ज्ञानविशिष्टस्य प्रतिबन्धकतया तादृ-
शज्ञानीयवह्न्यभाववद्ध्रदत्वात्मकजात्यवच्छिन्नविषयितायां प्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूप-
सम्बन्धरूपावच्छेदकत्वसत्त्वेप्यवच्छेदकावच्छेदेन साध्यतास्थलीयसामानाधिकरण्येन दोषेऽव्याप्तिः सामा-
धिकरण्येन वह्न्यभावावगाहिनो जातिमान्वह्न्यभाववानिति ज्ञानस्य जातिमान् ह्रद इति ज्ञानविशि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टस्याप्रतिबन्धकत्वात् एवञ्च नियताहार्य्यज्ञाने दोषविषयित्वाव्यापकविषयिताशून्यत्वाभावादेव तदीय-विषयिताव्यावृत्तेः । नच वह्निमान्ह्रदो वह्न्यभाववानित्याहार्य्येपि दोषविषयिताऽव्यापकविषयिता न कापि विषयितेति वाच्यम् । यद्रूपावच्छिन्नविषयित्वावच्छिन्नयद्रूपावच्छिन्नविषयित्वं विशिष्टविषयित्वा-ऽव्यापकं तद्रूपावच्छिन्नविषयित्वावच्छिन्नतद्रूपावच्छिन्नविषयित्वशून्यत्वस्याव्यापकविषयिताशून्यत्वप-दार्थत्वात् उक्ताहार्य्येच संयोगावच्छिन्नविषयित्वावच्छिन्नह्रदत्वावच्छिन्नविषयितायाः अव्यापकीभू-तायाः सत्त्वेन तदसंग्रहात् विशेषणान्तरप्रक्षेपापेक्षयोक्तविशेषणपरिष्कारस्यौचित्यादिति चेन्न । ह्रदे-स्वरूपतो भेदत्वसाधने भेदभेदवद्ध्रदरूपे बाधेऽव्याप्तेः तत्र भेदभेदवद्ध्रदो भेद इति नियताहार्य्यज्ञाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्रूपावच्छिन्नविषयित्वावच्छिन्नयद्रूपावच्छिन्नविषयिता भेदभेदवद्भेदत्वावच्छिन्नविषयित्वाव्यापिका तादृशविषयितायाः कस्या अप्यभावात् यद्रूपावच्छिन्नविषयिताव्यापिकेत्यस्या अप्युक्तावपि भेदत्ववद्भेदभेदवद्भेदत्वावच्छिन्नविषयित्वाऽप्रसिद्ध्यैव तज्ज्ञानाऽवारणात् तत्रच दोषविषायितायास्सत्त्वात् भेदभेदवद्भेदत्वावच्छिन्नविषयित्वावच्छिन्नभेदत्वावच्छिन्नविषयितापि व्यापिकैव भेदत्वावच्छिन्नावच्छेदकतानिरूपितविषयितायास्तादृशत्वात् । नचैवमपि यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयता तादृशविशिष्टविषयित्वाव्यापिका तद्रूपावच्छिन्नविषयतानिरूपिततद्रूपावच्छिन्नविषयताशून्यत्वविवक्षणे न तत्राव्याप्तिस्तादृशाहार्य्ये स्वरूपावच्छिन्नविषयतानिरूपितभेदभेदवद्भेदत्वावच्छिन्नविशेष्यताख्य-

CC-0. In Public Domain. Digitization by eGangotri

विषयतायाः भेदभेदवान्ह्रद इति ज्ञानेऽसत्त्वेन तदसंग्रहादिति वाच्यम्। भेदभेदेऽवृत्तित्वसाधने भेदभेदवति बाधेऽव्याप्तेस्तत्र तादृशदोषविषयतावति भेदत्वेन घटावगाहिनि भेदो भेदभेदवानिति नियताहार्य्ये भेदभेदावच्छिन्नविषयिताव्यापिका यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयता तस्याः यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयिता तस्याश्चासत्त्वात् भेदो भेदभेदवानित्याहार्य्यज्ञानीयाया भेदभेदत्वावच्छिन्नविषयतानिरूपिताया भेदत्वावाच्छिन्नविषयतायाः स्वरूपत्वावच्छिन्नविषयतायाश्च व्यापकत्वात् भेदभेदावाच्छिन्नविषयतातु तादृशाहार्य्यें नास्त्येव भेदभेदवद्भेदत्वावच्छिन्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयिता त्वप्रसिद्धैव व्यधिकरणस्य निरूपकतानवच्छेदकत्वात् भेदभेदस्य निरूपकताव्यधिकरणत्वात् तथाच अनाहार्य्यत्वविशेषणमावश्यकमेवेति दिक् ॥ श्रीः ॥

यद्रूपावच्छिन्नविषयितासामान्यमित्यत्र सामान्यपदं व्यर्थमुक्तयुक्त्याऽव्यापकविषयिताशून्यत्वस्य निवेशनीयतया एकदेशेऽतिव्याप्तिविरहात् एकदेशविषयितायाः दोषविषयकज्ञानीयाया एव तादृशप्रतिबन्धकतावच्छेदकतया तस्य ज्ञानस्यैकदेशविषयित्वाऽव्यापकविशिष्टविषयितावत्त्वात् । नच गोत्वाभावो गोत्वाभाववानित्यत्र गोत्वाभावेऽतिव्याप्तिः गोत्वाभावो गोत्ववानिति ज्ञानीयगोत्वाभावविषयितायाः प्रतिबन्धकतावच्छेदकत्वात् तत्रच ज्ञाने गोत्वाभावविषयिताऽव्यापकविषयिताया अस-

CC-0. In Public Domain. Digitization by eGangotri

त्वात् सामान्यपदोपादाने गोत्वाभाव इति ज्ञानीयतद्विषयितायाः प्रतिबन्धकतानवच्छेदकतया न दोष इ- ति वाच्यम्। यद्रूपावच्छिन्नविषयिता तादृशविशिष्टविषयिताऽव्यापिका तद्रूपावच्छिन्नविषयिताशून्यत्वस्य विवक्षणीयतयोक्तदोषाभावात् तादृशोक्तप्रतिबन्धकज्ञाने गोत्वाभावत्वावच्छिन्नविषयिताऽव्यापकगोत्वाभा-

---

१ गोत्वाभावत्वावच्छिन्नविषयिताऽव्यापकेत्यस्यायमाशयः गोत्वविशिष्टविषयिताऽव्यापिका यद्रूपावच्छिन्नविषयता तद्रूपावच्छिन्नविषयताशून्यत्वमेवोपादेयम् । तत्रच गोत्वाभावत्वविशिष्टविषयित्वाधिकरणे गोत्वाभाव इत्याकारक- ज्ञाने गोत्वाभावत्वावच्छिन्नविषयितायाः असत्त्वादिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत्वावच्छिन्नविषयतायाः सत्त्वेन तज्ज्ञानवारणात्। नचैवमपि वह्निर्वह्निमानित्यादौ वह्न्यभावाद्यवच्छिन्नेऽतिव्याप्तिः वह्न्यभावाद्यवच्छिन्नविषयित्वाऽव्यापकवह्न्यभाववद्वह्नित्वावच्छिन्नविषयिताशून्यत्वस्य दोषज्ञाने सत्त्वात्तदीयवह्न्यभावाद्यवच्छिन्नविषयितायाः प्रतिबन्धकतावच्छेदकत्वात् एवं ह्रदो जात्यभाववानित्यत्र बाधेऽव्याप्तिश्च उक्ताव्यापकविषयताशून्यत्वविशेषणेन जातिमज्ञातिमानिति ज्ञानावारणादिति वाच्यम्। यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयता विशिष्टविषयित्वाऽव्यापिका तद्रूपावच्छिन्नविषयतानिरूपिततद्रूपावच्छिन्नविषयताशून्यत्वविवक्षणेनोक्तदोषवारणात् गोत्वाभावत्वावच्छिन्नविषयतानिरूपितसमवायावच्छिन्नविषयतायाः गोत्वाभावो गोत्ववानिति ज्ञाने सत्त्वात् एवं वह्निर्वह्न्यभाववानिति

CC-0. In Public Domain. Digitization by eGangotri

ज्ञाने वह्न्यभावावच्छिन्नविषयिताऽव्यापिका या वह्नित्वावच्छिन्नविषयितानिरूपितस्वरूपत्वावच्छिन्नविषयतायास्सत्त्वात् एवं जातिमाञ्जातिमानिति ज्ञानेच जातित्वावच्छिन्नविषयतानिरूपितजात्यवच्छिन्नविषयताया जातिमद्भेदत्वावच्छिन्नविषयित्वाऽव्यापिकायास्सत्त्वात् इति चेन्न। यत्र स्वरूपे स्वरूपवद्भेदत्वं साध्यते तत्र स्वरूपवद्भेदत्ववद्भेदवत्स्वरूपं बाधः तत्र स्वरूपवद्भेदत्ववद्भेदवत्यातिव्याप्तिः तादृशभेदावच्छिन्नविषयित्वाऽव्यापिकायास्तादृशविषयतायाः प्रतिबन्धकीभूतदोषज्ञानेऽसत्त्वात्तज्ज्ञानीयतादृशभेदावच्छिन्नविषयितायाः प्रतिबन्धकतावच्छेदकत्वात् यद्रूपावच्छिन्नविषयता तादृशविशिष्टविषयिताऽ-

१ एवमपि धर्मितया स्वरूपत्वेन पदार्थान्तरावगाहिबाधभ्रमविषये स्वरूपवद्भेदत्ववद्भेदवत्यतिव्याप्तिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यापिका तद्रूपावच्छिन्नविषयिताशून्यत्वमपि निवेश्यं तादृशभेदावच्छिन्नविषयित्वाऽव्यापकविशिष्ट-दोषविषयिताशून्यत्वस्य तादृशदोषज्ञानेऽभावेन तद्दोषवारणमिति चेद्गौरवमिति दिक् ॥ श्रीः ॥

यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्तितादृशविशिष्टद्वयाघटितत्वे सतीति ॥

अत्र तादृशविशिष्टद्वयाघटितत्वं तादृशविशिष्टद्वयविषयताशून्यज्ञानविषयत्वं तच्च यदि तादृशविशिष्ट-विषयताशून्यत्वे सति तादृशविशिष्टविषयताशून्यज्ञानघटितं तदा वह्न्यभाववद्ध्रदादिरूपदोषासंग्रहः ह्रदो

CC-0. In Public Domain. Digitization by eGangotri

वह्निमान्वह्निव्याप्यधूमवानिति समूहालम्बनानुमितिंप्रति वह्न्यभाववान्धूमाभाववान्वह्न्यभाववान्ह्रद इ-
त्याकारकनिश्चयस्य प्रतिबन्धकतया तादृशप्रतिबन्धकतानतिरिक्तवृत्त्युक्तनिश्चयविशिष्टवह्न्यभाववद्ध्रद-
विषयकनिश्चयत्वमपीति वह्न्यभाववद्ध्रदविषयताशून्यत्वस्य ह्रदो वह्न्यभाववानिति ज्ञानेऽसत्त्वात् ।
नापि तादृशविशिष्टविषयित्वतादृशविशिष्टविषयित्वोभयाभाववज्ज्ञानघटितं तथासति ह्रदो वह्न्यभाव-
वानिति ज्ञाने धूमाभाववह्न्यभाववत्त्वावच्छिन्नविषयित्वाऽभावेनोभयाभावसत्त्वात्तादृशदोषसंग्रहेपि ह्रदो
वह्निमानित्यत्र वह्न्यभावव्याप्यह्रदवृत्तिपङ्कजे धर्म्मितावच्छेदकविशेषणभावानापन्नवह्न्यभावव्याप्तिह्रदवृ-
त्तित्वघटितविशिष्टेऽतिव्याप्तिः वह्न्यभावव्याप्यं पङ्कजं पङ्कजवान्ह्रद इति ज्ञानयोरिव वह्न्यभावव्याप्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पङ्कजं ह्रदवृत्ति पङ्कजमिति ज्ञानयोरपि ज्ञानविशिष्टज्ञानत्वेन ह्रदे वह्न्यनुमितिप्रतिबन्धकतया वह्न्यभावव्याप्तिह्रदवृत्तित्वोभयमेकत्र द्वयमिति रीत्याऽवगाहमानवह्न्यभावव्याप्तिह्रदवृत्तित्ववत्पङ्कजमिति ज्ञाने विशेष्यताया ऐक्येन विषयिताद्वयशून्यत्वस्य सत्त्वात् तत्रच वह्न्यभावव्याप्तिप्रकारतानिरूपितपङ्कजत्वावच्छिन्नविशेष्यताशालिनिश्चयविशिष्टह्रदवृत्तित्वप्रकारतानिरूपितपङ्कजत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकतायाः प्रकृतानुमितिनिरूपितायाः सत्त्वात् किंतु तादृशविशिष्टविषयताविशिष्टतादृशविशिष्टविषयताशून्यज्ञानाविषयत्वम् अत्र प्रथमनिश्चयत्वानिवेशे जलवान्वह्न्यभाववान्न वेति ज्ञानविशिष्टजलवान्ह्रद इति निश्चये प्रतिबन्धकताविरहेण द्वितीये तदनिवेशे जलवा-

CC-0. In Public Domain. Digitization by eGangotri

न्वह्न्यभाववानिति निश्चयविशिष्टह्रदो जलवान्न वेति ज्ञानेच प्रतिबन्धकताविरहेण तादृशविशिष्टद्वय-
स्य यादृशविशिष्टपदेन धर्तुमशक्यतया वह्न्यभाववज्जलवत्कालीनघटजलवद्ध्रदकालीनघटादिकमेव ता-
दृशविशिष्टद्वयं तत्रोभयत्र निश्चयत्वानिवेशेपि विशिष्टवैशिष्ट्यबुद्धौ विशेषणांशे संशयास्वीकारेण
तादृशविशिष्टद्वयविषयकज्ञाने कालीनत्वांशे संशयात्मकेपि जलवत्त्वादिविशिष्टांशे वह्न्यभावादिसं-
शयात्मकत्वाभावेन प्रकृतानुमितिप्रतिबन्धकतासत्त्वात् तादृशविशिष्टद्वयविषयिताशून्यत्वस्योक्तविशि-
ष्टविषयकज्ञाने सत्त्वेन तत्रातिव्याप्त्यापत्तिरत उभयत्र निश्चयत्वनिवेशनम् । नन्वत्र निश्चयत्वनिवे-
शेपि जातिमत्वान्वह्न्यभाववान्जलवान्ह्रद इति निश्चययोर्जलवान्वह्न्यभाववान्जातिमत्वान्ह्रद इति नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रययोश्च प्रकृतानुमित्यप्रतिबन्धकतया तादृशविशिष्टद्वयाप्रसिद्धिनिबन्धनासम्भववारणायोभयत्र निश्चयेऽव्यापकविषयताशून्यत्वं निवेशनीयम् तथाच निश्चयत्वाऽनिवेशेपि जलवान्वह्न्यभाववान्न वा ह्रदो जलवान्न वेति संशययोर्वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयित्वाव्यापकवह्न्यभावाभावत्वावच्छिन्नविषयिताजलवद्ध्रदत्वावच्छिन्नविषयित्वाऽव्यापकाभावत्वावच्छिन्नविषयित्वाश्रययोर्वारणसम्भवेन तादृशविशिष्टद्वयस्य यादृशविशिष्टपदेन धर्तुं शक्यतया तत्रातिव्याप्तिविरहेणोभयत्र निश्चयत्वनिवेशवैयर्थ्यमिति चेन्न। अव्यापकविषयताशून्यत्वनिवेशेपि प्रथमनिश्चयत्वाऽनिवेशे वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यस्य जलवान्वह्निमान्न वेति संशयस्यावारणात्तादृशसंशयविशिष्टजलवान्ह्रद इति

CC-0. In Public Domain. Digitization by eGangotri

निश्चयस्याऽप्रतिबन्धकतया यादृशविशिष्टपदेन तादृशविशिष्टद्वयस्य धर्तुमशक्यतया तत्रातिव्याप्त्या-पत्तेः द्वितीये निश्चयत्वाऽनिवेशे वह्न्यभाववत्तेजोभाववद्वृत्तितेजोभाववद्ध्रदेतिव्याप्तिर्वह्न्यभाववान् तेजो-भाववानिति निश्चयविशिष्टस्य ह्रदस्तेजःस्वी न वेति संशयस्य तेजोभाववद्ध्रदत्वावच्छिन्नविषयित्वा-व्यापकविषयिताशून्यस्यानुमित्यप्रतिबन्धकतया यादृशविशिष्टपदेन तादृशविशिष्टद्वयस्य धर्तुमशक्य-त्वात्।नच यादृशविशिष्टविषयित्वाऽव्यापिका यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयता तद्रू-पावच्छिन्नविषयतानिरूपिततद्रूपावच्छिन्नविषयताशून्यत्वमुभयत्राऽव्यापकविषयताशून्यत्वमित्यनेन विव-क्षणीयम् तथाच जलवान्वह्निमान्न वेत्याकारकसंशये वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयित्वाऽव्यापि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कायाः संयोगत्वावच्छिन्नविषयतानिरूपितवह्नित्वावच्छिन्नविषयतायाः सत्त्वेन ह्रदस्तेजःस्वी न वेति संशयेच तेजोभाववद्ध्रदत्वावच्छिन्नविषयित्वाऽव्यापिकायाः संयोगत्वावच्छिन्नविषयतानिरूपिततेजस्त्वावच्छिन्नविषयतायास्सत्त्वेन चोक्तसंशययोर्वारणाद्यादृशपदेन तादृशाविशिष्टद्वयस्य धर्तुं शक्यतया तयोरतिव्याप्तिविरहेणोभयत्र निश्चयत्वांशो व्यर्थ इति वाच्यम् । ह्रदो भेद इत्यत्र भेदभेदवदभावभेदवद्वृत्त्यभावभेदवद्ध्रदेऽतिव्याप्तेः उक्ताव्यापकविषयताशून्यत्वविशेषणेनाभावभेदवान्भेदो न वेत्याकारकस्य स्वरूपतो भेदत्वभेदभेदकोटिकसंशयस्यावारणात्तत्र भेदभेदवदभावभेदवत्त्वावच्छिन्नविषयित्वाव्यापकीभूतायाः कस्या अपि तादृशविषयताया अभावात् एवं ह्रदोऽभावो न वेत्याकारकस्य स्वरूपतोऽभाव-

CC-0. In Public Domain. Digitization by eGangotri

त्वाभावभेदकोटिकसंशयस्य वारणं न संभवति तत्राभावभेदवद्धृदत्वावच्छिन्नविषयित्वाव्यापिकाया-
स्तादृशविषयताया असत्त्वात् तथाचैतादृशैकतरसंशयापरनिश्चययोर्ह्रदो भेद इत्यनुमित्यप्रतिबन्धकत्वेन
यादृशविशिष्टपदेन तादृशविशिष्टद्वयस्य धर्तुमशक्यत्वादत उभयत्र निश्चयत्वनिवेश आवश्यकः॥ तथा-
च यादृशविशिष्टविषयकत्वाऽव्यापकविषयिताशून्यया‌दृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टवि-
षयकत्वाऽव्यापकविषयिताशून्ययादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबन्धकताऽनतिरिक्तवृत्तिता-
दृशविशिष्टविषयिताविशिष्टतादृशविशिष्टविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशू
न्ययद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

द्रूपवत्त्वं लक्षणम्। अत्र स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे ह्रदो वह्निमान् जलादित्यादौ वह्निव्यापकीभूताभावप्रतियोगिजलरूपाऽसाधारण्येऽव्याप्तिः तत्र वह्निव्यापकीभूताभावप्रतियोगिजलमित्याकारकतादृशजलत्वविशिष्टविषयकनिश्चयविशिष्टजलवान्ह्रद इत्याकारकजलत्वविशिष्टविषयकनिश्चयत्वे प्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वस्य सत्त्वाद्वह्निव्यापकीभूताभावप्रतियोगिजलत्वविशिष्टविषयताविशिष्टजलत्वविशिष्टविषयताशून्यज्ञानाविषयत्वस्य तादृशासाधारण्येऽसत्त्वादतोऽनतिरिक्तवृत्तित्वनिवेशः तथासति वह्निव्यापकीभूताभावप्रतियोगि जलमित्याकारकनिश्चयविशिष्टजलमिति निश्चये प्रतिबन्धकत्वासत्त्वेन यादृशविशिष्टपदेन तादृशविशिष्टद्वयं न धर्तुं शक्यत इति नाव्याप्तिः।

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वत्रानतिरिक्तवृत्तित्वनिवेशपक्षेपि तादृशनिश्चयद्वयेप्यव्यापकविषयिताशून्यत्वं निवेशनीयमन्यथा तादृशाविशिष्टद्वयाऽप्रसिद्ध्याऽसम्भवापत्तेः एवञ्चसति वह्निव्यापकीभूताभावप्रतियोगिजलमित्याकारकनिश्चयविशिष्टस्य जलवान्ह्रद इत्याकारकनिश्चयस्य प्रतिबन्धकत्वेपि तत्र जलत्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यत्वाभावेन तादृशाव्यापकविषयिताशून्यस्य शुद्धजलमित्याकारकानिश्चयस्याऽसाधारण्यविषयकनिश्चयविशिष्टस्यानुमित्यप्रतिबन्धकतया न तादृशविशिष्टद्वयमादायाव्याप्तिः । नच जलं वह्निमज्जलादित्यत्रासाधारण्येऽव्याप्तिस्तत्र तादृशासाधारण्यविषयकनिश्चयविशिष्टजलं जलवादित्याकारकनिश्चयत्वे प्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वसत्त्वात् तत्रच जलत्वावच्छिन्नविष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यित्वाऽव्यापकविषयिताशून्यत्वस्यापि सत्त्वात् अनतिरिक्तवृत्तित्वनिवेशेऽसाधारण्यनिश्चयविशिष्टजलमिति निश्चये प्रतिबन्धकताविरहान्न दोष इति वाच्यम् । यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयता यादृशविशिष्टविषयित्वाऽव्यापिका तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयताशून्ययादृशविशिष्टविषयकनिश्चयविशिष्टयद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयता यादृशविशिष्टविषयकत्वाऽव्यापिका तद्रूपावच्छिन्नविषयतानिरूपिततद्रूपावच्छिन्नविषयताशून्ययादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबन्धकतावच्छेदकं तादृशविशिष्टद्वयाऽघटितत्वनिवेशे नोक्तदोषः तत्राऽसाधा-

Nepal Sanskrit University, Balmadi Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रण्यनिश्चयविशिष्टजलं जलवदित्याकारकनिश्चये जलत्वावच्छिन्न[1]विषयित्वाव्यापकीभूतजलत्वाद्यवच्छिन्न-विषयतानिरूपितजलत्वाद्यवच्छिन्नविषयतायाः सत्त्वात्तच्छून्यजलमित्याकारकनिश्चयस्यानुमित्यप्रतिबन्धकत्वात्। नच जलवज्जलं स्वरूपवज्जलवज्जलकालीनवह्निमत् स्वरूपवज्जलादित्यत्रासाधारण्येऽव्याप्तिस्तादृशविवक्षायामपि दुर्निवारा अत्र पक्षे जलं स्वरूपसम्बन्धेन प्रविष्टं स्वरूपवज्जलवज्जलकालीनवह्निव्यापकीभूताऽभावप्रतियोगिस्वरूपवज्जलमित्याकारकाऽसाधारण्यविषयकनिश्चयविशिष्टस्वरूपवज्जलवज्जलत्ववि-

---

१ जलवान् घट इत्याकारकज्ञानान्तर्भावेणाऽव्यापकत्वं बोध्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्टविषयताशालिस्वरूपवज्जलवज्जलवज्जलमिति निश्चयत्वस्यानुमितिप्रतिबन्धकतावच्छेदकतया तादृशासाधारण्यात्मकविशिष्टस्वरूपवज्जलवज्जलत्वविशिष्टयोर्यादृशविशिष्टपदेन धर्तुं शक्यतया तादृशविशिष्टद्वयाघटितत्वस्यासाधारण्येऽभावात् अनतिरिक्तवृत्तित्वनिवेशेतु तादृशासाधारण्यविषयकनिश्चयविशिष्टस्वरूपवज्जलवज्जलमित्याकारकानिश्चये तादृशप्रतिबन्धकत्वाऽभावेनैतादृशविशिष्टद्वयस्य यादृशविशिष्टपदेन धर्तुमशक्यतया नाव्याप्तिरिति वाच्यम् । स्वरू[1]पसम्बन्धरूपावच्छेदकत्वपक्षेपि यादृशवि-

---

१ वस्तुतः परस्परविषयताशून्यत्वस्य निश्चयेऽवश्यं निवेशनीयतया तेनैवासाधारण्येऽव्याप्तिशङ्कैव नास्ति उक्तविशिष्टद्वयस्य धर्तुमशक्यत्वात् ।

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्टविषयित्वाऽव्यापिका यद्रूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकविषयतानिरूपितयद्रूपाव-
च्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकविषयता तद्रूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताक-
विषयतानिरूपिततद्रूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकविषयताशून्यत्वस्य विवक्षणीयतयो-
क्ताव्याप्तेरभावात् तादृशासाधारण्यविषयकनिश्चयविशिष्टस्वरूपवज्जलवज्जलवज्जलमिति निश्चयेऽनुमिति-
प्रतिबन्धके स्वरूपवज्जलवज्जलत्वावच्छिन्नविषयित्वाऽव्यापिका या जलवज्जलत्वनिष्ठधीविशेषविषयत्वरू-
पसमुदायत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकजलवज्जलत्वावच्छिन्नविशेष्यतानिरूपितस्व-
रूपवज्जलत्वनिष्ठधीविशेषविषयत्वरूपसमुदायत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकप्रकारता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यास्सत्त्वेन तच्छून्यस्वरूपवज्जलवज्जलमित्याकारकनिश्चये प्रतिबन्धकताविरहेण तादृशविशिष्टस्य यादृशविशिष्टपदेन धर्तुमशक्यत्वात्। यत्तु केनचिदुक्तं स्वरूपसम्बन्धरूपावच्छेदकत्वानिवेशे नीलोत्पलवान् ह्रदो रक्तदण्डवानित्यत्र बाधेऽव्याप्तिः समानविषयकप्रत्यक्षसामग्र्या अनुमितिप्रतिबन्धकतया नीलोत्पलवान्ह्रदो रक्तदण्डवानिति प्रत्यक्षसामग्र्यास्तादृशानुमितिप्रतिबन्धकत्वेन तादृशप्रत्यक्षस्यच ह्रदांशे नीलत्वविशिष्टोत्पलस्य रक्तविशिष्टदण्डस्यच वैशिष्ट्यावगाहितया तत्सामग्रीकुक्षौ नीलमुत्पलं रक्तो दण्ड इत्याकारकनिश्चययोर्विशेषणतावच्छेदकप्रकारकनिश्चयमुद्रया प्रवेशात्सामग्र्या अप्येकविशिष्टापरत्वेनैव प्रतिबन्धकत्वस्य वक्तव्यतया नीलोत्पलत्वविशिष्टविषयकनिश्चयविशिष्टरक्तदण्डत्ववि-

CC-0. In Public Domain. Digitization by eGangotri

शिष्टविषयकनिश्चयत्वस्य तादृशानुमितिप्रतिबन्धकतावच्छेदकतया तादृशविशिष्टद्वयाऽघटितत्व-
स्योक्तबाधेऽसत्त्वात् अनतिरिक्तवृत्तित्वानिवेशे चक्षुःसंयोगाऽकालीनतादृशानिश्चययोः प्रतिबन्धकत्वाभा-
वेन तादृशविशिष्टयोर्यादृशविशिष्टपदेन धर्तुमशक्यत्वान्न दोष इति । तदसत् । सामग्रीनिष्ठतादृशा-
नुमितिप्रतिबन्धकतावच्छेदकुक्षौ तादृशनिश्चयद्वयस्यानिवेशेन तादृशनिश्चयत्वे प्रतिबन्धकतावच्छेद-

१ ननु साक्षात्प्रतिबन्धकस्य निरुक्तनिश्चयद्वयस्य प्रतिबन्धकतावच्छेदककुक्ष्यन्तर्गतत्ववर्णनमसंगतमिति चेन्न । सामग्रीत्वस्यैकविशिष्टापररूपत्वेन तन्नच निरुक्तनिश्चयद्वयस्य विशिष्टसामग्रीशरीरे विशेषणत्वात् । नच विशेषणत्वे प्रति-बन्धकत्वाभावाद्विशिष्टद्वयपदेन धर्तुमशक्यत्वं तस्येति वाच्यम् । सामग्र्यन्तरापेक्षया तस्य विशेष्यत्वादिति ध्येयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कत्वाभावात् । नच सामग्रीप्रतिबन्धकतायां तादृशनिश्चयाऽनिवेशे तादृशनिश्चयाभावदशायामपरप्रत्यक्षकारणसत्त्वेऽनुमितिर्न स्यादिति वाच्यम् । तादृशानुमितिंप्रत्यपि विशेषणतावच्छेदकप्रकारकनिर्णयविधया तादृशनिश्चययोरपि कारणत्वेन तदभावे तदनुत्पादस्येष्टत्वात् । यत्तु केनचिदुक्तं चिकीर्षा-

---

१ पूर्वस्थले नीलोत्पलवद्ध्रदकालीनरक्तदण्डवद्ध्रदकालीनजलहेतुस्थलेऽव्याप्तिं परित्यज्य स्थलान्तरानुधावनं व्यर्थमितितु भ्रमः समाने विषयेऽनुमितिंप्रति प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वस्य सिद्धान्तसिद्धत्वात् साध्यशरीरे निवेशेतु आचार्यपादोक्तदोषो दुर्द्धर एव प्रकृतस्थलेच चिकीर्षासामग्र्या अनुमितिमात्रविरोधित्वेन साध्यशरीरे निवेशे बीजाभावः तथाचान्यहेतुकानुमितिसामग्रीसत्त्वे फलेच्छादिघटितसामग्रीमात्रसत्त्वे कृतिसाध्यत्वादिज्ञानाभा-

CC-0. In Public Domain. Digitization by eGangotri

सामग्र्या अनुमितिप्रतिबन्धकतामते ह्रदः कृतिसाध्यतावदिष्टसाधनतावत्पाककालीनवह्निमान्धूमादि-
त्यत्र बाधेऽव्याप्तिः तत्र तादृशचिकीर्षासामग्रीनिष्ठानुमितिप्रतिबन्धकतावच्छेदककुक्षौ कृतिसाध्यता-
वत्पाकेष्टसाधनतावत्पाकविषयकनिश्चययोः प्रवेशेन तादृशविशिष्टद्वयाघटितत्वस्य तत्रत्यबाधेऽभावात्
अनतिरिक्तवृत्तित्वनिवेशे फलेच्छाऽकालीनतादृशनिश्चययोः प्रतिबन्धकताविरहेण न दोष इति त-
दपि न, प्रागुक्तरीत्यैव तादृशानुमितिप्रतिबन्धकतावच्छेदककुक्षौ तादृशनिश्चययोरप्रवेशादिति चेन्न । ह्रदो

वेच सत्त्वेऽनुमितिरनुभूयते सा न स्यात् कृतिसाध्यत्वज्ञानादिव्यतिरिक्तप्रतिबन्धकसत्त्वादिति विभावयन्तु तर्कनिपुणाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वह्निमानिष्टसाधनतावत्कृतिसाध्यतावत्पाककालीनजलादित्यत्रासाधारण्येऽव्याप्त्यापत्तेः ताहशस्थली-यानुमितिनिरूपितचिकीर्षासामग्रीनिष्ठप्रतिबन्धकतावच्छेदककुक्षौ ताहशनिश्चययोरप्यवश्यं निवेशनीय-त्वात् अन्यथा ताहशनिश्चयाभावकाले फलेच्छादिसत्त्वे लिङ्गान्तरपरामर्शादपि ताहशानुमित्यनापत्तेः तथाच कृतिसाध्यतावत्पाकस्येष्टसाधनतावत्पाकस्यच याहशविशिष्टपदेन धर्तुं शक्यतया तदघटितत्व स्योक्तहेतुतावच्छेदकावच्छिन्नहेतुघटिताऽसाधारण्येऽसत्त्वात् अनतिरिक्तवृत्तित्त्वनिवेशेतु फलेच्छाऽका-लीनताहशविशिष्टविषयकनिश्चययोः प्रतिबन्धकत्त्वाभावेन याहशविशिष्टपदेन तद्वारणासम्भवान्नाव्याप्ति-रिति। याहशविशिष्टविषयित्वाव्यापकविषयिताशून्ययाहशविशिष्टविषयताशालिनिश्चयविशिष्टताहशया-

CC-0. In Public Domain. Digitization by eGangotri

शत्रिशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्तितादृशविशिष्टद्वयविषयिताशून्याव्यापकवि-
षयिताशून्ययद्रूपावच्छिन्नविषयताशालिनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकता तद्रूपावच्छिन्नत्वं
लक्षणम् अत्र यत्किंचित्प्रतिबन्धकतानतिरिक्तवृत्तित्वनिवेशे ह्रदो गगनाभाववद्वह्न्यधिकरणनिरूपितत्व-
वत्कालीनवह्निमान् जलादित्यत्र गगनाभाववद्वह्न्यधिकरणनिरूपितत्ववत्कालीनवह्निव्यापकीभूताभाव-
प्रतियोगिजलरूपासाधारण्येऽव्याप्तिः तत्र व्यापकताशरीरे वृत्तित्वांशे वह्न्यधिकरणनिरूपितत्वस्य
प्रविष्टतया तादृशासाधारण्यस्य गगनाभाववद्वह्न्यधिकरणनिरूपितत्ववत्त्वविशिष्टवह्न्यधिकरणनिरूपि-
तत्ववद्वृत्तितात्वविशिष्टात्मकविशिष्टद्वयघटिततया वह्न्यधिकरणनिरूपितत्ववान् गगनाभाववानि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

ति निश्चयविशिष्टवह्न्यधिकरणनिरूपितत्ववद्वृत्तित्वमिति निश्चयत्वस्य वृत्तित्वं गगनवदित्य-
नुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानातिरिक्तवृत्तितया तदघटितत्वस्य तत्राभावात्
अतः प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपकप्रतिबन्धकतानतिरिक्तवृत्तित्वमेव तद्घटकं वाच्यम् ।
नन्वेवमपि गगनवानभावो गगनाभाववद्वह्न्यधिकरणनिरूपितवृत्तित्ववत्कालीनवह्निमान् जलादित्यत्रा-
साधारण्येऽव्याप्तिः वह्न्यधिकरणनिरूपितवृत्तित्ववान् गगनाभाववान् वह्न्यधिकरणनिरूपितवृत्तित्व-
वानभाव इति निश्चयविशिष्टनिश्चयत्वस्य प्रकृतानुमितित्वव्यापकाभावत्वावच्छिन्नविशेष्यकगगनत्वाव-
च्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तितया तादृशविशिष्ट-

CC-0. In Public Domain. Digitization by eGangotri

द्वयाघटितत्वस्य तादृशासाधारण्येऽभावात् असाधारण्यघटकव्यापकताघटकाभावे वह्न्यधिकरणनिरूपि-
तवृत्तित्वस्य प्रविष्टत्वादिति चेन्न । विशेष्यदले यादृशप्रतिबन्धकता प्रविष्टा तादृशप्रतिबन्धकताया एव
प्रवेशनीयत्वात् तथाच किंचिद्रूपावच्छिन्नविषयित्वाव्यापकविषयिताशून्ययद्रूपावच्छिन्नविषयताशालि-
निश्चयत्वव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितयत्प्रतिबन्धकता तत्प्रतिबन्धकतानाति-
रिक्तवृत्तियादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं तादृशविशिष्टद्वयाविषयिता-
शून्यज्ञानविषयतद्रूपावच्छिन्नत्वं लक्षणम् पक्षधर्मिकहेतुमत्ताज्ञानकालीनाऽसाधारण्यविषयकनिश्चयत्व-
व्यापिका प्रकृतानुमितित्वव्यापकपक्षे विशिष्टसाध्यवत्ताबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कता प्रकृतासाधारण्यघटकविशिष्टद्वयविषयकनिश्चयत्वव्यापिका पक्षे पक्षतावच्छेदकावगाहिबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतेति तत्राव्याप्तिविरहात् । नचैवं सति बाधादावव्याप्तिः बाधनिश्चयत्वावच्छिन्नप्रतिबन्धकताया ज्ञानवैशिष्ट्यानवच्छिन्नतया तदवच्छिन्नावच्छेदकधर्मदर्शनप्रतिबन्धकतातो भिन्नतया यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं बाधप्रतिबन्धकतानतिरिक्तवृत्तितादृशविशिष्टद्वयाप्रसिद्धेरिति वाच्यम् । वक्ष्यमाणानुगमेन सर्वदोषसंग्रहात् तत्प्रकारश्च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टरूपवत्त्वं रूपे प्रतिबन्धकतावैशिष्ट्यञ्च स्वनिष्ठकिंचिद्रूपावच्छिन्नविषयित्वाव्यापकविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्च-

Nepal Sanskrit University, Balmandi Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावनिरूपितप्रतियोगिताकनिरूपितावच्छेदक-
तानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छि-
न्नत्वसम्बन्धावच्छिन्नावच्छेदकत्वस्वाभाववत्प्रतीतिविषयितानिरूपकतावच्छेदकत्वोभयसम्बन्धेन अभा-
वप्रतियोगितावच्छेदकसम्बन्धश्च स्वनिष्ठो यः किंचिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यकिं-
चिद्रूपावच्छिन्नविषयिताशालिनिश्चयविशिष्टकिंचिद्रूपावच्छिन्नविषयित्वाव्यापकविषयिताशून्यकिंचिद्रूपा-

१ अवच्छेदकतायाम् । २ प्रतियोगितायाम् । ३ भेदे । ४ वृत्तित्वे । ५ निश्चये । ६ विषयितायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धो योऽभावस्तन्नि-
रूपितप्रति[1]योगितानिरूपितावच्छेदक[2]तानिरूपितावच्छेदक[3]तानिरूपितावच्छेदक[4]तानिरूपितावच्छेदक[5]-
ताविशिष्टविषयितारूपः विषयितायामवच्छेदकतावैशिष्ट्यञ्च स्वविशिष्टरूपावच्छिन्नत्व-स्वविशिष्ट-
रूपावच्छिन्नविषयितासामानाधिकरण्योभयसम्बन्धेन प्रथमसम्बन्धघटकरूपे स्ववैशिष्ट्यञ्च स्वनिरूपि-
तावच्छेदक[6]तानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावत्त्व-स्वनिरूपितावच्छेदक[7]तानिरूपिता-

---

१ अवच्छेदकतायाम् । २ प्रतियोगितायाम् । ३ भेदे । ४ वृत्तित्वे । ५ निश्चये । ६ विषयितायाम् । ७ शून्यत्वे ।

वच्छेदकं[1]तानिरूपितावच्छेदकं[2]तानिरूपितावच्छेदकं[3]तानिरूपितावच्छेदकं[4]तानिरूपितावच्छेदकं[5]तानिरू-
पितावच्छेदकतानिरूपितावच्छेदकं[6]तानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावत्त्वोभयसम्बन्धेन
द्वितीयरूपे स्ववैशिष्ट्यञ्च स्वनिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्नावच्छेदकं[7]तावत्त्वसम्बन्धेन तादृ-
शावच्छेदकतावत्त्वं च स्वनिरूपितावच्छेदकं[8]तानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावत्त्व-
स्वनिरूपितावच्छेदकं[10]तानिरूपितावच्छेदकं[11]तानिरूपितावच्छेदकं[12]तानिरूपितावच्छेदकं[13]तानिरूपितावच्छे-

१ विषयितायाम् । २ अवच्छेदकत्वे । ३ प्रतियोगित्वे । ४ भेदे । ५ वृत्तित्वे । ६ अधिकरणे । ७ विषयित्वे । ८ निश्चये । ९ विषयित्वे । १० शून्यत्वे । ११ विषयित्वे । १२ अवच्छेदकत्वे । १३ प्रतियोगित्वे ।

दर्क[1]तानिरूपितावच्छेदर्क[2]तानिरूपिताऽवच्छेदर्क[3]तानिरूपितावच्छेदर्क[4]तानिरूपितावच्छिन्नत्वसम्बन्धाव-
च्छिन्नावच्छेदकतावत्त्वोभयसम्बन्धेन तथाच प्रतिबन्धकतानिरूपिततादृशाभावीयप्रतियोगिता[5]निरूपि-
तावच्छेदर्क[6]तानिरूपितावच्छेदर्क[7]तानिरूपितावच्छेदर्क[8]तानिरूपितावच्छेदर्क[9]ताविशिष्टविषयिताकज्ञानवै-
शिष्ट्यावच्छिन्नप्रतिबन्धकताया एव सम्बन्धः तादृशप्रतिबन्धकतायामेवोक्ताभावस्य सत्त्वात् तादृश-
सम्बन्धेन वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदविषयकनिश्चये तादृशनिश्चयनिष्ठज्ञानवैशिष्ट्यावच्छिन्नप्रति-

---

१ भेदे । २ वृत्तित्वे । ३ अधिकरणे । ४ विषयित्वे । ५ अवच्छेदकत्वे । ६ प्रतियोगित्वे । ७ भेदे । ८ वृत्तित्वे । ९ निश्चये ।

CC-0. In Public Domain. Digitization by eGangotri

वन्धकतायाः सत्त्वेन तदभाववती प्रतीतिस्तादृशविशिष्टाविषयकैव तन्निष्ठविषयितानिरूपकतावच्छेदक-
त्वस्योक्तरूपेऽभावेन नातिव्याप्तिः बाधप्रतिबन्धकतायास्तादृशसम्बन्धस्य व्यधिकरणसम्बन्धतया
तेन सम्बन्धेन तदभाववान् बाधविषयकनिश्चय इति तन्निष्ठविषयितानिरूपकतावच्छेदकत्वस्य बा-
धतावच्छेदकरूपे सत्त्वेन प्रागुक्तप्रथमसम्बन्धस्यच सत्त्वेन लक्षणसमन्वयः। अथैवमपि बाधाद्यसं-
ग्रहः बाधबुद्धित्वावच्छिन्नप्रतिबन्धकतायामपि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वाव्यापकविषयिताशू-
न्यवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताशालिनिश्चयविशिष्टवह्न्यभाववद्ध्रदत्वावच्छिन्नाविषयिताऽव्यापक-
विषयिताशून्यवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रातियोगितावच्छेदकत्वं नास्ती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति प्रतीतिसिद्धाभावस्य सत्त्वेन तन्निरूपितप्रतियोगितया परम्परया निरूपितनिश्चयनिष्ठावच्छेदकताविशिष्टविषयिताया बाधविषयकज्ञानेपि सत्त्वेन तादृशसम्बन्धेन तदभाववती प्रतीतिर्बाधाऽविषयिकैवेति वह्न्यभाववद्ध्रदत्वे तन्निष्ठविषयितानिरूपकतावच्छेदकत्वाभावादिति चेन्न । द्वितीयसम्बन्धघटकस्वाभावस्य स्वविशिष्टावच्छेदकताविशिष्टविषयितासम्बन्धावच्छिन्नप्रतियोगिताकस्य विवक्षणात् अवच्छेदकतायां स्ववैशिष्ट्यञ्च स्वनिष्ठकिञ्चिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यकिञ्चिद्रूपावच्छिन्नविषयिताशालिनिश्चयविशिष्टकिञ्चिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यकिञ्चिद्रूपाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च्छिन्नविषयताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावनिरूपितप्रति[1]यो-
गितानिरूपितावच्छेद[2]कतानिरूपितावच्छेद[3]कतानिरूपिताऽवच्छेद[4]कतानिरूपितत्वस्वातिरिक्तवृत्तिविष-
यितानिरूपकतावच्छेदकतासमानाधिकरणावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेद[5]कतानिरूपकनिरूपकता-
सम्बन्धावच्छिन्नावच्छेद[6]कतानिरूपकत्वस्वातिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकत्वसमानाधिकरणा-
वच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतानिरूपकनिरूपकतासंबन्धावच्छिन्नावच्छेदकतानिरूपकसामानाधि-

१ अवच्छेदकत्वे । २ प्रतियोगित्वे । ३ भेदे । ४ वृत्तित्वे । ५ धर्मे । ६ विषयितायाम् ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करण्यसंबन्धावच्छिन्नावच्छेदकतानिरूपकत्वैतत्त्रितयसंबन्धेन शेषं पूर्ववदेव तथाच बाधप्रतिबन्धकतायां वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताशालिनिश्चयविशिष्टवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावस्य सत्त्वेपि तादृशाभावीयप्रतियोगितानिरूपितनिश्चयनिष्ठावच्छेदकताच न तादृशसम्बन्धत्रयेण प्रतिबन्धकताविशिष्टा तत्र प्रथमसम्बन्धसत्त्वेप्यन्यसम्बन्धयोरभावात् तादृशा[1]वच्छेदकतानिरूपितविषयितानिष्ठावच्छेदकतानिरूपितावच्छि-

१ तादृशावच्छेदकतानिरूपितविषयितानिष्ठेत्यादिना बाधप्रतिबन्धकतातिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकत्वस्य वह्न्यभाववद्ध्रदत्वेऽभावादसम्भवो वारितः। नन्वत्र संशयाहार्याद्यन्तर्भावेण प्रतिबन्धकतातिरिक्तवृत्तिविषयितानिरूपक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावच्छेदकत्वेनाऽसंभवस्तदवस्थ एव । नच स्वाभाववदनाहार्य्याऽप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तिविषयितानिरूपकतावच्छेदकत्वोपादाने नाऽसंभव इति वाच्यम् । भाविज्ञानं वह्न्यभावाभाववति वह्न्यभावप्रकारताकमित्याकारकज्ञानद्वितीयक्षणे अपेक्षाबुद्ध्यात्मकबाधनिश्चयः तत्रच पूर्वक्षणावच्छेदेन प्रतिबन्धकत्वाभावविशिष्टद्वितीयक्षणावच्छिन्ननिरुक्तविशेषणविशिष्टनिश्चयीयविषयितानिरूपकतावच्छेदकत्वादिति चेन्न । स्वाऽव्यापकतत्कत्वरूपस्य स्वातिरिक्तवृत्तित्वस्य निवेशात् प्रकृतेच अनाहार्याऽप्रामाण्यज्ञानाऽनास्कन्दितनिश्चयवृत्तित्वविशिष्टवह्न्यभाववद्धृदत्वावच्छिन्नविषयतायाः स्वपदेन धारणे स्वाऽव्यापकप्रतिबन्धकतारूपस्वातिरिक्तवृत्तित्वाऽभावात् असंग्राह्यस्थलेच वह्न्यभाववज्जलवत्त्वादौ तत्सत्त्वात्सर्वं समञ्जसमिति निर्मत्सरा विभावयन्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

न्नत्वसम्बन्धावच्छिन्नावच्छेदकत्वस्य वह्न्यभाववद्ध्रदत्वनिष्ठस्य तादृशप्रतिबन्धकतातिरिक्तवृत्तिविषयि-
तानिरूपकतावच्छेदकतासमानाधिकरणत्वाभावात् । एवमेव सम्बन्धान्तरेपि ज्ञेयं तथाच अवच्छेद-
कधर्मदर्शननिष्ठप्रतिबन्धकतावृत्तिर्यो निरुक्ताभावस्तन्निरूपितप्रतियोगितानिरूपितानिश्चयनिष्ठाऽवच्छेद-
कतायामेव तादृशप्रतिबन्धकतावैशिष्ट्यमस्ति तत्र तादृशप्रतिबन्धकताशून्यजलवान्ह्रद इति निश्च-
यनिष्ठविषयितानिरूपकतावच्छेदकत्वसमानाधिकरणजलवद्ध्रदत्वनिष्ठावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छे-
दकतानिरूपकविषयितानिष्ठावच्छेदकतानिरूपकत्वस्य तादृशावच्छेदकत्वसमानाधिकरणवह्न्यभावव-
ज्जलवत्त्वनिष्ठावच्छेदकतानिरूपकविषयितानिष्ठावच्छेदकतानिरूपकनिश्चयनिष्ठावच्छेदकतानिरूपकत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्य प्रथमसम्बन्धस्यच सत्त्वात् तादृशावच्छेदकताविशिष्टविषयिताच बाधप्रतिबन्धकताया व्यधिकरणसम्बन्ध एवेति नोक्तदोषः । वस्तुतो द्वितीयसम्बन्धघटकस्वाभावप्रतियोगितावच्छेदकसम्बन्धः स्वनिष्ठो यः किञ्चिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यकिञ्चिद्रूपावच्छिन्नविषयिताशून्यकिञ्चिद्रूपावच्छिन्नविषयिताशालिनिश्चयविशिष्टकिञ्चिद्रूपावच्छिन्नविषयिताऽव्यापकविषयिताशून्यकिञ्चिद्रूपावच्छिन्नविषयिताशून्यकिञ्चिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धोऽभावस्तन्निरूपितप्रतियोगिंतानिरूपितावच्छेदकं[2]तानिरूपितावच्छे-

१ अवच्छेदकत्वे । २ प्रतियोगित्वे ।

CC-0. In Public Domain. Digitization by eGangotri

दक[1]तानिरूपितावच्छेदक[2]तानिरूपितावच्छेदक[3]ताविशिष्टविषयितैव विषयितायामवच्छेदकतावैशिष्ट्यं च स्वविशिष्टरूपावच्छिन्नत्व–स्वविशिष्टरूपावच्छिन्नविषयितासामानाधिकरण्योभयसम्बन्धेन प्रथमरूपे स्ववैशिष्ट्यंच स्वनिरूपितावच्छेदक[4]तानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावत्त्व–स्वनिरूपितावच्छेदक[5]तानिरूपितावच्छेदक[6]तानिरूपितावच्छेदक[7]तानिरूपितावच्छेदक[8]तानिरूपितावच्छेदक[9]तानिरूपितावच्छेदक[10]तानिरूपितावच्छेदक[11]तानिरूपिताऽवच्छेदक[12]तानिरूपितावच्छिन्नत्वसम्ब–

१ भेदे । २ वृत्तित्वे । ३ निश्चये । ४ विषयितायाम् । ५ शून्यत्वे । ६ विषयितायाम् । ७ अवच्छेदकत्वे । ८ प्रतियोगित्वे । ९ भेदे । १० वृत्तित्वे । ११ अधिकरणे । १२ विषयितायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सा॰ नि॰
॥ ९६ ॥

न्धावच्छिन्नावच्छेदकतावत्त्व–स्वनिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्नावच्छेदक[1]तानिरूपितावच्छेद-क[2]तानिरूपितावच्छेदक[3]तानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावत्त्वैतत्त्रितयसंबन्धेन द्विती-यरूपे स्ववैशिष्ट्यंच स्वनिरूपितावच्छेदक[4]तानिरूपितावच्छेदक[5]तानिरूपितावच्छिन्नत्वसम्बन्धावच्छि-न्नावच्छेदकतावत्त्व–स्वनिरूपितसामानाधिकरण्यसंबन्धावच्छिन्नावच्छेदक[6]तावत्त्वोभयसंबन्धेन तादृशा-वच्छेदकतावत्त्वंच स्वनिरूपितावच्छेदक[7]तानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावत्त्व-स्वनिरू-

१ निश्चये । २ शून्यत्वे । ३ विषयितायाम् । ४ शून्यत्वे । ५ विषयितायाम् । ६ निश्चये । ७ विषयितायाम् ।

पितावच्छेदक[1]तानिरूपितावच्छेदक[2]तानिरूपितावच्छेदक[3]तानिरूपितावच्छेदक[4]तानिरूपितावच्छेदक[5]ता-
निरूपिताव[6]च्छेदकतानिरूपिताऽवच्छेद[7]कतानिरूपितावच्छेद[8]कतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नाव-
च्छेदकत्वोभयसंबन्धेन एवंच बाधप्रतिबन्धकतायां वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वाऽव्यापकविष-
यिताशून्यवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताशून्यवह्न्यभाववद्ध्रदत्वावाच्छिन्नविषयिताशालिनिश्चयवि-
शिष्टतादृशनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावो नास्त्येव तादृशनिश्चयस्यै

---

१ शून्यत्वे । २ विषयितायाम् । ३ अवच्छेदकत्वे । ४ प्रतियोगितायाम् । ५ भेदे । ६ वृत्तित्वे ।
७ अधिकरणे । ८ विषयितायाम् ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वासिद्धत्वात् वह्न्यभाववज्जलवद्वृत्तिजलवद्धृदविषयकनिश्चयनिष्ठज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायांतु वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यजलवद्धृदत्वावच्छिन्नविषयिताशून्यवह्न्यभाववज्जलवत्त्वावच्छिन्नविषयिताशालिनिश्चयविशिष्टजलवद्धृदत्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यवह्न्यभाववज्जलवत्त्वावच्छिन्नविषयिताशून्यजलवद्धृदत्वावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावो वर्तत इति तादृशाभावीयप्रतियोगितानिरूपितनिश्चयनिष्ठावच्छेदकताविशिष्टरूपम् उक्तसंबन्धत्रयेण जलवद्धृदत्वं वह्न्यभाववज्जलवत्त्वंचेति तादृशैकरूपावच्छिन्नविषयितासमानाधिकरणापररूपावच्छिन्नविषयितायास्तादृशविशिष्टविषयकनिश्चये सत्त्वेन नाऽव्याप्त्य-

CC-0. In Public Domain. Digitization by eGangotri

तिव्याप्ती इति एवं स्वरूपसंबन्धरूपावच्छेदकत्वपक्षेपि अनुगमः शक्यः तथाहि प्रकृतानुमितित्व-व्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टरूपवत्त्वं लक्षणम् प्रतिबन्धकतावैशिष्ट्यंच प्रागुक्तोभयसंबन्धेन द्वितीयसंबन्धघटकाभावप्रतियोगितावच्छेदकसंबन्धश्च स्ववृत्तिकिञ्चिद्रूपावच्छिन्नविषयिताविशिष्टकिंचिद्रूपावच्छिन्नविषयितात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणतावत्त्वरूपः तादृशनिरूपकतायाः स्ववृत्तित्वंच स्वविशिष्टनिश्चयीयविषयितानिष्ठस्वरूपसंबन्धरूपावच्छेदकतानिरूपकत्वसंबन्धेन निश्चये निरूपकतावैशिष्ट्यंच स्वनिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावद्रूपवत्त्व–स्वनिरूपित–सामानाधिकरण्यसम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावद्धर्मांव–

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नविषयिताशून्यत्व-स्वविशिष्टनिश्चयसामानाधिकरण्यैतत्त्रितयसम्बन्धेन एतत्सम्बन्धघटकनिश्चये स्ववैशिष्ट्यंच स्वनिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावद्धर्मावच्छिन्नविषयिताशून्यत्व-स्वनिरूपितसामानाधिकरण्यसंबन्धावच्छिन्नावच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावद्रूपवत्त्वोभयसंबन्धेन निश्चयद्वये रूपवत्त्वंच स्वावच्छिन्नविषयितावत्त्व-स्वावच्छिन्नविषयित्वाधिकरणवृत्तिकिञ्चिद्रूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकविषयितानिरूपितकिञ्चिद्रूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकविषयता नास्तीति प्रतीतिसिद्धाभावप्रतियोगिविषयताशून्यत्वोभयसम्बन्धेनेति यदि वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वानङ्गीकारेण तादृशसम्बन्धावच्छिन्नप्रतियोगि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ताकप्रतिबन्धकत्वाऽभावाप्रसिद्ध्योक्तानुगमद्वयमपि न सङ्गच्छत इति विभाव्यते तदा स्वनिष्ठनिरुक्ताभावप्रति[1]योगितानिरूपितावच्छेदक[2]तानिरूपितावच्छेदक[3]तानिरूपितावच्छेदक[4]तानिरूपितावच्छेदक[5]ताविशिष्टविषयितानिष्ठप्रकारतानिरूपितविशेष्यत्वस्य प्रमीयविशेष्यत्वीयस्वरूपसम्बन्धेन योऽभावस्तद्वत्प्रतीतिविषयितानिरूपकतावच्छेदकत्वम् अनतिरिक्तवृत्तित्वकल्पे द्वितीयसम्बन्धः द्वितीयकल्पे स्ववृत्तिकिञ्चिद्रूपावच्छिन्नविषयिताविशिष्टकिंचिद्रूपावच्छिन्नविषयितात्वावच्छिन्ननिरूपकतानिरू-

---

१ अवच्छेदकत्वे । २ प्रतियोगितायाम् । ३ भेदे । ४ वृत्तित्वे । ५ निश्चये ।

CC-0. In Public Domain. Digitization by eGangotri

पिताधिकरणतानिष्ठप्रकारतानिरूपितविशेष्यताया यः प्रमीयविशेष्यत्वीयस्वरूपसम्बन्धेनाऽभावस्तद्वत्प्रतीतिविषयितानिरूपकतावच्छेदकतावत्त्वं द्वितीयसम्बन्ध इति बोध्यम् तथाच ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावृत्तिनिरुक्ताभावीयप्रतियोगितानिरूपितनिश्चयनिष्ठावच्छेदकताविशिष्टविषयिताप्रकारकताहशाविशिष्टविषयकनिश्चयविशेष्यकबुद्धेः प्रमात्वेन ताहशप्रकारतानिरूपितविशेष्यतायाः प्रमीयविशेष्यत्वीयस्वरूपसम्बन्धेन ताहशविशिष्टविषयकनिश्चये सत्त्वेन तदभाववती प्रतीतिस्ताहशविशिष्टाऽविषयकैवेति न तत्रातिव्याप्तिः बाधप्रतिबन्धकतानिष्ठताहशाभावाऽप्रसिद्धावपि ताहशप्रतिबन्धकतावृत्तित्वेन ताहशाभावावगाहितन्निष्ठताहशाभावप्रतियोगितानिरूपितावच्छेदकताविशिष्ट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयितावद्वह्न्यभाववद्ध्रदविषयकज्ञानमिति भ्रमसंभवात् तादृशभ्रमीयतादृशविषयिताप्रकारतानिरू-
पितविशेष्यतायाः प्रमीयविशेष्यताप्रतियोगिकस्वरूपात्मकव्यधिकरणसम्बन्धेन दोषज्ञानेऽसत्त्वेन ल-
क्षणसमन्वयः यदि विशेषरूपेण स्वरूपादीनां सम्बन्धत्वं न स्वीक्रियते तदोक्तप्रकारेणाऽनुगमाऽ-
सम्भवेपि प्रकृतानुमितित्वव्यापकप्रतिबध्यताविशिष्टरूपवत्त्वं लक्षणम् प्रतिबध्यतावैशिष्ट्यञ्च स्वनि-
रूपितप्रतिबन्धकतावृत्तिकिंचिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिता-
शालिनिश्चयानिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितानिरूपितपरम्प-
रावच्छेदकत्व-स्वावच्छेदकधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावृत्तिकिंचिद्रूपावच्छिन्नविषयि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वाऽव्यापकविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयविशि-
ष्टताद्दशनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वम् नास्तीति प्रतितिसिद्धाभावप्रतियोगितानिरूपितानिश्चय-
निष्ठावच्छेदकताविशिष्टविषयिता नास्तीति प्रतीतिसिद्धाभाववत्प्रतीतिविषयितानिरूपकतावच्छेदकत्वो-
भयसम्बन्धेन इदानीं बाधनिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकधर्मावच्छिन्नप्रतिब-
ध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतामादाय द्वितीयसम्बन्धोपि दोषतावच्छेदकरूपेऽस्ती-
ति व्यधिकरणसम्बन्धावच्छिन्नाभावो न वक्तव्यः असंग्राह्यविशिष्टविषयकानिश्चये ज्ञानवैशिष्ट्याव-
च्छिन्नप्रतिबन्धकतावृत्तिताद्दशाभावप्रतियोगितानिरूपितावच्छेदकताविशिष्टविषयितासामान्याभावस्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावेन नातिव्याप्तिः एवं स्वरूपसम्बन्धरूपावच्छेदकत्वपक्षेपि तादृशप्रतिबध्यताविशिष्टरूपवत्त्वमेव लक्षणं वैशिष्ट्यघटकप्रथमसम्बन्धः प्रागुक्त एव द्वितीयसम्बन्धश्च स्वावच्छेदकावच्छिन्नप्रतिबध्यता-निरूपितप्रतिबन्धकतावृत्तिकिंचिद्रूपावाच्छिन्नविषयिताविशिष्टकिंचिद्रूपावाच्छिन्नविषयितात्वावच्छिन्नप्र-तियोगिताकाभाववत्प्रतीतिविषयितानिरूपकतावच्छेदकत्वरूपः अभावस्य प्रतिबन्धकतावृत्तित्वञ्च स्वप्रतियोगिताविशिष्टनिश्चयीयविषयित्वावच्छिन्नत्वसम्बन्धेन प्रतियोगितावैशिष्ट्यञ्च प्रागुक्तस्वरूप-सम्बन्धरूपावच्छेदकत्वपक्षानुगमे निरूपकतावैशिष्ट्यनियामकसम्बन्धेनेति न काचिदनुपपत्तिः ।
अत्र चिकीर्षासामग्र्या अनुमितिप्रतिबन्धकतामते ह्रदो वह्निमान् कृतिसाध्यतावदिष्टसाधनतावत्पाक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालीनजलादित्यत्राऽसाधारण्येऽव्याप्तिः तत्राऽसाधारण्यज्ञानचिकीर्षासामग्र्योरेकधर्मावच्छिन्नंप्रत्येव प्रतिबन्धकत्वादतस्तद्वारणायाऽनतिरिक्तवृत्तित्वरूपावच्छेदकताया विशेषणदले प्रवेश इति । नन्वेवं सति प्रतियोगित्वं वह्निमत् वह्न्यभाववद्वह्न्यधिकरणनिष्ठाभावनिरूपितत्ववत्कालीनजलादित्यत्र वह्निव्यापकीभूताभावप्रतियोगिवह्न्यभाववद्वह्न्यधिकरणनिष्ठाभावनिरूपितत्ववत्कालीनजलरूपासाधारण्येऽव्याप्तिः प्रतियोगितात्वविशिष्टे वह्निवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नंप्रति पक्षे हेतुमत्ताज्ञानकालीनाऽसाधारण्यविषयकनिश्चयस्य प्रतिबन्धकतया तदवच्छिन्नंप्रत्येव वह्न्यधिकरणनिष्ठाभावनिरूपितत्ववद्वह्न्यभाववद्वह्न्यधिकरणनिष्ठाभावनिरूपितत्ववत्प्रतियोगित्वमिति निश्चयविशिष्टनिश्चय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्य प्रतिबन्धकतया तादृशाऽसाधारण्यनिश्चयत्वावच्छिन्नप्रतिबन्धकतायाः प्रथमसम्बन्धस्याऽसाधारण्यतावच्छेदकरूपे सत्त्वेपि द्वितीयसम्बन्धो नास्त्येव तादृशप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकपक्षे–साध्यवैशिष्ट्यावगाहित्वघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपिता या उक्तावच्छेदकधर्मदर्शनप्रतिबन्धकता तद्वृत्तिनिरुक्ताभावीयप्रतियोगितानिरूपितनिश्चयनिष्ठावच्छेदकताविशिष्टोक्तैकविशिष्टविषयताविशिष्टापरविषयितायास्तादृशाऽसाधारण्यविषयकनिश्चये सत्त्वादिति चेन्न । असाधारण्यविषयकनिश्चयस्य सामानाधिकरण्येनानुमितिमवच्छेदकावच्छेदेनानुमितिं प्रत्यपि प्रतिबन्धकत्वं पक्षे हेतुमत्ताज्ञानं यादृशं तादृशानुमितिंप्रत्येव तस्य प्रतिबन्धकत्वात् प्रकृतासाधारण्यघटकावच्छेदकधर्मदर्शनस्यतु अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छेदकावच्छेदेनानुमितिं प्रति प्रतिबन्धकत्वं तादृशासाधारण्यशरीरे व्यापकताघटकतया प्रतियोगित्वांशे वह्न्यभावावच्छेदकत्वेन गृहीतस्य वह्न्यधिकरणनिष्ठाभावनिरूपितत्वस्य सामानाधिकरण्येनैव प्रविष्टत्वात् अवच्छेदकधर्मदर्शनप्रतिबन्धकत्वस्य बाधबुद्धितुल्ययोगक्षेमत्वात् तादृशासाधारण्यशरीरे प्रतियोगितात्वावच्छेदेन तादृशावच्छेदकधर्मप्रवेशेऽवच्छेदकावच्छेदेन तादृशधर्मविशिष्टप्रतियोगित्वाप्रसिद्ध्या विशिष्टदोषाप्रसिद्ध्या क्वाऽव्याप्तिः एवञ्चाऽसाधारण्यनिश्चयनिष्ठसामानाधिकरण्येनानुमि-

१ ननु वह्न्यधिकरणवृत्त्यभावनिरूपितत्वस्य संयोगेन प्रमेयाभावनिरूपितप्रतियोगितायां बाधात् व्यापकत्वभङ्गो निश्चेतव्य इति भ्रमः प्रमेयाभावस्यापि संयोगेन वह्न्यधिकरणे कालिकेन वर्तमानत्वात् । नच वह्न्यधिकणनिरूपितवृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिप्रतिबन्धकतामादाय लक्षणसमन्वयः तादृशप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकतापर्याप्त्यधिकरणशुद्धसंयोगसम्बन्धेन वह्निमत्प्रतियोगित्वबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतायां ता-

---

त्तितायां स्वरूपसम्बन्धावच्छिन्नत्वं निविष्टमिति वाच्यम्। अननुगमात् किंच कालपक्षककालिकसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वप्रकारकप्रमाविशेष्यत्वाभावसाध्यकस्थले निरुक्तप्रमाविशेष्यत्वाभावाऽभाववन्निरुक्तप्रमाविशेष्यत्वाधिकरणनिरूपितकालिकसम्बन्धावच्छिन्नवृत्तितानिरूपकत्ववद्वृत्तिनिरुक्तनिरूपकत्ववत्कालेऽतिव्याप्तेः तत्रच स्वरूपसम्बन्धघटितविशिष्टद्वयाऽघटितत्वस्य प्रकृतविशिष्टद्वयघटितसमुदाये सत्त्वादिति चेन्न। किंचित्प्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकतानियामकसम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वादिति।

CC-0. In Public Domain. Digitization by eGangotri

दृशासाधारण्यघटकविशिष्टद्वयविषयिताशालिनिश्चयत्वव्यापकत्वाभावेनाऽन्यविशिष्टद्वयस्यैव तादृशत्वात् तद्विषयिताशून्यत्वस्योक्तासाधारण्यानिश्चये सत्त्वात् । एतेनाभावो गगनत्ववान् आधेयत्वादित्यत्र गगनत्वव्यापकाभावप्रतियोग्याधेयत्वरूपासाधारण्ये हेतुमत्पक्षघटितेऽव्याप्तिः प्रतिबन्धकताद्यैक्यविवक्षायामपि दुर्वारेति परास्तम् । तादृशासाधारण्यस्य हेतुमत्पक्षविशिष्टासाधारण्यरूपविशिष्टद्वयघटितत्वेपि विशिष्टाऽसाधारण्यानिश्चये हेतुमत्पक्षविषयिताशून्यत्वाभावेन तादृशविशिष्टद्वयस्य यादृशविशिष्टपदेन धर्तुमशक्यत्वात् परस्पर[1]विषयिताशून्ययादृशविशिष्टद्वयविषयकनिश्चयत्वं तादृश-

१ परस्परविषयिताशून्ययादृशविशिष्टद्वयविषयकनिश्चयत्वमित्यस्य चरमनिश्चयीयविषयितानिरूपकतावच्छेदकयद्रूपाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्ननिरूपकताकविषयिताशून्ययद्रूपावच्छिन्नविषयकनिश्चयविशिष्टप्रथमनिश्चयीयविषयितानिरूपकतावच्छेदकयद्रूपाव-
च्छिन्ननिरूपकताकविषयिताशून्ययद्रूपावच्छिन्नविषयकनिश्चयत्वमनुमितिप्रतिबन्धकताऽनतिरिक्तवृत्ति तद्रूपावच्छिन्नविष-
यताविशिष्टतद्रूपावच्छिन्नविषयताशून्यत्वमर्थः । नन्वत्र सर्वत्रासम्भवः जलवान् ह्रद इति चरमनिश्चयीयजलत्वनिष्ठनिरू
पकतावच्छेदकताकजलविषयिताया जलवान् वह्न्यभाववानित्यादिज्ञाने सत्त्वात् । नच पर्य्याप्तिनिवेशे नायं दोष इति
वाच्यम् । अभावो गगनत्ववान् आधेयत्वादित्यत्राव्याप्तेर्जलेपत्वात् तथाहि आधेयत्ववदभावत्वपर्य्याप्तावच्छेद-
कताकनिरूपकताकविषयिताशून्यत्वमसाधारण्यविषयकनिश्चयेऽसाधारणनिश्चयीयविषयितानिरूपकतावच्छेदकतापर्य्या-
प्त्यधिकरणधर्मपर्य्याप्तावच्छेदकताकविषयिताशून्यत्वंच केवलहेतुमत्पक्षविषयकज्ञाने चेति चेन्न । परस्परविषयिताशू-

CC-0. In Public Domain. Digitization by eGangotri

प्रतिबन्धकतानतिरिक्तवृत्तितादृशविशिष्टद्वयविषयिताशून्यत्वस्य तादृशासाधारण्यनिश्चयेऽक्षतत्वात् ए-
वं घटो गगनाभाववदभाववत्कालीनगगनवानित्यत्र बाधेपि नाव्याप्तिः तत्र तादृशबाधनिश्चयनिरूपि-

---

न्यत्वमित्यनेन विशिष्टद्वयीयविशेष्यतानिरूपितविशेष्यत्वीयनिरूपकतावच्छेदकरूपावच्छिन्नविषयिताशून्यत्वस्य विव-
क्षितत्वात् तथाचासाधारण्यघटकव्यापकत्वशरीरे गगनत्वावच्छिन्नवृत्तितावानभाव इत्यंशीयविशेष्यताया अपि ग्रह-
णात्तच्छून्यत्वस्यासाधारण्यज्ञानेऽसत्त्वेन निरुक्तविशिष्टद्वयपदेन तद्विशिष्टद्वयस्य धर्तुमशक्यत्वाद्विशिष्टद्वयान्तराऽघटितत्वा-
न्नाव्याप्तिः एवमेव जलवद्ध्रदत्ववह्न्यभाववज्जलवत्त्वरूपनिरुक्तरूपावच्छिन्नविषयिताशून्यत्वसत्त्वात् सर्वं समञ्जसमिति नि-
र्मत्सरतर्करसिका विभावयन्तु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ता या विशिष्टगगनवत्ताबुद्धित्वावच्छिन्ना प्रतिबध्यता तस्यां उक्तोभयसंबन्धेन तादृशबाधतावच्छेद-
के सत्त्वात् तत्र गगनाभाववदभाववत्कालीनगगनाभावत्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नवि-
शेष्यताशालिनिश्चयत्वाऽवच्छिन्नप्रतिबन्धकतानिरूपितविशिष्टगगनवत्ताबुद्धित्वाऽवच्छिन्नप्रतिबध्यताया-
स्तादृशानुमितित्वव्यापिकायाः सत्त्वात् तादृशप्रतिबध्यतानिरूपितप्रतिबन्धकताघटितप्रथमसंबन्धस्य
च सत्त्वात् एवं तदवच्छेदकविशिष्टगगनवत्ताबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपिता या तद्व्यक्तित्ववान्
तादृशगगनाभाववान् तद्व्यक्तित्ववान् घट इति निश्चयविशिष्टनिश्चयत्वावच्छिन्नप्रतिबन्धकता तन्निष्ठतादृ-
शनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगितानिरूपितनिश्चय-

CC-0. In Public Domain. Digitization by eGangotri

निष्ठावच्छेदकताविशिष्टविषयिताया उक्तबाधनिश्चयेऽसत्त्वेन द्वितीयसंबन्धस्यच सत्त्वात् । नचाभाववा-
न् गगनाभाववान् अभाववान् घट इति निश्चयविशिष्टनिश्चयस्यापि तादृशविशिष्टगगनवत्ताबुद्धिप्र-
तिबन्धकतया तादृशप्रतिबध्यतावच्छेदकधर्म्मावच्छिन्नप्रतिबध्यतानिरूपितोक्तनिश्चयनिष्ठप्रतिबन्धक-
तावृत्तितादृशाभावप्रतियोगितावच्छेदकताविशिष्टविषयिताया उक्तबाधज्ञाने सत्त्वेन कथं तत्संग्रह इति
वाच्यम् । स्वनिरूपितप्रतिबध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नपर्याप्तिकाव-
च्छेदकताकप्रतिबध्यताया एव तादृशसंबन्धशरीरे निवेशनीयतया गगनाभाववदभाववदभाववद्घटविषयक-
निश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकशरीरे घटो गगनवान् तादृशविशिष्टगगनवान् पट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालीनगगनवान् इत्यादिज्ञानानामेकरूपेण प्रतिबध्यतानिर्वाहाय घटविशेष्यकगगनप्रकारकबुद्धित्वस्यैव प्रवेशेन तादृशविशिष्टबाधनिश्चयनिरूपितप्रतिबध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकस्य तादृशविशिष्टगगनत्वादिनिष्ठसमुदायत्वस्योक्तावच्छेदकधर्मदर्शनप्रतिबध्यतावच्छेदकतापर्याप्त्यवच्छेदकत्वाभावेन तादृशनिश्चयविशिष्टनिश्चयनिष्ठप्रतिबन्धकताया व्यावर्तनात्।नचाभाववान् गगनाभाववान् अभाववान् घट इति निश्चयकाले घटे तादृशविशिष्टगगनवत्ताबुद्ध्यनुत्पादेन ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकताया आवश्यकतया तत एव विशिष्टगगनाभाववद्घटवत्तानिश्चयकालेऽप्यनुमित्यनुत्पादनिर्वाहे ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतायां मानाभाव इति वाच्यम्। तथा सति अभाववति गगनाभावोऽव्याप्यवृत्तिरिति नि-

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चयकाले तादृशबाधनिश्चयानन्तरं तादृशविशिष्टानुमित्यापत्तेः अवच्छेदकधर्मदर्शनस्यापि व्यापकांशेऽव्याप्यवृत्तित्वज्ञानाभावविशिष्टनिश्चयविशिष्टस्यैव प्रतिबन्धकत्वात् एवं गगनाभाववदभाववत्कालीनघटो गगनवानित्यत्र गगनाभाववत्तादृशघटरूपबाधेपि नाव्याप्तिः तत्र तादृशघटो गगनवानिति बुद्धिंप्रति अभाववान् गगनाभाववान् अभाववान् गगनाभाववदभाववत्कालीनघट इति निश्चययोः प्रतिबन्धकत्वेपि तादृशविशिष्टयोः परस्पराघटितत्वाभावेन तद्घटितत्वस्याकिंचित्करत्वात् अभाववान् गगनाभाववान् अभाववान् घट इति निश्चययोः प्रतिबन्धकत्वमेव नास्ति अभाववान् घट इति निश्चयस्य घटत्वसामानाधिकरण्येनाऽभावावगाहित्वेऽनुमितेरपि घटत्वसामानाधिकरण्येन गगनावगाहितया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽप्रतिबन्धकत्वात् अवच्छेदकावच्छेदेन तदवगाहित्वे तादृशघटस्य बाधघटकत्वमेव नास्तीति नाव्याप्तिः अतस्तादृशबाधनिश्चयस्य ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकत्वमन्तरेण स्वतन्त्रविशिष्टनिश्चयत्वावच्छिन्नप्रतिबन्धकताविरहेऽपि न क्षतिः यद्यपि तादृशविशिष्टपक्षकगगनसाध्यकस्थलेऽभाववत्तादृशघटेऽतिव्याप्तिः तद्घटकीभूतविशिष्टद्वयस्य परस्पराघटितत्वाभावेन यादृशविशिष्टपदेन धर्तुमशक्यतया तादृशविशिष्टद्वयाऽघटितत्वस्याक्षतत्वात् एवं रूपं नीलरूपवदित्यत्र नीलरूपाभाववन्नीलेऽतिव्याप्तिः एवमभावो वह्निमानित्यत्र वह्न्यभाववद्वह्निमत्यतिव्याप्तिः तत्रोभयत्र तद्घटकीभूतविशिष्टद्वयस्य परस्पराऽघटितत्वाभावात् तथापि वक्ष्यमाणविशिष्टात्तराऽघटितत्वस्यैतेन परिष्कारेणैव वारणीयतया न दो-

CC-0. In Public Domain. Digitization by eGangotri

षः यदि अत्रापि तादृशदोषोद्धार आवश्यकस्तदा विशेष्यदलघटकविषयितायां तत्तद्विषयिताभिन्नत्वं विशेषणं देयम् । नन्वत्र विशिष्टद्वयाघटितत्वनिवेशो व्यर्थः एकविशिष्टाऽघटितत्वनिवेशादेवोक्तातिव्याप्तिवारणात् तथाहि यादृशविशिष्टविषयकत्वं प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताऽनतिरिक्तवृत्ति तादृशविशिष्टविषयिताशून्यज्ञानीययद्रूपावच्छिन्नविषयिताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वं लक्षणं तथाच नोक्तविशिष्टेऽतिव्याप्तिः वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयतादृशजलवद्ध्रदत्वावच्छिन्नविषयिताया ह्रदो वह्निमानित्यनुमितिप्रतिबन्धकताऽनतिरिक्तवृत्तितया तद्रूपावच्छिन्नविषयि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताशून्यत्वस्य तादृशाविशिष्टविषयकज्ञानेऽसत्त्वात् । नच वह्न्यभाववद्ध्रदादिरूपबाधाद्यसंग्रहः तेषां स्वात्मकविशिष्टघटितत्वादिति वाच्यम्। यद्रूपावच्छिन्नविषयिता प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्तिः तद्रूपावच्छिन्नविषयिताशून्यत्वस्य विवक्षणीयत्वात् तथाच बाधादिविषयिताया ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानऽतिरिक्तवृत्तित्वाभावात् यादृशविशिष्टविषयिता तादृशी तच्छून्यत्वस्य बाधादिज्ञाने सत्त्वान्नाव्याप्तिः। नचैवमपि घटो गगनाभाववदभाववत्कालीनगगनवानित्यादौ बाधेऽव्याप्तिः तादृशबाधज्ञाने ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताया अपि सत्त्वेन तद्विषयितायास्तादृशप्रतिबन्धकताऽनतिरिक्तवृत्तित्वादिति वाच्यम् । यादृशावैशिष्ट-

CC-0. In Public Domain. Digitization by eGangotri

विषयिता ज्ञानवैशिष्ट्यांवच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्तिज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छे-
दिका तादृशविषयिताशून्यत्वस्य विवक्षणीयत्वात् उक्तबाधविषयिताया ज्ञानवैशिष्ट्याऽनवच्छिन्नप्रति-
बन्धकतायामप्यवच्छेदकतया तादृशी विषयिता गगनाभाववदभाववत्कालीनगगनाभाववत्तद्व्यक्तित्ववद्वृ-
त्तितद्व्यक्तित्ववद्घटविषयितैवेति तच्छून्यत्वस्योक्तबाधज्ञाने सत्त्वादव्याप्तिविरहात् । नच गगनवत्प्रति-
योगित्वं गगनाभाववद्वह्न्यधिकरणवृत्त्यभावानिरूपितत्ववत्कालीनवह्निमज्जलादित्यत्रावच्छेदकधर्मघटि-
ताऽसाधारण्येऽव्याप्तिः तादृशासाधारण्यविषयितायाः तादृशानुमितित्वव्यापकविशिष्टपक्षग्रहत्वा-

१ अत्र प्रतिबन्धकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वस्य प्रयोजनाभावेनानुपादेयत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्तितया ज्ञानवैशिष्ट्यावच्छिन्न-
प्रतिबन्धकतानवच्छेदकतयाच तादृशासाधारण्यस्य यादृशविशिष्टपदेन धर्तुं शक्यत्वेन तदघटितत्व-
स्य तत्रासत्त्वादिति वाच्यम्। स्वमत इवात्रापि प्रतिबन्धकतैक्यस्य विवक्षणीयत्वात् तथाच विशेष्य-
दलघटकीभूताया असाधारण्यविषयकनिश्चयत्वव्यापिकायाः पक्षतावच्छेदकावच्छिन्ने विशिष्टसाध्यवैशि-
ष्ट्यावगाहित्वावच्छिन्नप्रतिबध्यतानिरूपितायाः प्रतिबन्धकतायाः प्रकृतासाधारण्यघटकावच्छेदकध-
र्मदर्शननिष्ठप्रतिबन्धकतायाः विशिष्टपक्षग्रहत्वावच्छिन्ननिरूपिताया गगनाभाववद्वह्निमन्निष्ठाभावनिरू-
पितत्ववत्त्वविशिष्टविषयकनिश्चयविशिष्टवह्निमन्निष्ठाभावनिरूपितत्ववत्प्रतियोगितात्वविशिष्टविषयकनि-

CC-0. In Public Domain. Digitization by eGangotri

श्चयत्वावच्छिन्नायाश्चैक्याभावेन न तत्राव्याप्तिः तथाच प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपित-प्रतिबन्धकताविशिष्टरूपवत्त्वं लक्षणम् प्रतिबन्धकतावैशिष्टयंच स्ववृत्तिकिञ्चिद्रूपावच्छिन्नविषयित्वा-व्यापकविषयिताशून्यकिञ्चिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्ती-ति प्रतीतिसिद्धाभावीयप्रतियोगिता[1]निरूपितावच्छेदकता[2]निरूपितावच्छेदकता[3]निरूपितावच्छेदकता[4]नि-रूपितावच्छेदकता[5]निरूपितावच्छेदकता[6]निरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावत्त्व-स्वतादा-त्म्यापन्नज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानिष्ठकिञ्चिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यकि--

१ अवच्छेदकत्वे । २ प्रतियोगितायाम् । ३ भेदे । ४ वृत्तित्वे ५ निश्चये । ६ विषयितायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितानिरूपितावच्छेदकं[1]तानिरूपितावच्छेदकं[2]तानिरूपितावच्छेदकं[3]तानिरूपितावच्छेदकं[4]तानिरूपितावच्छेदकं[5]तानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावद्धर्मावच्छिन्नविषयितासम्बन्धावच्छिन्न—स्वाभाववत्प्रतीतिविषयितानिरूपकतावच्छेदकत्वोभयसम्बन्धेन एवंचैतन्मतेपि स्वमते अनुगमघटकसम्बन्ध एवात्राप्यनुगमघटकः तादृशद्वितीयसंबन्धघटकाभावो लघुशरीर इति लाघवमेतन्मते एवंच गगनवत्प्रतियोगित्वं गगनाभाववद्धृदचधिकरणनिष्ठाभावनिरूपितत्ववत्कालीनवह्निमज्जलादित्यत्रासा--

१ प्रतियोगित्वे । २ भेदे । ३ वृत्तित्वे । ४ निश्चये । ५ विषयितायाम् ।

CC-0. In Public Domain. Digitization by eGangotri

धारण्ये नाव्याप्तिः प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपिताऽसाधारण्यविषयकत्वावच्छिन्नप्रतिब-न्धकताविशिष्टरूपं तादृशासाधारण्यतावच्छेदकं तादृशप्रतिबन्धकतावृत्तिर्यः पक्षे हेतुमत्ताज्ञानका-लीनाऽसाधारण्यविषयकनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धोभावस्तन्निरूपि-तप्रतियोगितया परम्परया निरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतायाः प्रथमसंबन्धस्य तत्र स-त्त्वात् एवं स्वतादात्म्यापन्नज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकत्वं स्वयमेव तत्र च यादृशविशिष्टविषय-कत्वाव्यापकविषयिताशून्ययादृशविशिष्टविषयकनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रती-तिसिद्धाभावस्तादृशविशिष्टाप्रसिद्ध्या स्वभिन्नविशिष्टपक्षग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितगगनाभाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

वद्वह्न्यधिकरणनिष्ठाभावनिरूपितत्वाविशिष्टविषयकनिश्चयविशिष्टवह्न्यधिकरणनिष्ठाभावनिरूपितत्वव--
त्प्रतियोगितात्वविशिष्टविषयकनिश्चयत्वावच्छिन्नप्रतिबन्धकत्वादौ गगनाभाववद्वह्न्यधिकरणवृत्त्यभावनि-
रूपितत्ववद्वृत्तिताहशनिरूपितत्ववत्प्रतियोगितात्वविशिष्टविषयकत्वाऽव्यापकविषयिताशून्यताहशविष-
यिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावस्य सत्त्वात् स्वता-
दात्म्यापन्नज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावृत्तिताहशाभावघटितसम्बन्धस्य तस्य व्यधिकरणत्वेन
द्वितीयसम्बन्धस्यच सत्त्वात् एवं घटो गगनाभाववदभाववत्कालीनगगनवानित्यत्र बाधे नाव्याप्तिः
तत्र ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकताया द्वितीयसम्बन्धघटकाविषयित्वस्य व्यधिकरणसम्बन्धत्वा-

Nepal Sanskrit University, Balmandir, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त् तथाचैतन्मते गगनाभाववदभाववत्कालीनघटो गगनवानित्यत्राऽभाववत्तादृशघटे रूपं नीलरूपवदित्यत्र नीलरूपाभाववन्नीले अभावो वह्निमानित्यत्र वह्न्यभाववद्वह्निमतिच नातिव्याप्तिः तत्र ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतामादायैव लक्षणसत्त्वस्योपपादनीयतया अभाववत्तादृशघटत्वादौ तादृशप्रतिबन्धकतायाः प्रथमसम्बन्धस्य सत्त्वेपि द्वितीयसंबन्धस्याभावात् तत्राभाववत्तादृशघटत्वावच्छिन्नविषयिताशाल्यव्यापकविषयिताशून्यनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावसत्त्वेन तन्निरूपितप्रतियोगिताघटितोक्तविषयित्वाभावस्य तादृशविशिष्टविषयकप्रतीतावभावात् । नचैवं तादृशविशिष्टघटपक्षकगगनसाध्यकस्थले गगनाभाववद्विशिष्टघटात्मकबाधेऽव्याप्तिः तत्र ज्ञा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवैशिष्ट्यावच्छिन्नप्रतिबन्धकताया एव सत्त्वेन ताद्दशप्रतिबन्धकताया उक्तोभयसंबन्धस्य ताद्दशघटत्वे- ऽसत्त्वात् स्वमते ताद्दशबाधघटकगगनाभाववदभाववत्त्वविशिष्टबाधरूपविशिष्टयोः परस्पराघटित्वाभा- वेन तदुभयघटितत्वं नाव्याप्तिसंपादकम् एवमभावो गगनत्ववानाधेयत्वादित्यत्र गगनत्वव्यापकाभावप्र- तियोग्याधेयत्वरूपासाधारण्येऽव्याप्तिः तत्रापि ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताया एव सत्त्वात् एवं व- ह्न्यभाववद्वह्न्यभावव्याप्यवत्कालीनह्रदो वह्निमानित्यत्र वह्न्यभावव्याप्यवद्वह्न्यभाववद्वह्न्यभावव्याप्य- वत्कालीनह्रदरूपसत्प्रतिपक्षेऽव्याप्तिः एवं धूमाभाववद्धूमाभावव्याप्यवत्कालीनह्रदो वह्निमान् धूमादित्य- त्र धूमाभावव्याप्यवत्ताद्दशह्रदरूपस्वरूपासिद्धावव्याप्तिः एवं धूमवान् धूमाभाववद्वृत्तित्ववद्धूमाभाववद्वृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तित्वव्याप्यवत्कालीनवह्नेरित्यत्र धूमाभाववद्वृत्तित्वव्याप्यवत्तादृशवह्निरूपव्यभिचारेऽव्याप्तिरेवं विरोधेऽप्यव्याप्तिः सर्वत्र तादृशदोषज्ञानानां ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धकत्वात् स्वमते तादृशदोषघटकविशिष्टद्वयस्य परस्पराघटितत्वाभावेन यादृशविशिष्टपदेन तादृशविशिष्टद्वयस्य धर्तुमशक्यतया विशिष्टद्वयान्तराघटितत्वसत्त्वात् नाव्याप्तिरिति वाच्यम् । स्वमतेऽतिव्याप्तिवारणाय विशेष्यदलघटकविषयितायां विषयिताविशेषभेदो निवेश्यः एतन्मते उक्ताव्याप्तिवारणाय विशेषणदलघटकविषयितायां विषयिताविशेषभेदो निवेश्य इति तुल्यं स्वमते लक्षणशरीरगौरवं परमतिरिच्यत इति चेन्न । नानाविधावच्छेदकधर्मदर्शनानामेकरूपेण प्रतिबन्धकत्वमिति–मते एतन्मते सर्वत्र प्रागुक्तदो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षेष्वव्याप्तिः ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताया उक्तोभयसंबन्धेन दोषतावच्छेदकेऽसत्त्वात् तत्र प्रथमसंबन्धस्य सत्त्वेपि तादृशप्रतिबन्धकतावृत्तिविशिष्टदोषविषयकनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितानिरूपितावच्छेदक[1]तानिरूपितावच्छेदक[2]तानिरूपितावच्छेदक[3]तानिरूपितावच्छेदक[4]तानिरूपितावच्छेदक[5]तानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावद्धर्मावच्छिन्नविषयित्वाभाववत्प्रतीतिविषयितानिरूपकतावच्छेदकत्वाभावात् एकरूपेण प्रतिबध्यप्रतिबन्धकभावश्च ह्रदत्वावच्छिन्नविशेष्यकवह्नित्वावच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्नंप्रति वह्न्यभावत्वा-

---

१ प्रतियोगितायाम् । २ भेदे । ३ वृत्तित्वे । ४ निश्चये । ५ विषयितायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नप्रकारताविशिष्टहृदत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन विशेष्यतायां प्रकारतावैशिष्ट्यंच स्व-
विशिष्टप्रकारतानिरूपितत्व-स्वनिरूपकनिश्चयसमानाधिकरणज्ञानीयत्वोभयसंबन्धेन प्रकारतायां स्व-
वैशिष्ट्यंच स्वनिरूपितविशेष्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्व-स्वविशिष्टरूपावच्छिन्नत्वोभय-
संबन्धेन रूपे स्ववैशिष्ट्यंच स्वनिरूपितविशेष्यतावच्छेदकतावच्छेदकत्व-स्वनिरूपितसंसर्गतानिरू-
पितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितस्वाश्रयनिष्ठावच्छेदकतानिरूपितकिंचित्समानाधिकरणभेदप्र-
तियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदक-
तानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितप्रतियोगितानिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तभेदनिष्ठाऽवच्छेदकतानिष्ठाऽवच्छेदकतानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपिताधि-
करणनिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपितधर्मनिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपिताधेयतासं--
बन्धावच्छिन्नावच्छेदकतावत्त्वोभयसंबन्धेनेति । अवच्छेदकधर्मदर्शनानामेकरूपेण प्रतिबन्धकत्वानङ्गी-
कर्तृमते नीलरूपाभाववन्नीलमित्यादिनिश्चयानां विशिष्टज्ञानत्वेनैव प्रतिबन्धकत्वं तादृशज्ञानस्य नि-
यमतो रूपत्वविशिष्टे नीलत्वावगाहितया ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकत्वे प्रमाणाभावात् तथाच त-
न्मते तत्राऽतिव्याप्तिः तत्प्रतिबन्धकतायाः ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावृत्तितादृशाभावघटि-
तविषयितात्मकसंबन्धस्य व्यधिकरणत्वात् तथाच मतद्वयानुसारेण लक्षणकरणे उक्तस्थलेष्वातिव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्त्यव्याप्तिवारणाय विशेष्यदले विषयितायामुक्तविषयिताभेदः विशेषणदले विषायतायां प्रागुक्तसर्व-
विषयिताभेदो निवेशनीय इति गौरवं स्वमते मतद्वयेप्यतिव्याप्तिवारणाय विशेष्यदले विषयितायामेव
विषयिताविशेषभेद एव निवेश्य इति लाघवम्। यत्तु कैश्चिदुक्तं ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताला-
भायैव तदभिधानमिति। तदसत्। उक्तरीत्या तन्निवेशस्यावश्यकत्वात्। यत्तु एकविशिष्टाघटितत्व-
निवेशे वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदविषयितावच्छेदवह्न्यभाववज्जलवत्कालीनजलवद्ध्रदविषयितावच्छेदा-
दीनां निवेशनीयतया गौरवं विशिष्टद्वयाघटितत्वपक्षे न तादृशगौरवं वह्न्यभाववज्जलवत्त्वविशिष्टविष-
यिताविशिष्टजलवद्ध्रदत्वविशिष्टविषयित्वाभावस्य निवेशादेवैकावच्छेदकधर्मघटितनानाविशिष्टवारणसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवादिति । तदपि न । उक्तप्रकारेणानुगमे तादृशगौरवाप्रसक्तेरिति । नन्वत्र यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमित्यत्र प्रथमनिश्चयत्वस्थाने ज्ञानत्वं निवेशनीयं द्वितीयं निश्चयत्वघटितं तथाच यादृशविशिष्टविषयकज्ञानविशिष्टयादृशविशिष्टविषयकनिश्चयत्वम् प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वं विशेषणम् इदानीं ज्ञानवैशिष्ट्यं तादात्म्यसंबन्धेन द्वितीयनिश्चयत्वं संशयान्यत्वं तथाचैकांशे संशयात्मकापरनिश्चयस्य व्यावृत्त्या न तादृशविशिष्टाऽप्रसिद्धिः । नचैवमपि जलवान् वह्न्यभाववान् जातिमत्त्वान् ह्रदः जातिमत्त्वान् वह्न्यभाववान् जलवान् ह्रद इति समुहालम्बनज्ञानयोः प्रतिबन्धकताविरहेण तादृशविशिष्टद्वयाप्रसिद्ध्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽसंभवापत्त्याऽव्यापकविषयिताशून्यत्वस्यावश्यं निवेशनीयतया सर्वत्र समूहालम्बनज्ञानमादायैव तादृशविशिष्टद्वयविषयकनिश्चयत्वेऽनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वस्योपपादनीयतया समूहालम्बनज्ञानेच प्रत्येकविषयिताऽव्यापकविषयित्वशून्यत्वस्याभावेन तादृशविशिष्टद्वयाप्रसिद्धिर्दुर्वारैव ॥ नच किञ्चिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यत्वमेव तादृशज्ञाने निवेशनीयम् एवंसति अनुगमशरीरप्रविष्टद्वितीयसम्बन्धघटकाभावोपि लघुशरीरः तथाच वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यवह्न्यभाववज्जलवत्त्वविशिष्टविषयकज्ञानात्मकजलवद्ध्रदत्वविशिष्टविषयकनिश्चयत्वे तादृशप्रतिबन्धकतानतिरिक्तवृत्तित्वसत्त्वात् न विशिष्टद्वयाऽप्रसिद्धिरिति वक्तव्यं । त-

॥ ११८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थासति वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यवह्न्यभाववद्ध्रदत्वविशिष्टविषयिताशालिज्ञानात्मकतादृशविशिष्टविषयकनिश्चयत्वस्य तादृशप्रतिबन्धकतानातिरिक्तवृत्तितया तादृशविशिष्टविषयिताविशिष्टतादृशविशिष्टविषयिताशून्यज्ञानविषयत्वरूपतादृशविशिष्टद्वयाघटितत्वस्याभावेन बाधादावव्याप्तिरिति वाच्यम् । ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकतादृशविशिष्टद्वयविषयिताशून्यत्वस्य विवक्षणीयतयाऽव्याप्तिविरहादिति चेन्न । गगनाभाववदभाववत्कालीनघटो गगनवानित्यत्र बाधेऽव्याप्तेः तत्र गगनाभाववद्गगनाभाववदभाववत्कालीनघटत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यगगनाऽभाववदभाववत्त्वविशिष्टविषयकज्ञानाऽऽत्मकतादृशविशिष्टबाधरूपविशिष्टविषयकनिश्चयत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्य प्रतिबन्धकतानतिरिक्तवृत्तितया तादृशविशिष्टविषयितायां ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्ध-कतानवच्छेदकत्वस्य सत्त्वात् तादृशबाधज्ञानस्य ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकतया वि-शिष्टज्ञानत्वेन प्रतिबन्धकत्वे मानाभावात् तथाच तादृशविशिष्टविषयिताशून्यत्वस्य तादृश-बाधज्ञानेऽसत्त्वात् एवमभावो गगनत्ववानाधेयत्वादित्यत्रासाधारण्येऽव्याप्तेश्च तस्य चाऽऽधेयत्व-वदभावत्वविशिष्टतादृशासाधारण्यरूपविशिष्टद्वयघटितत्वात् । नच स्वाभाववज्ज्ञानविशिष्टविषयिता-निरूपकतावच्छेदकयद्रूपविशिष्टविषयकज्ञानाविशिष्टतादृशयद्रूपविशिष्टविषयकनिश्चयत्वं प्रतिबन्धक-तानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वस्य निवेशनीयतया नोक्तबाधासाधारण्ययोरव्याप्तिः तत्र य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रूपपदग्राह्यबाधासाधारण्यतावच्छेदकरूपयोस्तादृशप्रतिबन्धकताशून्यज्ञाननिष्ठविषयितानिरूपकताऽव-च्छेदकत्वाभावेन तादृशतादृशविशिष्टद्वयस्य यादृशविशिष्टपदेन धर्तुमशक्यतया तद्व्यक्तित्ववान् गग-नाभाववान् तद्व्यक्तित्ववान् तादृशघट इत्यादिज्ञानविषयविशिष्टयोरेव धर्तव्यतया तदघटितत्वस्य तादृशबाधादौ सत्त्वादिति वाच्यम् । तादृशविशिष्टविषयिताऽव्यापकविषयिताशून्यत्वविवक्षणे ह्रदो ज-लवज्जातिमत्कालीनवह्निमानित्यत्र जलवज्जातिमत्कालीनवह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्तेः तत्र जलवान् जलवज्जातिमत्कालीनवह्न्यभाववान् जलवान् जातिमान् इति समूहालम्बनेपि जलवज्जाति-मत्कालीनवह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वावच्छिन्नविषयताऽव्यापकविषयिताशून्यत्वसत्त्वेन तादृशज्ञा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ने प्रतिबन्धकताविरहेण तादृशविशिष्टद्वयस्य यादृशविशिष्टद्वयपदेन धर्तुमशक्यतया पङ्कजवान् जलवज्जातिमत्कालीनवह्न्यभाववान् पङ्कजवान् ह्रद इति ज्ञानविषयीभूतविशिष्टद्वयस्यैव यादृशविशिष्टपदेन धर्तव्यत्वात्तदघटितत्वस्य तत्र सत्त्वात् । नच यद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वोपलक्षितयद्रूपावच्छिन्नविषयिताशालिज्ञानविशिष्टयद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वोपलक्षितयद्रूपावच्छिन्नविषयिताशालिनिश्चयत्वं प्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वस्य विवक्षणान्नोक्तातिव्याप्तिः असमूहालम्बनात्मकप्रत्येकज्ञानीयविषयितायाः समूहालम्बनात्मकज्ञानीयविषयितायाश्चैक्यात् जलवान् जलवज्जातिमत्कालीनवह्न्यभाववान् जातिमान् जलवान् इत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारकसमूहालम्बने जलवद्ध्रदत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यजलवान् ह्रद इति ज्ञानीयत्वोपलक्षितजलवद्ध्रदत्वावच्छिन्नविषयिताया अभावेन तत्र प्रतिबन्धकताया विरहेपि जलवान् तादृशवह्न्यभाववान् जलवान् ह्रद इति ज्ञाने तादृशविषयितावति प्रतिबन्धकतायाः सत्त्वेन यादृशविशिष्टपदेन तादृशविशिष्टद्वयस्यापि धर्तुं शक्यतया तदघटितत्वस्य तत्राभावादिति वाच्यम्। पूर्वोक्तबाधादिसंग्रहार्थं यद्रूपे स्वाभाववत्प्रतीतिविषयितानिरूपकतावच्छेदकत्वरूपविशेषणस्यावश्यकतया तद्घटकप्रतीतावनाहार्यत्वाऽप्रामाण्यज्ञानानास्कन्दितत्वनिश्चयत्वानां निवेशनीयतया गौरवात्। नच यद्रूपावच्छिन्नविषयिताऽव्यापकविषयिताशून्ययद्रूपावच्छिन्नविषयिताशून्यज्ञानीयत्वमेवोपलक्षणविधया विष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यितायां निवेशनीयं तथाच नोक्तगौरवम् अपित्वनुगमशरीरे लाघवमेव तथाहि प्रकृतानुमितित्व-
व्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टरूपवत्त्वं लक्षणम् वैशिष्ट्यं पूर्वोक्तसंबन्धद्वयेन द्विती-
यसंबन्धघटकाभावप्रतियोगितावच्छेदकसंबन्धश्च स्वनिष्ठो यः किंचिद्रूपावच्छिन्नविषयिताऽव्यापकविष-
यिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशून्यज्ञानीयत्वोपलक्षितकिंचिद्रूपाऽवच्छिन्नविषयिताशालिज्ञानवि-
शिष्टकिंचिद्रूपावच्छिन्नविषयिताऽव्यापकविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशून्यज्ञानीयत्वोपल-
क्षितकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽभावस्तन्निरूपितप्रति[1]योगितानिरूपितावच्छेदक[2]तानिरूपितावच्छेदक[3]तानिरूपितावच्छेदक[4]तानिरूपि-- तावच्छेदक[5]ताविशिष्टविषयितारूपः विषयितायामवच्छेदकतावैशिष्ट्यंच स्वाविशिष्टरूपावच्छिन्नत्व–स्व- विशिष्टरूपावच्छिन्नविषयितासामानाधिकरण्योभयसंबन्धेन प्रथमरूपे स्ववैशिष्ट्यंच स्वनिरूपितावच्छे- द[6]कतावत्त्व–स्वनिरूपिततादात्म्यसंबन्धावच्छिन्नावच्छेदक[7]तानिरूपितावच्छेदक[8]तानिरूपितावच्छेदक[9]ता-

---

१ अवच्छेदकत्वे । २ प्रतियोगितायाम् । ३ भेदे । ४ वृत्तित्वे । ५ निश्चये । ६ विषयितायाम् । ७ ज्ञाने । ८ विषयितायाम् । ९ वृत्तित्वे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निरूपिताव[1]च्छेदकतानिरूपिताव[2]च्छेदकतानिरूपिताव[3]च्छेदकतानिरूपितावच्छिन्नत्वसंबन्धाऽवच्छिन्नाव-
च्छेदकतावत्त्वोभयसंबन्धेन रूपेऽवच्छेदकतावत्त्वं च स्वनिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छे-
दकतावत्त्व-स्वनिरूपितावच्छे[4]दकतानिरूपिताऽवच्छे[5]दकतानिरूपितावच्छे[6]दकतानिरूपितावच्छे[7]दकता-
निरूपितावच्छे[8]दकतानिरूपितावच्छे[9]दकतानिरूपितावच्छे[10]दकतानिरूपितावच्छे[11]दकतानिरूपितावच्छे[12]द-
कतानिरूपितावच्छे[13]दकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावत्त्वोभयसंबन्धेन द्वितीयरू-

१ ज्ञाने। २ शून्यत्वे। ३ विषयितायाम्। ४ वृत्तित्वे। ५ ज्ञाने। ६ शून्यत्वे। ७ विषयत्वे। ८ अवच्छेदकत्वे। ९ प्रतियोगितायाम्। १० भेदे। ११ वृत्तित्वे। १२ अधिकरणे। १३ विषयितायाम्।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पे स्ववैशिष्ट्यंच स्वनिरूपिततादात्म्यसंबन्धावच्छिन्नावच्छेदक[१]तानिरूपितावच्छेदक[२]तावत्त्व–स्वनिरूपितावच्छेदक[३]तानिरूपितावच्छेदक[४]तानिरूपिताऽवच्छेदक[५]तानिरूपितावच्छेदक[६]तानिरूपितावच्छेदक[७]तानिरूपिताऽवच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावत्त्वोभयसंबन्धेन एतत्संबन्धघटकावच्छेदकतावत्त्वं रूपे प्रागुक्तोभयसंबन्धेनेति, यद्यभावप्रतियोगितावच्छेदकशरीरे उपलक्षणविधया प्रवेशो नाङ्गीक्रियते तदा द्वितीयसंबन्धघटकप्रतिबन्धकत्वाभावप्रतियोगितावच्छेदकसंबन्धश्च स्ववृत्तिर्यस्तद्व्यक्तिविशिष्टज्ञानविशिष्टतद्व्यक्तिविशिष्टनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धोऽभा-

१ ज्ञाने । २ विषयितायाम् । ३ विषयितायाम् । ४ वृत्तित्वे । ५ ज्ञाने । ६ शून्यत्वे । ७ विषयितायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्तन्निरूपितप्रतियोगिता[1]निरूपितावच्छेद[2]कतानिरूपितावच्छेद[3]कतानिरूपितावच्छेद[4]कतानिरूपितावच्छेद[5]कताविशिष्टावच्छेद[6]कताविशिष्टविषयितारूपः अवच्छेदकतायामवच्छेदकतावैशिष्ट्यंच स्वतादात्म्य–स्वविशिष्टविषयितानिष्ठोभयावृत्तिधर्मावच्छिन्नावच्छेदकतानिरूपकत्व–स्वविशिष्टविषयितानिष्ठो--भयावृत्तिधर्मावच्छिन्नावच्छेदकतानिरूपकतादात्म्यसंबन्धावच्छिन्नावच्छेद[7]कतानिरूपकत्वैतत्रितयसंबन्धेनप्रथमविषयितायां स्ववैशिष्ट्यंच स्वनिरूपितावच्छेदकतावद्विषयितानिरूपकतावच्छेदकधर्मावच्छिन्नविषयिताऽव्यापकविषयिताशून्यज्ञानीयत्व–स्वनिरूपिततादात्म्यसंबन्धावच्छिन्नावच्छेदकतानिरूपिताव-

१ अवच्छेदकत्वे । २ प्रतियोगित्वे । ३ भेदे । ४ वृत्तित्वे । ५ निश्चये । ६ निश्चये । ७ ज्ञाने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकतावद्विषयितानिरूपकतावच्छेदकधर्मावच्छिन्नविषयिताशून्यज्ञानीयत्वोभयसंबन्धेन द्वितीयविषयितायां स्ववैशिष्ट्यंच स्वनिरूपिततादात्म्यसंबन्धावच्छिन्नावच्छेदंकतानिरूपितावच्छेदकतावद्विषयितानिरूपकतावच्छेदकधर्मावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयत्व—स्वनिरूपितावच्छेदकतावद्विषयितानिरूपकतावच्छेदकधर्मावच्छिन्नविषयिताशून्यज्ञानीयत्वोभयसंबन्धेन विषयितायामवच्छेदकतावैशिष्ट्यंच स्वनिरूपितावच्छेदकतावद्विषयितानिरूपकतावच्छेदकधर्मावच्छिन्नत्व—स्वनिरूपिततादात्म्यसंबन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकतावद्विषयितानिरूपकतावच्छेदकधर्मावच्छिन्न—

१ ज्ञाने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयितासामानाधिकरण्योभयसंवन्धेनेति वाच्यम् । यादृशस्थलेऽसंग्राह्यविशिष्टविषयकसमूहालम्बनम-प्रसिद्धम् तादृशविशिष्टेऽतिव्याप्तेर्वारणाय सामानाधकरण्यरूपवैशिष्ट्यमेव निवेशनीयं तथाचोभयत्र निश्चयत्वनिवेश आवश्यकः यादृशस्थलेऽसंग्राह्यविशिष्टघटकप्रत्येकविषयकाऽसमूहालम्बनज्ञानमप्रसिद्धं तत्रातिव्याप्तिरुभयमतेपि तुल्येति । नन्वत्र प्रकृतानुमितित्वव्यापकप्रातिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदकविषयताशून्यत्वं निश्चये विशेषणं देयं तथाच सति अव्यापकविषयिताशून्यत्वं विशिष्टान्तराघटितत्वं विशिष्टद्वयाघटितत्वंच नोपादेयं जातिमान् वह्न्यभाववानिति ज्ञाने प्रतिबन्धकतानवच्छेदकजातित्वविषयताशून्यत्वाभावेन तद्व्युदासात् मेयत्वविशिष्टव्यभिचारनिश्चये तादृशमेयत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयतायाः सत्त्वात् वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदविषयकज्ञाने तादृशवृत्तित्वविषयतायाश्च सत्त्वात्त-योर्व्युदासाच्च। नचैवमसंभवः ह्रदो वह्निमानित्यत्र वह्न्यभाववद्ध्रदरूपदोषविषयकनिश्चये ह्रदत्वप्रकारता-निरूपितनिरवच्छिन्नविशेष्यतायास्तादृशप्रतिबन्धकतानवच्छेदिकायाः सत्त्वेन तच्छून्यत्वाभावादिति वाच्यम्। प्रतिबन्धकतानवच्छेदकेत्यनेन प्रतिबन्धकतावच्छेदकविषयताविशिष्टान्यत्वस्य विवक्षितत्वात् वैशिष्ट्यंच तादात्म्यावच्छिन्नत्वान्यतरसंबन्धेन तथाच ह्रदादिनिरवच्छिन्नविषयताया अपि प्रतिबन्धकता-वच्छेदकह्रदत्वावच्छिन्नविशेष्यत्वावच्छिन्नत्वान्नासम्भवः। नचैवमपि ह्रदो वह्न्यभाववानिति ज्ञानस्या-ऽवच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रकारताकनिश्चयत्वेन लाघवात् प्रतिबन्धकताम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते वह्निनिष्ठविषयतायाः कस्याश्चिदपि प्रतिबन्धकतावच्छेदकत्वाभावेन तद्विषयताशून्यत्वाभावेन बाधविशेषेष्वव्याप्तिरिति वाच्यम् । तादात्म्या–ऽवच्छेद्यत्वा–ऽवच्छेद्यनिरूपितत्वा–ऽन्यतमसम्बन्धेन वैशिष्टयस्य विवक्षणीयत्वात् तादृशबाधज्ञानीयवह्न्यादिविषयताया अपि प्रतिबन्धकतावच्छेदकाभावत्वावच्छिन्नप्रकारतावच्छेद्यतादृशविशेष्यतानिरूपितत्वेन तादृशविषयताविशिष्टान्यत्वाभावेन नाव्याप्तिः असंग्राह्यविशिष्टविषयकज्ञानीयवृत्तित्वविषयतायाः प्रतिबन्धकतावच्छेदकजलनिष्ठप्रकारत्वावच्छेद्यविशेष्यतानिरूपितत्वेन तादृशविषयताविशिष्टान्यत्वाभावेपि वृत्तितात्वनिष्ठविषयतायास्तादृशत्वेन तच्छून्यत्वाभावान्नातिव्याप्तिः प्रमेयतात्वविषयतामादाय प्रमेयत्वविशिष्टव्यभिचारवारणमिति चेन्न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रदो वह्न्यभाववानिति ज्ञानस्य संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन व-
ह्निप्रकारकतया तादृशप्रतियोगितायास्तादृशावच्छिन्नत्वविशिष्टप्रतियोगितात्वेन सम्बन्धत्वे केवलप्रति-
योगितात्वेन सम्बन्धत्वे वा संयोगावच्छिन्नत्वप्रतियोगितात्वविषयितयोः प्रतिबन्धकतावच्छेदकाविषय-
तातादात्म्यावच्छिन्नत्वावच्छेद्यनिरूपितत्वानां मध्ये कस्याप्यभावेन तत्र तच्छून्यत्वाभावेनाऽव्याप्ति-
तादवस्थ्यात् यदि प्रागुक्तसम्बन्धत्रयावच्छेद्यनिरूपितनिरूपितत्वान्यतमसम्बन्धेन वैशिष्ट्यं विवक्ष-
णीयम् तथाच प्रतियोगितात्वादिविषयिताया अपि प्रतिबन्धकतावच्छेदकाभावत्वावच्छिन्नप्रकारत्वा-
वच्छेद्यतादृशविशेष्यतानिरूपितप्रतियोगितानिष्ठसांसर्गिकविषयतानिरूपितत्वान्नाव्याप्तिरिति विभाव्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते तदा वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदविषयकज्ञानीयवृत्तितात्वविषयताया अपि प्रतिबन्धकतावच्छेदकजलत्वावच्छिन्नप्रकारत्वावच्छेद्यताद्दशविशेष्यतानिरूपितवृत्तित्वनिष्ठविषयतानिरूपिततया ताद्दशविषयताविशिष्टान्यत्वाभावेनातिव्याप्तितादवस्थ्यात् अतो विशिष्टद्वयाघटितत्वं निवेशनीयम्, वस्तुतस्तु अवच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छिन्नाभावनिष्ठप्रकारतानिरूपितह्रदनिष्ठविशेष्यताशालिनिश्चयत्वेन प्रतिबन्धकत्वे वह्नित्ववदभाववद्ध्रदस्यैव बाधतया वह्न्यभाववद्ध्रदविषयकनिश्चयस्यासंग्रहेऽपि न क्षतिः अतो वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदरूपविशिष्टेऽतिव्याप्तिवारणं प्रयोजनं विशिष्टद्वयाऽघटितत्वस्य न संभवति, परंतु ह्रदो वह्निमान् जला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दित्यादौ एकत्र द्वयमिति रीत्या भासमानह्रदवृत्तित्ववह्निव्यापकीभूताभावप्रतियोगित्ववत्पङ्कजे असाधारण्यसत्प्रतिपक्षानात्मकेऽतिव्याप्तिः तज्ज्ञानीयविषयतायाः कस्या अपि तादात्म्यावच्छिन्नत्वान्यतरसम्बन्धेन प्रतिबन्धकताविशिष्टायाः अप्रसिद्धेः, एवं विशिष्टान्तराघटितत्वविशेषणमप्यावश्यकम् अन्यथा ह्रदो वह्निमानित्यत्र वह्न्यभाववद्ध्रदावच्छिन्नेऽतिव्याप्तिः तत्रापि ह्रदत्वावच्छिन्नप्रकारताया वह्न्यभावप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतारूपप्रतिबन्धकतावच्छेदकविषयत्वावच्छेद्यत्वात् धर्मिविषयतायाश्च तादृशप्रकारतानिरूपितत्वात् तादृशविषयताविशिष्टान्यविषयतायास्तादृशज्ञानेऽसत्त्वात्, एवं ह्रदो वह्न्यभाववानिति ज्ञानस्य वह्निनिष्ठप्रतियोगितासम्बन्धावच्छिन्नप्रकारताशालिज्ञानत्वे-

CC-0. In Public Domain. Digitization by eGangotri

न प्रतिबन्धकत्वेपि तद्विशेषणद्वयमावश्यकम् अन्यथा तत्कल्पे प्रागुक्तविषयताशून्यत्वमेव निश्चये विशेषणं न तूक्तविशेषणद्वयं तादृशविषयतावैशिष्ट्यञ्च तादात्म्यावच्छिन्नत्वान्यतरसम्बन्धेन तथाच ह्रदो वह्न्यभाववानिति–ज्ञानीयवह्निप्रकारतायास्तदवच्छेदकप्रतियोगिताविषयतायास्तन्निष्ठप्रतियोगितात्वादिविषयतायाश्च प्रतिबन्धकतावच्छेदकत्वात् ह्रदादिनिरवच्छिन्नविशेष्यतायास्तदवच्छिन्नत्वाच्च तज्ज्ञानीयविषयताकापि तादृशविषयताविशिष्टान्येति नाव्याप्तिः असंग्राह्यविशिष्टविषयकज्ञानीयवृत्तित्वादिविषयिता तादृशविषयताविशिष्टान्येति तद्वारणान्नातिव्याप्तिरपि । नच गगनाभाववदभावव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्कालीनघटो गगनवानित्यत्र बाधेऽव्याप्तिः तादृशबाधज्ञानस्य गगनाभाववदभाववत्त्वविशिष्टविषयकज्ञानविशिष्टाभाववद्गगनाभाववदभाववत्कालीनघटत्वविशिष्टविषयकज्ञानत्वेनैव प्रतिबन्धकतया बाधज्ञानीयपक्षविशेषणतापन्नाभावविशेषणतापन्नगगनगगनत्वविषयतादीनां प्रतिबन्धकतानवच्छेदकतया तच्छून्यत्वस्य तादृशबाधज्ञानेऽभावादिति वाच्यम्। प्रकृतानुमितित्वव्यापकप्रतिबन्धकतानिरूपितप्रति-

---

१ रूपाभाववदभाववत्कालीनघटे संयोगेन रूपसाधने बाधेऽव्याप्तिः तेन प्रागुक्तबाधज्ञानीयपक्षतावच्छेदककुक्षिप्रविष्टगगनप्रकारतायाः प्रतिबन्धकतावच्छेदकतया पक्षविशेषणतापन्नाभावविशेषणतापन्नगगनविषयतायास्तदवच्छिन्नत्वेपि नोक्तदोषानवकाशशङ्कावकाशः ।

CC-0. In Public Domain. Digitization by eGangotri

बध्यतानवच्छेदकत्वस्यापि ताहशविषयताविशेषणत्वात् ताहशबाधज्ञानीयगगनादिविषयतानां प्रतिबन्धकतानवच्छेदकत्वेपि ताहशानुमितेर्गगनाभाववदभाववत्कालीनघटो गगनाभाववानिति बुद्धिं प्रति गगनत्वावच्छिन्नप्रकारतानिरूपितताहशघटत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन प्रतिबन्धकतया ताहशप्रतिबन्धकतानिरूपितप्रतिबध्यतायां गगनगगनत्वादिविषयतानामवच्छेदकतया तदनवच्छेदकविषयताशून्यत्वस्य तत्र सत्त्वेनाव्याप्तिविरहात् । नचैवमपि वह्न्यभाववज्जलवद्वृत्तिजलाभाववद्वह्निमत्कालीनह्रदो वह्निमानित्यत्र वह्न्यभाववज्जलवद्वृत्तिजलवत्ताहशह्रदेऽतिव्याप्तिः ताहशविशिष्टविषयकज्ञानीयताहशविशिष्टह्रदांशे प्रकारतावच्छेदककुक्षिप्रविष्टवृत्तित्वादिविषयतानां ताहशानुमितित्वव्यापकवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्टपक्षे साध्यवैशिष्ट्यावगाहित्वावच्छिन्नप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानव-च्छेदकत्वेपि तादृशानुमितेः वह्निमान् वह्न्यभाववज्जलवद्वृत्तिजलाभाववान् इति ज्ञानविशिष्टवह्नि-मान् तादृशह्रद इति ज्ञानत्वेन तादृशह्रदो वह्न्यभाववज्जलवद्वृत्तिजलवानिति बुद्धित्वावच्छिन्नं प्र-ति प्रतिबन्धकतया तादृशानुमितित्वव्यापकतादृशप्रतिबन्धकतानिरूपिततादृशप्रतिबध्यतानवच्छेदक-त्वस्य तादृशवृत्तित्वादिविषयतास्वभावेन तथाविधोदासीनविषयताशून्यत्वस्य तादृशविशिष्टज्ञानेऽ-क्षतत्वादिति वाच्यम् । प्रकृतानुमितित्वव्यापकप्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य नि-वेशनीयत्वात् प्रकृते तादृशानुमितित्वव्यापकोक्तप्रतिबन्धकतायाः ज्ञानवैशिष्ट्यावच्छिन्नतया तद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यबाधबुद्ध्यादिनिरूपितप्रतिबन्धकतानिरूपितप्रतिबध्यतायां तादृशवृत्तित्वादिविषयतानामनवच्छेद-
कतया तच्छून्यत्वस्य तादृशविशिष्टविषयकज्ञाने सत्त्वेनातिव्याप्तिविरहात् । नचैवं कपिसंयोगा-
भावाऽभाववत्कपिसंयोगवत्कालीनकपिसंयोगाभाववदभाववत्कालीनगुणः कपिसंयोगवानित्यत्र बाधेऽ-
व्याप्तिः तादृशबाधनिश्चयस्य पक्षे साध्यवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति अभाववान् क-
पिसंयोगाभाववान् अभाववान् तादृशगुण इति ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धकतया तत्प्र-
तिबन्धकतावच्छेदककुक्षौ पक्षविशेषणतापन्नाभावविशेषणतापन्नबाधज्ञानीयकपिसंयोगतत्संयोगत्वादि-
विषयतानामप्रवेशेन तादृशप्रतिबन्धकतानवच्छेदकत्वात् कपिसंयोगवान् तादृशगुण इत्यनुमितेर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

पि तादृशबुद्धिं प्रति कपिसंयोगवान् कपिसंयोगाभावाभाववान् कपिसंयोगवान् तादृशगुण इति ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धकतया तादृशानुमितित्वव्यापकज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतानवच्छेदकत्वाच्च तच्छून्यत्वस्य तादृशबाधज्ञानेऽसत्त्वादिति वाच्यम् । प्रकृतानुमितित्वव्यापकप्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वमनिवेश्य विशेष्यदलघटकप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकत्वस्य निवेशनीयत्वात् निश्चये प्रतिबध्यतावैशिष्ट्यञ्च स्वाश्रयत्व–स्वनिरूपितमुख्यविशेष्यतानिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्प्रकारताविशिष्टविशेष्यताकाऽव्याप्यवृत्तित्वज्ञानाभाववत्त्वोभयसम्बन्धेन विशेष्यतायां प्रकारतावैशिष्ट्यञ्च स्वावच्छेदकावच्छिन्नत्व–स्वावच्छे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नत्वान्यतरसम्बन्धेन तथाचोक्त-
स्थले वह्न्यभाववज्जलवद्वृत्तिजलवत्ताद्दशह्रदे नातिव्याप्तिः ताद्दशह्रदो वह्न्यभाववज्जलवद्वृत्तिजल-
वानिति ज्ञानं प्रति ताद्दशानुमितेर्या प्रतिबन्धकता तस्यास्ताद्दशप्रतिबध्यताविशिष्टनिश्चयत्वव्याप-
कत्वविरहात् वह्निमति वह्न्यभाववज्जलवद्वृत्तिजलाभावोऽव्याप्यवृत्तिरिति ज्ञानकालीने वह्निमान् ताद्द-
शह्रद इति निश्चये निरुक्तोभयसम्बन्धेन प्रतिबध्यतावति ताद्दशप्रतिबन्धकताया अभावात् त-
द्व्यापकीभूताऽन्यैव प्रतिबन्धकता तन्निरूपितप्रतिबध्यताऽनवच्छेदकत्वस्य ताद्दशवृत्तित्वादिविषय-
तायां सत्त्वात् तच्छून्यत्वस्य ताद्दशविशिष्टज्ञानेऽसत्त्वेनोक्तातिव्याप्तेर्नावकाशः एवं कपिसंयोगाभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ववत्कपिसंयोगाभावाभाववत्कपिसंयोगवत्कालीनकपिसंयोगाभाववदभाववत्कालीनगुणात्मकबाधे नाव्याप्तिः कपिसंयोगवति कपिसंयोगाभावाभावोऽव्याप्यवृत्तिरिति ज्ञानकालीने तादृशसाध्यवत्पक्षविषयकनिश्चये निरुक्तोभयसम्बन्धेन विशेष्यदलघटकप्रतिबध्यता नास्त्येव तन्निरूपिततादृशगुणत्वावच्छिन्नमुख्यविशेष्यतानिष्ठावच्छेदकतानिरूपितावच्छेदकतावति या कपिसंयोगत्वावच्छिन्नप्रकारता तदवच्छेदककपिसंयोगत्वावच्छिन्नाभावाभावत्वावच्छिन्नविशेष्यताकाऽव्याप्यवृत्तित्वज्ञानवत्त्वस्य तत्र सत्त्वात् अतस्तादृशप्रतिबध्यतावन्निश्चयस्तादृशाव्याप्यवृत्तित्वज्ञानाभावकालीन एवेति तत्रच तादृशबाधबुद्धिनिरूपितप्रतिबन्धकतायाः सत्त्वात् तादृशबाधज्ञानीयकसंयोगीयविषयतायास्तादृशप्रतिबध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तावच्छेदकतया तदनवच्छेदकविषयताशून्यत्वस्य तत्राक्षतत्वात् । नचैवमपि ह्रदो वह्निमान् वह्न्यभाववज्जलवत्कालीनत्वाभाववज्जलकालीनजलाभावादित्यत्र वह्न्यभाववज्जलवत्कालीनजलवद्ध्रदेऽतिव्याप्तिः तादृशविशिष्टविषयकज्ञानीयविषयतानां सर्वासामपि प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वात् तज्ज्ञानीयकालीनत्वविषयताया अपि हेत्वप्रसिद्धिज्ञानीयप्रतिबन्धकतावच्छेदकत्वादिति वाच्यम् । उक्तान्यतरसंबन्धेन स्वावच्छेदकविषयताविशिष्टान्या या स्वनिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतानवच्छेदकीभूता विषयता तच्छून्ययद्रूपावच्छिन्नविषयताशालिनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकतेति लक्षणकरणात् उक्तातिव्याप्तेर-

CC-0. In Public Domain. Digitization by eGangotri

भावात् तत्रहि साध्यवत्पक्षविषयकबुद्धिनिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतामादाय लक्षणसत्त्वमुपपादनीयम् तादृशप्रतिबन्धकतानवच्छेदकत्वस्य तादृशप्रतिबन्धकतानिरूपितप्रतिबध्यताविशिष्टवह्न्यभावऽव्याप्यवृत्तित्वज्ञानाऽकालीनह्रदो वह्निमानिति निश्चयत्वव्यापिका या ह्रदो वह्न्यभाववानिति बुद्ध्यादिनिरूपितप्रतिबन्धकता तन्निरूपितप्रतिबध्यतानवच्छेदकत्वस्य च कालीनत्वविषयितायां सत्त्वात् तादृशविषयताशून्यत्वस्योक्तविशिष्टज्ञानेऽभावात् तदनुगमश्च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टावच्छेदकता[1]निरूपितावच्छेदकता[2]निरूपितावच्छिन्नत्वसम्बन्धाव-

१ निश्चये । २ विषयतायाम् ।

च्छिन्नावच्छेदकतावद्धर्मवत्त्वं लक्षणम् अवच्छेदकतायां प्रतिबन्धकतावैशिष्टयञ्च स्ववृत्तिर्यः किञ्चिन्निरूपितावच्छेदकतावाद्विषयताविशिष्टान्यकिञ्चिन्निरूपितप्रतिबध्यताविशिष्टनिश्चयानिष्ठभेदप्रतियोगितावच्छेदकत्वाभाववत्प्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकान्यविषयताशून्यकिञ्चिद्रूपावच्छिन्नविषयताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धोभावस्तन्निरूपितप्रतियोगितानिरूपितावच्छेदकता[1]निरूपितावच्छेदकता[2]निरूपितावच्छेदकता[3]निरूपितत्व—स्वविशिष्टविषयत्वनिष्ठाऽवच्छेदकतानिरूपकशून्यत्वनिष्ठावच्छेदकतानिरूपकत्वोभयसंबन्धेन विषयत्वनिष्ठावच्छेदकतायां स्ववैशि-

१ प्रतियोगितायाम्। २ भेदे। ३ वृत्तित्वे।

ष्टयंच स्वनिष्ठावच्छेद[1]कतानिरूपकावच्छेदक[2]तानिरूपकतादात्म्यावच्छिन्नत्वान्यत-
रसंबन्धावच्छिन्नावच्छेद[3]कतानिरूपकावच्छेद[4]कतानिरूपकावच्छेदक[5]तानिरूपकत्व—स्वनिष्ठावच्छेदकता-
निरूपकावच्छेद[6]कतानिरूपकोक्तोभयसंबन्धावच्छिन्नावच्छेद[7]कतानिरूपकावच्छेद[8]कतानिरूपकावच्छेद[9]-
कतानिरूपकाव[10]च्छेदकतानिरूपकाव[11]च्छेदकतानिरूपकाव[12]च्छेदकतानिरूपकाव[13]च्छेदकतानिरूपकाव[14]च्छे-

---

१ निरूपितत्वे । २ अवच्छेदकत्वे । ३ विषयितायाम् । ४ अधिकरणे । ५ भेदे । ६ निरूपितत्वे । ७ प्रतिबध्यतायाम् । ८ निश्चये । ९ वृत्तित्वे । १० भेदे । ११ प्रतियोगितायाम् । १२ अवच्छेदकत्वे । १३ अभावे । १४ प्रतिबन्धकत्वे ।

दकतानिरूपकावच्छेद[1]कतानिरूपकावच्छेद[2]कतानिरूपकावच्छेद[3]कतानिरूपकावच्छेद[4]कतानिरूपकाव-च्छेद[5]कतानिरूपकत्वोभयसंबन्धेनेति चेन्न । सर्वं गगनवदित्यत्र गगनाभाववद्घटादावव्याप्तेः तादृशबाध-विषयकज्ञाने प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदकीभूताया निरुक्तप्र-तिबध्यतानवच्छेदकीभूतायाश्च समवायसमवायत्वादिविषयतायास्सत्त्वात् अवच्छिन्नत्व-तादात्म्या-ऽवच्छेद्यनिरूपितत्वा-ऽवच्छेद्यनिरूपितनिरूपितत्वान्यतमसम्बन्धेन प्रतिबन्धकतावच्छेदकविषयतावि-

१ निरूपितत्वे । २ प्रतिबध्यतायाम् । ३ अवच्छेदकत्वे । ४ अधिकरणे । ५ भेदे ।

CC-0. In Public Domain. Digitization by eGangotri

शिष्टान्यत्वविवक्षणेन तत्संग्रहे मेयत्वविशिष्टव्यभिचारवारणाय विशिष्टान्तराघटितत्वं वह्न्यभाववज्जला-
दिमद्वृत्तिजलवद्ध्रदवारणाय विशिष्टद्वयाघटितत्वं चावश्यकमिति ध्येयम् ॥ श्रीः ॥

ननु प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाऽव्यापकप्रतिबन्धकताशून्यनिश्चयीयय-
द्रूपावच्छिन्नविषयिताव्यापिका तादृशप्रतिबन्धकता तद्रूपवत्त्वं लक्षणमास्ताम् कृतं विशिष्टाऽन्तराघ-
टितत्वविशिष्टद्वयाऽघटितत्वविशेषणाभ्यां ह्रदो जात्यभाववानित्यत्र जातिमान् जातिमानिति निश्चये
तादृशप्रतिबन्धकताऽव्यापकप्रतिबन्धकताशून्ये प्रकृतानुमितिप्रतिबन्धकताविरहेण बाधाऽव्याप्तिवार-
णायाऽव्यापकविषयिताशून्यत्वंतु निवेशनीयम्। नचैवमसंभवः प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरू-

CC-0. In Public Domain. Digitization by eGangotri

पितावच्छेदकधर्मदर्शनादिप्रतिबन्धकत्वान्तराव्यापकतत्तद्दोषविषयकत्वावच्छिन्नप्रतिबन्धकताशून्यत्वस्य तत्तद्दोषविषयकनिश्चयेऽभावादिति वाच्यम् । यादृशप्रतिबन्धकतामादाय लक्षणं संगमनीयं तादृशप्रतिबन्धकताऽव्यापकप्रतिबन्धकताशून्यत्वस्य विवक्षणात् एवंच मेयत्वविशिष्टव्यभिचारनिश्चये व्यभिचारविषयकत्वावच्छिन्नप्रतिबन्धकताऽव्यापकव्यभिचारविशेष्यकमेयत्वाभावप्रकारकबुद्धिनिरूपितप्रतिबन्धकतायाः सत्त्वान्न तत्रातिव्याप्तिः एवं ह्रदो वह्निमानित्यनुमितिनिरूपितायाः जलवान् वह्न्यभाववानिति ज्ञानविशिष्टजलवान् ह्रद इति ज्ञाने वर्तमानाया ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताया अव्यापकीभूताया वह्न्यभाववज्जलवद्वृत्तिजलाभाववान् ह्रद इति ज्ञाननिरूपितप्रतिबन्धकता तच्छून्यत्वस्य तादृशविशिष्टाविष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यकनिश्चयेऽसत्त्वेन ताद्दशविशिष्टे नातिव्याप्तिः। नचैवं सर्वं गगनवदित्यत्र गगनाभाववद्धटपटादिरूपे बाधेऽव्याप्तिः सर्वं गगनवदिति ज्ञानं प्रति गगनाभाववद्धटपटादिविषयकनिश्चयानामेकरूपेणैव प्रतिबन्धकतया ताद्दशप्रतिबन्धकताया गगनाभाववान् घट इत्यादिनिश्चयेषु सत्त्वेन तदधिकरणे गगनाभाववान् पट इति निश्चयेऽवर्तमानायाः घटो गगनवानिति ज्ञाननिरूपितायाः प्रतिबन्धकताया घटो गगनाभाववानिति दोषविषयकनिश्चये सत्त्वादिति वाच्यम्। यद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यस्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकीभूतप्रतिबन्धकताशून्ययद्रूपावच्छिन्नविषयिताशालिनिश्चयत्वव्यापकत्वस्य प्रकृतानुमितिप्रतिबन्धकतायां विवक्षणीयत्वात् तथाच गगनाभाववद्धटत्वावच्छिन्न-

CC-0. In Public Domain. Digitization by eGangotri

विषयित्वाऽव्यापकविषयिताशून्यतादृशप्रतिबन्धकताधिकरणे घटो गगनाऽभाववानिति निश्चयेऽविद्यमा-
ना प्रतिबन्धकता न घटो गगनवानिति ज्ञाननिरूपिता अपितु पटो गगनवानिति ज्ञाननिरूपितेति तच्छून्य-
त्वस्य तादृशबाधादिनिश्चये सत्त्वात्, अत्रायमनुगमः प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिब-
न्धकताविशिष्टावच्छेदकताविशिष्टरूपवत्त्वं लक्षणम् अवच्छेदकतायां प्रतिबन्धकतावैशिष्ट्यंच स्वनिष्ठ-
किंचिद्धर्मावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यस्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकप्रतिबन्धक-
ताशून्यकिंचिद्रूपावच्छिन्नविषयिताऽव्यापकविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावनिरूपितप्रतियोगितानिरूपितावच्छेद[1]कतानिरूपितावच्छेद[2]कतानिरूपिता[3]वच्छेदकतानिरूपितत्व--स्वनिष्ठावच्छेद[4]कतानिरूपकावच्छेदक[5]तानिरूपकावच्छेद[6]कतानिरूपकावच्छेद[7]कतानिरूपकावच्छेद[8]कतानिरूपकावच्छेद[9]कतानिरूपकावच्छेद[10]कतानिरूपकत्वोभयसंबन्धेन रूपे अवच्छेदकतावैशिष्ट्यंच स्वनिरूपितावच्छेदक[11]तानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्ना-

---

१ प्रतियोगित्वे। २ भेदे। ३ वृत्तित्वे। ४ अधिकरणे। ५ वृत्तित्वे। ६ भेदे। ७ प्रतियोगित्वे। ८ अवच्छेदकत्वे। ९ प्रतिबन्धकत्वे। १० शून्यत्वे। ११ विषयित्वे।

CC-0. In Public Domain. Digitization by eGangotri

वच्छेदकतावत्त्व—स्वनिरूपितावच्छे[1]दकतानिरूपितावच्छेदक[2]तानिरूपितावच्छेदक[3]तानिरूपितावच्छेद[4]--
कतानिरूपितावच्छे[5]दकतानिरूपितावच्छे[6]दकतानिरूपितावच्छेदक[7]तानिरूपितावच्छे[8]दकतानिरूपिताव--
च्छेदक[9]तानिरूपितावच्छे[10]दकतानिरूपितावच्छे[11]दकतानिरूपितावच्छे[12]दकतानिरूपितावच्छे[13]दकतानिरूपि—
तावच्छे[14]दकतानिरूपितावच्छे[15]दकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावत्त्वोभयसंबन्धेनेति

---

१ शून्यत्वे। २ प्रतिबन्धकत्वे। ३ अवच्छेदकत्वे। ४ प्रतियोगित्वे। ५ भेदे। ६ वृत्तित्वे। ७ निश्चये।
८ शून्यत्वे। ९ विषयितायाम्। १० अवच्छेदकत्वे। ११ प्रतियोगित्वे। १२ भेदे। १३ वृत्तित्वे। १४ अधिकरणे।
१५ विषयित्वे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेन्न । गगनाभाववदभाववत्कालीनघटो गगनवानित्यत्र बाधेऽव्याप्त्यापत्तेः तत्र बाधनिश्चये तादृशानुमितिनिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताद्वयी एका अभाववान् गगनाभाववानिति निश्चयविशिष्टगगनाभाववान् तादृशघट इति निश्चयत्वावच्छिन्ना अपरा गगनाभाववान् तादृशघट इति निश्चयविशिष्टाऽभाववान् गगनाभाववानिति निश्चयत्वावच्छिन्ना तत्र प्रथमप्रतिबन्धकतामादाय लक्षणं संगमनीयम् तादृशप्रतिबन्धकतावति अभाववान् गगनाभाववदभाववत्कालीनघट इति निश्चये तादृशघटत्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्येऽवर्तमानाया गगनाभावस्तादृशघटावृत्तिरित्याकारकबुद्धिनिरूपितप्रतिबन्धकतायास्तादृशबाधज्ञाने सत्त्वात् । अथाव्यापकप्रतिबन्धकतायां प्र-

CC-0. In Public Domain. Digitization by eGangotri

कृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टविषयित्वानवच्छिन्नत्वं विशेषणं देयं विषयितायां प्रतिबन्धकतावैशिष्ट्यं स्वावच्छेदकत्व-स्वनिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापक-प्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वोभयसंबन्धेन प्रतिबध्यतावत्त्वंच स्वानवच्छेदकविषयताशून्यज्ञानीयत्वसंबन्धेन तथाच नोक्तबाधेऽव्याप्तिः तत्र बाधज्ञाने विद्यमानाया गगनाभावस्तादृशघटावृत्तिरिति ज्ञाननिरूपितप्रतिबन्धकतायास्तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्न-प्रतिबन्धकतानिरूपितप्रतिबध्यताविशिष्टतादृशघटविशेष्यकगगनप्रकारकनिश्चयत्वव्यापकसाध्याभावव-त्पक्षविषयकबुद्धिनिरूपितप्रतिबन्धकतानिरूपिततादृशप्रतिबध्यतानवच्छेदकविषयताशून्यगगनाभावव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

तादृशघटज्ञानीयतादृशघटत्वावच्छिन्नविषयित्वावच्छिन्नतया तदन्यप्रतिबन्धकताया एव तादृशत्वात् तच्छून्यत्वस्य तत्राक्षतत्वात् । नच गगनाभाववत्तादृशघटत्वावच्छिन्नविषयिताया निरुक्तप्रतिबन्धकतावच्छेदकत्वाभावेन तदवच्छिन्नत्वं नोक्तप्रतिबन्धकताव्यावर्तकमिति वाच्यम् । तादृशविषयिताया अप्यभाववद्वर्त्विषयितात्वेन तादृशप्रतिबन्धकतावच्छेदकत्वात् वह्न्यभाववज्जलवद्वृत्तिजलवान् ह्रद इति ज्ञानीयजलवद्ध्रदविषयिताया ह्रदो वह्निमानित्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदिकायास्तादृशप्रतिबन्धकताऽव्यापकीभूततादृशजलाभाववान्ह्रद इति ज्ञाननिरूपितप्रतिबन्धकतावच्छेदकत्वेपि तादृशप्रतिबन्धकतानिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकपक्षे सा-

CC-0. In Public Domain. Digitization by eGangotri

ध्याभावावगाहिबुद्धिनिरूपितप्रतिबन्धकतानिरूपितप्रतिबध्यतानवच्छेदकविषयिताशून्यज्ञानीयत्वाभावेन ताद्दशप्रतिबन्धकतासंग्रहः एवं प्रकृतानुमितित्वव्यापकव्याप्तिग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताऽव्यापकीभूतमेयत्वाभाववान् व्यभिचार इति ज्ञाननिरूपितप्रतिबन्धकतायास्ताद्दशप्रतिबन्धकतानिरूपितव्याप्तिग्रहत्वाऽवच्छिन्नप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितसाध्याभाववद्वृत्तित्वप्रकारकहेतुविशेष्यकबुद्धित्वावच्छिन्नप्रतिबध्यतानवच्छेदकविषयताशून्यशुद्धव्यभिचारविषयकज्ञानीयविषयित्वानवच्छिन्नतया तत्संग्रह इति चेन्न । तथाप्यभावो गगनत्ववानाधेयत्वादित्यत्र असाधारण्येऽव्याप्तेः तत्र गगनत्वव्यापकाभावप्रतियोग्याधेयत्वमिति असाधारण्यविषयकनिश्चयोत्तरमाधेयत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वानभाव इति ज्ञाने तादृशासाधारण्यविषयित्वाऽव्यापकविषयिताशून्ये प्रकृतानुमितित्वव्यापकप्रतिब-ध्यतानिरूपितप्रतिबन्धकतावत्यवर्तमानाया गगनत्वव्यापकाभावप्रतियोगित्वाभाववदाधेयत्वमिति ज्ञाननिरूपितायाः प्रतिबन्धकतायास्तादृशासाधारण्यज्ञाने सत्त्वात् । नच अव्यापकप्रतिबन्धकतायामसाधारण्यविषयकत्वानवच्छिन्नत्वमपि विशेषणं विवक्षितं वस्तुतस्तत्रापि पक्षधर्मिकहेतुमत्ताज्ञानविशिष्टासाधारण्यविषयकनिश्चयत्वावच्छिन्नप्रतिबन्धकतामादाय लक्षणसमन्वयसंभवः तादृशप्रतिबन्धकतावन्नाधेयत्ववानभाव इति ज्ञानं किंतु असाधारण्यज्ञानं तत्रच न पूर्वोक्तप्रतिबन्धकत्वाभावो वर्तत इति नाऽव्याप्तिरिति वाच्यम् । तथापि वह्न्यभाववद्धृत्त्यभावव्याप्यवत्कालीनहृदो वह्निमानित्यत्र

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्प्रतिपक्षेऽव्याप्तेः तत्र विशिष्टसत्प्रतिपक्षज्ञानोत्तरजाते तादृशसत्प्रतिपक्षविषयित्वाऽव्यापकविषयिता-शून्ये वह्न्यभाववान् वह्न्यभावव्याप्यवानिति ज्ञाने प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रति-बन्धकतावत्यविद्यमानाया वह्न्यभावव्याप्याभाववांस्तादृशह्रद इति ज्ञाननिरूपितायाः प्रतिबन्धकता-या विशिष्टसत्प्रतिपक्षनिश्चये सत्त्वात् । नच तत्रापि तादृशप्रतिबन्धकतामादाय लक्षणासंभवेपि प्रति-बन्धकत्वान्तरमादाय लक्षणं संगमनीयं तत्रहि कालिकसंबन्धेन वह्न्यभावाभाववदवृत्तिधर्मवान् स-मवायादिना वह्न्यभावाभाववदवृत्तिधर्मवानित्यादिज्ञानानामेकरूपेण प्रतिबन्धकत्वं कल्पनीयं सम्ब-न्धभेदेन प्रतिबध्यप्रतिबन्धकभा कल्पने गौरवात्, प्रतिबध्यप्रतिबन्धकभावश्च ह्रदत्वावच्छिन्नविशेष्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्नं प्रति वह्न्यभावाभाववद्वृत्तितात्वावच्छिन्नप्रकारताविशिष्टप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन प्रतिबन्धकत्वमिति, प्रकारतायां प्रकारतावैशिष्ट्यंच स्वनिरूपितावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्सम्बन्धावच्छिन्नत्व-स्वनिरूपिताभावत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नत्वोभय--सम्बन्धेन एतादृशप्रतिबन्धकताच प्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपिता सत्प्रतिपक्षविषयकनिश्चय एव न तदुत्तरप्रागुक्तज्ञान इति तदव्यापकप्रतिबन्धकताशून्यत्वं तत्राक्षतमेव । नच नानासम्बन्धावगाहिव्याप्यदर्शनानामेकरूपेण प्रतिबन्धकत्वे संयोगेन धूमाभाववदवृत्तिमानित्यादिनिश्चयत्वावच्छिन्नप्र-

CC-0. In Public Domain. Digitization by eGangotri

तिबन्धकताया ऐक्यात् तादृशप्रतिबन्धकतावति संयोगेन तादृशधर्मावगाहिनिश्चये समवायेन तादृश-धर्माभावावगाहिज्ञानप्रतिबन्धकताया असत्त्वेन तादृशप्रतिबन्धकताशून्यत्वस्य समवायेन तदवगाहि-सत्प्रतिपक्षनिश्चयेऽसत्त्वेन एवं चालनीन्यायेन सर्वेषु सत्प्रतिपक्षनिश्चयेष्वव्यापकप्रतिबन्धकताशून्यत्वा-भावाच्च कथं लक्षणसमन्वय इति वक्तव्यं यत्र यादृशसम्बन्धघटितस्सत्प्रतिपक्षस्तादृशसत्प्रतिपक्षविषयि-त्वाऽव्यापकविषयिताशून्यतत्प्रतिबन्धकतावांस्तादृशसंबन्धघटितसत्प्रतिपक्षनिश्चय एवेति तत्राविद्यमा-नप्रतिबन्धकता संबन्धान्तरेण तादृशधर्माभावावगाहिज्ञाननिरूपितप्रतिबन्धकतैव तच्छून्यत्वं तत्र तत्राक्षतमेवेति लक्षणसमन्वयादिति वाच्यम् । तथापि ह्रदो वह्निमानित्यत्र वह्न्यभाववद्ध्रदत्वभाववद्ध्रदे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽतिव्याप्तेः तत्र वह्न्यभाववान् वह्न्यभाववान् ह्रद इति निश्चये विद्यमानाया अभाववान् ह्रदो व-ह्निमानिति ज्ञाननिरूपिताया वह्न्यभाववह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वावच्छिन्नायाः प्रतिब-न्धकताया वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यतादृशप्रतिबन्धकतावद्ध्रदो वह्न्य-भाववानिति निश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वेपि प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितबा-धविषयकत्वावच्छिन्नप्रतिबन्धकतावच्छेदकीभूता या तादृशप्रतिबन्धकतानिरूपितप्रतिबध्यताविशिष्टह्र-दो वह्निमानिति निश्चयत्वव्यापकप्रतिबन्धकतानिरूपितवह्न्यभाववद्ध्रदविषयकबुद्धित्वावच्छिन्नप्रतिब-ध्यताऽनवच्छेदकविषयताशून्यवह्न्यभाववान् वह्न्यभाववान् ह्रद इति निश्चयीयविषयिता तदनवच्छिन्न-

CC-0. In Public Domain. Digitization by eGangotri

त्वाभावेन तत्सत्त्वस्याकिंचित्करत्वात् वह्न्यभाववह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताच बाधप्रतिब- न्धकतायां वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितात्वेनावच्छेदिकैव अतो विशिष्टान्तराऽघटितत्वमावश्यकम्। नच तथापि विशिष्टद्वयाऽघटितत्वाऽनिवेशेन लाघवमपरिहार्यमिति वाच्यम्। एतादृशगुरुविशेषणापेक्षया तस्यैव लघुत्वादिति ध्येयम् ॥ श्रीः ॥

नन्वु अवच्छेदकतासम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्व–स्वरूपोभयसम्बन्धेन यद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकता तद्रूपावच्छिन्नत्वं लक्षणम् इदानीं विशिष्टद्वयाऽघटितत्वं न विवक्षणीयम् वह्न्यभाववद्ध्रदादिविषयकनिश्चयस्य ज्ञानविशिष्टज्ञानत्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

प्रतिबन्धकत्वाभावेन तत्र तादृशप्रतिबन्धकत्वस्यावच्छेदकतासम्बन्धेनाभावात् स्वरूपसम्बन्धेन सत्त्वाच्च लक्षणसमन्वयः वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदविषयकनिश्चयस्य ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धकतया तत्र ज्ञाने तादृशप्रतिबन्धकतावच्छेदकत्वसत्त्वात् नातिव्याप्तिः प्रथमसम्बन्धमात्रेण व्यापकत्वविवक्षणे ह्रदो वह्निमानित्यत्र घटादिष्वतिव्याप्तिर्घटादिनिश्चयेपि तादृशप्रतिबन्धकतावच्छेदकताविरहात् स्वरूपसंबन्धमात्रेण व्यापकत्वविवक्षणे वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेतिव्याप्तिः अत उभसंबन्धेन व्यापकत्वं विवक्षितम्, अथ बाधादिज्ञानस्यात्मनि दैशिकाव्याप्यवृत्तितया तदभावस्यानुमितिकारणत्वे बाधनिश्चयकालेपि किञ्चिदवच्छेदेनात्मनि तदभावस्य सत्त्वेनानुमितिवारणाय बाधादिज्ञानवदात्मत्वादेरनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मितिप्रतिबन्धकत्वं व्याप्त्यनुगममथुरानाथीये उक्तं तन्[1]मते बाधादिदोषनिश्चये सर्वत्र प्रतिबन्धकतावच्छेदकत्वस्य सत्त्वेनाऽसम्भवः एवं साक्षादवच्छेदकताया व्यासज्यवृत्तित्वानङ्गीकर्तृमते[2] ज्ञानविशिष्टज्ञानीयविषयितावत्त्वेनैव प्रतिबन्धकतया तादृशज्ञानविशिष्टज्ञाने प्रतिबन्धकतावच्छेदकत्वविरहेणातिव्याप्तिश्च । नच स्वनिरूपितावच्छेदकतानिरूपितावच्छेदकत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रातियोगिताकभेदवत्त्व–स्वरूपोभयसम्बन्धेन व्यापकत्वं विवक्षणीयम् तथाच नासम्भवातिव्याप्ती बाधादिज्ञानवि-

१ बाधादिनिश्चविशिष्टात्मत्वं प्रतिबन्धकम् । २ बाधादिज्ञानीयविषयितावत्त्वेन प्रतिबन्धकत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्टात्मत्वादेः प्रतिबन्धकत्वे प्रतिबन्धकतावच्छेदकतावच्छेदकत्वस्य बाधादिनिश्चयेष्वभावात् मतान्तरेऽपि वारणीयविशिष्टविषयकनिश्चये प्रतिबन्धकतानिरूपितविषयितानिष्ठावच्छेदकतानिरूपितावच्छेदकत्वस्य सत्त्वादिति वाच्यम् । निश्चयविशिष्टनिश्चयत्वेन प्रतिबन्धकत्वमतेऽतिव्याप्त्यापत्तेः तादृशनिश्चये ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकतावच्छेदकताया अभावादिति चेन्न । स्वनिरूपितावच्छेदकताविशिष्टावच्छेदकतासम्बन्धावच्छिन्नस्वानिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्व—स्वरूपोभयसम्बन्धेन व्यापकत्वस्य विवक्षितत्वात् अवच्छेदकतायामवच्छेदकतावैशिष्ट्यञ्च स्वभिन्नत्व-स्व-

१ बाधादिनिश्चयत्वेन प्रतिबन्धकत्वम् ।

Nepal Sanskrit University Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टनिरूपितत्वोभयसम्बन्धेन स्ववैशिष्ट्यञ्च स्वनिरूपकत्व-स्वनिरूपितत्व-स्वनिरूपकनिरूपितत्वैतदन्यतमसम्बन्धेन प्रथमसम्बन्धद्वयघटकप्रथमसम्बन्धानुपादाने प्रथममतेऽसम्भवः बाधादिनिश्चयनिष्ठावच्छेदकतायां द्वितीयवैशिष्ट्यघटकान्यतमघटकस्वनिरूपकत्वसम्बन्धेन स्वनिष्ठप्रतिबन्धकतानिरूपितत्वस्य सत्त्वात्, द्वितीयसम्बन्धाऽनिवेशे प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रातिबन्धकत्वान्तरावच्छेदकताभिन्नत्वस्य तत्र सत्त्वात्तन्मते स एव दोषः, एवं द्वितीयवैशिष्ट्यघटकप्रथमसम्बन्धानिवेशे तृतीयमतेऽतिव्याप्तिः निश्चयविशिष्टनिश्चयत्वेन प्रतिबन्धकतया तन्निरूपितानिश्चयत्वादिनिष्ठावच्छेदकताभिन्नत्वस्य निश्चयनिष्ठावच्छेदकतायां सत्त्वेपि तन्निरूपितनिरूपितत्वतन्निरूप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

कनिरूपितत्वयोस्तन्निरूपकेऽभावात् तन्निवेशे तन्निरूपकप्रतिबन्धकतानिरूपितत्वस्य सत्त्वात्तत्संग्रहान्नातिव्याप्तिः, द्वितीयसम्बन्धाऽनिवेशे द्वितीयमतेऽतिव्याप्तिः प्राथमिकनिश्चयनिष्ठावच्छेदकतायां विषयतानिष्ठावच्छेदकताभिन्नत्वसत्त्वेपि तन्निरूपकनिरूपितत्वस्य तन्निरूपकनिरूपितनिरूपितत्वस्य चाभावात् तन्निवेशे तन्निरूपितद्वितीयानिश्चयनिष्ठावच्छेदकतानिरूपितत्वसत्त्वान्नातिव्याप्तिः। नच द्वितीयनिश्चयनिष्ठावच्छेदकतामादायैव तत्रातिव्याप्तिवारणं शक्यमिति वाच्यम्। तन्मत एव बाधनिश्चयादौ तादृशप्रतिबन्धकतानिरूपितविषयितानिष्ठावच्छेदकताभिन्नतान्निरूपकप्रतिबन्धकतानिरूपितत्व–स्वनिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतासत्त्वादसम्भववारणाय द्वितीयावच्छेदकतायां नि-

Nepal Sanskrit University Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपितत्वसम्बन्धानवच्छिन्नत्वस्य वक्तव्यतया द्वितीयनिश्चयनिष्ठावच्छेदकताया अतादृशत्वात्, तृतीयसम्बन्धानिवेशे प्रथममतेऽतिव्याप्तिः प्रथमनिश्चयनिष्ठावच्छेदकतायां द्वितीयनिश्चयनिष्ठावच्छेदकतानिरूपकनिरूपितत्वस्य तन्निरूपितनिरूपितत्वस्य चाभावात् तन्निवेशे तन्निरूपकप्रतिबन्धकतानिरूपितस्वनिरूपितत्वात्तत्संग्रह इति नातिव्याप्तिः, एवञ्च न कुत्रापि मते दोष इति गुरुभूतविशिष्टद्वयाऽघटितत्वं न निवेशनीयम् । नच गगनाभाववदभाववत्कालीनघटो गगनवानित्यत्र बाधेऽव्याप्तिः तादृशबाधज्ञानस्य ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धकतया तत्र प्रकृतप्रतिबन्धकतानिरूपितद्वितीयनिश्चयादिनिष्ठावच्छेदकताविशिष्टावच्छेदकतायाः सत्त्वादिति वाच्यम् । प्रकृतानुमितित्वव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पकप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टविषयताशून्यज्ञानवृत्तित्वेन द्वितीयावच्छेदकताया विशेषणीयत्वात् प्रतिबन्धकतावैशिष्ट्यञ्च विषयितायां स्वावच्छेदकत्व–स्वनिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतानवच्छेदकाविषयताशून्यज्ञानीयत्वोभयसम्बन्धेन प्रतिबध्यतानवच्छेदकत्वञ्च प्रतिबध्यतावच्छेदकविषयताविशिष्टान्यत्वं तथाचोक्तबाधज्ञाने ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकीभूता या तादृशप्रतिबन्धकता निरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकसाध्यप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितसाध्याभाववत्पक्षविषयकत्वावच्छिन्नप्रतिबध्यतावच्छेदकविषयताविशिष्टान्यविषयताशून्यतादृशबाधज्ञानीयविषयता तच्छून्यत्व-

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्याभावेन तत्राव्याप्तिविरहात् । नचैवमपि अभावो गगनत्ववानाधेयत्वादित्यत्रासाधारण्येऽव्याप्तिः तज्ज्ञानस्य ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकतया तत्र तादृशप्रतिबन्धकतानिरूपितावच्छेदकतायाः सत्त्वात् तादृशप्रतिबन्धकताविशिष्टविषयताशून्यत्वस्यच सत्त्वादिति वाच्यम्। असाधारण्यविषयिताशालिज्ञानावृत्तित्वेनापि विशेषणीयत्वात् । नचैवमपि निरवच्छिन्नसाध्याभाववत्पक्षस्य बाधत्वमते गगनाभाववद्भाववत्कालीनघटो गगनवानित्यत्र बाधेऽव्याप्तिः तज्ज्ञानीयनिरवच्छिन्नत्वविषयतायाः प्रतिबन्धकतानवच्छेदकतया तच्छून्यज्ञानीयविषयताशून्यत्वस्य तादृशबाधज्ञाने सत्त्वात् विषयतायां प्रतिबन्धकतावैशिष्ट्यनियामकसंबन्धघटकप्रतिबध्यतानवच्छेदकविषयतायां निरवच्छिन्नत्वघटकविषयताभेदस्य विशेषणत्वमङ्गीकृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्दोषवारणेऽपि गगनमवच्छिन्नत्ववत् अभाववच्छब्दवद्वृत्तिशब्दाभावादित्यत्र निरवच्छिन्नशब्दवद्वृत्तिशब्द-
वद्गगनेऽतिव्याप्तिः तत्र साध्यवत्पक्षाविषयकबुद्धित्वावच्छिन्ननिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकता-
यां निरुक्तोभयसंबन्धेन तादृशनिश्चयत्वव्यापकत्वस्य सत्त्वात् तादृशनिश्चये तादृशप्रतिबन्धकता-
निरूपितावच्छेदकताविशिष्टावच्छेदकत्वस्य सत्त्वेपि नहि तज्ज्ञानं प्रकृतानुमितित्वव्यापकप्रतिबध्यता-
निरूपितप्रतिबन्धकताविशिष्टविषयिताशून्यं तज्ज्ञानीयविषयतायां सर्वत्र प्रकृतानुमितित्वव्यापकप्र-
तिबध्यतानिरूपितहेत्वभाववत्पक्षविषयकनिश्चयत्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वस्य तादृशप्रतिब-
न्धकतानिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकहेतुमत्पक्षविषयकनिश्चयत्वावच्छिन्नप्रतिबन्धकतानि-

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपितप्रतिबध्यतावच्छेदकविषयताविशिष्टान्यनिरवच्छिन्नत्वघटकविषयताभिन्नविषयताशून्यज्ञानीयत्वस्यच सत्त्वात् तच्छून्यत्वस्य तादृशविशिष्टज्ञाने अभावात् इति वाच्यम्। स्वविशिष्टविषयिताशून्यज्ञानवृत्तिस्वनिरूपितावच्छेदकताविशिष्टावच्छेदकतासंबन्धावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्व–स्वरूपोभयसंबन्धेन व्यापकत्वस्य विवक्षणीयत्वात्, विषयितायां स्ववैशिष्ट्यंच स्वनिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतानवच्छेदकविषयताशून्यज्ञानीयत्वसंबन्धेन तथाच नोक्तविशिष्टेऽतिव्याप्तिः तज्ज्ञाने स्वपदग्राह्यसाध्यवत्पक्षविषयकबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानिरूपिततादृशप्रातिबध्यताविशिष्टनिश्चयत्वव्याप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कसाध्यवत्पक्षविषयकनिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितसाध्याभाववत्पक्षविषयकबुद्धित्वावच्छिन्न-प्रतिबध्यतानवच्छेदकवृत्तित्वादिविषयताशून्यबाधज्ञानीयविषयिताशून्यत्वस्य सत्त्वात्तादृशावच्छेदकता-संबन्धेन निरुक्तप्रतिबन्धकतायास्तत्र सत्त्वात् इति चेन्न । विशिष्टद्वयाऽघटितत्वनिवेशापेक्षयोक्तनिवे-शस्यातिगुरुत्वात्, एवं निरवच्छिन्नसाध्याभाववत्पक्षस्य बाधतामते उक्तबाधसंग्रहाय तादृशप्रतिबन्ध-कतावैशिष्ट्यघटकप्रतिबध्यतानवच्छेदकविषयतायां निरवच्छिन्नत्वघटकविषयताभेदस्य निवेशनीयतया तत्र घटकत्वनिर्वचनस्यच गुरुत्वात् इति ध्येयमिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्प्रतिपक्षघटकदलद्वयविषयिताभिन्ननिरुक्तविशिष्टद्वयविषयिताशू-
न्यत्वस्य विशिष्टद्वयाघटितत्वपदार्थत्वादिति ॥

तथाच यादृशविशिष्टविषयकानिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिवन्धकतानतिरिक्तवृत्तिसत्प्रतिपक्षघटकदलद्वयविषयिताभिन्नतादृशविशिष्टद्वयविषयिताशून्यत्वं निश्चयविशेषणम्। नन्वेवमपि प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षरूपसत्प्रतिपक्षे कथं लक्षणसमन्वयः तत्र विशिष्टान्तराऽघटितत्वस्याभावात् तथाहि तादृशसत्प्रतिपक्षज्ञानस्य ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धकतया जलव्यापकवह्न्यभावसमानाधिकरणजलवान्ह्रद इति ज्ञानस्यैव जलव्यापक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वह्न्यभावाधिकरणनिरूपितवज्जलवान् ह्रद इति ज्ञानस्यापि प्रतिबन्धकतया जलव्यापकवह्न्यभावाधिकरणनिरूपितवज्जलवद्ध्रदत्वविशिष्टाऽघटितत्वाभावात्। नच सत्प्रतिपक्षविषयिताभिन्नत्वं विशिष्टान्तरविषयितायां विशेषणं देयं तथाच स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं सत्प्रतिपक्षविषयताभिन्नतद्रूपावच्छिन्नविषयताशून्यत्वं निश्चयविशेषणम् तथाच नोक्ताव्याप्तिरिति वाच्यम्। मेयत्वविशिष्टतादृशसत्प्रतिपक्षेऽतिव्याप्त्यापत्तेः शुद्धसत्प्रतिपक्षस्य विशिष्टान्तरत्वेपि तद्विषयताभिन्नत्वाभावात् इति चेन्न । सत्प्रतिपक्षविषयिताऽव्यापकविषयिताशून्यज्ञानीयसत्प्रतिपक्षविषयताभेदस्य विशिष्टान्तरविषयितायां विवक्षितत्वात् मेयत्वविशि-

CC-0. In Public Domain. Digitization by eGangotri

ष्टसत्प्रतिपक्षविषयकज्ञानीयसत्प्रतिपक्षविषयतायां सत्प्रतिपक्षविषयित्वाऽव्यापकविषयिताशून्यशुद्धत-ज्ज्ञानीयतद्विषयताभेदस्य सत्त्वान्नातिव्याप्तिरिति दिक् ॥ श्रीः ॥

अनुमितिप्रतिबन्धकतायां यादृशरूपावच्छिन्नविषयकत्वमवच्छेदकं तादृशं यत्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्तदवच्छिन्नत्वं समुदितार्थं इति ॥

अत्र स्वाऽनवच्छिन्नप्रकारतावच्छेदकं यत्तादृशं रूपं तदनवच्छिन्नप्रकारतावच्छेदकरूपवत्त्वं विशिष्टान्तराघटितत्वमिति जगदीशोक्तादरेपि मेयत्वविशिष्टव्यभिचारादौ नातिव्याप्तिः मेयत्वविशिष्टव्यभिचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्वानवच्छिन्नशुद्धव्यभिचारवानिति ज्ञानीयप्रकारतावच्छेदकव्यभिचारत्वाऽनवच्छिन्नप्रकारतावच्छेदक-त्वस्य तादृशव्यभिचारत्वेऽसंभवात् तथापि व्यभिचारकालीनघटादावतिव्याप्तिः तादृशघटत्वाव-च्छिन्नप्रकारत्वस्य व्यभिचारत्वानवच्छिन्नत्वात् स्वानवच्छिन्नप्रकारतावच्छेदकं यत्तादृशं रूपं तदव-च्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वाविवक्षणेन तद्वारणे बाधाद्यसंग्रहः ह्रदो वह्न्यभाववानिति ज्ञाने तुल्यवित्तिवेद्यतया ह्रदवृत्तिवह्न्यभावत्वावच्छिन्नस्य विषयतया वह्न्यभाववद्ध्रदत्वानवच्छिन्नप्रकारताव-च्छेदकह्रदवृत्तिवह्न्यभावत्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकत्वस्य वह्न्यभाववद्ध्रदत्वेऽभावात् अतः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं तादृशरूपे विवक्षणीयम् । नच साक्षात्परम्परा-

CC-0. In Public Domain. Digitization by eGangotri

साधारणावच्छेदकत्वमङ्गीकृत्यैवैतल्लक्षणं कर्तव्यम् अन्यथा ह्रदो वह्निमानित्यत्र बाधादावव्याप्तिः तादृशबाधज्ञानीयवह्न्यभाववद्ध्रदविषयितानिरूपितसाक्षादवच्छेदकताया वह्न्यभावह्रदत्वमात्रपर्याप्ततया तद्घतसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकनिरूपकतावच्छेदकताकविषयिताया ह्रदोऽभाववानिति ज्ञानेपि सत्त्वेन तत्र प्रतिबन्धकताविरहात्, साक्षात्परम्परासाधारणावच्छेदकतास्वीकारेतु तादृशबाधविषयितानिरूपकतावच्छेदकताया वह्निवह्नित्वाद्यन्तर्भावेणैव पर्याप्ततया तादृशसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकनिरूपकतावच्छेदकताकविषयिताया ह्रदोऽभाववानिति ज्ञानेऽसत्त्वेन तत्संग्रहः, एवंचोक्तविवक्षायामपि न व्यभिचारकालीनघटेऽतिव्याप्तिः तादृशघटत्वावच्छिन्नप्रकारताया व्यभिचारत्वाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नत्वादिति वाच्यम्। विषयताप्रतियोगितादिनिष्ठावच्छेद्यताया विभिन्नतया मेयत्वविशिष्टव्यभिचारत्वानवच्छिन्नप्रकारतावच्छेदकशुद्धव्यभिचारत्वानिरूपितप्रतियोगितानिष्ठावच्छेद्यताऽभाववत्प्रकारतावच्छेदकत्वस्य मेयत्वविशिष्टव्यभिचारत्वे सत्त्वेनातिव्याप्त्यापत्तिरतो विषयतानिष्ठावच्छेद्यत्वाभाव एव निवेशनीयः एवं चासंभवः वह्न्यभाववद्वृत्त्वादिनिरूपितप्रतियोगितादिनिष्ठावच्छेद्यत्वाभाववत्प्रकारतानिरूपितावच्छेदकतावत्तद्धर्मानवच्छिन्नप्रकारतावच्छेदकत्वस्य तत्राभावादिति, प्रथममपि विषयतानिष्ठावच्छेद्यत्वाभाव एव निवेशनीय इति सूचनायोक्तविवक्षा, जगदीशस्याप्ययमेवाभिप्राय इति ध्येयम् ॥श्रीः॥

CC-0. In Public Domain. Digitization by eGangotri

मेयत्वविशिष्टव्यभिचारत्वाश्रयाविषयकत्वस्य व्यभि-
चारत्वाद्यवच्छिन्नविषयकप्रतीतौ दुर्घटत्वादिति ॥ ॥

ननु कथमत्र दुर्घटत्वं व्यभिचारत्वेन घटावगाहिन्यां व्यभिचारत्वावच्छिन्नप्रतीतौ मेयत्वविशिष्टव्यभिचारत्वाश्रयाविषयकत्वस्य सुघटत्वात् इति चेन्न । तथासत्यसंभवः बाधत्वाश्रयाऽविषयकस्य बाधत्वेन घटावगाहिज्ञानस्य संभवेन तदघटितत्वस्य बाधादावसत्त्वादतः स्वाश्रयाऽविषयकप्रतीतिविषयवृत्तिस्वाश्रयाविषयकप्रतीतिविषयतावच्छेदकं यत्तादृशं रूपं तदवच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकत्वमेव वक्तव्यं तथाच बाधत्वस्य बाधत्वेन घटविषयकप्रतीतिविषयतावच्छेदकत्वेपि न तादृशप्रती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिविषयवृत्तित्वमिति नासंभवः, प्रकृते मेयत्वविशिष्टव्यभिचारत्वाश्रयाऽविषयकप्रतीतिविषयतावच्छेदकं तादृशप्रतीतिविषयवृत्तिव्यभिचारत्वं न संभवतीति दुर्घटत्वं, वस्तुतस्तु व्यभिचारत्वं साध्याभाववद्वृत्तित्वविशिष्टहेतुतावच्छेदकं तत्र वैशिष्ट्यं सामानाधिकरण्यमेवेति सामानाधिकरण्यघटकतया व्यभिचारपदार्थस्यापि व्यभिचारत्वघटकतया दुर्घटत्वाभिधानमिति ध्येयम् ॥ श्रीः ॥

अतः स्वाश्रयाविषयकत्वमुपेक्ष्य स्वावच्छिन्नाविषयकत्वनिवेश इति ॥

नन्वत्र चरमोपात्तस्य तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकमित्यस्य प्रयोजनं प्रथममभिधाय तदनन्तरं प्रथमोपात्तस्य स्वावच्छिन्नेत्यस्य प्रयोजनाभिधाने किं बीजमिति चेन्न । स्वावच्छि-

CC-0. In Public Domain. Digitization by eGangotri

न्नाविषयकेत्यस्योपादानेऽनुपादाने च स्वयमेव यदि तदवच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकत्वेन न निवेश्यते तदा व्यभिचारकालीनघटादावतिव्याप्तिः तादृशघटत्वावच्छिन्नाऽविषयकज्ञानीयायां तदाश्रयाऽविषयकज्ञानीयायां वा विषयतायामवच्छेदकं यद्व्यभिचारत्वं तदवच्छिन्नाऽविषयकप्रतीतिविषयत्वात्तादृशघटत्वाश्रयस्य, स्वपदार्थे तादृशप्रतीतिविषयतावच्छेदकत्वनिवेशेतु तादृशघटत्वस्य स्वपदार्थस्य व्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वाभावेन नातिव्याप्तिः स्वपदार्थे तादृशप्रतीतिविषयतावच्छेदकत्वानुपादाने स्वावच्छिन्नेत्यस्य व्यावृत्तिर्न संभवति तदनुपादाने मेयत्वविशिष्टव्यभिचारत्वाश्रयव्यभिचाराविषयकप्रतीतिविषयतावच्छेदकं यद्बाधत्वादिकं तदवच्छिन्नाऽविषयकप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीतिविषयता मेयत्वविशिष्टव्यभिचारे यथा वर्तते तथा तादृशव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकशुद्धव्यभिचारत्वावच्छिन्नाविषयके प्रमेयत्वादिना तद्विषयकज्ञाने मेयत्वविशिष्टव्यभिचारस्य विषयत्वात्, तन्निवेशेतु स्वावच्छिन्नेत्यस्याऽनिवेश एवायं दोषो नतु तन्निवेश इति सूचनाय वैपरीत्येन प्रयोजनाभिधानादिति ॥ श्रीः ॥

स्वावच्छिन्नाविषयकप्रतीतिविषयवृत्तित्वस्य तादृशधर्मविशेषणत्वे व्यभिचारत्वादेरपि प्रमेयत्वादिना व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषये व्यभिचारादौ वर्तमानतयाऽसंभव इति ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

ननु स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वापेक्षया तादृशप्रतीतिविषयताश्रयवृत्तित्वस्य गुरुतया कथमियं शङ्कापीति चेन्न। वह्न्यभाववद्ध्रदत्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकं ह्रदत्वमपि प्रकृतानुमितिप्रतिबन्धकतानातिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं विशिष्टस्य शुद्धानतिरिक्तत्वात् तथाच तद्घटितत्वस्य बाधादावसत्त्वादसंभवोऽतः स्वावच्छिन्नाविषयकप्रतीतिविषयितानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं यत्प्रकृतानुमितिप्रतिबन्धकतावच्छेदकविषयितानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं तदवच्छिन्नानुयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिताकपर्याप्तिकावच्छेदकताकनिरूपकताकाविषयिताशून्यत्वस्य निवेशनीयतया ताद्दशप्रतीतिविषयवृत्तिवृत्तित्वस्य निवेशसंभवेन लाघवानपायादिति ॥ श्रीः ॥

प्रमेयं गगनवद्वाच्यत्वादित्यादौ व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयितावच्छेदकं यद्गगनाभाववत्प्रमेयत्वादि तदाश्रयाविषयकप्रतीत्यप्रसिद्ध्या व्यभिचारादौ ताद्दशप्रतीतिविषयत्वस्य दुरुपपादतयाऽव्याप्तिरिति ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

ननु ह्रदो वह्निमानित्यादौ वह्न्यभाववद्ध्रदत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्ध्रदवृत्ति-वह्न्यभाववत्वं तदाश्रयाविषयकप्रतीतिविषयतावच्छेदकत्वस्य बाधतावच्छेदकेऽभावेनासंभव एव कुतो नाभिहितः । नच तदाश्रयमुख्यविशेष्यताशून्यत्वविवक्षणान्नासंभव इति वाच्यम् । तथापि बाधत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकसत्प्रतिपक्षतावच्छेदकधर्माश्रयपक्षाविषयकप्रतीतिविषयतावच्छेदकत्वस्य बाधत्वादावभावेनासंभवस्य दुर्वारत्वादिति चेन्न । घटो गगनवानित्यादौ सत्प्रतिपक्षासिद्धिस्थले लक्षणसमन्वयसंभवादिति ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रच तादृशविशिष्टान्तराविषयकप्रतीतिविषयतावच्छेदकत्वस्य दोषतावच्छेदकधर्मे विशेषणतापेक्षया ज्ञानस्येत्यत्र ज्ञानपदार्थे तादृशविशिष्टान्तराविषयकत्वनिवेश एवोचित इति ॥ ॥ ॥

नन्वत्र ज्ञानपदार्थे तादृशविशिष्टान्तराविषयकत्वनिवेशे लाघवं न संभवति अनुगमे गौरवात् तथा सति तत्रैवमनुगमः कार्यः प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टरूपवत्त्वं लक्षणम्, प्रतिबन्धकतावैशिष्ट्यंच स्ववृत्तिर्यः किंचिद्रूपावच्छिन्नविषयतात्वावच्छिन्नप्रतियोगिताकाभाववत्प्रतीतिविषयतावच्छेदकप्रकृतानुमितिप्रतिबन्धकतावृत्तिकिंचिद्रूपावच्छिन्नविषयताशालिनिश्चयनिष्ठभे-

दप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावनिरूपितप्रतियोगितानिरूपितावच्छेदकता[1]निरूपि-
तावच्छेदकता[2]निरूपितावच्छेदकता[3]निरूपितावच्छेदकता[4]निरूपितावच्छेदकता[5]निरूपितावच्छिन्नत्वसंब-
न्धावच्छिन्नावच्छेदकतावद्धर्मावच्छिन्नविषयतात्वावच्छिन्नप्रतियोगिताकाभाववत्किंचिद्रूपावच्छिन्नविषय-
ताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धोऽभावस्तन्निरूपितप्रतियोगितानि-
रूपितावच्छेदकता[6]निरूपितावच्छेदकता[7]निरूपितावच्छेदकता[8]निरूपितावच्छेदकता[9]वत्त्वसंबन्धेन तादृशा-

१ प्रतियोगित्वे । २ भेदे । ३ वृत्तित्वे । ४ निश्चये । ५ विषयित्वे । ६ प्रतियोगित्वे । ७ भेदे । ८ वृत्तित्वे । ९ निश्चये ।

वच्छेदकतावत्त्वं च स्वनिरूपितावच्छेदक[1]तानिरूपितावछिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावत्त्व—स्वनिरू-
पितावच्छेदक[2]तानिरूपितावच्छेदक[3]तानिरूपितावच्छेदक[4]तानिरूपितावच्छेदक[5]तानिरूपितावच्छेदक[6]ता—
निरूपितावच्छेदक[7]तानिरूपितावच्छेदक[8]तानिरूपितावच्छेदक[9]तानिरूपितावच्छेदक[10]तानिरूपितावच्छेद—
क[11]तानिरूपितावच्छेदक[12]तानिरूपितावच्छेदक[13]तानिरूपितावच्छेदकतावत्त्वोभयसंबन्धेन अत्र प्रतिबन्धक-
तावृत्त्यभावोऽतिगुरुशरीरकः तन्मते अनुगमस्तु प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्ध-

१ विषयित्वे । २ अभाव । ३ प्रतियोगित्वे । ४ अवच्छिन्नत्वे । ५ अवच्छिन्नत्वे । ६ धर्मे । ७ अवच्छेदकत्वे ।
८ विषयित्वे । ९ प्रतीतौ । १० अभावे । ११ प्रतियोगित्वे । १२ अवच्छिन्नत्वे । १३ अवच्छिन्नत्वे ।

कतावृत्तिर्यः किंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धोऽभावस्तन्निरूपितप्रतियोगितानिरूपितावच्छेदक[1]तानिरूपितावच्छेदक[2]तानिरूपितावच्छेदक[3]तानिरूपितावच्छेदक[4]तानिरूपितावच्छेदक[5]तानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावद्रूपविशिष्टरूपवत्त्वं लक्षणम्, रूपे रूपवैशिष्ट्यं च स्वतादात्म्यप्रकृतानुमितिप्रतिबन्धकतानिष्ठाकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितावच्छेदक[6]ताव-

१ प्रतियोगित्वे । २ भेदे । ३ वृत्तित्वे । ४ निश्चये । ५ विषयित्वे । ६ प्रतियोगित्वे ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च्छेदक[1]तावच्छेदक[2]तावच्छेदक[3]तावच्छेदक[4]तानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकताविशिष्टस्वा-
वच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्ववद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वोभयसंबन्धे-
नेति प्रतिबन्धकतावृत्त्यभावो लघुशरीरक इति चेन्न। एतन्मतेपि प्रकृतानुमितित्वव्यापकप्रतिबध्यता-
निरूपितप्रतिबन्धकतावृत्तिर्यः किंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं
नास्तीति प्रतीतिसिद्धोऽभावस्तन्निरूपितप्रतियोगितानिरूपितावच्छेदक[5]तानिरूपितावच्छेदक[6]तानिरू-
पितावच्छेदक[7]तानिरूपितावच्छेदर्कताविशिष्टधर्मवत्त्वं लक्षणम्, अवच्छेदकतावैशिष्ट्यं च स्वनिरू-

---

१ भेदे। २ वृत्तित्वे। ३ निश्चये। ४ विषयित्वे। ५ प्रतियोगित्वे। ६ भेदे। ७ वृत्तित्वे। ८ निश्चये।

पितावच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावत्त्व–स्वसमानाधिकरणो यः किंचिद्रूपा-
वच्छिन्नविषयत्वाभाववत्प्रतीतिविषयतावच्छेदकप्रकृतानुमितिप्रतिबन्धकतावृत्तिकिंचिद्रूपावच्छिन्नाविष-
यिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितावच्छेदक[१]ता-
वच्छेदक[२]तावच्छेदक[३]तावच्छेदक[४]तावच्छेदक[५]तानिरूपितावच्छिन्नत्वसंबन्धाऽवच्छिन्नावच्छेदकतावद्धर्माऽव-
च्छिन्नविषयता नास्तीति प्रतीतिसिद्धोभावस्तन्निरूपितविषयतात्वावच्छिन्नप्रतियोगितानिरूपिता-
वच्छिन्नत्वानिष्ठावच्छेदकतानिरूपितावच्छेदक[६]तानिरूपितावच्छेदक[७]तानिरूपितावच्छेदक[८]तानिरूपिताव-

६ धर्मे । ७ अवच्छेदकत्वे । ८ विषयित्वे ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकता[1]निरूपितावच्छेदकता[2]निरूपितावच्छेदकता[3]निरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकताव-त्त्वोभयसंबन्धेनेति लाघवमस्त्येव, अथ विशिष्टान्तरतावच्छेदकधर्मे स्वावच्छिन्नाविषयकप्रतीतिविषयता-वच्छेदकत्वं किमिति निवेशनीयम् किंतु प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायाम् स्वावच्छिन्नाविषयकयद्रूपावच्छिन्नविषयताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धोऽभावस्तद्रूपावच्छिन्नविषयताशून्यत्वं दोषज्ञाने निवेश्यताम् तथा सति अनुगमशरीरम् लघु तथाहि प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टरूपवत्त्वं लक्षणम् रूपे प्रति-

१ प्रतीतौ । २ अभावे । ३ विषयित्वे ।

बन्धकतावैशिष्ट्यं च स्ववृत्तिकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितानिरूपितावच्छेद[१]कतानिरूपितावच्छेदक[२]तानिरूपितावच्छेदक[३]तानिरूपितावच्छेदक[४]तावत्संबन्धेन, तादृशावच्छेदकतावत्त्वं च स्वनिरूपितावच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावत्त्व–स्वसमानाधिकरणो यः प्रकृतानुमितिप्रतिबन्धकतानिष्ठकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितानिरूपितावच्छेदक[५]तानिरूपितावच्छेदक[६]तानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरूपितकिंचिद्रूपावच्छिन्नवि-

५ प्रतियोगित्वे । ६ भेदे ।

CC-0. In Public Domain. Digitization by eGangotri

षयत्वाऽभावसमानाधिकरणनिश्चयनिष्ठावच्छेदकतानिरूपितावच्छेदकं[1]तानिरूपितावच्छिन्नत्वसम्बन्धाव-च्छिन्नावच्छेदकतावद्धर्मावच्छिन्नविषयित्वं नास्तीति प्रतीतिसिद्धोऽभावस्तन्निरूपितप्रतियोगितानिरू-पितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतातिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकत्वनिष्ठावच्छेदक-तानिरूपितविषयित्वनिष्ठावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितनिश्चयनिष्ठावच्छेदकत्वनिष्ठाऽवच्छेदक-तानिरूपितसामानाधिकरण्यनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितविषयतानिष्ठप्रति-

---

१ विषयित्वे ।

CC-0. In Public Domain. Digitization by eGangotri

योगितासम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावत्त्वोभयसंबन्धेनेति। मैवम्। यादृशस्थलेऽप्रामाण्यज्ञानानास्कन्दितव्यभिचारज्ञानं नियमतो मेयत्वविषयकं मेयत्वाविषयकव्यभिचारज्ञानमप्रामाण्यज्ञानास्कन्दितं तत्र मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाऽविषयकज्ञानीयव्यभिचारत्वावच्छिन्नविषयित्वाव्यापकत्वस्यानुमितिप्रतिबन्धकताया-मसत्त्वात् तादृशव्यभिचारज्ञानस्य नियमेनाप्रामाण्यज्ञानवत्त्वेन प्रतिबन्धकताशून्यत्वात्, स्वमतेतु नायं दोषः व्यभिचारत्वेऽप्रामाण्यज्ञानास्कन्दितज्ञानान्तर्भावेण मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकत्वस्य सत्त्वात् मेयत्वविशिष्टव्यभिचारज्ञानान्तर्भावेण प्रतिबन्धकताया व्यभिचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रविषयिताव्यापकत्वात् तद्विषयताशून्यत्वस्य मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयकज्ञानेऽसत्त्वा-
दिति दिक् ॥ श्रीः ॥

स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकं यत्प्रकृतानुमितिप्र-

---

१ यद्यपि मेयत्वविशिष्टव्यभिचारज्ञाने प्रतिबन्धकतासत्त्वेपि व्यभिचारविषयित्वाऽव्यापकविषयिताशून्यत्वाभावेन विशेष्यदलाभावान्न तत्संग्रहस्तथाप्यप्रामाण्यज्ञानास्कन्दितज्ञानान्तर्भावेण विषयितायां विशिष्टविषयित्वाऽव्यापकत्व-विवक्षणान्न दोषः ।

CC-0. In Public Domain. Digitization by eGangotri

तिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं तदवच्छिन्नाऽविषयकत्वं दोषज्ञाने निवेशितम् ॥ ॥ ॥

अथात्र विशिष्टान्तरविषयितायां स्वरूपसंबन्धरूपमवच्छेदकत्वमेव निवेश्यताम् किमनतिरिक्तवृत्तित्वनिवेशेन । नचैवमसंभवः वह्न्यभाववद्ध्रदत्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकह्रदत्वावच्छिन्नविषयताया बाधज्ञानीयाया अनुमितिप्रतिबन्धकतावच्छेदकतया तादृशविषयताशून्यत्वस्य बाधज्ञानेऽसत्त्वादिति वाच्यम् । अनतिरिक्तवृत्तित्वकल्पेऽपि जातित्वादिना वह्नित्वाद्यवगाहिव्यभिचारज्ञाने प्रतिबन्धकताविरहेणाऽव्यापकविषयिताशून्यज्ञानीयत्वस्य विशिष्टान्तरविषयितायां निवेशनीयतया यद्रूपाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीययद्रूपावच्छिन्नविषयिता तादृशप्रतिबन्धकतानिरूपितस्वरू-
पसंबन्धरूपावच्छेदकतावती स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकतद्रूपावच्छिन्नविषयताशून्यत्व-
स्य विवक्षणेनासंभवाभावादिति चेन्न। संयोगवज्जलं जलाभाववदित्यत्र जलवत्संयोगवज्जलरूपबाधेऽ-
व्याप्तेः तत्र जलत्वेन घटावगाहिजलवत्संयोगवज्जलमिति ज्ञानीयायाः संयोगवज्जलत्वावच्छिन्नविषयतायाः
प्रतिबन्धकतावच्छेदुकतया तादृशज्ञानेच संयोगवज्जलत्वावच्छिन्नविषयिताऽव्यापकविषयितायाः क-
स्या अप्यभावात् तादृशबाधज्ञाने च संयोगवज्जलत्वावच्छिन्नविषयताशून्यत्वाभावात्, एवं संयोगः
संयोगाभाववान् संयोगाभाववत्पर्वतकालीनधूमादित्यत्र संयोगवत्पर्वतरूपसाधनाप्रसिद्धावव्याप्तिः सं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगत्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यसंयोगः संयोगवानिति ज्ञानीयसंयोगत्वावच्छिन्नविषयितायाः प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वात् स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकसंयोगत्वावच्छिन्नविषयताशून्यत्वस्य तादृशसाधनाप्रसिद्धित्वावच्छिन्नज्ञानेऽसत्त्वात्। नच यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयिता स्वावच्छिन्नविषयित्वाऽव्यापिका तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यज्ञानीययद्रूपावच्छिन्नविषयिता तादृशानुमितिप्रतिबन्धकतावच्छेदिका स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकतद्रूपावच्छिन्नविषयताशून्यत्वस्य विवक्षणान्नोक्तदोषः संयोगत्वावच्छिन्नविषयिताव्यापकीभूतायाः संयोगत्वावच्छिन्नविषयितानिरूपितसंयोगत्वावच्छिन्नविष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यिताया अभावस्य संयोगः संयोगवानिति ज्ञानेऽसत्त्वात्, एवं संयोगवज्जलत्वावच्छिन्नविषयित्वाऽव्यापकीभूतायाः संयोगावच्छिन्नविषयितानिरूपितसंयोगवज्जलत्वावच्छिन्नविषयिताया अभावस्य जलत्वेन घटावगाहिनि जलवत्संयोगवज्जलमिति ज्ञानेऽसत्त्वाच्चेति वाच्यम्। तथापि रूपं गुणभिन्नम् इत्यत्र स्वरूपतो गुणत्ववद्रूपबाधेऽव्याप्तिः तस्यरूपघटितत्वात् रूपत्वावच्छिन्नविषयित्वाव्यापिकायास्तादृश विषयिताया रूपं गुण इति ज्ञानेऽसत्त्वात् तज्ज्ञानीयरूपत्वावच्छिन्नविषयितायाः प्रतिबन्धकतावच्छेदकत्वात्, एवं जलत्वावच्छेदेन जलवज्जलाभावसाधने जलवज्जलवज्जलरूपे बाधेऽव्याप्तिः तस्य जलवज्जलघटितत्वात् जलवज्जलत्वावच्छिन्नविषयित्वाव्यापकीभूता यद्रूपावच्छिन्नविषयितानि-

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

रूपितयद्रूपावच्छिन्नविषयिता तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यबाधज्ञानीय-जलवज्जलत्वावच्छिन्नविषयितायास्तादृशानुमितिप्रतिबन्धकतावच्छेदकत्वात् । नच यद्रूपावच्छिन्न-विषयता स्वावच्छिन्नविषयित्वाव्यापिका तद्रूपावच्छिन्नविषयताशून्यत्वस्यापि विवक्षणान्नोक्तदोषः रूप-त्वावच्छिन्नविषयित्वाव्यापिकाया रूपाऽवच्छिन्नविषयताया रूपं गुण इति प्रतिबन्धकज्ञाने सत्त्वात्, एवं जलवज्जलत्वावच्छिन्नविषयिताव्यापकीभूताया जलवज्जलत्वावच्छिन्नविषयितायाः जलवज्जलव-ज्जलमिति प्रतिबन्धकज्ञाने सत्त्वाच्चेति वाच्यम् । जलं संयोगवज्जलाभाववदित्यत्र संयोगवज्जलवज्ज-लरूपबाधेऽव्याप्तेः तस्य संयोगवज्जलवदात्मकाविशिष्टान्तरघटितत्वात् उक्तबाधज्ञानीयसंयोगवज्जलव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्त्वावच्छिन्नविषयितायाः प्रतिबन्धकतावच्छेदकत्वात् तादृशविशिष्टविषयिताऽव्यापिका यद्रूपावच्छि-न्नविषयता तस्याः तादृशप्रतिबन्धकज्ञाने च अभावात् । नच यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपाव-च्छिन्नविषयता स्वावच्छिन्नविषयित्वाऽव्यापिका तद्रूपावच्छिन्नविषयतानिरूपिततद्रूपावच्छिन्नविषय-ताशून्यत्वं विवक्षणीयं तथाच संयोगवज्जलवत्त्वावच्छिन्नविषयिताऽव्यापकीभूताया जलत्वावच्छिन्न-विषयतानिरूपितसंयोगवज्जलत्वावच्छिन्नविषयताया उक्तप्रतिबन्धकज्ञाने सत्त्वेन तच्छून्यसंयोगवज्जल-

---

१ जलत्वेन धर्मितया घटावगाहिसंयोगवज्जलवज्जलमिति बाधभ्रमोयसंयोगवज्जलवत्त्वावच्छिन्नविषयतायाः प्रति-बन्धकतावच्छेदकतया तज्ज्ञाने यद्रूपावच्छिन्नविषयताऽव्यापकविषयतायाः अभात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदिति ज्ञानीयतद्विषयितायाः प्रतिबन्धकतानवच्छेदकतया नाव्याप्तिरिति वाच्यम् । तथापि स्वरूपं स्वरूपवद्भेदत्ववदित्यत्र स्वरूपवद्भेदत्ववद्भेदवत्स्वरूपात्मकबाधेऽव्याप्तिः स्वरूपवद्भेदत्ववद्भेदवत्त्वावच्छिन्नविषयित्वाव्यापकीभूता यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयता तच्छून्यताद्दशबाधज्ञानीयस्वरूपवद्भेदत्ववद्भेदवत्त्वावच्छिन्नविषयितायाः प्रतिबन्धकतावच्छेदकत्वात् ताद्दशबाधस्य च तद्घटितत्वात् । नच स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नविषयितासामान्यमनुमितिप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नाऽघटितत्वं विवक्षणीयं तदापि अनतिरिक्तवृत्तित्वपक्षनिवेशनीयाऽप्रामाण्यज्ञानानास्कन्दिततत्वसंशयान्यत्वाऽनिवेशेन लाघवात् तथाच न प्रागुक्तदोषावकाश इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच्यम् । अभाववान् वह्न्यभाववान् अभाववान् ह्रद इति ज्ञानस्य ह्रदो वह्निमानित्यनुमितिप्रतिबन्धकतया अभाववद्ध्रदत्वावच्छिन्नविषयितासामान्यस्य तादृशानुमितिप्रतिबन्धकतावच्छेदकतया वह्न्यभाववद्ध्रदादिरूपबाधस्य तदघटितत्वाभावेनाऽव्याप्त्यापत्तेः । नच यद्रूपावच्छिन्नविषयितासामान्यं ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नाऽघटितत्वस्य विवक्षणान्नायं दोष इति वाच्यम् । तथा सति मेयत्वविशिष्टासाधारण्येतिव्याप्त्यापत्तेः मेयत्वविशिष्टासाधारण्यघटकतावच्छेदकशुद्धाऽसाधारण्यत्वावच्छिन्नविषयितासामान्यस्य ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायामेवावच्छेदकत्वात् शुद्धासाधारण्यस्य विशिष्टान्तरत्वासंभवात् । नच यद्रूपावच्छिन्नविषयतासामान्यं ज्ञानवैशिष्ट्यानवच्छिनत्वाऽ-

Nepal ... Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधारण्यविषयकत्वानवच्छिन्नत्वोभयाभाववत्प्रतिबन्धकतावच्छेदकं तदवच्छिन्नाघटितत्वं विवक्षणीयं
तथा चासाधारण्यप्रतिबन्धकतायामसाधारण्यविषयकत्वाऽनवच्छिन्नत्वाभावेनोभयाभावसत्त्वेनासाधारण्य-
स्य विशिष्टान्तरतासंभवेन मेयत्वविशिष्टासाधारण्ये नातिव्याप्तिः नवा बाधेऽव्याप्तिः, उक्तरीत्याऽभाव-
वद्धदविषयकनिश्चयप्रतिबन्धकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयकत्वानवच्छिन्नत्वोभयस्यै-
व सत्त्वेन तस्य विशिष्टान्तरत्वाभावादिति वाच्यम् । तथापि गगनाभाववदभाववत्कालीनघटो गग-
नवानित्यत्र मेयत्वविशिष्टबाधेऽतिव्याप्त्यापत्तेः गगनाभाववद्गगनाभाववदभाववत्कालीनघटात्मकबाध-
विषयितासामान्यस्य प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेवावच्छेदकतया तत्प्रतिबन्धकतायामुक्तोभयसत्त्वेनोभयाभाववत्प्रतिबन्धकतावच्छेदकत्वस्य दोषान्तरविषयितायामेव सत्त्वेन तदघटितत्वस्योक्तमेयत्वविशिष्टबाधेऽक्षतत्वात् । नच यद्रूपावच्छिन्नविषयितासामान्यं ज्ञानवैशिष्ट्यावच्छिन्नत्वा-ऽसाधारण्यविषयित्वानवच्छिन्नत्व-प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टविषयित्वानवच्छिन्नत्वैतत्रितयाभाववत्प्रकृतानुमितिप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नाघटितत्वं विवक्षणीयम्, विषयितायां प्रतिबन्धकतावैशिष्ट्यंच स्वावच्छेदकत्वस्वनिरूपितप्रतिबध्यतावच्छेदकविषयिताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताऽवच्छेदकत्वोभयसंबन्धेन, तथाच तादृशबाधनिश्चयप्रतिबन्धकतायां प्रागुक्तोभयाभावप्रतियोग्युभयसत्त्वेपि प्रकृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

तानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूता सती तन्निरूपितप्रतिबध्यतावच्छेदकगगनाभाववदभाववत्कालीनघटत्वावच्छिन्नविशेष्यतानिरूपितगगनत्वावच्छिन्नप्रकारिताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितगगनाभाववत्तादृशघटविषयकबुद्धित्वावच्छिन्नप्रतिबध्यतावच्छेदकीभूता या गगनाभाववत्तादृशघटविषयिता तदनवच्छिन्नत्वाभावेनोक्तात्रितयाभावसत्त्वेन तादृशप्रतिबन्धकतायां बाधविषयितासामान्यस्याऽवच्छेदकतया शुद्धतादृशबाधस्य विशिष्टान्तरतोपपत्त्या तद्घटितेनातिव्याप्तिरिति वाच्यम् । वह्न्यभाववद्वह्न्यभावव्याप्यवत्कालीनह्रदो वह्निमानित्यत्र वह्न्यभावव्याप्यवत्तादृशह्रदात्मकसत्प्रतिपक्षज्ञानस्य ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धकतया तत्प्रतिबन्धकतायां ज्ञान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैशिष्ट्यावच्छिन्नत्वाऽसाधारण्यविषयकत्वानवच्छिन्नत्वतादृशप्रतिबन्धकताविशिष्टविषयित्वाऽनवच्छिन्न-त्वानां त्रयाणामपि सत्त्वेन तत्त्रितयाभाववत्प्रतिबन्धकतावच्छेदकविषयितासामान्यकदोषान्तराऽघटिते मेयत्वविशिष्टतादृशसत्प्रतिपक्षेऽतिव्याप्तेः, यदिच प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्ध-कतावच्छेदकपक्षविशेष्यतानिरूपितप्रकारतावच्छेदकधर्मावच्छिन्नविधेयताशाल्यनुमितित्वाऽवच्छिन्नज-न्यतानिरूपितजनकतावच्छेदकविषयितानवच्छिन्नत्व–प्रागुक्तत्रितयैतच्चतुष्टयाभाववत्प्रकृतानुमितिप्रतिब-न्धकतावच्छेदकं यद्रूपावच्छिन्नविषयितासामान्यं स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकतद्रूपाव-च्छिन्नाघटितत्वस्य निवेशनेन तादृशातिव्याप्तिर्वार्यते तदाऽनतिरिक्तवृत्तित्वनिवेशापेक्षया किमपि

CC-0. In Public Domain. Digitization by eGangotri

लाघवं न पश्याम इति अनतिरिक्तवृतित्वरूपावच्छेदकत्वनिवेश एवोचित इति ॥ श्रीः ॥

नच यद्रूपावच्छिन्नविषयकत्वं स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकं तादृशरूपान्तराऽघटितत्वस्य विवक्षितत्वान्न दोष इति ॥

ह्रदो वह्न्यभाववान् ह्रदे वह्न्यभाव इति ज्ञानयोरेकरूपेण प्रतिबन्धकत्वमङ्गीकृत्येदं, प्रतिबध्य-प्रतिबन्धकभावश्च वह्नित्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालिबुद्धित्वावच्छिन्नं प्रति वह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितत्वविशिष्टस्वरूपत्वावच्छिन्नत्वाभावह्रदत्वावच्छिन्नप्रकारतानिरूपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्वविशिष्टाधेयतात्वावच्छिन्नत्वाभावोभयाभाववद्ध्रदवह्न्यभावत्वावच्छिन्नविषयतानिरूपितसंसर्गविषयतानि-
रूपितह्रदत्वावच्छिन्नविषयताशालिनिश्चयत्वेन प्रतिबन्धकत्वमिति, यद्वा स्वरूपत्वावच्छिन्नावच्छेदकत्वे-
तरसंसर्गनिष्ठावच्छेदकत्वानिरूपकवह्न्यभावत्वावच्छिन्नविषयतानिरूपितसांसर्गिकविषयतानिरूपिताधे-
यतात्वावच्छिन्नावच्छेदकत्वेतरसांसर्गिकावच्छेदकत्वानिरूपकह्रदत्वावच्छिन्नविषयताशालिनिश्चयत्वेनेति
एवंच वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतासामान्यावच्छेदकविषयिता-
निरूपकतावच्छेदकं तदवच्छिनाविषयकप्रतीतिविषयतावच्छेदकं ह्रदवृत्तिवह्न्यभावत्वं तदवच्छिन्नाविष-
यकप्रतीतिविषयतावच्छेदकं वह्न्यभाववद्ध्रदत्वमिति लक्षणसंगतिः, मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नवि-

CC-0. In Public Domain. Digitization by eGangotri

षयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकं तादृशरूपं शुद्धव्यभिचारत्वं तदवच्छिन्नाघटितत्वाभावान्मेयत्वविशिष्टव्यभिचारे नातिव्याप्तिः व्यभिचारघटितबाधत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकं न शुद्धव्यभिचारत्वं तादृशप्रतिबन्धकतासामान्यान्तर्गतबाधप्रतिबन्धकताशून्यव्यभिचारमात्रनिश्चये सत्त्वात्, किंतु विपरीततादृशबाधत्वमिति न तत्राव्याप्तिरिति कथमसंभवाभिधानमिति कश्चित् । तन्न । तथा सति बाधविशिष्टव्यभिचारेऽतिव्याप्तिः बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकं शुद्धव्यभिचारविषयकत्वं बाधविषयकत्वं वा न भवति, किंतु व्यभिचारविशिष्टबाधविषयकत्वमिति तदघटित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वस्य तत्र सत्त्वादतः स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यस्वावच्छिन्नाविषयकप्रतीतिविषयता-वच्छेदकत्वरूपमेव तादृशरूपे विशिष्टान्तरत्वं वक्तव्यं, तथाच विपरीतबाधत्वादिकं न विशिष्टान्तरता-वच्छेदकमिति असंभवाभिधानस्य युक्तत्वात्। एतेनैकरूपेण प्रतिबन्धकत्वानङ्गीकारेऽपि सर्वं गगनव-दित्यत्र गगनाभाववद्घटादिरूपबाधे लक्षणसमन्वयः तादृशबाधविषयकत्वावच्छिन्नप्रतिबन्धकतासा-मान्यावच्छेदकं गगनाभाववत्पटत्वावच्छिन्नविषयितानिरूपकतावच्छेदकं तादृशपटत्वादिकं स्वावच्छिन्ना-ऽविषयकप्रतीतिविषयतावच्छेदकंच तदवच्छिन्नाऽघटितत्वस्य तत्र सत्त्वादित्यसंभवाभिधानमसङ्गतमिति परास्तं, बाधविशिष्टव्यभिचारवारणायोक्तविवक्षाया आवश्यकतया गगनाभाववत्पटत्वादेर्विशिष्टान्त-

CC-0. In Public Domain. Digitization by eGangotri

रतावच्छेदकत्वाऽसंभवात् । यत्तु यद्रूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताकवि-
षयिताव्यापकप्रकृतानुमितिप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकतात्वावच्छिन्न-
प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं यत्तद्रूपवृत्तिनिरूपकताकविषयिताशून्यज्ञानवृत्तिविषयितानि-
रूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकम् अधिकवारकपर्याप्तिमनिवे-
श्य तद्रूपावच्छिन्नानुयोगिताकपर्याप्तिकनिरूपकतावच्छेदकताकविषयिताशून्यज्ञानीयविषयितानिरूप-
कतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकं यद्रूपं तद्रूपविशिष्टवत्त्वं लक्षणम्, सर्वत्र दोषतावच्छेदक-
घटकसमुदायगतसमुदायत्वमादाय लक्षणं संगमनीयम्, तत्र विशिष्टान्तरं मेयत्वविशिष्टव्यभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चारादिकं तद्घटकसमुदायगतसमुदायत्वस्य व्यभिचारत्वघटकसमुदायगतसमुदायत्ववृत्तिनिरूपकताक-
शुद्धव्याभिचाराविषयिताशून्यमेयत्वविशिष्टो व्यभिचार इति ज्ञानीयविषयितानिरूपकतावच्छेदकतात्वाव-
च्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वात्, यद्रूपपदेन मेयत्वविविशिष्टव्यभिचारत्वघटकसमुदायत्वोपादाने
विशिष्टान्तररूपं शुद्धव्यभिचारत्वघटकसमुदायत्वमपीति तदवच्छिन्नपर्याप्तिकनिरूपकतावच्छेदक-
ताकविषयिताशून्यत्वस्य मेयत्वविशिष्टव्यभिचारविषयकप्रतीतावभावान्नातिव्याप्तिः, तत्राधिकवारकप-
र्याप्त्यनिवेशादिति कथमसंभव इति। तदपि न। तथापि बाधविशिष्टव्यभिचारादिवारणाय विशि-
ष्टान्तरताघटकप्रतीतौ यद्रूपवृत्तिनिरूपकताकविषयित्वाऽव्यापकविषयिताशून्यत्वस्य निवेशनीयत-

CC-0. In Public Domain. Digitization by eGangotri

या तादृशविशिष्टान्तराप्रसिद्ध्या असंभवस्य दुष्परिहरत्वात्, यदपि स्वावच्छिन्नविषयकत्वावच्छि-
न्नप्रतिबन्धकतासामान्यावच्छेदकं यद्रूपावच्छिन्नविषयकत्वमित्यस्य स्वावच्छिन्नविषयकत्वावच्छिन्नप्रति-
बन्धकतात्वव्यापकं यद्रूपावच्छिन्नविषयिताव्यापकत्वमित्यर्थः तथाच बाधविपरीतबाधयोरेकरूपेण प्रति-
बन्धकत्वाभावेपि लक्षणसमन्वयः संभवति इति, तथाहि स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतायां
विशिष्टान्तरत्वेनाभिमतविशिष्टविषयिताव्यापकत्वं न स्वरूपसंबन्धेन किंतु स्वनिरूपितप्रतिबध्यतावच्छे-
दकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावत्त्वसंबन्धेन, एवंच ह्रदे वह्न्यभाव इति निश्चयस्य
ह्रदो वह्न्यभाववानिति निश्चयस्य चैकरूपेण प्रतिबन्धकत्वाभावेप्येकधर्मावच्छिन्नं प्रत्येव प्रतिब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्धकतया ह्रदवृत्तिवह्न्यभाववत्त्वावच्छिन्नविषयकनिश्चये सर्वत्र वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वाव-
च्छिन्नप्रतिबन्धकतायाः सत्त्वेन तादृशप्रतिबन्धकतात्वव्यापकत्वस्य ह्रदवृत्तिवह्न्यभावत्वावच्छिन्नवि-
षयिताव्यापकत्वे सत्त्वेन तस्य विशिष्टान्तरतासंभवात् तदघटितत्वस्य बाधे सत्त्वात्, एवं सर्वं गगनवदि-
त्यत्रापि गगनाभाववद्घटत्वाद्यवच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतात्वव्यापकत्वस्य गगनाभाववत्पटत्वा-
द्यवच्छिन्नविषयिताव्यापकत्वे सत्त्वेन तत्रापि लक्षणसंगतिः, एवं व्यभिचारघटितबाधेच नाव्याप्तिः तादृशबा-
धत्वावच्छिन्नप्रतिबन्धकताया उक्तसम्बन्धेन शुद्धव्यभिचारविषयकनिश्चयेऽभावेन तद्विषयिताव्यापकत्वे
तादृशप्रतिबन्धकतात्वव्यापकत्वाभावेन शुद्धव्यभिचारस्य विशिष्टान्तरत्वाभावात् विपरीतव्यभिचारघ-

CC-0. In Public Domain. Digitization by eGangotri

टितबाध एव तादृशविशिष्टान्तरमिति तदघटितत्वस्य तत्र सत्त्वादिति तदपि न, उक्तदोषानतिलङ्घनात्, तथाचासंभव एव, अत्र प्रथमं स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेऽसंभवः वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यान्तर्गता पक्षे साध्यवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितबाधनिश्चयप्रतिबन्धकता पक्षे हेतुवैशिष्ट्यावगाहिबुद्धिनिरूपिताऽवच्छेदकधर्मदर्शनप्रतिबन्धकता च तदुभयानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकत्वरूपैकैकरूपवदप्रसिद्धेः, उत्तरत्रैव तन्निवेशे व्यभिचारघटितबाधस्थले तादृशबाधविषयिताव्यापिका विशिष्टबाधप्रतिबन्धकता शुद्धव्यभिचारप्रतिबन्धकता च तदुभयावच्छेदकत्वं स्वरूपसम्बन्धरूपं न बाधविषयितायाः शुद्धव्यभिचारनिश्चयप्रतिबन्धकतायामन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छेदकत्वात्, व्यभिचारविषयितायास्तदुभयावच्छेदकत्वेपि स्वरूपसम्बन्धरूपतन्निवेशे बाधादिज्ञानी-
यैकदेशविषयतामादायासंभववारणाय यद्विषयितासामान्यस्यैव तादृशावच्छेदकताया वक्तव्यतया जा-
तित्वादिना वह्नित्वाद्यवगाहिव्यभिचारविषयितायास्तत्सामान्यान्तर्गतायास्तदवच्छेदकत्वाभावेनाप्रसि-
द्धिभिया यद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीययद्रूपावच्छिन्नविषयितासामान्यस्य विव-
क्षणीयतया व्यभिचारत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयव्यभिचारविषयिताया बाध-
प्रतिबन्धकतायामनवच्छेदकत्वात् तदप्रसिद्धिरिति, उभयत्र तन्निवेशेतु बाधादिविषयकत्वावच्छिन्नप्रति-
बन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकतदविषयकप्रतीतिविषयतावच्छेदकरूपाऽप्रसि–

CC-0. In Public Domain. Digitization by eGangotri

द्विरतोऽनतिरिक्तवृत्तित्वमेवोभयत्र निविष्टम् तथाच विपरीतबाधत्वादिकमेव तादृशंप्रसिध्यति ॥ श्रीः ॥

व्यभिचारत्वादिरूपस्वावच्छिन्नाविषयताकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकस्य तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्याऽप्रसिद्ध्याऽसंभवादिति ॥

नन्वत्र स्वावच्छिन्नविषयकत्वावच्छिन्ना यावत्यः प्रकृतानुमिति प्रतिबन्धकतास्तत्प्रत्येकं यद्रूपावच्छिन्नघटकानिरूपितविषयितात्वव्यापकं तद्रूपावच्छिन्नाऽघटितत्वं समुदितार्थः, प्रतिबन्धकताया विषयि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तात्वव्यापकत्वमवच्छेदकतासंबन्धेन, घटकत्वंच तदविषयकप्रतीतिविषयतावच्छेदकधर्म्मवत्त्वं तथाच वह्न्यभाववद्ध्रदत्वाद्यवच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकता यावत्यः तत्प्रत्येकं केवलबाधप्रतिबन्धकतैव तदनतिरिक्तवृत्तिमेयत्वविशिष्टबाधादिविषयित्वमिति नाप्रसिद्धिः, एवंच तादृशबाधादिप्रतिबन्धकतायां मेयत्वविशिष्टबाधत्वादिरूपयद्रूपावच्छिन्नघटकशुद्धबाधादिविषयितात्वव्यापकत्वसत्त्वात् बाधे तदघटितत्वसत्त्वाल्लक्षणसमन्वयः मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयिताव्यापकव्याप्तिज्ञाननिरूपितप्रतिबन्धकतायां मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नघटकशुद्धव्यभिचारविषयितात्वव्यापकत्वस्य सत्त्वात्, यद्रूपपदेन मेयत्वविशिष्टव्यभिचारत्वस्य धर्तुं शक्यतया स्वस्य स्वाघटितत्वाभावान्नातिव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्तिः, एवं व्यभिचारघटितबाधे नाव्याप्तिः तादृशबाधत्वावच्छिन्नविषयित्वावच्छिन्नयावत्प्रतिबन्धकता-न्तर्गता बाधप्रतिबन्धकता व्यभिचारप्रतिबन्धकता च तत्प्रत्येकं तादृशबाधघटकव्यभिचारविषयिताव्या-पकत्वं नास्ति तादृशबाधविषयिताव्यापकत्वस्य सत्त्वेपि न तस्य तादृशबाधघटकत्वं निरुक्तं, किंतु मेय-त्वविशिष्टतादृशबाधघटकताद्विषयिताव्यापकत्वमेवेति तस्य तद्घटितत्वात्, एवं बाधविशिष्टव्यभिचारादौ नातिव्याप्तिः तादृशव्यभिचारविषयिताव्यापकयावत्प्रतिबन्धकतान्तर्गता बाधप्रतिबन्धकता व्यभिचारप्र-

१ स्वघटकत्वं स्वावच्छिन्नाविषयकप्रतीतिविषयत्वविशिष्टस्वावच्छिन्नविषयताऽव्यापकविषयताशून्यज्ञानीयवि-षयितानिरूपकत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिबन्धकता च तत्प्रत्येकं बाधविशिष्टव्यभिचारघटकशुद्धबाधशुद्धव्यभिचारविषयितात्वव्यापकत्वसत्त्वात्, एवंच सति विशिष्टद्वयाऽघटितत्वमपि न निवेशनीयं वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदत्वावच्छिन्नविषयिताव्यापिका प्रकृतानुमितिप्रतिबन्धकता ज्ञानवैशिष्ट्यावच्छिन्नैव तत्रच स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकत्वरूपोक्तविशिष्टघटकतावद्वह्न्यभाववज्जलवज्जलवद्ध्रदविषयितात्वव्यापकत्वस्य सत्त्वेन स्वस्य स्वाघटितत्वाभावेन तादृशविशिष्टेऽतिव्याप्तिविरहात्, एवं स्वरूपसंम्बन्धरूपावच्छेदकतासंम्बन्धेन प्रतिबन्धकताया व्यापकत्वविवक्षणात् रूपं नीलरूपवदित्यादौ नीलरूपाभाववन्नीलादौच नातिव्याप्तिः तत्र नीलरूपाभाववन्नीलत्वविशिष्टविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकता नीलरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाभाववन्नीलत्वविशिष्टविषयकनिश्चयवैशिष्ट्यावच्छिन्ननीलत्ववद्रूपत्वावच्छिन्नविषयकनिश्चयप्रतिबन्धक-
तैव तत्र नीलरूपाभाववन्नीलत्वविशिष्टघटकनीलत्ववद्रूपत्वविशिष्टविषयितात्वव्यापकत्वस्य सत्त्वा-
त्स्वस्य स्वाऽघटितत्वाभावात्, अत्रायमनुगमः पदार्थविशिष्टपदार्थवत्त्वं हेत्वाभाससामान्यलक्षणम्,
पदार्थवैशिष्ट्यंच स्वतादात्म्य-स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरू-
पितप्रतिबन्धकतात्वव्यापकरूपावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वोभयसंबन्धेन, रूपे प्रतिब-
न्धकतात्वव्यापकत्वं च स्वविशिष्टरूपवत्त्वसंबन्धेन, रूपे स्ववैशिष्ट्यंच स्वावच्छिन्नाविषयकप्रतीतिवि-
षयतावच्छेदकत्व-स्वावच्छिन्नविषयिताऽव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकत्वो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयसंबन्धेन, तादृशरूपवत्त्वंच स्वावच्छिन्नविषयितात्वव्यापकत्वसंबन्धेनेति । नचैवं गगनाभाववद्भाववत्कालीनघटो गगनवानित्यत्र बाधेऽव्याप्तिः गगनाभाववत्तादृशघटत्वात्मकबाधतावच्छेदकरूपे स्वतादात्म्यसत्त्वेपि द्वितीयसंबन्धस्याभावात् तथाहि तादृशबाधविषयिताऽव्यापकप्रकृतानुमितिप्रतिबन्धकता ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतैव तत्रच तादृशघटत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकतदवच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकाऽभाववत्तादृशघटत्वावच्छिन्नाविषयितात्वव्यापकत्वस्य सत्त्वात् स्वस्यच स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकत्वाभावात्, एवं प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षरूपसत्प्रतिपक्षस्य लक्ष्यत्वे तत्राव्याप्तिः तत्र

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताद्दशसत्प्रतिपक्षनिश्चयप्रतिबन्धकतायां ताद्दशसत्प्रतिपक्षघटकप्रतिहेतुव्यापकसाध्याभावविषयितात्व-
व्यापकत्वस्य सत्त्वादिति वाच्यम् । स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतात्वव्यापकरूपावच्छिन्ना-
ऽविषयकप्रतीतिविषयतानवच्छेदकत्व-स्वावच्छिन्नविषयकत्वावच्छिन्नताद्दशप्रतिबन्धकताविशिष्टविषयि-
तानिरूपकतानवच्छेदकत्व-स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदका-
वच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयताऽवच्छेदकधर्मावच्छिन्नविधेयताशाल्यनुमिति-
त्वावच्छिन्नकार्यतानिरूपितकारणताविशिष्टविषयितानिरूपकतानवच्छेदकत्वै-तत्रितयाभाव-स्वतादा-
त्म्योभयसंबन्धेन पदार्थवैशिष्ट्यस्य विवक्षणीयत्वात्, विषयितायं प्रतिबन्धकतावैशिष्ट्यंच स्वविशिष्टवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षयितावदन्यत्व-स्वनिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्वोभयसंबन्धेन, अत्र प्रथमसंबन्धघटकविषयितायां स्ववैशिष्ट्यंच स्वनिरूपितप्रतिबध्यताविविष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रातिबध्यतावच्छेदकत्वसंबन्धेन,तत्संबन्धघटकाविषयितावत्त्वंच स्वव्याप्यत्व-स्वाव्यापकत्वोभयसंबन्धेन विषयितायां कारणतावैशिष्ट्यंच स्वावच्छेदकत्व-स्वविशिष्टविषयितावदन्यत्वोभयसंबन्धेन विषयितायां स्ववैशिष्ट्यंच अवच्छेदकत्वसंबन्धेन विषयितावत्त्वंच स्वव्याप्यत्व-स्वाव्यापकत्वोभयसंबन्धेन, अत्र विषयितायां प्रतिबन्धकतावैशिष्ट्यघटकतया स्वविशिष्टविषयितावदन्यत्वनिवेशात् ह्रदो वह्निमानित्यादौ वह्न्यभाववद्ध्रह्न्यभाववद्ध्रदे नातिव्याप्तिः, अन्यथा तादृ-

Nepal Sanskrit University, Balmandir Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शद्वदत्वे स्वतादात्म्यस्य स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताविशिष्टनि- निश्चयत्वव्यापकह्रदो वह्निमानिति निश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकविषयता- निरूपकतावच्छेदकत्वप्रयुक्तात्रितयाभावस्यच सत्त्वेनातिव्याप्तेः, तन्निवेशेच तादृशप्रतिबन्धकतावि- शिष्टवह्न्यभाववद्ध्रदत्वावच्छिन्नाविषयिताव्याप्यत्वस्य तदव्यापकत्वस्यच सत्त्वेन तादृशविषयितावि- शिष्टान्यत्वाभावात् नातिव्याप्तिः, एवं विषयितायां कारणतावैशिष्ट्यघटकतया तादृशसंबन्धनिवेशात् तत्रैव वह्न्यभावव्याप्यवद्ध्रह्न्यभावव्याप्यवद्ध्रदे नातिव्याप्तिः । नचैवमसाधारण्येऽव्याप्तिः असाधार- ण्यविषयिताव्यापकत्वस्य प्रकृतानुमितिप्रतिबन्धकतायामसत्त्वात् असाधारण्यतावच्छेदकस्य स्वपदे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न धर्तुमशक्यतया तादात्म्यघटितोभयसंबन्धेन कस्यापि पदार्थस्य तादृशदोषतावच्छेदकेऽभावादिति वाच्यम् । द्वितीयसंबन्धघटकप्रतिबन्धकतायां पक्षधर्मिकहेतुमत्ताज्ञानाऽकालीनत्वासाधारण्यविषयिताशालित्वोभयाभाववत्स्वावच्छिन्नविषयिताशालिनिश्चयत्वव्यापकत्वस्य विवक्षणात् तथाच तादृशनिश्चयत्वव्यापकप्रतिबन्धकतात्वव्यापकरूपं वह्निव्यापकीभूताभावप्रतियोगिजलवद्ध्रदत्वं तद्घटकासाधारण्यत्वावच्छिन्नविषयितामात्रे तादृशप्रतिबन्धकतानिरूपितस्वरूपसंबन्धरूपावच्छेदकत्वस्य सत्त्वात् तदवच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकत्वस्य सत्त्वाल्लक्षणसमन्वयः । नचैवमपि अभावो गगनत्ववानाधेयत्वादित्यादौ हेतुमत्पक्षघटितासाधारण्येऽव्याप्तिः तत्र तादृशासाधारण्यविषयित्वा-

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नप्रतिबन्धकतात्वव्यापकत्वस्य तादृशासाधारण्यतावच्छेदके सत्त्वात् तादृशधर्मघटकतदवच्छिन्न-
विषयिताऽव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकाधेयत्ववदभाववत्त्वावच्छिन्नविषयि-
तासामान्ये तादृशप्रतिबन्धकतावच्छेदकत्वस्य सत्त्वात् स्वस्य स्वावच्छिन्नाघटितत्वाभावात् इति वा-
च्यम् । रूपनिष्ठप्रतिबन्धकतात्वव्यापकतावच्छेदकीभूतस्वविशिष्टरूपवत्त्वसबन्धघटकरूपवत्त्वघटकस्वा-
वच्छिन्नविषयितात्वव्यापकत्वरूपसंबन्धघटकविषयितायामसाधारण्यविषयिताभिन्नत्वासाधारण्यविषयक-
त्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वोभयाभावस्य विशेषणत्वाङ्गीकारात् तथाच तादृशप्रतिबन्धकता-
त्वव्यापकं नासाधारण्यतावच्छेदकं तद्घटकतावच्छेदकाधेयत्ववदभावत्वावच्छिन्नविषयितायामुभयाभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाऽभावात्, असाधारण्यतावच्छेदकंतु घटकतावच्छेदकं न भवत्यतो मेयत्वविशिष्टताद्दशासाधारण्यतावच्छेदकमेव ताद्दशामिति तदवच्छिन्नाऽघटितत्वस्य सत्त्वान्नाव्याप्तिरिति चेन्न । निरवच्छिन्नवह्न्यभाववद्ध्रदस्य दोषत्वमतेऽसंभवः ताद्दशबाधनिश्चयप्रतिबन्धकतायां ताद्दशबाधघटकवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितात्वव्यापकत्वसत्त्वात् स्वस्य स्वाऽघटितत्वाभावात्, यदिच तद्दोषवारणाय ताद्दशप्रतिबन्धकतायां स्वघटकविषयिताव्यापकत्वं विवक्षणीयं तन्मते ताद्दशबाधादिज्ञानस्य न निरवच्छिन्नविषयिताशालित्वेन प्रतिबन्धकत्वं किन्तु अव्याप्यवृत्तित्वज्ञानमन्तर्भाव्य विरोधिविषयकत्वेनैव तथाच नासंभवः, इदानीमसाधारण्यविशेषसंग्रहार्थं विषयितायामसाधारण्यविषयिताभिन्नत्वघटितो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयाभावो न निवेशनीयः, किंतु मेयत्वविशिष्टासाधारण्यवारणाय पक्षधर्मिकहेतुमत्ताज्ञानाकालीनत्वासाधारण्यविषयताशालित्वोभयाभाववत्स्वावच्छिन्नविषयिताशालिनिश्चयत्वव्यापकत्वसंबन्धेन तादृशरूपविशिष्टरूपवत्त्वं प्रतिबन्धकतायां निवेशनीयम् तथाच न कश्चिद्दोष इति चेदुच्यते, तदा विशिष्टद्वयाऽघटितत्वं निवेशनीयम् एवं रूपं नीलरूपवदित्यत्र नीलरूपाभाववन्नीलेऽतिव्याप्तिवारणाय तद्विषयिताभेदोपि विवक्षणीय इति भट्टाचार्योक्तैतेन—कल्पापेक्षया गौरवमिति दिक् ॥ श्रीः ॥

स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयिता—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरूपकतावच्छेदकः कश्चित्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यस्य एवंभूतं यत्स्वं मेयत्वविशिष्टव्यभिचारत्वादि तदवच्छिन्नाविषयक-प्रतीतिविषयतावच्छेदकत्वस्य विवक्षणीयतया न दोष इति वाच्यमिति ॥

अत्र प्रतियोगिनि स्वत्वं निविष्टं तथाच स्वं मेयत्वविशिष्टबाधत्वादिकं स्वावच्छिन्न-विषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकः स्वावच्छिन्नाऽविषय-कप्रतीतिविषयतावच्छेदकः कश्चित् शुद्धबाधत्वादिः तदवच्छिन्नाऽघटितत्वस्य बाधादौ सत्त्वा-

Nepal Sanskrit University, Dang. Collection

CC-0. In Public Domain. Digitization by eGangotri

ल्लक्षणसमन्वयः, मेयत्वविशिष्टबाधादावसत्त्वान्नातिव्याप्तिः, एवंच स्वपदेनोक्तव्यभिचारघटितबाधत्वं न धर्तुं शक्यते तदवच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यान्तर्गततादृशबाधप्रतिबन्धकताशुद्धव्यभिचारप्रतिबन्धकतयोरवच्छेदकीभूता यद्धर्मावच्छिन्नविषयिता स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्य तस्याप्रसिद्धेः, किंतु मेयत्वविशिष्टतादृशबाधत्वमेव धर्तव्यमिति तत्र नाव्याप्तिः, अत्र प्रथमं स्वरूपसंबन्धरूपावच्छेदकत्वनिवेशे वह्न्यभाववद्ध्रदादिरूपबाधाद्यसंग्रहः मेयत्वविशिष्टतादृशबाधविषयिताया बाधविषयितात्वेन साध्यवत्ताबुद्धिनिरूपितज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतायां पक्षे हेतुवैशिष्ट्यावगाहिबुद्धिनिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायां चावच्छेदकत्वात् तादृशप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिबन्धकताद्वयानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकस्य तादृशस्याप्रसिद्धेः, उत्तरत्रैव तन्निवेशे व्यभिचारघटितबाधाऽसंग्रहः स्वपदेन व्यभिचारघटितबाधत्वस्य धर्तुं शक्यत्वात्तादृशबाधत्वावच्छिन्न-विषयिताव्यापकप्रतिबन्धकताद्वयेपि तज्ज्ञानीयव्यभिचारविषयिताया अवच्छेदकत्वात् व्यभिचारत्वस्य तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वात् यद्रूपावच्छिन्नविषयितासामान्यं स्वावच्छिन्नविषयक-त्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकमिति विवक्षणेन व्यभिचारविषयितासामान्यान्तर्गतशुद्धव्यभि-चारज्ञानीयतद्विषयितायास्तादृशबाधप्रतिबन्धकतावच्छेदकत्वाभावेन तद्दोषवारणे बाधाद्यसंग्रहः मेयत्व-विशिष्टबाधत्वावच्छिन्नप्रतिबन्धकतायां जातिमान् वह्न्यभाववानिति ज्ञानीयतद्विषयितायास्सामान्यान्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्गताया अवच्छेदकत्वाभावात्, अतः स्वावच्छिन्नविषयिताऽव्यापकविषयिताशून्यज्ञानीययद्रूपावच्छिन्नविषयितासामान्यमवच्छेदकमिति विवक्षणीयम् एवंच मेयत्वविशिष्टव्यभिचारघटितबाधत्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकतासामान्यावच्छेदकस्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकतदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकरूपाप्रसिद्धिः, उभयत्र तन्निवेशे धूमव्यभिचारी वह्निर्धूमवान् वह्नेरित्यत्र मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः तत्र मेयत्वविशिष्टव्यभिचारविषयितासामान्यावच्छिन्ना प्रतिबन्धकताद्वयी एका व्याप्तिग्रहप्रतिबन्धकता अन्या साध्यवत्ताग्रहनिरूपिता मेयत्ववान् धूमाभाववान् मेयत्ववान् धूमव्यभिचारी वह्निरिति ज्ञानविशिष्टज्ञानत्वाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्ना तयोः व्यभिचारविषयितासामान्यस्यावच्छेदकत्वाऽभावात् स्वपदेन मेयत्वविशिष्टव्यभिचारस्य धर्तुमशक्यतयाऽन्यस्यैव तादृशतया तदवच्छिन्नाऽघटितत्वस्य तत्र सत्त्वात्, तथाच पूर्वत्रानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशावश्यकत्वे उत्तरत्रापि तदावश्यकतेति, अत्र स्वावच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतासामान्यानतिरिक्तवृत्तिविषयितायां स्वपदग्राह्यधर्मावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वमपि विवक्षणीयम् अन्यथा सर्वं गगनवदित्यत्र गगनाभाववद्घटत्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकतासामान्यानतिरिक्तवृत्तिगगनाभाववत्पटत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञा–

१ किंतु मेयत्वविशिष्टयद्धूमाभाववद्वृत्तित्वं तद्वह्नित्वादिकमेव ।

नीयविषयितानिरूपकतावच्छेदकताद्दशघटत्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकगगनाभाववत्प-
टत्वप्रसिद्धया तत्राव्याप्तेः, यद्रूपावच्छिन्नविषयित्वाऽव्यापकाविषयिताशून्यत्वमपि निवेशनीयम्
अन्यथा ह्रदो वह्निमानित्यत्र जातिमद्वह्न्यभाववद्ध्रदेऽतिव्याप्तेः। नन्वत्र यद्विशिष्टान्तरं तद्भिन्नत्वमेव

---

१ एवं निवेशे पर्वतो वह्न्यभाववान् धूमाभावादित्यत्र वह्निधूमवत्पर्वतस्वरूपासिद्धिबाधानात्मकेतिव्याप्तिः स्वपदेन ताद्दशविक्षिष्टरूपस्य धर्तुमशक्यतया मेयत्वविशिष्टताद्दशविशिष्टपर्वतत्वस्यैव धर्तव्यतया तदघटितत्वस्योक्तविशिष्टे सत्त्वात् तदनिवेशेतु ताद्दशपर्वतत्वं स्वपदग्राह्यं भवति धूमवत्पर्वतकालीनवह्निमत्पर्वतस्यैव विशिष्टान्तरस्य प्रसिद्धेः सर्वं गगनवत् इत्यादौ गगनाभाववद्घटादावव्याप्तिस्तु एतत्कल्पे व्यभिचारघटितबाध इव दुर्वारेति।

CC-0. In Public Domain. Digitization by eGangotri

निवेश्यताम् किं तदघटितत्वनिवेशनेन। नच व्यभिचारादौ मेयत्वविशिष्टव्यभिचारादिभेदाभावादसं-
भव इति वाच्यम् । स्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताकविषयिताव्यापकप्र-
तिबन्धकतासामान्यानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदक-
तादृशविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदककं यत्स्वं तद्भिन्नप्र-
कृतानुमितिप्रतिबन्धकतावच्छेदकविषयितानिरूपकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदक-
धर्मविशिष्टवत्त्वस्य विवक्षणीयतयाऽदोषात्, एवंच मेयत्वविशिष्टव्यभिचारत्वघटकसमुदायगतसमुदायत्वं
स्वपदग्राह्यं तद्भिन्नंच शुद्धव्यभिचारत्वगतसमुदायत्वमिति लक्षणसमन्वयः, मेयत्वविशिष्टव्यभिचारादौच

CC-0. In Public Domain. Digitization by eGangotri

नातिव्याप्तिः एवंच व्यभिचारघटितबाधेच नाव्याप्तिः धूमव्यभिचारिवह्निमत्त्वगतसमुदायत्वस्य शुद्धव्यभिचारत्वगतसमुदायत्वात्मकताद्दशरूपान्तरकत्वेपि तद्भेदस्य व्यभिचारघटितबाधत्वगतसमुदायत्वे सत्त्वेन भट्टाचार्योक्तरीत्या दोषाभावात् इति चेन्न। व्यभिचारविशिष्टबाधेऽतिव्याप्त्यापत्तेः तत्र हि व्यभिचारविशिष्टबाधत्वगतसमुदायत्वं न स्वपदेन धर्तुं शक्यते ताद्दशबाधत्वावच्छिन्नविषयिताव्यापकप्रातिबन्धकतासामान्यावच्छेदकतद्विषयित्वाऽव्यापकाविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकतदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकरूपाप्रसिद्धेः व्यभिचारवैशिष्ट्यगतसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकनिरूपकतावच्छेदकविषयिताव्यापकप्रातिबन्धकतासामान्यावच्छेदकताद्दशविषयिताऽव्यापकविषयिताशून्य–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानीयविषयितानिरूपकतावच्छेदकतापर्याप्त्यवच्छेदकताद्दशविषयिताशून्यज्ञानविषयितानिरूपकताव-
च्छेदकतापर्याप्त्यनुयोगितावच्छेदकव्यभिचारत्वगतसमुदायत्वप्रसिद्धावपि तद्भेदस्य व्यभिचारविशिष्ट-
बाधत्वगतसमुदायत्वे सत्त्वात्, तदघटितत्वनिवेशे नायं दोषः अधिकवारकपर्याप्त्यनिवेशेन ताद्दशव्य-
भिचारवैशिष्टचगतसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकनिरूपकतावच्छेदकताकविषयिताशून्यत्वस्य
व्यभिचारविशिष्टबाधज्ञानेऽसत्त्वात्। एतेन ननु स्वावच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतासामान्या-
वच्छेदकस्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकस्वावच्छिन्नाऽ-
विषयकप्रतीतिविषयतावच्छेदकयत्किंचिद्रूपकं यत्स्वं तदवच्छिन्नविषयितावत्त्व-तदवच्छिन्नविषयित्वाऽ-

CC-0. In Public Domain. Digitization by eGangotri

व्यापकविषयिताशून्यत्वोभयाभाववद्यद्रूपावच्छिन्नविषयिताशालिनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकता तद्रूपवत्त्वं विवक्ष्यताम्, व्यभिचारादिदोषनिश्चये स्वपदग्राह्यमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयित्वाभावादुभयाभावोस्तीति दोषे लक्षणसमन्वयः, मेयत्वविशिष्टव्यभिचारनिश्चये चोभयसत्त्वान्नातिव्याप्तिः, व्यभिचारघटितबाधेच नाव्याप्तिः तत्र धूमव्यभिचारिवह्निमत्त्वस्य स्वपदेन धर्तुं शक्यत्वेपि तादृशबाधनिश्चये तदवच्छिन्नविषयित्वाऽव्यापकधूमाभाववद्धूमव्यभिचारिवह्निमत्त्वावच्छिन्नविषयितायाः सत्त्वेनोभयाभावसत्त्वात्। नचैवं मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः मेयत्वविशिष्टव्यभिचार–घटोभयविषयकसमूहालम्बने तदवच्छिन्नविषयित्वाऽव्यापकघटत्वावच्छिन्नविषयितासत्त्वेनोभयाभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसत्त्वादिति वाच्यम्। तदुभयाभाववत्स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकत्वस्य लक्ष्यतावच्छेदके विवक्षणीयत्वात्, स्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यत्वं वा निश्चयविशेषणमित्यपि परास्तम् व्यभिचारविशिष्टबाधेऽतिव्याप्तेः तत्र विशिष्टबाधत्वस्य स्वपदेन धर्तुमशक्यत्वात्, व्यभिचारवैशिष्ट्यस्य स्वपदेन धर्तुं शक्यत्वेपि तदवच्छिन्नविषयित्वाऽव्यापकबाधविषयितायास्तत्र सत्त्वेनोभयाभावसत्त्वात्। यत्तु यद्रूपावच्छिन्नानुयोगिताकपर्याप्तिकनिरूपकतावच्छेदकताकविषयिताव्यापकप्रतिबन्धकतासामान्यानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकतापर्याप्त्यनु-

CC-0. In Public Domain. Digitization by eGangotri

योगितावच्छेदकं यत्तादृशं समुदायत्वं तद्वृत्तिविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकत्वं लक्ष्यतावच्छेदके निवेशनीयमिति, तदपि न उक्तदोषात् ॥ श्रीः ॥

तथा सति धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादौ बाधत्वावच्छिन्नघटकतावच्छेदकधूमव्यभिचारिवह्निमत्त्वादेः स्वावच्छिन्नाऽविषयकप्रतीति विषयतावच्छेदकीभूतस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकव्यभिचारत्वकत्वादव्याप्तेर्दुर्वारत्वादिति ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वत्र पक्षे हेतुमत्ताज्ञानाऽकालीनत्वा–ऽसाधारण्यविषयितावत्त्वोभयाभाववत्स्वावच्छिन्नविषयिताव्यापिका यावत्यः प्रतिबन्धकतास्तत्प्रत्येकप्रतिबन्धकतायां स्वघटकीभूतयत्किञ्चिद्रूपावच्छिन्नाऽसाधारण्यविषयिताभिन्नत्वा–ऽसाधारण्यविषयकत्वाऽवच्छिन्नप्रतिबन्धकताऽवच्छेदकत्वोभयाऽभाववद्विषयितात्वव्यापकस्वरूपसम्बन्धरूपावच्छेदकताकत्वमस्ति, एवं भूतं यत्स्वं तदवच्छिन्नविषयितावत्त्व–तदवच्छिन्नविषयिताऽव्यापकविषयिताशून्यत्वोभयाभाववती या प्रतीतिः स्वावच्छिन्नविषयित्वाव्यापकाविषयिताशून्यतदीयविषयितानिरूपकतावच्छेदकत्वं लक्ष्यतावच्छेदके निवेशनीयं तथाच मेयत्वविशिष्टव्यभिचारादौ नातिव्याप्तिः, स्वपदग्राह्यं मेयत्वविशिष्टव्यभिचारत्वं तद्घटकीभूतशूद्धव्यभिचारत्वावच्छि-

CC-0. In Public Domain. Digitization by eGangotri

न्ना या निरुक्तोभयाभाववती विषयिता तत्त्वव्यापकावच्छेदकताकत्वस्य व्याप्तिज्ञानप्रतिबन्धकतायां सत्त्वात्, तदवच्छिन्नविषयितावत्त्वघटितोभयाभावस्य च मेयत्वविशिष्टव्यभिचारविषयकप्रतीतौ तद्विषयिताऽव्यापकविषयिताशून्यायामभावात् तदवच्छिन्नविषयित्वाभावादेवोभयाभाववती शुद्धव्यभिचारविषयकप्रतीतिरिति लक्षणसमन्वयः, एवं व्यभिचारविशिष्टबाधेच नातिव्याप्तिः तादृशबाधत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकताव्यभिचारज्ञानप्रतिबन्धकता बाधनिश्चयप्रतिबन्धकता च तत्तत्प्रतिबन्धकताव्यक्तौ तादृशबाधत्वघटकीभूतव्यभिचारत्वबाधत्वरूपयत्किंचिद्रूपावच्छिन्नविषयितात्वव्यापकावच्छेदकताकत्वस्य सत्त्वात् स्वपदेन व्यभिचारविशिष्टबाधत्वस्य धर्तुं शक्यत्वात्, एवं व्यभिचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रघटितबाधे च नाव्याप्तिः तत्र धूमव्याभिचारिवह्निमत्त्वस्य स्वपदेन धर्तुं शक्यत्वेपि तदवच्छिन्नवि-
षयित्वाऽव्यापकधूमाभाववद्धूमव्याभिचारिवह्निमत्त्वावच्छिन्नविषयितायाः सत्त्वेनाऽव्यापकविषयिताशून्य-
त्वाभावप्रयुक्तोभयाभावस्य तादृशबाधनिश्चये सत्त्वात्, स्वावच्छिन्नविषयकानिश्चये पक्षधर्मिकहेतुम-
त्ताज्ञानाऽकालीनत्वघटितोभयाभावानिवेशादसाधारण्यसंग्रहः स्वघटकीभूतयत्किञ्चिद्रूपावच्छिन्नविषयि-
तायामसाधारण्यविषयिताभिन्नत्वघटितोभयाभावस्य निवेशादसाधारण्याविशेषसंग्रहः स्वावच्छिन्नविषयि-
तावत्त्वघटितोभयाभाववत्प्रतीतौ स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यत्वनिवेशात् मेयत्वविशि-
ष्टव्यभिचारोदासीनविषयकसमूहालम्बनमादाय न तत्रातिव्याप्तिः, अत्रापि सर्वं गगनवदित्यत्र गग-

नाभाववद्घटपटादिसंग्रहाय स्वघटकीभूतकिंचिद्रूपावच्छिन्नविषयितायां स्वावच्छिन्नविषयिताऽव्यापकवि-
षयिताशून्यज्ञानीयत्वं ह्रदो वह्निमानित्यादौ जातिमद्ध्रह्न्यभाववद्ध्रदेऽतिव्याप्तिवारणाय यद्रूपावच्छिन्न-
विषयिताऽव्यापकविषयिताशून्यज्ञानीयत्वं च निवेशनीयम्, एवं चेदानीं विशिष्टद्वयाऽघटितत्वं न नि-
वेशनीयं वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वघटकीभूतवह्न्यभाववज्जलवत्त्वावच्छिन्नविषयितायां तादृश-
विषयिताव्यापकज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकतासत्त्वात्, एवं रूपं नीलरूपवदित्यादौ
नीलरूपाभाववन्नीले च नातिव्याप्तिः, अत्रायमनुगमः पदार्थविशिष्टपदार्थवदन्यप्रतीतिविशिष्टरूपवत्त्वं
लक्षणम्, पदार्थे पदार्थवैशिष्ट्यं च स्वतादात्म्यस्वावच्छिन्नविषयिताशालिपक्षधर्मिकहेतुमत्ताज्ञाना-

CC-0. In Public Domain. Digitization by eGangotri

कालीनत्वा-ऽसाधारण्यविषयितावत्त्वोभयाभाववन्निश्चयत्त्वव्यापकप्रतिबन्धकतात्वव्यापकत्वोभयसम्बन्धेन, व्यापकत्वं च स्वविशिष्टरूपवत्त्वसम्बन्धेन, रूपे स्ववैशिष्ट्यं च स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकत्व--स्वावच्छिन्नविषयिताऽव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकत्वोभयसम्बन्धेन, रूपवत्त्वं चाऽसाधारण्यविषयिताभिन्नत्वा--ऽसाधारण्यविषयकत्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वोभयाभाववत्स्वविशिष्टविषयितात्वव्यापकावच्छेदकताकत्वसम्बन्धेन, विषयितायां स्ववैशिष्ट्यंच स्वावच्छिन्नत्व--स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वोभयसम्बन्धेन, निरवच्छिन्नसाध्याभाववत्पक्षस्य लक्ष्यत्वमते पक्षधर्मिकहेतुमत्ताज्ञानाकालीनत्वघटितोभयाभाववत्स्वावच्छिन्नाविषयि-

ताशालिनिश्चयत्वव्यापकत्वसम्बन्धेन, प्रतीतिर्विशेषणतापन्नभेदप्रतियोगिनि धर्मवत्त्वं च स्वावच्छिन्नवि-
षयितावत्त्व-स्वावच्छिन्नविषयिताऽव्यापकाविषयिताशून्यत्वोभयसम्बन्धेन, रूपे प्रतीतिवैशिष्ट्यं च स्ववृत्ति-
विषयितानिरूपकतावच्छेदकत्व–स्ववृत्तिकिञ्चिद्रूपावच्छिन्नविषयित्वाव्यापकविषयिता नास्तीति प्रती-
तिसिद्धाऽभावप्रतियोगितानिरूपितावच्छेद[1]कतानिरूपितावच्छेदक[2]तानिरूपितावच्छेदक[3]तानिरूपिताऽव-
च्छेदक[4]तानिरूपितावच्छेदक[5]तावानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावत्त्वोभयसम्बन्धेन, ग-
गनाभाववद्भाववत्कालीनघटो गगनवानित्यत्र गगनाभाववत्तादृशघटस्य लक्ष्यत्वे तादृशप्रतीतिमद्-
न्यत्व–प्रकृतानुमितिप्रतिबन्धकताविशिष्टविषयितानवच्छेदकत्व-विरोध्यनुमितिजनकताविशिष्टविषयिता-

CC-0. In Public Domain. Digitization by eGangotri

नवच्छेदकत्वैतत्त्रितयाभाववत्त्वं लक्ष्यतावच्छेदके विवक्षणीयम्, विषयितायां प्रतिबन्धकतावैशिष्ट्यंच स्वावच्छेदकत्व--स्वविशिष्टविषयितावदन्यत्वोभयसम्बन्धेन, विषयितायां स्ववैशिष्ट्यंच स्वानतिरिक्त-वृत्तित्व-स्वनिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्वो-भयसम्बन्धेन विषयितायां जनकतावैशिष्ट्यं च प्रागुक्तरीत्या ज्ञेयमिति दिक् ॥ श्रीः ॥

नच स्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकी-भूतयत्किञ्चिद्विषयित्वं यादृशयादृशधर्मावच्छिन्नानिरूपितं तादृश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशधर्मावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तद्रूपा-
वच्छिन्नत्वमेव समुदितलक्षणार्थं इति ॥ ॥

स्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकतासामान्यानतिरिक्तवृत्तिविषयितात्वसामानाधिकरण्येन यद्य-
द्रूपावच्छिन्नाऽनिरूपितत्वं तत्तद्रूपावच्छिन्नाऽघटितत्वं समुदायार्थः, अत्रोभयत्र स्वरूपसंबन्धरूपा-
वच्छेदकत्वनिवेशे पर्वतो वह्निमानित्यत्र पाषाणमयत्वविशिष्टपर्वतेऽतिव्याप्तिः पाषाणमयत्वविशिष्टपर्वत-
त्वावच्छिन्नविषयित्वावच्छिन्नज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकविषयितायां घटत्वाद्यवच्छिन्ना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽनिरूपितत्वसत्त्वात् तदवच्छिन्नाऽघटितत्वस्य तत्र सत्त्वात्, प्रथमत एव तन्निवेशे ह्रदो वह्निमानित्यादौ वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यान्तर्गता या बाधनिश्चयप्रतिबन्धकता याच पक्षे हेतुमत्ताज्ञाननिरूपिता ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकता तदुभयानतिरिक्तवृत्तिविषयित्वाप्रसिद्धिः, उत्तरत्रैव तन्निवेशे व्यभिचारघटितबाधाऽसंग्रहः तादृशबाधत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यान्तर्गता बाधनिश्चयप्रतिबन्धकता व्यभिचारनिश्चयप्रतिबन्धकता च तदुभयावच्छेदकविषयित्वाऽप्रसिद्धेः, यद्यपि व्यभिचारघटितबाधज्ञानीयव्यभिचारविषयितायास्तदुभयावच्छेदकत्वमस्ति बाधप्रतिबन्धकतायामपि धर्मितावच्छेदकतया तद्विषयिताया अवच्छेदकत्वात् तथापि सर्वं गगनवदि-

Nepal Sanskrit University

CC-0. In Public Domain. Digitization by eGangotri

त्यत्र गगनाभाववद्घटपटादिरूपबाधसंग्रहार्थं तादृशविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वस्य ह्रदो वह्निमानित्यत्र जातिमद्ध्रदत्वाभाववद्ध्रदवारणाय यद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वस्य च विवक्षणीयतया व्यभिचारत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यशुद्धव्यभिचारविषयकज्ञानीयव्यभिचारविषयितायास्तदुभयावच्छेदकत्वं न संभवतीत्यप्रसिद्धिः, तथाच स्वावच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतानिष्ठाऽभावप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकैकत्ववदुभयाऽवृत्तिधर्मवान् यो यत्किंचिद्रूपावच्छिन्नविषयित्वाव्यापकविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धोऽभावस्तन्निरूपितप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तियोगितानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपि-
तावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नाऽवच्छेदकतावद्धर्मावच्छिन्नस्वाव-
च्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयविषयितानिष्ठो यः किंचिद्रूपावच्छिन्ननिरूपकताकनिरू-
पितत्वं नास्तीति प्रतीतिसिद्धोऽभावस्तन्निरूपितनिरूपितत्वनिष्ठप्रतियोगितानिरूपितनिरूपकतानि-
ष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावद्धर्मावच्छिन्नाऽविषयकप्रतीतिविषयताव-
च्छेदकधर्मवत्त्वं लक्षणार्थः, अत्रायमनुगमः पदार्थविशिष्टपदार्थवत्त्वं लक्षणम्, पदार्थे पदार्थवैशिष्ट्यं
च स्वतादात्म्य-स्वविशिष्टविषयितानिष्ठकिंचिद्रूपावच्छिन्ननिरूपकतानिरूपितत्वं नास्तीति प्रतीतिसि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्धाभावनिरूपितप्रतियोगितानिरूपितावच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावद्धर्माव-
च्छिन्नविषयिताशून्यज्ञानीयविषयतानिरूपकतावच्छेदकत्वोभयसंबन्धेन, विषयितायां स्ववैशिष्टचंच स्वा-
वच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्व-स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यपक्षध-
र्मिकहेतुमत्ताज्ञानाकालीनत्वासाधारण्यविषयितावत्त्वोभयाभाववत्स्वावच्छिन्नविषयकनिश्चयत्वव्यापकप्र-
तिबन्धकतावृत्त्यभावप्रतियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेदकैकत्ववदुभयाऽवृत्ति-
धर्मवद्यत्किंचिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्ययत्किंचिद्रूपावच्छिन्नविषयिताशालिनिश्चय-
निष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितानिरूपितावच्छेदकतानि-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छिन्नत्व-संबन्धावच्छिन्नावच्छेदकतावद्धर्मावच्छिन्नत्वोभयसंबन्धेन, तद्व्यक्तित्ववानभावश्चाऽसाधारण्यविषयिताशालित्वपक्षधर्मिकहेतुमत्ताज्ञानाकालीनत्वोभयाभाववत्किंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धो ग्राह्य[1]स्तेन मेयत्वविशिष्टाऽसाधारण्ये नातिव्याप्तिरिति ॥श्रीः॥

---

१ एतादृशाभावानुपादाने असाधारण्ये लक्षणसमन्वय एव न संभवति वह्निव्यापकीभूताभावप्रतियोगिजलत्वावच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतानिष्ठाभावप्रतियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेद—केकत्ववदुभयावृत्तिधर्मवानभावः वह्निव्यापकीभूताभावप्रतियोगिजलवद्ध्रदत्वावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वत्रापि स्वावच्छिन्नविषयकत्वव्यापिका यावत्यः प्रकृतानुमितिप्रतिबन्धकतास्तत्प्रत्येकावच्छेद-
कतायां यादृशघटकयत्किंचिद्धर्मावच्छिन्नविषयितात्वव्यापकत्वमस्ति तादृशविषयितायां यद्यद्रूपाव-
च्छिन्नाऽनिरूपितत्वमस्ति तत्तद्रूपावच्छिन्नाऽघटितं यत्स्वावच्छिन्नं तद्रूपावच्छिन्नत्वं समुदितार्थः ह्रदो

योगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्ध एव तन्निरूपितप्रतियोगितानिरूपितपरम्परयाऽवच्छिन्नत्वसम्बन्धावच्छिन्नावच्छे-
दकतावान्धर्मस्तादृशह्रदत्वमेव तदवच्छिन्नत्वस्यासाधारण्यविषयतायामभावात् तथाच मेयत्वविशिष्टासाधारण्ये कथ-
मतिव्याप्त्यभिधानम् अत्र विषयितायां स्ववैशिष्ट्यं स्वावच्छिन्नविषयिताभिन्नत्वघटितैतदुभयाभाववत्त्वैतदुभयाभाव-
वत्त्वसम्बन्धेन यदि विवक्ष्यते तदासाधारण्ये लक्षणसमन्वयो भवत्येव मेयत्वविशिष्टेऽसाधारण्येऽतिव्याप्तिश्चेति ध्येयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वह्निमानित्यादौ वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वव्यापिका बोधप्रतिबन्धकता तदवच्छेदकतायां मेयत्वविशिष्टबाधघटकबाधत्वात्मकयत्किंचिद्धर्मावच्छिन्नविषयितात्वव्यापकत्वमस्ति तद्रूपावच्छिन्नविषयितायां मेयत्वविशिष्टबाधत्व–घटत्वाद्यवच्छिन्नानिरूपितत्वमस्ति तत्तद्रूपावच्छिन्नाऽघटितत्वं बाधेऽस्तीति लक्षणसमन्वयः, एवं मेयत्वविशिष्टव्यभिचारादौ नातिव्याप्तिः ताद्दशव्यभिचारत्वावच्छिन्नविषयिताव्यापकव्याप्तिज्ञानप्रतिबन्धकतायां मेयत्वविशिष्टव्यभिचारघटकशुद्धव्यभिचारत्वावाच्छिन्नाविषयितात्वव्यापकत्वस्य सत्त्वेन तत्र च विषयितायां मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाऽनिरूपितत्वस्य सत्त्वात् तदवच्छिन्नाऽघटितत्वस्य च स्वावच्छिन्नेऽभावात्, एवं बाधविशिष्टव्यभिचारे च नातिव्याप्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताद्दशव्यभिचारत्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकतयोः प्रत्येकमवच्छेदकतायां बाधविशिष्टव्यभिचारघटकबाधत्वावच्छिन्नविषयितात्वव्यापकत्वस्य व्यभिचारत्वावच्छिन्नविषयितात्वव्यापकत्वस्य च सत्त्वात् स्वस्यच स्वाऽघटितत्वाभावात्, अत्र स्वरूपसंबन्धरूपप्रातिबन्धकतावच्छेदकतायां याद्दशविशिष्टघटकविषयितात्वव्यापकत्वस्य विवक्षणात् वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वावच्छिन्नविषयिताव्यापकज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकतायां ताद्दशविशिष्टघटकजलवद्ध्रदादिविषयितात्वव्यापकत्वस्य सत्त्वात् तस्य च तदवच्छिन्नाऽघटितत्वाऽभावात् ताद्दशविशिष्टे नातिव्याप्तिः अतो विशिष्टद्वयाघटितत्वं न निवेशनीयम्, एवं नीलरूपाभाववन्नीलादौ नातिव्याप्तिरतोत्र तत्तद्विषयिताभेदोपि न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेशनीयः, अत्रायमनुगमः पदार्थविशिष्टपदार्थवत्त्वं हेत्वाभाससामान्यलक्षणं, पदार्थे पदार्थवैशिष्ट्यं च स्वतादात्म्य-स्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकतात्वव्यापकधर्मविशिष्टधर्मावच्छिन्नाऽविषयकप्रतीतिविषयितानिरूपकतावच्छेदकत्वोभयसंबन्धेन, धर्मे प्रतिबन्धकतात्वव्यापकत्वं च स्वविशिष्टरूपवत्त्वसंबन्धेन, रूपे स्ववैशिष्ट्यं च स्वावच्छिन्नाविषयकप्रतीतिविषयितावच्छेदकत्व-स्वावच्छिन्नविषयिताऽव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकत्वोभयसंबन्धेन, रूपवत्त्वं च स्वविशिष्टविषयितात्वव्यापकावच्छेदकताकत्वसंबन्धेन, विषयितायां स्ववैशिष्ट्यं च स्वावच्छिन्नत्व-स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वोभयसंबन्धेन, धर्मे धर्मवैशिष्ट्यं च स्वविशिष्ट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपावच्छिन्नविषयितानिष्ठकिंचिद्रूपावच्छिन्ननिरूपकताकानिरूपितत्वं नास्तीति प्रतीतिसिद्धाभावनिरूपितप्रतियोगितानिरूपितावच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकत्वसंबन्धेन, रूपे स्ववैशिष्ट्यं च प्रागुक्तोभयघटकद्वितीयसंबन्धेन, अन्यत्सर्वं प्रागुक्तरीत्या बोध्यम्, यद्वा तादृशप्रतिबन्धकतावच्छेदकतायां यादृशयादृशधर्मावच्छिन्नविषयितात्वव्यापकत्वमस्ति तादृशतादृशयत्किंचिद्धर्मा-

---

१ अत्र मेयत्वविशिष्टबाधत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकत्वावच्छेदकवह्नित्वाद्यवच्छिन्नविषयितायां स्वावच्छिन्नानिरूपितत्वसत्त्वाद्दोषवारणाय प्रागुक्तद्वितीयसम्बन्धः स्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकस्वावच्छिन्नविषयितासामान्यकत्वरूपस्तदुभयसम्बन्धेन धर्मवैशिष्ट्यं रूपे बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नविषयितायां यद्यद्रूपावच्छिन्नानिरूपितत्वमस्ति तत्तद्रूपावच्छिन्नाऽघटितत्वं समुदितार्थः, तथा-च पदार्थविशिष्टपदार्थवत्त्वं लक्षणम्, पदार्थवैशिष्ट्यं च स्वतादात्म्य-स्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकतात्वव्यापकरूपावच्छिन्नाऽघटितत्वोभयसंबन्धेन, रूपे प्रतिबन्धकतात्वव्यापकत्वं च स्वविशिष्टरूपवत्त्वसंबन्धेन, रूपे स्ववैशिष्ट्यं च स्वावच्छिन्नाऽनिरूपितविषयितावच्छेदकत्व-स्वावच्छिन्नविषयि-

१ स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितावृत्तिर्यो योऽभावः तत्तदभावकूटवती यद्रूपावच्छिन्नविषयता तद्रूपावच्छिन्नत्वमिति समुदितोर्थः, कूटत्वस्यापि तादृशविषयतावृत्त्यभावत्वावच्छिन्नानुयोगि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वाऽव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकत्वोभयसंबन्धेन, रूपवत्त्वं च स्वाव- विवेचना.
च्छिन्नविषयितात्वव्यापकावच्छेदकताकत्वसंबन्धेनेति चेन्न। प्रागुक्तरीत्या वक्ष्यमाणेनैतेन–कल्पापेक्षया गौरवस्य दुष्परिहरत्वात् ॥ श्रीः ॥

ताकपर्याप्तिकप्रतियोगित्वेन निवेशः, अत्राधिकरणभेदेनाभावभेदे लक्षणसमन्वयो न संभवति तादृशप्रतिबन्धकतासामान्यावच्छेदकविषयितायां यद्यद्रूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकत्वाभावः तत्तद्रूपभिन्नं यद्रूपं तद्रूपविशिष्टत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतेन स्वावच्छिन्ननिरूपितविषयित्वावच्छिन्नयत्किञ्चित्प्रतिबन्धकतावच्छेदकविषयिताकविशिष्टनिरूपितविषयितात्वव्यापकस्वावच्छिन्ननिरूप्यताकधर्मवत्त्वं समुदितलक्षणार्थं इति ॥ ॥

अत्रोभयत्र स्वरूपसम्बन्धरूपाऽवच्छेदकत्वनिवेशे कपिसंयोग्येतत्त्वादित्यादौ कपिसंयोगाभाववद्वृक्षेतिव्याप्तिः कपिसंयोगाभाववद्वृक्षत्वावच्छिन्नविषयितानिष्ठस्वरूपसम्बन्धरूपावच्छेदकतानिरूपकसाध्यवत्ताबुद्धिप्रतिबन्धकतात्मकयत्किंचित्प्रतिबन्धकतानिरूपितताहशावच्छेदकतावत्तदवच्छिन्नविषयितात्व—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्यापकत्वस्य तदवच्छिन्ननिरूप्यतायां सत्त्वात्, उत्तरत्राऽनतिरिक्तवृत्तित्वानिवेशे तादृशप्रतिबन्धकताशू-
न्याऽव्याप्यवृत्तित्वज्ञानकालीनानाहार्य्यत्वादिविशिष्टकपिसंयोगाभाववद्वृक्षविषयकनिश्चये तदवच्छिन्नवि-
षयितासत्त्वेनातिव्याप्तिवारणेऽपि वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदत्वावच्छिन्नविषयित्वावच्छिन्नयत्कि-
ञ्चित्प्रतिबन्धकतानतिरिक्तवृत्तिविषयिता तादृशजलवद्ध्रदविषयितैवेति तत्त्वव्यापकत्वस्य तादृशजलव-
द्ध्रदत्वावच्छिन्ननिरूप्यतायां सत्त्वेन तत्रातिव्याप्तिवारणार्थं विशिष्टद्वयाऽघटितत्वमपि निवेशनीयं, प्रथम
एवानतिरिक्तवृत्तित्वरूपाऽवच्छेदकत्वनिवेशे तु कपिसंयोगाभाववद्वृक्षे नातिव्याप्तिः अव्याप्यवृत्तित्वभ्र-
मानास्कन्दितानाहार्य्यत्वादिविशिष्टनिश्चयीयतद्विषयिताव्यापकत्वस्य प्रतिबन्धकतायामसत्त्वात्, एवं

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टद्वयाघटितत्वमपि न निवेशनीयम् वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ह्रदत्वावच्छिन्नविषयिताव्यापिका ज्ञानवैशिष्ट्यावच्छिन्ना या यत्किञ्चित्प्रतिबन्धकता तन्निरूपितस्वरूपसम्बन्धरूपावच्छेदकतावद्विषयितात्वस्य वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयितायामपि सत्त्वेन तत्र तादृशजलवद्ह्रदत्वावच्छिन्ननिरूप्यताविरहेणातिव्याप्तिविरहात्, एवं च पूर्वमनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वमुतरत्र स्वरूपसम्बन्धरूपमिति विवेकः, अत्र प्रथमं स्वावच्छिन्नविषयितायां स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यानाहार्य्याप्रामाण्यज्ञानाऽव्याप्यवृत्तित्वभ्रमानास्कन्दितनिश्चयीयत्वं निवेशनीयम् अन्यथा पूर्वोक्तदोपात्, एवं यत्किञ्चित्प्रतिबन्धकतावच्छेदकविषयितायामपि स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्वं निवेशनीयम् अन्यथा सर्वं गगनवदित्यत्र गगनाभाववद्धटत्वावच्छिन्नविषयिताव्यापकयत्किञ्चित्प्रतिबन्धकतावच्छेदकगगनाभाववत्पटत्वावच्छिन्नविषयितायां तादृशघटत्वावच्छिन्ननिरूप्यताविरहेणाव्याप्त्यापत्तेः । नचैवमपि स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेपि सामान्यपदस्यावश्यकतया ह्रदो वह्निमानित्यत्र जातिमद्वह्न्यभाववद्ध्रदेतिव्याप्तिः तत्र जातिमद्वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताव्यापकयत्किञ्चित्प्रतिबन्धकता साध्यवत्ताबुद्धिप्रतिबन्धकतैव तदवच्छेदकत्वं च तदवच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितासामान्ये नास्ति तत्सामान्यान्तर्गतजातिमान्वह्न्यभाववानिति ज्ञानीयविषयितायां तदभावात्, किन्तु तादृशविशिष्टविषयितायामेव तत्त्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यापकत्वस्य तादृशविशिष्टनिरूप्यतायां सत्त्वादिति वाच्यम् । द्वितीयविशिष्टविषयितायां यद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वस्यापि विवक्षणात्, एवं च तादृशयत्किञ्चित्प्रतिबन्धकतावच्छेदकत्वस्य जातिमद्वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयजातिमान्वह्न्यभाववानिति ज्ञानव्यावृत्तवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितासामान्ये सत्त्वेन तत्रच जातिमद्वह्न्यभाववद्ध्रदत्वावच्छिन्ननिरूप्यत्वाऽभावेन नातिव्याप्तिः तथाच स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्याऽनाहार्याऽप्रामाण्यज्ञानाऽनास्कन्दिताऽव्याप्यवृत्तित्वभ्रमाऽनास्कन्दितनिश्चयीयस्वावच्छिन्नविषयिताव्यापकप्रकृतानुमि–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तित्वव्यापकप्रतिबध्यतानिरूपितयत्किञ्चित्प्रतिबन्धकतानिरूपितस्वरूपसंबन्धरूपावच्छेदकतावत्स्वाव-
च्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीययद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयवि-
षयितात्वव्यापकस्वावच्छिन्ननिरूप्यताकधर्मवत्त्वं लक्षणं पर्य्यवसितम् । नचात्राऽसाधारण्येऽव्याप्तिरसा-
धारण्यविषयिताव्यापकप्रतिबन्धकताऽप्रसिद्धेरिति वाच्यम् । अनाहार्य्यत्वादिविशिष्टपक्षधर्म्मिकहेतुमत्ता-
ज्ञानाकालीनत्वा-ऽसाधारण्याविषयकत्वोभयाभाववत्स्वावच्छिन्नविषयकनिश्चयत्वव्यापकत्वस्य प्रतिबन्ध-
कतायां विवक्षणीयत्वात् । नचैवमपि अभावो गगनत्ववानाधेयत्वादित्यत्रासाधारण्येऽव्याप्तिः अना-
हार्य्यत्वादिविशिष्टनिरुक्तोभयाभाववत्ताहृशाऽसाधारण्यविषयिताकनिश्चयत्वव्यापकयत्किंचित्प्रतिबन्धक-

CC-0. In Public Domain. Digitization by eGangotri

तानिरूपितस्वरूपसंबन्धरूपाऽवच्छेदकतावति तादृशासाधारण्यविषयित्वाऽव्यापकविषयिताशून्यस्वाऽवच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयाऽधेयत्ववदभावत्वाऽवच्छिन्ननिरूपितहेतुमत्पक्षाविषयत्वे तादृशाऽसाधारण्यत्वावच्छिन्ननिरूप्यत्वाऽभावात् । नच तादृशयत्किंचित्प्रतिबन्धकतासाक्षान्निरूपितावच्छेदकतावद्विषयितायामेव तन्निरूप्यत्वं विवक्षितं हेतुमत्पक्षाविषयिता च न तादृशीति वक्तव्यम् ह्रदो जलवद्ध्रदकालीनवह्निमान्पङ्कजादित्यत्र जलवद्ध्रदकालीनवह्निव्यापकीभूताभावप्रतियोगिजलेऽतिव्याप्तिः जलवद्ध्रदकालीनवह्निव्यापकीभूताभावप्रतियोगिजलत्वावच्छिन्नविषयित्वव्यापकयत्किंचित्प्रतिबन्धकता जलवद्ध्रदविषयकनिश्चयविशिष्टतादृशजलत्वावच्छिन्नविषयकनिश्चयप्रतिबन्धकतैव तत्साक्षादव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदिकाच तादृशजलत्वावच्छिन्नविषयितैव तत्रच तादृशजलत्वावच्छिन्ननिरूप्यत्वस्य सत्त्वादिति वाच्यम् । तादृशयत्किंचित्प्रतिबन्धकतावच्छेदकविषयितायामसाधारण्यविषयिताभिन्नत्वाऽसाधारण्यविषयित्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वोभयाभाववत्त्वस्य विवक्षणीयत्वात्, असाधारण्यघटकहेतुमत्पक्षविषयिता च नोभयाभाववती, किन्तु विशिष्टाऽसाधारण्याविषयितैव तत्रच तादृशासाधारण्यत्वावच्छिन्ननिरूप्यत्वसत्त्वान्नाव्याप्तिः; ह्रदो जलवद्ध्रदकालीनवह्निमान्पङ्कजादित्यत्र निरुक्तजले नातिव्याप्तिः असाधारण्यविषयित्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वाभावप्रयुक्तनिरुक्तोभयाभाववत्यां तादृशजलत्वा-

१ जलवद्ध्रदत्वावच्छिन्नविषयितायामप्यसाधारण्यघटकविषयितात्वप्रयुक्तासाधारण्यविषयकत्वावच्छिन्नप्रतिबन्धक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नविषयिताव्यापकयत्किंचित्प्रतिबन्धकतावच्छेदिकायां जलवद्ध्रदविषयितायां तादृशजलत्वावच्छिन्ननिरूप्यत्वाऽभावात्, एकरूपेण प्रतिबन्धकत्वे तु असाधारण्यरूपपङ्कजविषयितैव तादृशी, प्रथममवच्छिन्नान्तानुपादाने प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितयत्किंचित्प्रतिबन्धकतानिरूपितावच्छेदकतावद्ध्रदत्वभावत्वावच्छिन्नविषयितायां बाधनिरूप्यत्वाभावादसम्भवः, यद्रूपावच्छिन्नविषयितासामान्यं तादृशप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नविषयितायां निरूप्यत्वोक्तौ पर्वतो वह्निमानि-

---

तासत्त्वेपि जलवान् ह्रद इति स्वतन्त्रज्ञानीयायां तद्विषयितायामुभयाभावसत्त्वात् तत्रच तादृशयत्किंचित्प्रतिबन्धकतावच्छेदकत्वस्यापि सत्त्वात् तत्रच स्वावच्छिन्ननिरूप्यत्वाभावान्नातिव्याप्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्यत्र पाषाणमयत्वविशिष्टपर्वतेतिव्याप्तिः पाषाणमयत्वविशिष्टपर्वतविषयितासामान्यस्य तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नयत्किंचित्प्रतिबन्धकतायामवच्छेदकत्वात्, प्रतिबन्धकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वाऽसाधारण्यविषयकत्वानवच्छिन्नत्वोभयाभावविवक्षया तद्दोष-

१ प्रतिबन्धकतायामुभयाभावनिवेशे ह्रदो वह्निमान् जलादित्यत्र वह्न्यभाववद्वह्निव्यापकीभूताभावप्रतियोगिजलवद्वृत्तिवह्निव्यापकीभूताभावप्रतियोगिजलवद्ध्रदेऽतिव्याप्तिस्तादृशविशिष्टविषयकनिश्चयनिष्ठज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायां तादृशावच्छेदकधर्मघटकासाधारण्यविषयिताया अप्यवच्छेदकत्वेनोक्तोभयाभावस्य सत्त्वात् असाधारण्यविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयासाधारण्यविषयित्वानवच्छिन्नत्वस्योक्तोभयाभावप्रतियोगितावच्छेदककोटौ निवेशनेन ता-

CC-0. In Public Domain. Digitization by eGangotri

वारणेपि कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगाभाववद्वृक्षेतिव्याप्तिः तादृशानुमितित्वव्यापकसाध्यवत्ताबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतायां कपिसंयोगाभाववद्वृक्षविषयितासामान्यस्यावच्छेदकत्वात्, अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वविवक्षणे च वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदेतिव्याप्तिः, प्रकृतानुमितिनिरूपितयत्किंचित्प्रतिबन्धकता ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकता तदनतिरिक्तवृत्तिविषयिता च तादृशविशिष्टविषयकत्वाऽव्यापकविषयिताशून्यज्ञानीयतादृशवि-

---

दृशप्रतिबन्धकतावारणेपि जलं वह्निमत् जलादित्यत्र वह्निव्यापकीभूताभावप्रतियोगित्ववद्वृत्तिवह्निव्यापकीभूताभावप्रतियोगित्ववज्जलेतिव्याप्तिरिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्टविषयितैव तद्वारणाय विशिष्टद्वयाऽघटितत्वनिवेशे गौरवम्, अतो यथाश्रुतमेव साधु, अत्रायम-
नुगमः पदार्थविशिष्टपदार्थवत्त्वं हेत्वाभासत्वम्, पदार्थवैशिष्ट्यं च स्वतादात्म्य--स्वावच्छिन्ननिरूप्य-
तावृत्तिर्यः किंचिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्याऽनाहार्य्याऽप्रामाण्यज्ञानानास्कन्दिताऽ-
व्याप्यवृत्तित्वभ्रमानाऽस्कन्दितपक्षधर्म्मिकहेतुमत्ताज्ञानाकालीनत्वाऽसाधारण्यविषयित्वोभयाऽभाववर्त्किं-
चिद्रूपावच्छिन्नविषयिताशालिनिश्चयत्वव्यापकयत्किंचित्प्रतिबन्धकतावच्छेदकत्ववृत्तिकिंचिद्रूपाऽवच्छि-
न्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीययत्किंचिद्रूपाऽवच्छिन्नविषयितानिष्ठभेदप्रतियोगिताऽवच्छेदक-
त्वं नास्तीति प्रतीतिसिद्धाभावनिरूपितप्रतियोगितानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावद्रूपावच्छिन्नांकिंचिद्रूपावच्छिन्नविषयि-त्वाऽव्यापकविषयिताशून्यज्ञानवृत्त्यसाधारण्यविषयिताभिन्नत्वासाधारण्यविषयित्वाऽवच्छिन्नप्रतिबन्धक-तावच्छेदकत्वोभयाभाववद्विषयितानिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धोभावस्तन्नि-रूपितावच्छेदकत्वनिष्ठप्रतियोगितानिरूपितप्रतियोगितानिष्ठाऽवच्छेदकतानिरूपितभेदनिष्ठाऽवच्छेदक-तानिरूपितवृत्तित्वानिष्ठाऽवच्छेदकतानिरूपितविषयितानिष्ठाऽवच्छेदकतावत्त्वोभयसम्बन्धेन, तादृशाऽ-वच्छेदकतावत्त्वंच स्वनिरूपितवृत्तित्वनिष्ठाऽवच्छेदकतानिरूपितज्ञाननिष्ठाऽवच्छेदकतानिरूपितशून्य-त्वनिष्ठाऽवच्छेदकतानिरूपिताविषयितानिष्ठावच्छेदकतानिरूपिताव्यापकत्वनिष्ठावच्छेदकतानिरूपितवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षयितानिष्ठाऽवच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकत्व–स्वनिरूपितावच्छिन्नत्वसम्ब-
न्धाऽवच्छिन्नाऽवच्छेदकतानिरूपिताऽवच्छेदकत्वनिष्ठाऽवच्छेदकतानिरूपितविषयितानिष्ठाऽवच्छेदकत्व-
निष्ठाऽवच्छेदकतानिरूपितवृत्तित्वनिष्ठाऽवच्छेदकतानिष्ठाऽवच्छेदकतानिरूपितभेदानिष्ठाऽवच्छेदकत्व––
निष्ठाऽवच्छेदकतानिरूपितप्रतियोगित्वनिष्ठाऽवच्छेदकत्वनिष्ठाऽवच्छेदकतानिरूपिताऽवच्छेदकत्वनिष्ठप्र-
तियोगित्वनिष्ठाऽवच्छेदकत्वनिरूपिततादृशाभावनिष्ठावच्छेदकतानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरू-
पितावच्छेदकत्वनिष्ठाऽवच्छेदकतानिरूपितप्रतिबन्धकतावृत्त्युभयावृत्तिधर्म्मावच्छिन्नाऽवच्छेदकतानिरू-
पिताभावनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठाऽवच्छेदकतानिरूपितप्रतियोगित्वनिष्ठाऽवच्छेदक–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानिरूपितभेदनिष्ठावच्छेदकतानिरूपितवृत्तित्वनिष्ठाऽवच्छेदकतानिरूपितनिश्चयनिष्ठाऽवच्छेदकताानि-
रूपिताविषयितानिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकत्वोभयसम्बन्धेनेति, गग-
नाभाववदभाववत्कालीनघटो गगनवानित्यत्र गगनाभाववत्तादृशघटरूपबाधस्य व्यापकसामानाधिकर-
ण्यरूपव्याप्तिविशिष्टप्रतिहेतुमत्पक्षरूपसत्प्रतिपक्षस्य लक्ष्यत्वे तत्संग्रहाय यत्किंचित्प्रतिबन्धकता-
वच्छेदकविषयितानिष्ठभेदप्रतियोगितावच्छेदकत्व-प्रकृतानुमितिप्रतिबन्धकताविशिष्टविषयित्वाऽवृत्ति-
त्व-विरोध्यनुमितिजनकताविशिष्टविषयित्वाऽवृत्तित्वैतत्त्रित्वावच्छिन्नप्रतियोगिताकाभावो निरूप्यतायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्तव्यः, अनुगमे च द्वितीयसम्बन्धघटकस्वावच्छिन्ननिरूप्यतावृत्तिरभाव एतन्नित्वावच्छिन्नप्रतियोगि-
ताको विवक्षणीय इति दिक् ॥ श्रीः ॥

स्वावच्छिन्नानिरूपिताविशिष्टविषयित्वानवच्छिन्नप्रतिबन्धकतावच्छेदकस्वा-
वच्छिन्नविषयिताको यो धर्मस्तद्वत्त्वं वा समुदितलक्षणार्थ इति ॥ ॥

स्वावच्छिन्नानिरूपितयत्किंचिद्विशिष्टविषयित्वावच्छेद्यतावदन्यप्रतिबन्धकतानतिरिक्तवृत्तिविषयिता-
निरूपकतावच्छेदकं यत्स्वं तद्वत्त्वं लक्षणम्, मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाऽनिरूपितशुद्धव्यभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चारत्वविषयित्वानवच्छेद्यप्रतिबन्धकताच न मेयत्वविशिष्टव्यभिचारप्रतिबन्धकता किंत्वन्यैवेति नातिव्याप्तिः, व्यभिचारघटितबाधत्वावच्छिन्नाऽनिरूपितव्यभिचारविषयितासामान्यावच्छेद्यतावदन्या तादृशबाधप्रतिबन्धकता भवतीति लक्षणसमन्वयः, व्यभिचाराविशिष्टबाधत्वावच्छिन्नानिरूपितशुद्धबाधविषयिताशुद्धव्यभिचारविषयितानवच्छेद्यप्रतिबन्धकता तदुभयप्रतिबन्धकताभिन्नैवेति न तदनतिरिक्तवृत्तिर्व्यभिचाराविशिष्टबाधत्वावच्छिन्नविषयितेति नातिव्याप्तिः, सर्वं गगनवदित्यत्र गगनाभाववद्घटत्वावच्छिन्नानिरूपितगगनाभाववत्पटादिविषयित्वानवच्छेद्यप्रतिबन्धकतायां गगनाभाववद्घटत्वावच्छिन्नविषयिताया अनवच्छेदकत्वात्तत्राव्याप्तिरतः स्वावच्छिन्नानिरूपितविषयितायां स्वावच्छिन्नविषयित्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽव्यापकविषयिताशून्यज्ञानीयत्वं विवक्षणीयम्, तथाच बाधत्वावच्छिन्नाऽनिरूपितबाधत्वावच्छिन्नविषयिताऽव्यापकविषयिताशून्यज्ञानीयविषयिता बाधैकदेशपदार्थविषयिता तत्सामान्यानवच्छेद्याच बाधप्रतिबन्धकतेति लक्षणसमन्वयः, एवं तत्रैव यद्रूपावच्छिन्नविषयित्वाव्यापकाविषयिताशून्यज्ञानीयत्वमपि विशेषणं बोध्यम्, अन्यथा ह्रदो वह्निमानित्यत्र जातिमद्वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयतदवच्छिन्नाऽनिरूपितवह्न्यभाववद्ध्रदत्वावाच्छिन्नविषयितासामान्यावच्छेद्या न तादृशबाधनिश्चयप्रतिबन्धकता जातिमान्वह्न्यभाववानिति ज्ञानीयतादृशविषयितायां तादृशप्रतिबन्धकतावच्छेदकत्वाभावात् किंत्वन्यदेव किंचिद्विषयित्वादिकं तदन्याच तादृशबाधप्रतिबन्धकता तदवच्छे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिकाच ताद्दशजातिमद्वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितेति तत्रातिव्याप्तेः, तन्निवेशे तु वह्न्यभाववद्ध्र-
दत्वावच्छिन्नविषयित्वाऽव्यापकाविषयिताशून्यज्ञानीयजातिमान्वह्न्यभाववानिति ज्ञानव्यावृत्तनिरुक्तविष-
यितासामान्यावच्छेद्यायामेव बाधप्रतिबन्धकतायामुक्तविशिष्टविषयिताया अवच्छेदकत्वान्नातिव्याप्तिः,
अत्र प्रथमस्वरूपसंबन्धरूपावच्छेदकताया निवेशाद्वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदे नातिव्याप्तिः
ताद्दशह्रदत्वावच्छिन्नानिरूपितवह्न्यभाववज्जलवत्त्वावच्छिन्नविषयितानिष्ठस्वरूपसंबन्धरूपावऽच्छेदक-
तानिरूपकान्या या प्रतिबन्धकता तदवच्छेदकत्वस्य ताद्दशविशिष्टविषयितायामभावादतो विशिष्टद्ध-
याऽघटितत्वं न निवेशनीयम्, एवं नीलरूपाभाववन्नीले नातिव्याप्तिः । नचैवमपि हेतुमत्पक्षघटि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताऽसाधारण्येऽव्याप्तिस्तादृशासाधारण्यत्वावच्छिन्नाऽनिरूपिततद्विषयित्वाऽव्यापकविषयिताशून्यज्ञानीयहेतुमत्पक्षविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयहेतुमत्पक्षविषयितासामान्यानवच्छेद्यप्रतिबन्धकतायां तादृशासाधारण्यविषयिताया अनवच्छेदकत्वादिति वाच्यम् । स्वावच्छिन्नानिरूपितविषयितायामसाधारण्यविषयिताभिन्नत्वासाधारण्यविषयित्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वोभयाभाववत्त्वस्य विवक्षणीयत्वात् तथाच हेतुमत्पक्षाविषयिताच न तादृशोभयाभाववती किंत्वसाधारण्यघटकपदार्थान्तरविषयितैव तत्सामान्यानवच्छेद्या च तादृशासाधारण्यावच्छिन्नप्रतिबन्धकतेति नाव्याप्तिः, एवं प्रतिबन्धकतावच्छेदकविषयिताशालिनिश्चये पक्षधर्मिकहेतुमत्ताज्ञानाकालीनत्वाऽसाधारण्यविषयकत्वोभ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याभावो विवक्षणीयस्तेन ह्रदो वह्निमाञ्जलादित्यादावसाधारण्यस्य नासंग्रहः तथाच स्वावच्छिन्नाऽनिरूपितस्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयतादृशविशिष्टविषयिताऽव्यापकविषयिताशून्यज्ञानीयासाधारण्यविषयिताभिन्नत्वासाधारण्यविषयित्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वोभयाऽभाववद्विशिष्टविषयतासामान्यावच्छेद्यतावदन्यप्रतिबन्धकता पक्षधर्मिकहेतुमत्ताज्ञानाकालीनत्वासाधारण्यविषयकत्वोभयाभाववदनाहार्य्यत्वादिविशिष्टयद्रूपावच्छिन्नविषयिताशालिनिश्चयत्वव्यापिका तद्रूपावच्छिन्नत्वं पर्य्यवसितलक्षणम्, अत्रायमनुगमः पदार्थविशिष्टपदार्थवत्त्वं हेत्वाभासत्वम्, पदार्थवैशिष्ट्यंच स्वतादात्म्य-स्वविशिष्टविषयितावदन्यप्रतिबन्धकतावृत्तित्वोभयसंबन्धेन, विषयितायां स्ववैशिष्ट्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च स्वावच्छिन्नानिरूपितत्व—स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वोभयसंबन्धेन, विष-
यितावत्ता च स्वनिरूपकतावच्छेदकधर्म्मविशिष्टाऽसाधारण्यविषयिताभिन्नत्वघटितोभयाभाववद्विषयि-
तात्वव्यापकावच्छेदकताकत्वसंबन्धेन, विषयितायां धर्म्मवैशिष्ट्यंच स्वावच्छिन्ननिरूपकताकत्व—स्वाव-
च्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वोभयसंबन्धेन, धर्म्मे प्रतिबन्धकतावृत्तित्वं च पक्षध-
र्म्मिकहेतुमत्ताज्ञानाऽकालीनत्वाऽसाधारण्यविषयकत्वोभयाभाववदनाहार्य्यत्वादिविशिष्टस्वविशिष्टनिश्च—
यनिष्ठभेदप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसंबन्धेन, नि-

CC-0. In Public Domain. Digitization by eGangotri

श्चये स्ववैशिष्ट्यंच स्वावच्छिन्नविषयितावत्त्व-स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यत्वोभयसं-
बन्धेनेति दिक् ॥ श्रीः ॥

अत्र केचित्-स्वसजातीयविशिष्टान्तराऽघटितत्वमेव यत्पदार्थे विशेषणं देयं, साजात्यं च हेत्वाभासविभाजकरूपेण, तच्च रूपं बाधत्वव्यभिचारत्वादीति ॥

अत्र स्ववृत्तियद्धेत्वाभासविभाजकतावच्छेदकं तद्वत्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं य-
त्तदवच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तद्वत्त्वं विशिष्टान्तराऽघटितत्वमिति फलितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वत्र स्वं बाधत्वादि वह्न्यभाववद्ध्रदत्वादि तद्वृत्तिहेत्वाभासविभाजकतावच्छेदकरूपवत्तदवच्छिन्नाऽ-
विषयकप्रतीतिविषयितावच्छेदकाप्रसिद्धिः बाधत्वविपरीतबाधत्वादौ तादृशस्यैक्यस्यकाभावात् , अथात्र
बाधत्वत्वव्यभिचारत्वत्वादिकमेव तादृशं तत्र बाधत्वत्वं नाम पक्षतावच्छेदकविशिष्टपक्षग्रहत्वाऽव्या-
पकसाध्यतावच्छेदकविशिष्टसाध्यग्रहत्वाऽव्यापकपक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टसाध्य-
वैशिष्ट्यावगाहिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशून्यानाहार्याऽप्रामाण्यज्ञानानास्कन्दिताऽ
व्याप्यवृत्तित्वभ्रमानास्कन्दितनिश्चयवृत्तित्वाभाववत्त्वम् , अत्र वृत्तित्वंच स्वावच्छिन्ननिरूपकताकविषयि- ॥ २०१ ॥
तासंबन्धावच्छिन्नं ग्राह्यम् , साध्याऽप्रसिद्धिपक्षाप्रसिद्धित्वयोर्बाधत्ववृत्तितादृशरूपवारणायाव्यापकतान्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वयं तदवारणे अवृत्तिजलं ह्रदावृत्तीत्यत्र ह्रदवृत्तिजलात्मकबाधस्य पक्षाप्रसिद्ध्यवृत्तिजलेन घटितस्या- संग्रहापत्तेः, एवं जलम् अवृत्तिजलकालीनह्रदावृत्तीत्यत्र जलकालीनह्रदवृत्तित्ववज्जलात्मकबाधस्य वृत्ति- त्ववज्जलात्मकसाध्याप्रसिद्धिघटितस्यासंग्रहापत्तेश्च, अत्र साध्यीभूताभावप्रतियोगिवृत्तित्वं साध्यताव- च्छेदककुक्षौच जलांशे वृत्तित्वं संयोगेन, तेन तादृशानुमितेर्नाहार्यतापत्तिः नवा बाधस्य साध्याप्रसिद्ध्य- घटितत्वम्, एवं सत्प्रतिपक्षतात्वं च विशिष्टपक्षग्रहत्वाव्यापकविशिष्टसाध्यग्रहत्वाव्यापकविशिष्टपक्ष- विशिष्टसाध्यवैशिष्ट्यावगाहिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशून्यानाहार्यत्वादिविशिष्ट- निश्चयवृत्तित्वाभाववत्त्वे सति तादृशप्रतिबन्धकतावच्छेदकविषयिताघटितधर्मावच्छिन्नजन्यतानिरूपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तजनकताशून्यताद्दशनिश्चयवृत्तित्वाभाववत्त्वम्, अत्राप्यव्यापकान्तद्वयं ताद्दशरूपस्य पक्षाप्रसिद्धिसाध्याप्रसिद्धित्वयोर्वारणाय, अन्यथा अवृत्तिरूपं द्रव्यवृत्तित्वाभाववदित्यत्र द्रव्यवृत्तित्वव्याप्यगुणत्ववद्रूपात्मकस्य सत्प्रतिपक्षस्य वृत्तित्वव्याप्यगुणत्ववद्रूपात्मकपक्षाप्रसिद्धिघटितस्यासंग्रहापत्तिः, एवं रूपमम् अवृत्तिरूपकालीनद्रव्यवृत्तित्वाभाववदित्यत्र रूपकालीनद्रव्यवृत्तित्वव्याप्यगुणत्ववद्रूपात्मकसत्प्रतिपक्षस्य वृत्तित्वव्याप्यगुणत्ववद्रूपात्मकसाध्याप्रसिद्धिघटितस्यासंग्रहापत्तिः, अत्र द्वितीयदलघटकप्रतिबध्यतायामव्यापकान्तद्वयं नोपादेयं प्रथमदले तद्विशेषणादेव पक्षाऽप्रसिद्धित्वसाधारण्याभावात्, प्रथमदलमात्रस्य बाधत्वसाधारण्यात् द्वितीयोपादानं तथासति आधेयत्वं निरूपितत्वाभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ववदित्यत्र बाधघटितसत्प्रतिपक्षस्यासंग्रहापत्तेः, वस्तुतो द्वितीयदलमात्रमेव सत्प्रतिपक्षतात्वं तावतैव बाधत्वादिसाधारण्याभावात् तदानीं तत्रैवाव्यापकान्तद्वयं विशेषणम्, स्वरूपासिद्ध्यादिकं द्विविधं तत्र स्वरूपासिद्धितात्वं विशिष्टपक्षग्रहत्वाऽव्यापकविशिष्टहेतुग्रहत्वाऽव्यापकविशिष्टपक्षहेतुवैशिष्ट्याऽवगाहिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशून्याऽनाहार्य्यत्वाऽदिविशिष्टनिश्चयवृत्तित्वाभावः प्रथमम्, अत्राव्यापकान्तद्वयानुपादानेऽवृत्तिजलं वह्निमद्ध्रदावृत्तित्वादित्यत्र ह्रदवृत्तिजलात्मकस्वरूपासिद्धेर्वृत्तिजलात्मकपक्षाऽप्रसिद्धिघटिताया जलं वह्निमदवृत्तिजलकालीनह्रदावृत्तित्वादित्यत्र जलकालीनह्रदवृत्तिजलात्मकस्वरूपासिद्धेर्वृत्तिजलात्मकसाधनाप्रसिद्धिघटितायाश्चासंग्रहापत्तिः, द्वितीयस्वरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पासिद्धितात्वं विशिष्टहेतुपक्षग्रहत्वाऽव्यापकविशिष्टपक्षहेतुवैशिष्ट्यावगाहिग्रहत्वव्यापकप्रतिबध्यतानिरू-
पितप्रतिबन्धकतावच्छेदकविषयितावच्छेदकधर्मावच्छिन्नविधेयताघटितधर्मावच्छिन्नजन्यतानिरूपितजन-
कताशून्यानाहार्यत्वादिविशिष्टनिश्चयवृत्तित्वाभावः, अत्राव्यापकान्तानुपादाने उक्तस्थलयोरेव ह्रदवृ-
त्तित्वव्याप्यवज्जलात्मकस्वरूपासिद्धेः वृत्तित्वव्याप्यवज्जलात्मकपक्षाप्रसिद्धिघटितायाः जलकालीन-
ह्रदवृत्तित्वव्याप्यवज्जलात्मकस्वरूपासिद्धेः वृत्तित्वव्याप्यवज्जलात्मकसाधनाप्रसिद्धिघटितायाश्चासंग्रहाप-
त्तिः, अत्र व्यभिचारतात्वं विशिष्टसाध्यसाधनग्रहत्वाऽव्यापकविशिष्टसाधनधर्मिकविशिष्टसाध्यव्याप्तिवैशि-
ष्ट्यावगाहिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशून्यतादृशनिश्चयवृत्तित्वाभावः,अत्राव्यापका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तानुपादाने अभाववदवृत्तिवह्निकालीनधूमवान्वह्नेरित्यत्र वह्निकालीनधूमाभाववद्वृत्तिवह्न्यात्मकव्यभिचा-
रस्याभाववद्वृत्तिवह्न्यात्मकसाध्याऽप्रसिद्धिघटितस्य वह्निमान् अभाववदवृत्तिद्रव्यत्वादित्यत्र वह्न्यभावव-
द्वृत्तिद्रव्यत्वात्मकव्यभिचारस्याभाववद्वृत्तिद्रव्यत्वात्मकसाधनाऽप्रसिद्धिघटितस्यासंग्रहापत्तिः, द्वितीयव्य-
भिचारतात्वमुक्तप्रतिबन्धकतावच्छेदकविषयितावच्छेदकधर्मावच्छिन्नविधेयताघटितधर्मावच्छिन्नजन्यता-
निरूपितजनकताशून्यतादृशनिश्चयवृत्तित्वाभावः, अत्रापि प्रतिबध्यतायामव्यापकान्तानुपादाने उक्तस्थ-
लयोर्वह्निकालीनधूमाभाववद्वृत्तित्वव्याप्यवद्वह्निरूपव्यभिचारस्याभाववद्वृत्तित्वव्याप्यवह्निरूपसाध्याप्रसि-
द्धिघटितस्य वह्न्यभाववद्वृत्तित्वव्याप्यवद्द्रव्यत्वरूपव्यभिचारस्याऽभाववद्वृत्तित्वव्याप्यवद्द्रव्यत्वरूपसाध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाप्रसिद्धिघटितस्य चासंग्रहापत्तिः, विशिष्टसाध्यसाधनग्रहत्वाव्यापकसाध्यसाधनधर्म्मिकसाधनसाध्यसामानाधिकरण्यप्रकारकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशून्यतादृशनिश्चयवृत्तित्वाभावः प्रथमं विरोधतात्वम् , अत्राऽव्यापकान्तानुपादाने गोत्वाधिकरणनिरूपितवृत्तित्वाभाववदभावकालीनगोत्ववानश्वत्वादित्यत्राभावकालीनगोत्वाधिकरणनिरूपितवृत्तित्वाऽभाववदश्वत्वरूपविरोधस्य गोत्वाधिकरणनिरूपितवृत्तित्वाभावरूपसाध्याऽप्रसिद्धिघटितस्य गोत्ववान् गोत्वाधिकरणनिरूपितवृत्तित्वाभाववदभावकालीनाश्वत्वादित्यत्र गोत्वाधिकरणनिरूपितवृत्तित्वाभाववदश्वत्वात्मकविरोधस्य गोत्वाधिकरणनिरूपितवृत्तित्वाभावरूपसाधनाप्रसिद्धिघटितस्य चासंग्रहापत्तिः, अत्र साध्यसाधनतावच्छेदककुक्षौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभावत्वावच्छेदेन गोत्वाधिकरणनिरूपितवृत्तित्वाभावः प्रविष्टः स चाभावः प्रतियोगितासंबन्धावच्छिन्नो
ग्राह्यः, अन्यथा गोत्वाधिकरणनिरूपितवृत्तित्वाभावस्य साध्यसाधनाप्रसिद्धित्वाऽसंभवात् निरुक्तप्रति-
बध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकधर्मावच्छिन्नविधेयताघटितधर्म्मावच्छिन्नजन्यता-
निरूपितजनकताशून्यतादृशनिश्चयवृत्तित्वाभावोऽपरं विरोधतात्वम्, अत्र प्रतिबध्यतायामव्यापका-
न्तानुपादाने अभावाभाववद्गगनकालीनवह्निमान् गगनादित्यत्र गगनकालीनवह्निमान् गगनादित्यत्र च व-
ह्न्यधिकरणनिरूपितवृत्तित्वाभावव्याप्यवद्गगनरूपाविरोधस्याऽभावव्याप्यवद्गगनरूपसाध्याप्रसिद्धिघटि-
तस्य वह्निमान् अभावाभाववद्गगनादित्यत्र तादृशसाधनाप्रसिद्धिघटितस्य तादृशाविरोधस्य चासंग्रहा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्तिः, विशिष्टपक्षग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशून्यतादृशनिश्चयवृत्तित्वाभाव एकमाश्रयासिद्धितात्वम्, तादृशप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकधर्मावच्छिन्नविधेयताघटितधर्म्मावच्छिन्नजन्यतानिरूपितजनकताशून्यतादृशनिश्चयवृत्तित्वाभावोऽपरम्, एवमेव साध्याऽप्रसिद्धितात्वद्वयं साधनाप्रसिद्धितात्वद्वयं चोह्यम्, विशिष्टसाध्यग्रहत्वाव्यापकसाध्यधर्मिकात्यन्ताभावप्रतियोगित्वप्रकारकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशून्यतादृशनिश्चयवृत्तित्वाभावोऽनुपसंहारितात्वम्, अत्राव्यापकान्तानुपादाने निरूपितत्वाभाववत्प्रतियोगित्वकालीनप्रमेयत्ववानित्यत्र प्रमेयत्ववृत्त्यभावप्रतियोग्यत्यन्ताभावनिरूपितप्रतियोगित्वरूपानुपसंहारित्वस्य निरूपितत्ववत्प्रतियो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गित्वरूपसाध्याप्रसिद्धिघटितस्यासंग्रहापत्तिः, विशिष्टसाधनग्रहत्वाव्यापकविशिष्टसाधनधर्मिकात्यन्ताभावप्रतियोगित्वप्रकारकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशून्यतादृशनिश्चयवृत्तित्वाऽभावोऽप्यनुपसंहारितात्वम्, अत्राप्यव्यापकान्तानुपादाने निरूपितत्वाभाववत्प्रतियोगित्वकालीनप्रमेयत्वहेतुकस्थलीयोक्तानुपसंहारित्वासंग्रहापत्तिः, एवमपरविधमनुपसंहारितात्वमप्यूह्यम्, तथाच बाधत्वादिवृत्तिश्चैतादृशाभावो विपरीतबाधत्वादिसाधारणः तथाच स्ववृत्त्येतदभावान्यतमवत्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तद्वत्त्वं स्वसजातीयविशिष्टान्तराऽघटितत्वम् तथाच न मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिः । मैवम् । तथापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यभिचारघटितबाधाद्यसंग्रहात् तत्र बाधत्वे व्याप्तिज्ञानप्रतिबन्धकताशून्यनिश्चयवृत्तित्वाभावस्य व्यभिचारतात्वस्य पक्षे साध्यवत्ताज्ञानप्रतिबन्धकताशून्यनिश्चयवृत्तित्वाभावरूपस्य बाधतात्वस्य च सत्त्वात् स्ववृत्तिव्यभिचारतात्वरूपतावदभावान्यतमवत्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकशुद्धव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य तादृशबाधत्वेऽभावात्। नच स्ववृत्तितादृशान्यतमयत्किञ्चिदभाववद्विशिष्टान्तराघटितत्वस्य विवक्षणाद्बाधतात्वरूपयत्किंचिदभाववद्विपरीतबाधत्वाऽघटितत्वस्य तादृशबाधत्वे सत्त्वेन लक्षणसमन्वय इति वाच्यम्। तथापि वह्न्यभाववज्जलादिमत्कालीनजलवद्ध्रदेऽतिव्याप्तेः तत्र पक्षे साध्यवैशिष्ट्यावगाहिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताशून्यतादृशनिश्चयवृत्तित्वाभावो यस्तादृशहृदत्ववृत्तिः तद्वत्त्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छे-
दकं यद्वह्न्यभाववज्जलादिमद्वृत्तिजलवद्धृदत्वं तदवच्छिन्नाऽघटितत्वस्य तत्र सत्त्वात् । नच तादृशप्र-
तिबन्धकताशून्यनिश्चयवृत्तित्वाभावमपहाय तादृशप्रतिबन्धकतावच्छेदकताशून्याऽनाहार्य्यज्ञानीयविषयि-
तावृत्तित्वाभावो विवक्षणीयः, वृत्तित्वं चावच्छिन्ननिरूपकताकत्वसम्बन्धेन, एवं च वह्न्यभाववज्जल-
वद्वृत्तिजलवद्धृदत्ववृत्तितादृशाभाववद्वह्न्यभाववज्जलवत्त्वमपीति तदवच्छिन्नाऽघटितत्वाभावात्तादृशवि-
शिष्टे नातिव्याप्तिः, तादृशपाषाणमयत्वविशिष्टपर्वतवारणेन विशेष्यदलसार्थक्यमपि भवतीति वाच्य-
म् । तथापि गगनाभाववदभाववत्कालीनघटो गगनवानित्यत्र बाधाव्याप्तेः तादृशबाधत्ववृत्तिज्ञानवै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्टयावच्छिन्नतादृशप्रतिबन्धकतावच्छेदकताशून्यतादृशविषयितावृत्तित्वाभावस्य तादृशबाधत्वाव-
च्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकाभाववत्तादृशघटत्वसाधारणतया तदघटितत्वस्य तत्राभावात्,
एवमाहार्य्यस्थलासंग्रहश्च तत्र प्रतिबन्धकत्वादिनिर्वचनासम्भवादिति चेन्न। बाधतात्वघटकप्रतिबन्धक-
तावच्छेदकत्वाभावश्च न स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकः अपितु स्वरूप–स्वनिरूपकप्राति-
बन्धकतानिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकविषायि–
तात्वोभयसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, प्रतिबध्यतावैशिष्ट्यञ्च स्वाश्रयत्व–स्वनिरूपित-
मुख्यविशेष्यतावृत्त्यवच्छेदकतानिरूपिताऽवच्छेदकतावत्प्रकारताविशिष्टविशेष्यतानिरूपकाऽव्याप्यवृ–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तित्वज्ञानाभाववत्त्वोभयसंबन्धेन, तथाच तादृशबाधत्ववृत्तिरेतादृशवृत्तित्वाभावश्च न अभाववत्तादृशघटत्वसाधारणः तदवच्छिन्नविषयितायां तादृशोभयसंबन्धावच्छिन्ननिरुक्तप्रतिबन्धकतावच्छेदकत्वाभावसत्त्वेन तत्राभाववत्तादृशघटत्वरूपधर्म्मस्यावच्छिन्ननिरूपकताकत्वसम्बन्धेन सत्त्वात्, एवं गगनाभाववद्भाववत्कालीनघटो वह्निमान् गगनादित्यत्र गगनाभाववत्तादृशघटरूपस्वरूपासिद्धचव्याप्तिवारणाय विशिष्टपक्षहेतुग्रहत्वाऽव्यापकविशिष्टपक्षधर्मिकविशिष्टहेतुमत्ताग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वानिष्ठनिरुक्तसम्बन्धद्वयावच्छिन्नप्रतियोगिताकाभाववद्विषयितावृत्तित्वाभावः स्वरूपासिद्धितावृत्तिर्विवक्षणीयः, एवं गगनवद्गगनाभाववद्भाववत्कालीनघटस्य यत्र साध्यता हेतुता पक्षता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च तत्र साध्याप्रसिद्धि–हेत्वप्रसिद्धि–पक्षाप्रसिद्धि–संग्रहाय साध्याऽप्रसिद्धितात्वादिकमप्येवमेव निर्वाच्यम्, सत्प्रतिपक्षतात्वं तु विशिष्टपक्षसाध्यग्रहत्वाव्यापकविशिष्टपक्षसाध्यवैशिष्ट्यावगाहिग्रहत्वव्यापकप्रतिवध्यतानिरूपितप्रतिबन्धकताविशिष्टविषयिताघटितधर्म्मावच्छिन्नकार्य्यताप्रातियोगिककारणतावच्छेदकताशून्याऽनाहार्य्यविषयितावृत्तित्वाभावः, अत्रावच्छेदकत्वाभावश्च स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताक एव ग्राह्यः, विषयितायां प्रतिबन्धकतावैशिष्ट्यं च स्वावच्छेदकत्व–स्वनिरूपितप्रतिवध्यताविशिष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिवध्यतावच्छेदकत्वोभयसंबन्धेन, अन्यविधं स्वरूपासिद्धितात्वादिकमपि सत्प्रतिपक्षतात्ववदेव निर्वाच्यम्, तेन गगनाभावव्याव्यवद्गगनाभाववद्भाववत्कालीनघटस्य स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्प्रतिपक्षस्वरूपासिद्ध्यादिरूपस्याभावव्याप्यवत्तादृशघटघटितत्वेपि नासंग्रहः । नन्वत्र किं तावदसाधारण्यतात्वं न तावद्विशिष्टपक्षसाध्यग्रहत्वाऽव्यापकविशिष्टपक्षसाध्यवैशिष्ट्यावगाहिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकताशून्याऽनाहार्य्यज्ञानविषयितावृत्तित्वाभावः, अत्राव्यापकान्तविशेषणान्निरूपितत्वाभाववत्प्रतियोगित्वं गगनत्ववदाधेयत्वादित्यादौ गगनत्वव्यापकीभूताभावनिरूपितप्रतियोगित्ववदाधेयत्वरूपासाधारण्यस्य पक्षासिद्धिघटितस्य घटो निरूपितत्वाभाववत्प्रतियोगित्वकालीनगगनत्ववानाधेयत्वादित्यत्र साध्याऽप्रसिद्धिघटितस्य च नासंग्रह इति वक्तुं शक्यम् तस्याभावस्यावच्छेदकधर्म्मसाधारणतया ह्रदो वह्न्यभाववज्जलवत्कालीनवह्निमान् जलादित्यत्र तादृशवह्निव्यापकीभूता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावप्रतियोगिजलात्मकासाधारण्येऽव्याप्तेः, तादृशासाधारण्यनिश्चयस्य जलवान्हृद इति निश्चयकालीनस्येव जलवान्वह्न्यभाववानिति निश्चयस्यापि तादृशनिश्चयकालीनस्य तादृशवह्निविशेषावगाह्यनुमितिंप्रति प्रतिबन्धकतया तादृशप्रतिबन्धकतावच्छेदकताशून्यविषयितावृत्तित्वाभावस्य तादृशासाधारण्यत्ववह्न्यभाववज्जलवत्त्वसाधारणतया असाधारण्यस्य वह्न्यभाववज्जलवृत्तित्वावच्छिन्नघटितत्वात्, यद्वा जलं वह्निमज्जलादित्यत्रासाधारण्येऽव्याप्तिः प्रतियोगित्ववद्वह्न्यभाववत्प्रतियोगित्ववज्जलमिति निश्चययोर्ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकतया तादृशप्रतिबन्धकतावच्छेदकताशून्यतादृशविषयितावृत्तित्वाभावस्य प्रतियोगित्ववज्जलत्वेऽपि सत्त्वेनासाधारण्यस्य तद्घटितत्वादिति चेन्न। निरुक्तप्रतिबध्यतानिरूपितनिश्चयाविशिष्टनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चयत्वानवच्छिन्नप्रतिबन्धकतावच्छेदकत्वाभाववत्तादृशविषयितावृत्तित्वाभावस्य विवक्षणीयत्वात्, निश्च-
यवैशिष्ट्यं च स्वसामानाधिकरण्य-स्वीयप्रकारताविशिष्टप्रकारतानिरूपितविशेष्यतावत्त्वोभयसंबन्धेन,
अवच्छेदकधर्म्मदर्शनप्रतिबन्धकता च तादृशनिश्चयत्वावच्छिन्नैव, असाधारण्यनिश्चयप्रतिबन्धकता तु नि-
श्चयविशिष्टनिश्चयत्वानवच्छिन्ना असाधारण्यनिश्चये पक्षधर्म्मिकहेतुमत्तानिश्चयस्य स्वीयप्रकारताविशिष्ट-
प्रकारतानिरूपितविशेष्यत्वसम्बन्धेनाभावात् उक्तस्थलेऽसाधारण्यतात्वस्य प्रतियोगित्ववज्जलत्वावृत्तितया
अव्याप्त्यनवकाशात् तादृशासाधारण्यतात्वस्य बाधत्वसाधारण्यवारणाय तादृशावच्छेदकत्वाभावः स्व-
रूप-स्वनिरूपकप्रतिबन्धकतानिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यतानवच्छेदकविषयितात्वोभयसंबन्धावच्छिन्नो विवक्षणीयः । न चेदानीं विशेष्यदलवैयर्थ्यं पाषाणमयत्ववत्पर्वतत्वादौ निरुक्तबाधतात्वस्याभात् तदवच्छिन्नविषयितायां स्वरूपसंबन्धेन पक्षे साध्यवैशिष्ट्यावगाहिबुद्धिप्रतिबन्धकतावच्छेदकत्वस्य सत्त्वेऽपि द्वितीयसंबन्धेनाभावेन तादृशावच्छेदकत्वाभाववद्विषयितावृत्तित्वाभावस्य निरुक्तधर्मेऽभावात् इति वाच्यम् । तथापि कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगाभाववद्वृक्षेऽतिव्याप्तिवारणाय तदावश्यकत्वात् । नन्वेवं विरोधिविषयताप्रयुक्तत्वदलवैयर्थ्यमिति विरुद्धम् कपिसंयोगी धूमान्यधूमादित्यत्र कपिसंयोगाभाववद्वृक्षस्य विशिष्टान्तराऽघटितत्वस्य सत्त्वेन तदुत्तरानुमितिसामान्ये उभयाभावस्य सत्त्वेन तद्वारणेन तत्सार्थक्यादिति चेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र केचित्। वैयर्थ्यमित्यस्य नोक्तप्रयोजनकत्वमित्यर्थः आहार्यस्थले घटादिवारणरूपं प्रयोजनं न सिद्ध्यतीति भावः अत एव तादृशप्रयोजनसिद्ध्यर्थं प्रतियोगिनि स्वत्वमन्तर्भाव्य शङ्कते नचेत्यादिनेति वदन्ति। एवं प्रतिबन्धकताघटितबाधतात्वादिकमाहार्यस्थलीयदोषसाधारणमपि वक्तुं शक्यम् प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताव्यापकं यद्रूपावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारत्वं तद्रूपावच्छिन्नविशेष्यतानिरूपिततद्रूपावच्छिन्नप्रकारताशालिग्रहत्वव्यापकत्वं प्रतिबध्यतायां निवेश्य बाधतात्वस्य एवमेव दोषान्तरतावच्छेदकधर्मवृत्तिरूपस्यापि वक्तव्यत्वात्, अत्रायमनुगमः पक्षे साध्यवैशिष्ट्यावगाहित्वसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वोभ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 याभावनिष्ठो यः किंचिद्रूपाऽवच्छिन्नविषयिताशालिनिश्चयोत्तरानुमितिनिष्ठाभावनिरूपितविरोधिविषय-
 ताप्रयुक्तत्वविशिष्टस्वनिष्ठनिरूपकतानिरूपिताधिकरणतासंबन्धावच्छिन्नप्रतियोगित्वं नास्तीति प्रतीति-
सिद्धोभावस्तन्निरूपितप्रतियोगितानिरूपिताभावनिष्ठावच्छेदकतानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरू-
पितानुमितिनिष्ठावच्छेदकतानिरूपितोत्तरत्वनिष्ठावच्छेदकतानिरूपितनिश्चयनिष्ठावच्छेदकतानिरूपित-
विषयितानिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावद्रूपविशिष्टरूपवत्त्वं लक्षणम्,
रूपे रूपवैशिष्टयं च स्वतादात्म्य–स्वविशिष्टावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपकविषयिता-
त्वावच्छिन्नप्रतियोगिताकाभाववत्प्रतीतिविषयतावच्छेदकत्वोभयसम्बन्धेन, अवच्छेदकतायां स्ववैशिष्टयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च स्वनिष्ठावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपकविषयितानिष्ठप्रतियोगितासम्बन्धावच्छिन्नावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकप्रतीतिनिष्ठावच्छेदकतानिरूपकविषयतानिष्ठावच्छेदकता-निरूपकनिरूपितत्वनिष्ठावच्छेदकतानिरूपकावच्छेदकत्वनिष्ठावच्छेदकतानिरूपकत्व स्वानिष्ठाधेयतासम्बन्धावच्छिन्नावच्छेदकतानिरूपकताद‍ृशाभावान्यतमत्वसमानाधिकरणोभयावृत्तिधर्मनिष्ठनिरवच्छिन्नावच्छे-दकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकत्वोभयसम्बन्धेनेति। नच तथाप्यवृत्तिजलकालीनजलाभाव-वान्ह्रदो वह्निमानित्यत्राश्रयासिद्धावव्याप्तिः तत्र ह्रदवृत्तिजलकालीनजलरूपाश्रयासिद्धेर्वृत्तिजलात्मकस्व-सजातीयविशिष्टान्तरघटितत्वादिति वाच्यम्। आहार्यस्थलीयदोषसाधारण्यायोक्तविवक्षायां प्रकृतपक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावच्छेदकविशिष्टपक्षग्रहनिष्ठाकिंचिद्रूपावच्छिन्नविशेष्यतानिरूपितकिंचिद्रूपावच्छिन्नप्रकारता नास्तीति प्रतीतिसिद्धाभावप्रतियोगि यत् किंचित्प्रकारताविशिष्टग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकताशून्यविषयितावृत्तित्वाभावरूपमाश्रयासिद्धितात्वं वक्तव्यम्, ग्रहे तादृशप्रकारतावत्त्वंच स्ववि-शिष्टविशेष्यतावत्त्वसंबन्धेन, विशेष्यतायां स्ववैशिष्ट्यं च स्वनिरूपितविशेष्यतावच्छेदकावच्छिन्नत्व–स्वावच्छेदकावच्छिन्नस्वावच्छेदकसम्बन्धावच्छिन्नप्रकारतानिरूपितत्वोभयसम्बन्धेन, अत्र प्रकारतायां यत्किंचित्वमभावत्रयप्रतियोगितावच्छेदककोटावपि अन्यतमत्वघटकप्रथमभेदप्रतियोगितावच्छेदककुक्षौ सामान्यरूपेणैव प्रकारताया निवेश इति ध्येयम्, तथाच तादृशस्थले पक्षतावच्छेदकाविशि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टपक्षग्रहनिष्ठयत्किंचित्प्रकारता ह्रदत्वावच्छिन्नविशेष्यतानिरूपितजलकालीनजलाभावत्वावच्छिन्ना आ-
श्रयासिद्ध्यन्तरानिश्चयप्रतिबध्यतावच्छेदकयत्किंचित्प्रकारता जलत्वावच्छिन्नविशेष्यतानिरूपिताऽवृ-
त्तित्वत्वावच्छिन्नप्रकारता च, अत्र प्रथमप्रकारताविशिष्टग्रहत्वव्यापकप्रतिबध्यताघटिताश्रयासिद्धितात्वं
न वृत्तिजलत्ववृत्ति वृत्तिजलमित्याकारकानिश्चयस्य जलकालीनजलाभाववान् ह्रद इति ज्ञानं प्रत्य-
प्रतिबन्धकत्वात्, द्वितीयप्रकारताघटिताश्रयासिद्धितात्वस्य जलकालीनजलवद्ध्रदरूपाश्रयासिद्धि-
त्वे सत्त्वेपि न तत्तद्घटकमिति तत्र नाव्याप्तिः। नन्वेवं सतिं ह्रदो वह्निमानित्यादौ दोषऽव्याप्तिः
तत्र विशिष्टपक्षग्रहानिष्ठोक्ताभावाप्रतियोगिनी या प्रकारता उक्तोभयसम्बन्धेन तद्विशिष्टविशेष्यता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वद्ग्रहाप्रसिद्धेरिति चेत् । मैवम् । सर्वत्राश्रयासिद्धितात्वस्य पक्षतावच्छेदकाभाववद्विषयितावृत्तित्वा-
भावरूपस्य वक्तव्यत्वात् तदभावनिरूपितपक्षतावच्छेदकनिष्ठप्रतियोगितावच्छेकसंबन्धश्च स्वविशि-
ष्टग्रहवृत्तियत्किंचिद्रूपावच्छिन्नविशेष्यतानिरूपितयत्किंचिद्रूपावच्छिन्नप्रकारता नास्तीति प्रतीतिसि-
द्धाभावनिरूपितप्रतियोगित्वाभाववद्यत्किंचित्प्रकारताविशिष्टग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रातिबन्ध-
कतावच्छेदकत्ववत्त्वसंबन्धेन, प्रकारतावैशिष्ट्यंच प्रागुक्तसंबन्धेन, अवच्छेदकतावत्त्वं च प्राक् प्रति-
योगितावच्छेदकतयोक्तस्वरूप-स्वनिरूपकप्रतिबन्धकतानिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापक-
प्रतिबन्धकतानिरूपितप्रातिबध्यतावच्छेदकत्वोभयसम्बन्धेन, एवं चायं सम्बधो निरवच्छिन्नपक्षता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छेदकस्थले तस्य व्यधिकरणसम्बन्ध एव तेन तदभावः केवलान्वयीति तद्वृत्तित्वाभावस्याप्रसिद्ध्याऽऽश्रयासिद्धिरप्रसिद्धैव आश्रयासिद्धिघटिताश्रयासिद्धौ च नाव्याप्तिरिति ध्येयम् । वस्तुतस्तु अन्यतमत्वं न तद्भिन्नभिन्नत्वं किन्तु प्रत्येकं तावदवृत्तिधर्मशून्यत्वं तथाचात्रैवं निवेशः पक्षतावच्छेदकविशिष्टपक्षग्रहत्वव्यापकप्रकारतानिष्ठोभयावृत्तिधर्मावच्छिन्नावच्छेदकतानिरूपकावच्छेदकतायाः परम्परया निरूपकावच्छिन्ननिरूपकताकत्वसम्बन्धावच्छिन्नवृत्तित्वानिष्ठप्रतियोगिताकाभावनिरूपितवृत्तितावानित्याकारिका या प्रतीतिस्तन्निरूपितस्य पक्षतावच्छेदकविशिष्टपक्षग्रहत्वव्यापकप्रकारतानिष्ठोभयावृत्तिधर्मनिष्ठनिरवच्छिन्नाऽवच्छेदकतानिरूपकप्रकारतानिष्ठस्वविशिष्टविशेष्यत्वसम्ब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्धावच्छिन्नावच्छेदकतानिरूपकग्रहनिष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठावच्छेदकतानिरूपकभेदनिष्ठाव-
च्छेदकतानिरूपकप्रतियोगितानिष्ठावच्छेदकतानिरूपकावच्छेदकत्वनिष्ठप्रतियोगितासम्बन्धावच्छिन्नाव--
च्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकप्रतिबध्यतानिष्ठावच्छेदकतानिरूपकप्रतिबन्धकतानि–
ष्ठावच्छेदकतानिरूपकावच्छेदकत्वनिष्ठस्वरूपघटितप्रागुक्तोभयसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धा—
वच्छिन्नावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकावच्छिन्न–
निरूपकताकत्वसम्बन्धावच्छिन्नवृत्तितात्वावच्छिन्नप्रतियोगिताकाभावनिरूपितवृत्तितात्वावच्छिन्नप्रका–
रतानिरूपितविशेष्यत्वस्य प्रमीयविशेष्यताप्रतियोगिकस्वरूपसम्बन्धेन योऽभावस्तद्वत्त्वे सति विशि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टसाध्यग्रहत्वव्यापकयत्किंचित्प्रकारताघटिततादृशाभाववत्त्वे सतीत्येवं रीत्या यावद्दोषविभाजकतावच्छेदकतावच्छेदकीभूताभावनिरूपितवृत्तित्वप्रकारतानिरूपिताविशेष्यतायाः प्रमीयविशेष्यताप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नाभाववान्यस्तच्छून्यत्वमन्यतमत्वमिति तथाच यत्र यो दोषः प्रसिद्धस्तत्र तादृशम्प्रदोषतावच्छेदकनिष्ठाभाववृत्तिधर्मे तादृशज्ञानीयतादृशप्रकारतानिरूपितविशेष्यत्वस्य प्रमीयविशेष्यताप्रतियोगिकस्वरूपसम्बन्धेनाभावो नास्तीति तद्वानन्य एव तच्छून्यत्वं च तादृशदोषतावच्छेदकवृत्त्यभावे वर्तत इति सर्वत्र प्रसिद्धिर्बोध्या ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसजातीयविशिष्टान्तरघटितं यत्स्वं तदविषयकप्रतीतिविषयत्वस्य विवक्षयाऽनुयोगिनि स्वत्वानन्तर्भावेण पदार्थान्तरेष्वतिप्रसङ्गवारकतया तद्दलसार्थक्यात् इति ॥ ॥

स्ववृत्तितादृशाभावान्यतमयत्किंचिदभाववत्स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकं यद्रूपं तदवच्छिन्नघटिततावच्छेदकं यत्स्वं तदवच्छिन्नाऽघटितत्वं विशिष्टान्तराघटितत्वम्, अत्र स्वपदेन व्यभिचारत्वादिकं धर्तुं न शक्यते तस्य तादृशविशिष्टान्तरघटितत्वाभावात् किन्तु मेयत्वविशिष्टव्यभिचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्वादिकं तच्च तादृशव्यभिचारत्वेन घटितं तदघटितत्वाभावान्नातिव्याप्तिः व्यभिचारादेस्तदघटितत्वाद्दोषे लक्षणसमन्वयः, व्यभिचारघटितबाधेच नाव्याप्तिः तादृशबाधत्ववृत्तिबाधतात्वरूपाऽभाववत्तादृशबाधत्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकं शुद्धव्यभिचारत्वं न भवति विपरीतबाधत्वं तादृशमपि न तद्घटितं स्वम् अतो मेयत्वविशिष्टतादृशबाधत्वमेव स्वपदग्राह्यं तदवच्छिन्नाऽघटितत्वस्य तत्र सत्त्वात्, बाधविशिष्टव्यभिचारादौ च नातिव्याप्तिः तादृशव्यभिचारत्वनिष्ठो यस्तादृशाभावान्यतमो यत्किंचिदभावो व्यभिचारतात्वरूपः तद्वत्तदवच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकं शुद्धव्यभिचारत्वं तदवच्छिन्नघटितं स्वावच्छिन्नं भवतीति तदघटितत्वस्य स्वस्मिन्नभावात्, अत्र स्वसजातीयविशिष्टान्तरकं यत्स्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदघटितत्वोक्तौ असंभवः बाधत्वादेरपि स्ववृत्तिताहशाभावान्यतमवत्स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकाविपरीतबाधत्वादिकतया स्वपदेन बाधत्वादेरपि धर्तुं शक्यत्वात्, स्वावच्छिन्ने तदवच्छिन्नघटितत्वोक्तौ च बाधस्य विपरीतबाधाऽघटिततया स्वपदेन न दोषतावच्छेदकधारणसम्भव इति तदुपात्तम्, ताहशविशिष्टान्तरघटितं यत्स्वं तदघटितत्वमनुक्त्वा तद्भिन्नत्वोक्तौ मेयत्वविशिष्टव्यभिचारविशिष्टघटेऽतिव्याप्तिः व्यभिचारतात्वाभावेन स्वपदेन ताहशघटत्वस्य धर्तुमशक्यतया स्वपदग्राह्यमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नभेदस्य तत्र सत्त्वात्, यद्यपि मेयत्वविशिष्टव्यभिचारविशिष्टघटस्य व्यभिचारविशिष्टमेयत्वतुल्यतया तत्र चातिव्याप्तेस्स्वयमनुपदं वक्तव्यतया तत्रातिव्याप्तिवारणप्रयोज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकत्वं न संभवति तथाप्यणुरपि विशेषोऽध्यवसायकर इति न्यायात्तदुपादानम्। नन्वेवं परिष्कारे विशेषगुणाभाववान् घटो गुणसामान्याभाववानित्यत्र विशेषगुणवद्धटरूपाश्रयासिद्धाव्याप्तिसंभवे व्यभिचारविशिष्टमेयत्वेऽतिव्याप्त्यभिधानं संदर्भविरुद्धम्, तथाहि विशेषगुणवद्धटत्वावच्छिन्नविषयितायामपि गुणसामान्याभाववद्विशेषगुणाभाववद्धटत्वावच्छिन्नविषयकबुद्धित्वव्यापकघटत्वावच्छिन्नविशेष्यतानिरूपितगुणसामान्याभावत्वावच्छिन्नप्रकारतारूपयत्किंचित्प्रकारताविशिष्टग्रहत्वव्यापकविशिष्टपक्षसाध्यग्रहत्वाव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकताया निरुक्तोभयसम्बन्धेन सत्त्वेन तदभाववद्वृत्तित्वाभावरूपस्य बाधतात्वस्य विशेषगुणवद्धटत्वरूपाश्रयासिद्धित्वे सत्त्वेन स्ववृत्तिबाधतात्ववत्स्वावच्छिन्नाऽविष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यकप्रतीतिविषयतावच्छेदकगुणवद्घटत्वावच्छिन्नघटितत्वस्याश्रयासिद्धौ सत्त्वेन तदघटितत्वस्य स्वास्मिन्नभावात् इति चेन्न। विशिष्टान्तराऽघटितत्वाऽघटितबाधत्वादीनामेवात्र विवक्षणीयत्वात् तत्त्वंच निरुक्तावच्छेदकत्वाभाववद्वृत्तित्वाभाव एव परन्तु प्रतियोगितावच्छेदकसम्बन्धश्च स्वविशिष्टविषयितानुयोगिकस्वरूप-प्रागुक्तद्वितीयसंबन्धोभयरूपः, विषयितायां स्ववैशिष्ट्यं च स्वनिरूपकप्रतिबन्धकतावत्त्वसंबन्धेन प्रतिबन्धकतावत्त्वं च स्वविशिष्टविषयिताभिन्नमुख्यविशेष्यताशून्यज्ञानीयत्वसंबन्धेन विषयितायां स्ववैशिष्ट्यं च स्वावच्छेदकत्व-स्वव्याप्यप्रतिबन्धकतानवच्छेदकत्वोभयसंबन्धेन, तथाच विशेषगुणवद्घटत्वावच्छिन्नविषयितायां न गुणसामान्याभावत्वावच्छिन्नप्रकारतात्मकतादृशयत्किञ्चित्प्रकारताविशिष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकतास्ति स्वानरूपकबाधप्रतिबन्धकताया अभावात् तादृशविषयितायास्तत्प्रतिबन्धकतायामवच्छेदकत्वेपि तद्व्याप्याश्रयासिद्धिप्रतिबन्धकतायामवच्छेदकत्वात् तादृशोभयसम्बन्धेन तादृशप्रतिबन्धकताविशिष्टा गुणवद्घटविषयतैव तदन्यमुख्यविशेष्यता विशेषगुणवान्घट इति ज्ञानीयविशेष्यता तच्छून्यज्ञानीयविषयितागुणवद्घटविषयितैव तदनुयोगिकस्वरूपसंबन्धेन तादृशावच्छेदकत्वाभाववती विषयिता तादृशाश्रयसिद्धिविषयिता तद्वृत्तित्वाभावश्च नाश्रयासिद्धित्वे इति विशिष्टान्तराघटितत्वेनाघटितं बाधतात्वं नाश्रयासिद्धिसाधारणमिति नोक्ताव्याप्तिप्रसक्तिः, अत्र मुख्यविशेष्यत्वानुपादाने मेयत्वविशिष्टबाधादावतिव्याप्तिः एतादृशबाधतात्वस्य तत्राभावात्, तथाहि पक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतारूपपर्याप्तिकाचित्प्रकारताविशिष्ट-ग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकता मेयत्वविशिष्टबाधविषयतायां नास्ति स्वानिरूपकबाधप्रतिबन्धकतावत्तायास्तत्राभावात्, तदभावश्च वह्न्यभाववद्ध्रदः प्रमेय इति ज्ञाने स्वावच्छेदकत्व-स्वव्याप्यप्रतिबन्धकतानवच्छेदकत्वोभयसंबन्धेन तादृशप्रतिबन्धकताविशिष्टा या बाधविषयिता तदन्यप्रमेयत्वविषयितायाः सत्त्वात्, तथाच तादृशबाधत्वस्य धर्तुमशक्यतया स्वपदग्राह्यं यत्तदवच्छिन्नाऽघटितत्वस्य तत्र सत्त्वात् मुख्यविशेष्यतानिवेशे तु प्रमेयत्वविषयता न तादृशीति तादृशप्रतिबन्धकताविशिष्टान्यमुख्यविशेष्यता न बाधः प्रमेय इति ज्ञानीयेति तादृशबाधत्वावच्छिन्नविषयिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यां निरुक्तोभयसम्बन्धेन बाधप्रतिबन्धकतावच्छेदकतायाः सत्त्वेन तच्छून्यविषयितावृत्तित्वाभावस्य सत्त्वेन तादृशबाधत्वस्य स्वपदग्राह्यतया नातिव्याप्तिः एवमेवासिद्धितात्वादिकमपि निर्वाच्यम्, अत्रायमनुगमः धर्मविशिष्टधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकप्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वोभयाभावनिष्ठकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयोत्तरानुमितिनिष्ठाभावनिरूपितविरोधिविषयताप्रयुक्तत्वविशिष्टस्वनिष्ठनिरूपकताकाधिकरणत्वसम्बन्धावच्छिन्नप्रतियोगित्वं नास्तीति प्रतीतिसिद्धाभावनिरूपितप्रतियोगितानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपिताव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावद्धर्मवत्त्वं लक्षणम्, धर्मे धर्मवैशिष्टयं च स्वविशिष्टरूपघटि तत्व–स्वतादात्म्योभयसम्बन्धेन रूपे स्ववैशिष्टयं च स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदक-त्व–स्ववृत्तितादृशाभावान्यतमवत्त्वोभयसम्बन्धेनेति ॥ श्रीः ॥

विशिष्टान्तराघटितत्वेनाघटितस्य साध्यसाधनग्रहाविरोधिज्ञाननिष्ठविषयितासम्बन्धेन व्याप्तिज्ञानप्रतिबन्धकतानतिरिक्तवृत्तित्वादिरूपस्य व्यभिचारादिविभाजकस्यात्र निवेशात्तादृशरूपस्य च व्यभिचारविशिष्टमेयत्वादिसाधारणत्वादित्याहुरिति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र बाधतात्वं विशिष्टपक्षसाध्यग्रहत्वाऽव्यापकपक्षसाध्यवैशिष्ट्यावगाहिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाभाववन्निरूपितवृत्तित्वाभावः प्रतिबन्धकत्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धश्च स्वरूप—स्वनिरूपितप्रतिबध्यताविशिष्टनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकविषयितावत्त्वोभयरूपः वृत्तितावच्छेदकसम्बन्धश्च स्वावच्छिन्ननिरूपकताकविषयितावत्त्वरूपः, एवमेव व्यभिचारतात्वं विशिष्टसाध्यसाधनग्रहत्वाऽव्यापकविशिष्टहेतुधर्म्मिकविशिष्टसाध्यनिरूपितव्याप्तिप्रकारकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाभाववद्वृत्तित्वाभावः, एवं रीत्यैव स्वरूपासिद्धितात्वादिकमपि निर्वाच्यम् , तथाचैतादृशव्यभिचारतात्वस्य व्यभिचारविशिष्टमेयत्वसाधारणतया न तत्रातिव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तिः एवं ह्रदो वह्निमानित्यादौ वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदादौ नातिव्याप्तिः ह्रदो वह्निमानित्याकारकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताया उक्तविशिष्टविषयकनिश्चये स्वरूपसम्बन्धेन सत्त्वेप्यपरसम्बन्धेनाभावेन तादृशसम्बन्धद्वयेन तादृशप्रतिबन्धकत्वाभावस्य तादृशनिश्चये सत्त्वेन तद्वृत्तित्वाभावस्य बाधतात्वस्य तादृशविशिष्टह्रदत्वेऽसत्त्वात्, अत्रायमनुगमः पदार्थविशिष्टपदार्थावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्पक्षे साध्यवैशिष्ट्यावगाहित्व–साध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वोभयाभाववृत्तिरूपं तद्वत्त्वं, पदार्थे पदार्थवैशिष्ट्यं च स्वतादात्म्य–स्वविशिष्टरूपघटितत्वोभयसम्बन्धेन रूपे स्ववैशिष्ट्यं च स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकत्व–स्ववृत्तिबाधतात्वाद्यन्यतमरूप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत्त्वोभयसम्बन्धेन रूपे तादृशोभयाभाववृत्तित्वं च स्वावच्छिन्नविषयताशाल्यनाहार्य्याप्रामाण्यज्ञानाना-
स्कन्दितनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकतासम्बन्धेन व्यापकत्वं विरोधिविषयताप्रयुक्तत्वविशिष्ट-
स्वाधिकरणत्वसम्बन्धेनेति ॥ श्रीः ॥

एवं सति बाधविशिष्टव्यभिचारादौ स्ववृत्तिबाधत्वव्यभिचारत्वादि-
यावद्धर्मेण सजातीयस्य विशिष्टान्तरस्य व्यभिचारविशिष्टबाधस्य
प्रसिद्धावपि तद्घटितत्वाऽसत्त्वेनातिव्याप्तेरिति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वत्र बाधविशिष्टव्यभिचारेऽतिव्याप्तिकथनमसंगतं स्वपदेन बाधविशिष्टव्यभिचारत्वस्य धर्तुमशक्यत्वेपि बाधवैशिष्ट्यमुपादाय तद्वृत्तिबाधतात्ववत्तदविषयकप्रतीतिविषयतावच्छेदकं शुद्धबाधत्वं तदवच्छिन्नघटितं यत्स्वं तदघटितत्वस्य तत्राभावात्। नचैवं व्यभिचारघटितबाधेऽव्याप्तिः तत्रापि धूमव्यभिचारिवह्निमत्त्वमुपादाय तद्वृत्तिर्व्यभिचारतात्ववत्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकशुद्धव्यभिचारत्वावच्छिन्नघटितत्वस्य सूपपादत्वात् तदघटितत्वाभावात् अतोत्राघटितत्वम् न तदवच्छिन्नाविषयकप्रतीतिविषयत्वं किंतु तदवच्छिन्नविषयतावत्त्व-तदवच्छिन्नविषयिताऽव्यापकविषयिताशून्यत्वोभयाभाववत्प्रतीतिविषयतावच्छेदकधर्मवत्त्वं वाच्यम् तथाच धूमव्यभिचारिवह्निमत्त्वावच्छिन्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयित्वाऽव्यापकविषयिताशून्यत्वाभावप्रयुक्तोभयाभाववत्त्वस्य तादृशविशिष्टबाधप्रतीतौ सत्त्वान्नाव्याप्तिः, एवं च बाधविशिष्टव्यभिचारे बाधवैशिष्ट्यमादाय नातिव्याप्तिवारणं शक्यते कर्तुम्, अत्र तादृशोऽभयाभाववत्प्रतीतौ यद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यत्वमपि विशेषणं बोध्यं तेन मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयित्वाऽव्यापकघटादिविषयिताशालिमेयत्वविशिष्टव्यभिचारघटविषयकसमूहालम्बनप्रतीतौ तादृशोभयाभावस्य सत्त्वेपि न मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिरिति वाच्यम्। तथापि स्ववृत्तयो यावन्तस्तादृशान्यतमत्वविशिष्टा अभावाः प्रत्येकं तद्वान् यः स्वावच्छिन्नाऽविषयकप्रतीतिर्विषयतावच्छेदको धर्मस्तदवच्छिन्नघटितताावच्छेदकं यत्स्वं तदवच्छिन्नाऽघटितत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवक्षणेऽतिव्याप्तिविरहात् बाधविशिष्टव्यभिचारत्ववृत्तिरभावो बाधतात्वं व्यभिचारतात्वं च प्रत्ये-
कं तद्वत्स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकं बाधत्वं व्यभिचारत्वं च तदवच्छिन्नघटिततावच्छे-
दकं बाधविशिष्टव्यभिचारत्वं स्वपदग्राह्यं भवतीति तदवच्छिन्नाऽघटितत्वस्य तत्राभावात्, व्यभि-
चारघटितबाधे च नाव्याप्तिः तादृशबाधत्ववृत्तयस्तादृशान्यतमत्ववन्तोऽभावा व्यभिचारतात्वं बाधतात्वं
च तत्र बाधतात्ववत्स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकं न बाधत्वं विपरीतबाधतात्वस्य
तादृशत्वेपि तदवच्छिन्नघटितत्वं न तादृशबाधत्वस्येति स्वपदेन तादृशबाधत्वस्य धर्तुमशक्यत्वात्
मेयत्वविशिष्टतादृशबाधत्वमेव स्वपदग्राह्यं तदवच्छिन्नाऽघटितत्वस्य तत्र सत्त्वात्, एवं मेयत्वविशिष्टव्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिचारादौ नातिव्याप्तिः। नचैवमपि ह्रदेऽवच्छेदकावच्छेदेन वह्नेः साधनेऽवच्छेदकावच्छेदेन वह्न्यभाववद्ध्र-
दरूपबाधेऽव्याप्तिः तादृशबाधत्ववृत्तिर्यः ह्रदत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारतारूप-
यत्किंचित्प्रकारताविशिष्टग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतातिरिक्तवृत्तित्वाभावस्तद्वत्तादृश-
बाधत्वावच्छिन्नविषयिताशून्यशुद्धस्वरूपसंबन्धेन वह्न्यभावावगाहिज्ञानीयविषयितानिरूपकतावच्छेदकं
सामानाधिकरण्येन बाधत्वं तदवच्छिन्नघटितं स्वावच्छिन्नं भवतीति स्वस्य स्वाघटितत्वाभावादिति
वाच्यम्। स्ववृत्तियावद्धेत्वाभासविभाजकरूपेण साजात्यस्यात्र कल्पे विवक्षिततया तदानीं स्ववृत्तयो
यावन्तस्तादृशान्यतमत्वाक्रान्ता अभावाः प्रत्येकं तत्तदभाववत्स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दकावच्छिन्नघटितत्वावच्छेदकत्वस्य स्वस्मिन् विवक्षिततयाऽवच्छेदकावच्छेदेन बाधत्ववृत्तिस्तादृशान्यतमत्वाक्रान्तोऽभावः ह्रदत्वावच्छिन्नविशेष्यतानिरूपितह्रदत्वव्यापकवह्निप्रतियोगिकसंयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारताविशिष्टग्रहत्वव्यापकतादृशप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतातिरिक्तवृत्तित्वाभावः ह्रदत्वावच्छिन्नविशेष्यतानिरूपितशुद्धसंयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतातिरिक्तवृत्तित्वाभावश्च तत्र प्रथमाभावस्य सामानाधिकरण्येन बाधत्वे सत्त्वेपि द्वितीयाभावस्याऽवच्छेदकावच्छेदेन बाधत्व एव सत्त्वेन तस्य स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकत्वाभावात् विपरीतावच्छेदकावच्छेदेन बाधत्वस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशत्वेपि स्वावच्छिन्नस्य तदवच्छिन्नाऽघटिततया स्वपदेन तादृशबाधत्वस्य धर्तुमशक्यतयाऽव्याप्तिविरहादिति चेन्न। यादृशाङ्कुरविशेषसाध्यकस्थले मेयत्वविशिष्टव्यभिचारविषयकज्ञानं नियमतो बाधविषयकसमूहालम्बनमेव तत्र मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः तथाहि तत्र मेयत्वविशिष्टव्यभिचारत्वं न स्वपदेन धर्तुं शक्यते स्ववृत्तिस्तादृशान्यतमत्वाक्रान्तोऽभावो व्यभिचारतात्वरूपो बाधतात्वरूपश्च तत्र स्ववृत्तिव्यभिचारतात्ववत्स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकव्यभिचारत्वावच्छिन्नघटितत्वेपि स्वावच्छिन्नस्य स्ववृत्तिबाधतात्ववत्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं न बाधत्वं किंतु विपरीतबाधत्वम्, अस्तु वा बाधत्वमपि तदवच्छिन्नघटिततावच्छेदकं न स्वमित्यतोऽन्यदेव स्वपदग्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्यं तदवच्छिन्नाऽघटितत्वस्य मेयत्वविशिष्टव्यभिचारे सत्त्वात् पूर्वोत्तरकल्पयोर्नायं दोषः, एतेन—कल्पे मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयिताव्यापकत्वस्य व्याप्तिज्ञानप्रतिबन्धकतायां साध्यवत्ताज्ञानप्रतिबन्धकतायां च सत्त्वेपि यत्किंचित्प्रतिबन्धकतात्वेन व्याप्तिज्ञानप्रतिबन्धकतामुपादाय तादृशप्रतिबन्धकतावच्छेदकव्यभिचारविषयितायां मेयत्वविशिष्टव्यभिचारत्वावच्छिन्ननिरूप्यत्वाभावेनातिव्याप्तिविरहात्, अत्र—वन्दन्ति—कल्पे चोभयाभावाधिकरणताप्रयोजकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां स्वावच्छिन्नविषयिताप्रयोज्यत्वाभावात् हेतौ व्याप्त्यवगाहित्वाभावाधिकरणतायां विशिष्टान्तरविषयित्वाऽप्रयोज्यत्वाभावाच्च विशिष्टान्तराघटितत्वाभावेनातिव्याप्तिविरहादिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"कालाध्वनोरत्यन्तसंयोगे" इत्यनेन द्वितीयाधिकरणे उत्तरपदस्योत्तरकालपरत्वादिति तु न युक्तम् व्यापकतात्मकस्यात्यन्तसंयोगस्य प्रकृतेऽविवक्षितत्वादिति ॥ ॥ ॥

नन्वत्र व्यापकत्वनिवेशेऽव्याप्तिरेव[1] कुतो नाभिहिता वह्न्यभाववद्ध्रदविषयकनिश्चयोत्तरकालत्वव्यापकत्वस्यानुमितावभावादिति चेन्न। दोषविषयकयत्किंचिन्निश्चयोत्तरकालत्वव्यापकत्वस्यानुमितौ नि-

१ अङ्कुरविशेषपक्षकस्थले लक्षणसमन्वयसम्भवेनाऽव्याप्तिकथनं सुसंगतमिति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेशनीयत्वात् तथाच यद्विषयकयत्किंचिन्निश्चयोत्तरकालनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धो यो यद्रूपावच्छिन्नविषयकनिश्चयनिष्ठतद्व्यक्तित्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकनिश्चयनिष्ठावच्छेदकतानिरूपकोत्तरकालनिष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठावच्छेदकतानिरूपकभेदनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूपकावच्छेदकतात्वावच्छिन्नप्रतियोगिताकाभाव एवानुमितौ निवेशनीयः, द्वितीयाभावस्तु यद्रूपनिष्ठावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतानिरूपकाविषयितानिष्ठावच्छेदकतानिरूपकनिश्चयनिष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठावच्छेदकतानिरूपकोभयाऽवृत्तिधर्मनिष्ठाधेयतासंबन्धावच्छिन्नावच्छेदकतानिरूपिका सती निरवच्छिन्नत्वनिष्ठावच्छेदकतानिरूपिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याऽवच्छेदकत्वनिष्ठावच्छेदकता तन्निरूपकनिश्चयनिष्ठावच्छेदकत्वनिष्ठावच्छेदकतानिरूपकोत्तरकालनिष्ठावच्छेदकत्वनिष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठावच्छेदकत्वनिष्ठावच्छेदकतानिरूपकभेदनिष्ठावच्छेदकत्वनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपकावच्छेदकत्वनिष्ठप्रतियोगितानिष्ठावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकानुमितिनिष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठावच्छेदकतानिरूपकभेदनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूपकावच्छेदकतात्वावच्छिन्नप्रतियोगिताकाभाव एव सामान्याभाव उभयाभावे निवेशनीयः एतादृशसामान्याभावनिवेशान्नातिप्रसङ्गः, एवं रीत्या निवेशेऽव्याप्तिविरहादविवक्षितत्वाभिधानमिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वनिष्ठप्रतिबन्धकतावच्छेदकधर्मस्य स्वानन्तरोत्पन्नज्ञाननिष्ठप्रति-
बध्यतावच्छेदकधर्माभावप्रयोजकत्वादिति ॥ ॥

प्रतिबन्धकतावच्छेदकविषयितायाः स्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकप्रतियोगितासंबन्धाऽवच्छिन्नावच्छेदकताकाभावत्वघटितधर्मावच्छिन्ननिरूपकताकाधिकरणताप्रयोजकत्वमिति नियमः, इदं च प्रतिबन्धकज्ञानोत्तरज्ञाननिष्ठाधिकरणतायां, तदनुत्तरज्ञाननिष्ठाधिकरणतायां तु प्रतिबध्यज्ञानसामग्र्यभावस्य प्रयोजकत्वमिति निष्कर्षो बोध्यः ॥ श्रीः ॥

CC-0. In Public Domain. Digitization by eGangotri

यद्विषयिताप्रयुक्तस्तादृशोभयाभावस्तत्त्वमित्येतावन्मात्रे कृते ह्रदो वह्न्यभाववानित्यादिज्ञानीयवह्न्यभावादिविशिष्टह्रदविषयिताया इव तदन्तःपातिवह्न्यभावत्वादिविशिष्टविषयिताया अपि प्रतिबन्धकतावच्छेदककोटिप्रविष्टतया प्रतिबध्यतावच्छेदकस्य ह्रदत्वादिविशिष्टे वह्न्यादिवैशिष्ट्यावगाहित्वस्य विरहप्रयोजकतया बाधाद्येकदेशे वह्न्यभावादिरूपविशिष्टेतिव्याप्तिरिति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्वत्र विशेष्यदलसत्वे ह्रदो वह्निमानित्यत्र बाधासंग्रहः जातिमान्वह्न्यभाववानित्याकारकवह्न्यभाववद्ध्रदत्वविशिष्टविषयकनिश्चयोत्तरं ह्रदे वह्न्यवगाहिसमूहालम्बनानुमितेरुत्पादात् तत्र चोभयाभावाभावादतोऽव्यापकविषयिताशून्यत्वं निवेशनीयं तथाच बाधनिश्चयश्च न बाधैकदेशविषयित्वाऽव्यापकविषयिताशून्यः तादृशैकदेशमात्रविषयकनिश्चयीयतद्विषयिताप्रयुक्तो नोभयाभाव इति नैकदेशातिव्याप्तिरिति चेन्न । गोत्वाभावो गोत्वाभाववानित्यादौ गोत्वाभावादावतिव्याप्तेः उक्तरीत्याऽव्यापकविषयिताशून्यत्वनिर्वचने च प्रागुक्तरीत्यैव दोषोऽनुसंधेयः इति ॥ श्रीः ॥

नच यादृशविशिष्टविषयितासामान्यप्रयुक्तस्तादृशोभयाभावस्तत्त्वमित्येव

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्यक्, ह्रदत्वादिविशिष्टविषयितासामान्यान्तर्गतायां ह्रद इत्यादिज्ञानी-
यविषयितायां तादृशोभयाभावप्रयोजकत्वासत्त्वादतिव्याप्तेरनवकाशादि-
ति वाच्यम् । पाषाणमयो न वह्निमानिति ज्ञानविशिष्टस्य पर्वतः पाषाणम-
य इति ज्ञानस्य पर्वतो वह्निमानिति ज्ञानप्रतिबन्धकतया ज्ञानभेदेन विषयि-
ताभेदाभावात्पाषाणमयत्वविशिष्टपर्वतविषयितासामान्यस्यैवोभयाभावप्र-
योजकत्वात्पाषाणमयत्वविशिष्टपर्वतादावतिव्याप्तेर्दुर्वारत्वादिति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र सामान्यपदोपादानेपि विशेष्यदलाभावेऽतिव्याप्तिरुक्ता। नन्वत्र विशेष्यदलसत्त्वेपि धूमव्यभिचारिवह्निर्धूमवान् वह्नेरित्यत्र मेयत्वविशिष्टव्यभिचारेतिव्याप्तिः तादृशव्यभिचारविषयकानिश्चयोत्तरानुमितिसामान्ये व्यभिचारविषयितारूपविरोधिविषयिताप्रयुक्तोभयाभावस्य सत्त्वात् विशिष्टान्तराऽघटितत्वेन विशेषणेन न तद्वारणं शक्यम् तादृशवह्निर्धूमवानिति ज्ञानं प्रति मेयत्ववान् धूमाभाववान् मेयत्ववान् तादृशवह्निरिति ज्ञानविशिष्टज्ञानस्य प्रतिबन्धकतया तादृशोभयाभावाधिकरणताप्रयोजिकायां पक्षे साध्यवैशिष्ट्याभावाधिकरणतायां तादृशव्यभिचारविषयितायाः प्रयोजकत्वात् तत्रच शुद्धव्यभिचारविषयिताया अप्रयोजकत्वात् तथाच विशिष्टान्तरविषयित्वाऽप्रयोज्यस्वविषयिताप्रयोज्योभयाभावाधिक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणताप्रयोजकाभावाधिकरणताकत्वरूपविशिष्टान्तराऽघटितत्वस्य सत्त्वादतस्तद्वारणाय स्वविषयिता-
निष्ठप्रयोजकतायां ज्ञानवैशिष्ट्यनिष्ठप्रयोजकतानिरूपकप्रयोज्यतावदधिकरणतानिष्ठप्रयोज्यतानिरूपि-
तत्वा-ऽसाधारण्यविषयित्वाऽवृत्तित्वोभयाभावो निवेशनीयः एवं चोक्तस्थले धूमव्यभिचारिवह्नौ धूमवैशि-
ष्ट्याभावाधिकरणतानिष्ठप्रयोज्यतायां ज्ञानवैशिष्ट्यनिष्ठप्रयोजकतानिरूपकत्वस्य सत्त्वेन मेयत्ववि-
शिष्टव्यभिचारविषयितानिष्ठप्रयोजकतायामुभयाभावाभावान्नातिव्याप्तिः तथाच पाषाणमयत्वविशिष्टप-
र्वते च नातिव्याप्तिः तद्विषयितानिष्ठप्रयोजकतायामुक्तोभयाभावाऽसत्त्वादिति चेन्न । कपिसंयोग्येतत्त्वा-
दित्यत्र कपिसंयोगाभाववद्वृक्षेतिव्याप्तिवारणाय विशेष्यदलावश्यकत्वात् तादृशविशिष्टविषयकानिश्चयोत्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रज्ञाननिष्ठे पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणत्वे कपिसंयोगाभाववद्वृक्षविषयितायाः प्रयोजकत्वात् विशिष्टान्तरविषयिताया अप्रयोजकत्वाच्च विशिष्टान्तराऽघटितत्वस्य सत्त्वात् विशेष्यदलसत्त्वे चाऽव्याप्यवृत्तित्वप्रमाकालीनतादृशविशिष्टविषयकनिश्चयोत्तरानुमितावुभयाभावासत्त्वेनातिव्याप्तिवारणात् ॥ श्रीः ॥

एवं दोषविषयकलौकिकनिश्चयाव्यवहितपूर्वमनु-
मित्युत्पत्त्यापि तद्दोषोऽत उत्तरेति इति ॥ ॥

नन्वत्र साध्यानुमित्यनन्तरं लौकिकान्यदोषज्ञानस्य साध्यानुमितिप्रतिबध्यतयैवोत्पत्त्यसंभवात् तादृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शज्ञानमादायोत्तरपदप्रयोजनं नायातीति लौकिकदोषज्ञानपर्यन्तानुसरणं कृतं, तदसंगतम्, दोषविषयकलौकिकान्यज्ञानाव्यवहितप्राक्कालीनानुमितौ निरुक्तोभयाभावसत्त्वेपि तस्य विरोधिविषयिताप्रयुक्तत्वाभावादेव दोषविषयकनिश्चयाव्यवहितानुमितिसामान्ये विरोधिविषयताप्रयुक्तोभयाभावासत्त्वादव्याप्तिरिति उत्तरपदप्रयोजनमायातीति किमथ लौकिकप्रत्यक्षानुसरणमिति चेन्न। विरोधिविषयताप्रयुक्तत्वदलसत्त्वाऽसत्त्वयोरव्याप्तिरिति सूचनार्थं तदनुसरणादिति ॥ श्रीः ॥

तादृशोभयाभावप्रयोजकाविरोधिविषयतावत्त्वं यद्रूपविशिष्टविषयकत्वव्यापकं तद्रूपावच्छिन्नत्वं दोषत्वमित्यस्य सम्यक्त्वेपि यथासन्निवेशे न वैयर्थ्यमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताद्दशोभयाभावप्रयोजकविरोधिविषयितायां यद्रूपविशिष्टविषयकत्वव्यापकत्वमनुक्त्वा तत्सामानाधिकरण्यमात्रोपादाने बाधाद्येकदेशेऽतिव्याप्तिः बाधज्ञानीयह्रदत्वादिविशिष्टविषयकत्वसामानाधिकरण्यस्य ताद्दशविरोधिविषयितायां सत्त्वात् तदुपादाने च ह्रद इत्याकारकज्ञाने तदभावान्नातिव्याप्तिः । ननु ह्रदो वह्निमानित्यादौ वह्न्यभाववद्ध्रदविषयके जातिमान् वह्न्यभाववानिति ज्ञाने वक्ष्यमाणविरोधिविषयिताया अभावेन बाधाद्यसंग्रहभिया यद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्ययद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापकत्वस्य ताद्दशविरोधिविषयितायां विवक्षणीयतया सामानाधिकरण्यमात्रनिवेशेऽपि नैकदेशेऽतिव्याप्तिः ताद्दशैकदेशमात्रविषयकनिश्चये कुत्रापि ताद्दशविषयिताया अभावात् । नच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथापि गोत्वाभावो गोत्वाभाववानित्यत्र गोत्वाभावेऽतिव्याप्तिः गोत्वाभाववत्त्वविशिष्टविषयित्वाऽव्यापक-
विषयिताशून्यगोत्वाभावविषयकगोत्वाभावो गोत्ववानिति निश्चयत्वसामानाधिकरण्यस्य तादृशविरोधि-
विषयतायां सत्त्वादिति वाच्यम्। यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयिता विशिष्टविषयि-
त्वाव्यापिका तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वस्य विवक्षणीयत्वादिति चे-
न्न। कपिसंयोग्येतत्त्वादित्यादौ कपिसंयोगाभाववद्वृक्षादावतिव्याप्तेः अव्याप्यवृत्तित्वज्ञानानास्कन्दितत-
द्विषयकनिश्चयान्तर्भावेण विरोधिविषयितायां कपिसंयोगाभाववद्वृक्षविषयकत्वसामानाधिकरण्यस्य सत्त्वात्,
व्यापकत्वनिवेशे नायं दोषः लक्षणेऽव्याप्यवृत्तित्वभ्रमानास्कन्दितत्वस्यैव निश्चये निवेशनीयतया वृक्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपिसंयोगाभावेऽव्याप्यवृत्तित्वज्ञानस्य प्रमात्वेन तद्भ्रमानास्कन्दिताऽव्याप्यवृत्तित्वप्रमाकालीनताद्द-शविशिष्टविषयकनिश्चये विरोधिविषयित्वाभावात् । नच ज्ञानभेदेन विषयिताभेदाभावेनाव्याप्यवृत्तित्व-ज्ञानकालीनकपिसंयोगाभाववद्वृक्षविषयकनिश्चयेपि विरोधिविषयितायाः सत्त्वात् व्यापकत्वनिवेशेपि ना-तिव्याप्तिवारणं संभवतीति वाच्यम् । विरोधिविषयितावत्त्वमित्यनेन तदधिकरणत्वस्य विवक्षितत्वात् तत्रैव चोभयाभावप्रयोजकत्वस्य विशेषणत्वात् तथाच ज्ञानभेदेन विषयिताभेदाभावेपि तदधिकरणत्वस्य भिन्नतयाऽव्याप्यवृत्तित्वज्ञानास्कन्दितकपिसंयोगाभाववद्वृक्षविषयकनिश्चये विरोधिविषयितासत्त्वेपि ताद्द-शोभयाभावप्रयोजकत्वविशिष्टविरोधिविषयिताधिकरणत्वस्याभावेनातिव्याप्तिविरहात्, अथैवमप्यसा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धारण्येऽव्याप्तिः असाधारण्यविषयकत्वव्यापकत्वस्य विरोधिविषयितायामभावात् इति चेन्न । साध्यव्यापकीभूताभावप्रतियोगिहेतुमत्ताज्ञानभिन्नत्वा-ऽसाधारण्यविषयकत्वोभयाभाववद्यद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापकत्वस्य विरोधिविषयितायां वक्तव्यत्वात् तथाच तादृशहेतुमत्ताज्ञानमेवासाधारण्यविषयकमुभयाभाववद्भवति तत्रच तादृशहेतुविषयितैव पक्षे साध्याभावव्याप्यविषयितात्वेन तादृशविरोधिविषयितेति तत्संग्रहात्, अत्र चोभयाभावप्रयोजकाधिकरणतायां विषयित्वीयत्वानुपादाने ह्रदो जलवद्ध्रदकालीनवह्निमानित्यत्र वह्न्यभाववज्जलवत्यतिव्याप्तिः वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयकोक्तपक्षसाध्यवैशिष्ट्यावगाहिनिश्चयस्याहार्यत्वनियमेन तद्विषयकानाहार्यनिश्चयत्वस्य तादृशोभयाभावप्रयोजकप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतपक्षसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतानियतत्वात् । नच धूमव्यभिचारिवह्निर्धूमवान् वह्नेरित्यत्र मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः यथाश्रुतविशिष्टान्तराऽघटितत्वेन न वारयितुं शक्यते मेयत्ववान् धूमाभाववान् मेयत्ववान् धूमव्यभिचारिवह्निरिति ज्ञानयोर्ज्ञानविशिष्टज्ञानत्वेन पक्षे साध्यवैशिष्ट्यावगाहिज्ञानं प्रति प्रतिबन्धकतया तादृशपक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायामुभयाभावप्रयोजिकायां मेयत्वविशिष्टव्यभिचारविषयिताप्रयोज्यायां शुद्धव्यभिचारविषयित्वाऽप्रयोज्यत्वस्य सत्त्वात्, अतो विशिष्टान्तराऽघटितत्वघटकस्वविषयितानिष्ठप्रयोजकतायां ज्ञानवैशिष्ट्यनिष्ठप्रयोजकतानिरूपकप्रयोज्यतावदधिकरणतानिष्ठप्रयोज्यतानिरूपितत्वाऽसाधारण्यविषयित्वाऽवृत्तित्वोभया–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावो निवेशनीयस्तथाच उक्तस्थले मेयत्वविशिष्टव्यभिचारविषयितानिष्ठप्रयोजकतायासुभयाभावाभावा-न्नातिव्याप्तिः, एवं चोक्तस्थले वह्न्यभाववज्जलवति नातिव्याप्तिः पक्षे साध्यवैशिष्ट्यावगाहित्वाऽभा-वाधिकरणतानिष्ठप्रयोज्यताया ज्ञानवैशिष्ट्यनिष्ठप्रयोजकतानिरूपकतया वह्न्यभाववज्जलवत्त्वावच्छिन्न-विषयितानिष्ठप्रयोजकतायासुभयाभावाभावेन विशिष्टान्तराऽघटितत्वाभावादिति वाच्यम् । कपिसंयो-गाभाववान् वृक्षः कपिसंयोगीत्यत्र कपिसंयोगाभाववद्वृक्षेतिव्याप्तेः तद्विषयकाऽनाहार्यनिश्चयत्वव्याप्यत्व-स्याहार्यमात्रवृत्तिपक्षे साध्यवैशिष्ट्यावगाहित्वस्य योऽभावस्तदधिकरणतायां सत्त्वात् अधिकरणतायां विषयित्वीयत्वोपादाने च नातिव्याप्तिरिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरोधिविषयितापदेन तादृशोभयाभावप्रतियोगितावच्छेदककोटौ यद्रूपावच्छिन्ने यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निविष्टं तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नाभाव–तद्व्याप्यान्यतराविषयिताया विवक्षितत्वादिति ॥ ॥ ॥

ननु विरोधिविषयिताया एतादृशरूपत्वे पर्वतो वह्न्यभाववानित्यादौ वह्निमत्पर्वतरूपबाधेऽव्याप्तिः पर्वतत्वावच्छिन्नविषयितानिरूपितवह्नित्वावच्छिन्नविषयितायास्तादृशत्वाभावात् । नच य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रूपावच्छिन्नांशे यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निविष्टं तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नात्मकाभावप्रतियोगितावच्छेदकावच्छिन्न-तद्व्याप्यान्यतरविषयिताया विवक्षणान्नोक्ताव्याप्तिः पर्वते वह्निविषयिताया अपि तादृशत्वादिति वाच्यम् । तथापि ह्रदो वह्न्यभाववान् द्रव्यादित्यत्र सिद्धिविषयेऽतिव्याप्तेः तत्र वह्न्यभावाभावस्य वह्निरूपद्रव्यात्मकतया वह्न्यभावत्वस्य द्रव्यत्वावच्छिन्नात्मकाभावप्रतियोगितावच्छेदकतया तादृशोभयाभावप्रतियोगितावच्छेदककुक्षौ ह्रदत्वावच्छिन्नांशे द्रव्यत्वावच्छिन्नवैशिष्ट्यावगाहित्वस्य निविष्टतया ह्रदत्वावच्छिन्नविषयितानिरूपितवह्न्यभावत्वावच्छिन्नविषयिताया निरुक्तविरोधिविषयितारूपत्वात् । नच यद्धर्मावच्छिन्ने यद्धर्मावच्छिन्नावगाहित्वं निविष्टं तद्धर्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नविषयतानिरूपिततद्धर्मसमनियतानुयोगितानिरूपितप्रतियोगितावच्छेदकावच्छिन्न—तद्व्याप्यान्यतरविषयिता विवक्षणीया तथाच वह्न्यभावत्वं न द्रव्यत्वसमनियतानुयोगितानिरूपितप्रतियोगितावच्छेदकमिति नोक्तातिव्याप्तिरिति वाच्यम् । तथापि ह्रदो वह्न्यभाववान्धूमजनकतेजस इत्यादौ सिद्धिविषयेऽतिव्याप्तिः तत्रोभयाभावप्रतियोगितावच्छेदककोटौ ह्रदत्वावच्छिन्ने धूमजनकतेजस्त्वावच्छिन्नवैशिष्ट्याऽवगाहित्वं निविष्टं धूमजनकतेजस्त्वसमनियतानुयोगितानिरूपितप्रतियोगितावच्छेदकं वह्न्यभावत्वं भवतीति ह्रदत्वावच्छिन्नविषयितानिरूपितवह्न्यभावत्वावच्छिन्नप्रकारिताया विरोधिविषयितारूपत्वात् । नच तद्धर्मसमनियतानुयोगितानिरूपितप्रतियोगितावच्छेदकत्वे सति तद्धर्मावच्छिन्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयितानिरूपकतावच्छेदको यो धर्मस्तदवच्छिन्नविषयिता विवक्षणीया तथाच वह्न्यभाववत्त्वं न धूमजनकतेजस्त्वावच्छिन्नप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयितानिरूपकतावच्छेदकमिति तादृशविषयितायां विरोधिविषयितात्वाभावान्नोक्तातिव्याप्तिरिति वाच्यम् । पर्वते संयोगेन वह्नेः साधने कालिकसम्बन्धावच्छिन्नवह्न्यभावस्य हेतुत्वे सिद्धिविषयेऽतिव्याप्तेः पर्वतत्वावच्छिन्ने वह्न्यभाववत्त्वावच्छिन्नवैशिष्ट्यावगाहित्वस्योभयाभावप्रतियोगितावच्छेदककोटौ प्रविष्टतया वह्नित्वस्य वह्न्यभाववत्त्वसमनियतानुयोगितानिरूपितप्रतियोगितावच्छेदकतया तादृशप्रतिबन्धकतावच्छेदकविषयितानिरूपक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावच्छेदकतया च पर्वतत्वावच्छिन्नविषयितानिरूपितवह्नित्वावच्छिन्नविषयितायाः विरोधिविषयिता-रूपत्वादिति चेन्न । तादृशोभयाभावीयप्रतियोगितानिरूपितावच्छेदकताश्रयविषयता[2]विशिष्टविषयता[3] तादृशविषयताविशिष्टविषयताघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयताऽन्यतरविषय-तायास्तथाविधत्वात्, विषयतायां[4] विषयतावैशिष्ट्यञ्च[5] स्वाधिकरणत्व[6]-स्वाधिकरणत्वान्य[7]-

---

१ ह्रदो जलाभाववानित्यत्र जलवद्ध्रदविषयताजलाभावाभाववद्ध्रदविषयताच विरोधिनी सामानाधिकरण्येन साध्यक-स्थले अवच्छेदकावच्छेदेन साध्यकस्थले च। २ प्रकारताख्या। ३ विशेष्यताख्या। ४ ह्रदत्वावच्छिन्नविशेष्यतायाम्। ५ जलाभावप्रकारताख्यायाः। ६ जलाभावप्रकारतायाः। ७ जलाभावाभावप्रकारतायाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तरसम्बन्धेन तत्र प्रथमस्वाधिकरणत्वं[1] स्वविशिष्टविशेष्यता[2]वच्छेदकावच्छिन्नत्व-स्वविशिष्टप्रकारता[3]निरूपितत्वोभयसम्बन्धेन विशेष्यतायां[4] स्ववैशिष्ट्यंच स्वनिरूपितत्व-स्ववृत्तिभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन, भेदप्रतियोगितावच्छेदकतावच्छेदकसम्बन्धः स्वनिरूपितकिञ्चिद्धर्म[5]व्यापकप्रतियोगिकत्वावच्छिन्नसांसर्गिकविषयतानिरूपितत्वरूपः, प्रकारतायां[6] स्ववैशिष्ट्यंच स्वाश्रयत्व-स्वव-

---

१ सामानाधिकरण्येन साध्यकस्थलीयम्। २ ह्रदत्वावच्छिन्नविशेष्यतास्यायाः। ३ जलाभावाभावप्रकारतया।
४ ह्रदत्वावच्छिन्नविशेष्यतायाम्। ५ साध्यतावच्छेदकसम्बन्धनिष्ठया। ६ जलाभावाभावप्रकारतायां जलप्रकारतायां च।

त्वान्यतरसम्बन्धेन स्वाश्रयत्वं च स्वविशिष्टप्रकारता[१]निरूपिताभावत्वावच्छिन्नविशेष्यत्वावच्छेद्यत्व-स्वावच्छेदकरू[२]पावच्छिन्नस्वावच्छेदकसम्बन्[३]धावच्छिन्नप्रतियोगिताकाभाववृत्तिस्वा[४]श्रयसामान्यानिरूपित-प्रतियोगितावच्छेदकसम्बन्[५]धनिष्ठयत्किञ्चिद्धर्मव्यापकप्रतियोगिकत्वावच्छिन्नविषयतानिरूपितत्वोभयसम्ब-न्धेन, प्रकार[६]तायां स्ववैशिष्ट्यं च स्वावच्छेदकरू[७]पावच्छिन्नत्व-स्वावच्छेदकसम्ब[८]न्धावच्छिन्नप्रतियो-गितासम्बन्धावच्छिन्नत्वोभयसम्बन्धेन स्ववत्त्वं[९]च स्वावच्छेद्यविशेष्य[१०]तानिरूपितप्रतियोगितात्वावच्छि-

१ प्रतियोगितासम्बन्धावच्छिन्नया । २ जलाभावत्वेन । ३ स्वरूपेण । ४ जलाभावः । ५ संयोगः । ६ प्रतियोगि-त्वसम्बन्धावच्छिन्नायाम् । ७ जलाभावत्वेन । ८ स्वरूपेण । ९ जलप्रकारतायाम् । १० अभावत्वावच्छिन्नतया ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्नसांसर्गिकविषयतावत्त्वसम्बन्धेन तादृशविषयतावत्ता च स्वनिरूपितप्रकारतावच्छेदक[1]र्मावच्छिन्नत्व-स्वनिरूपितावच्छिन्नत्वानिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्संबन्ध[2]निष्ठकिञ्चिद्ध[3]र्मव्यापकप्रतियोगिकत्वावच्छिन्नसांसर्गिक[4]विषयतानिरूपितत्वोभयसम्बन्धेन, द्वितीयस्वाधिकरणत्वं[5] च स्वनिरूपितकिंचिद्ध[6]र्मव्यापकप्रतियोगिकत्वाऽवच्छिन्नसांसर्गिक[7]विषयतानिरूपितविशेष्यतावच्छेदका[8]वच्छिन्नत्व-स्वविशिष्टप्रकारता[9]निरूपितत्वोभयसम्बन्धेन स्ववैशिष्ट्यंच स्वावच्छेद्यविशेष्यता[10]निरूपितप्रतियोगितात्वावच्छिन्न-

---

१ जलत्वम्। २ संयोगे। ३ ह्रदत्वम्। ४ संयोगनिष्ठा। ५ अवच्छेदकावच्छेदेन साध्यतास्थले। ६ ह्रदत्वम्। ७ स्वरूपनिष्ठा। ८ ह्रदत्वम्। ९ जलाभावाऽभावप्रकारता जलप्रकारता च १० अभावत्वावच्छिन्ना।

सांसर्गिकविषयतावत्त्व–स्वाश्रयत्वान्यतरसम्बन्धेन सांसर्गिकविषयतावत्त्वं च स्वनिरूपितप्रकारताव-
च्छेदकरू[1]पावच्छिन्नत्व–स्वनिरूपितावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्सम्ब[2]न्धावच्छि-
न्नत्वोभयसंबन्धेन स्वाश्रयत्वं च स्वविशिष्टप्रकारतानिरूपिताभावत्वावच्छिन्नाविशेष्य[3]तावच्छेद्यत्व–स्व-
निरूपितसंसर्गताऽवच्छेदकेतरधर्मा[4]ऽनवच्छिन्नसंसर्गनिष्ठाऽवच्छेदकताकस्वाऽवच्छेदकं[5]रूपाऽवच्छिन्नप्राति-
योगिताकाऽभाववृत्तिस्वाऽश्रय[6]सामान्यानिरूपितप्रतियोगिताऽवच्छेदकसम्बँ[7]न्धाऽवच्छिन्नत्वोभयसम्बन्धेन

---

१ जलत्वम् । २ संयोगः । ३ जलाभावाऽभावनिष्ठा । ४ स्वरूपत्वव्यापकप्रतियोगिकत्वम् । ५ जलाभा-
मूवत्व । ६ जलाभावः । ७ संयोगः ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकारतायां स्ववैशिष्ट्यं च स्वावच्छेदक[1]रूपावच्छिन्नत्व–स्वनिरूपितसंसर्गतावच्छेदकेतरधर्मानवच्छिन्नसंसर्गनिष्ठावच्छेदकताकप्रतियोगित्वसंबन्धावच्छिन्नत्वोभयसम्बन्धेनेति, साध्यवदवृत्तिमत्पक्षस्य बाधत्वे तु स्वाधिकरणत्वत्रयान्यतमसम्बन्धेन विषयतावैशिष्ट्यं विवक्षणीयं तत्र तृतीयस्वाधिकरणत्वं स्वनिरूपितविशेष्यतावच्छेदकावच्छिन्नत्व–स्वावच्छेदकावच्छिन्नस्वावच्छेदकसम्बन्धावच्छिन्ननिरूपकताकाधिकरणतावद्वृत्तित्वाभावावच्छिन्नप्रकारतानिरूपितत्वोभयसम्बन्धेन बोध्यम् । ननु विरोधिविषयिताया एतादृशत्वे असाधारण्येऽव्याप्तिः असाधारण्यविषयकनिश्चयोत्तरानुमितिनिष्ठोभयाभावाधि-

१ जलाभाववत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणतायां विरोधिविषयिताप्रयुक्तत्वाभावात् असाधारण्यविषयितायामुक्तविरोधिविषयितात्वाभावादिति चेन्न । लक्षणघटकनिश्चये पक्षधर्मिकहेतुमत्ताज्ञानाकालीनत्वघटितोभयाभावमनिवेश्य पक्षधर्मिकसाध्यव्यापकीभूताभावप्रतियोगिहेतुमत्ताज्ञानभिन्नत्वाऽसाधारण्यविषयकत्वोभयाभावस्य निवेशनीयतया असाधारण्यविषयकनिश्चयस्य पक्षे तादृशहेत्ववगाहिन एवोभयाभाववत्तया तादृशनिश्चयमादायैवाऽसाधारण्ये लक्षणसमन्वयस्य कर्तव्यतया तत्रच विषयताविशिष्टविषयताविरहेऽपि विषयताविशिष्टविषयताघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयतारूपविरोधिविषयतायाः सत्त्वात् तत्प्रयुक्तत्वाच्च तादृशोभयाभावाधिकरणताया नाव्याप्तिरिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्न-
विषयिताबहिर्भूतविषयिताया वा विवक्षितत्वादिति ॥ ॥

पूर्वकल्पे विपरीतबाधादीनामसंग्रहात् कल्पान्तरानुसरणम् । नन्वत्र पर्वतो वह्निमान् वह्न्यभावादित्यत्र स्वरूपासिद्धावव्याप्तिः तद्विषयितायाः साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयितावहिर्भूतत्वाऽभावादिति चेन्न । विषयतायां विषयतावहिर्भूतत्वमनिवेश्य विषयतानिष्ठप्रयोजकतायां पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतानिष्ठप्रयोज्यतानिरूपितसाध्यवत्पक्षविषयतानिष्ठप्रयोजकताभिन्नत्वस्य निवेशनेनोक्ताव्याप्तिविरहादिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नच विशिष्टसाध्यवत्ताग्रहप्रतिबन्धकतावच्छेदिकायास्तादृशबाधादिविषयितान्तःपातिव्यभिचारादिविषयिताया अपि तादृशबाधादिविषयिताप्रयोज्यायां विशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यावगाहित्वाद्यभावाधिकरणतायां प्रयोजकतया तादृशबाधादेरसंग्रह इति वाच्यमिति ॥ ॥

ननु ह्रदो वह्निमानित्यादौ सर्वत्र दोषैकदेशविषयिताया अपि विशिष्टदोषविषयिताप्रयोज्यायामुभयाभावप्रयोजकाभावाधिकरणतायां प्रयोजकतया विशिष्टान्तरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्यता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्दशाधिकरणताकत्वाभावादसम्भव एव कुतो नाभिहित इति चेन्न । विशिष्टान्तरविषयितायां लक्षणाश्रयत्वविवक्षाभिप्रायेणाव्याप्त्यभिधानात् लक्षणाश्रयत्वं च यद्रूपावच्छिन्नविषयिताशालिनिश्चयोत्तरानुमितित्वव्यापको विषयिताप्रयुक्तोभयाभावः तद्रूपावच्छिन्नत्वं तथाच तादृशविशिष्टान्तरविषयित्वाऽप्रयोज्यत्वस्यैव विशिष्टान्तराऽघटितत्वघटकतया ह्रदादिविषयितायाश्चाऽतादृशत्वान्नासम्भवः व्यभिचारघटितबाधस्थले व्यभिचारविषयिताच तादृश्येवेत्यव्याप्त्यभिधानसंगतिरिति दिक् ॥ श्रीः ॥

यत्किंचिद्विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाऽप्रयोज्यत्वानिवेशेन तत्संग्रहसम्भवादिति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्र यत्किंचित्त्वाऽनुपादाने विशिष्टान्तरविषयितात्वव्यापकं रूपं प्रमेयत्वविषयितात्वादिकमेव तदवच्छिन्नप्रयोज्यत्वाऽप्रसिद्धिः तथाच स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वसमानाधिकरणरूपनिष्ठावच्छिन्नत्वसम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकविषयित्वनिष्ठाऽवच्छेदकतानिरूपकवृत्तित्वनिष्ठाऽवच्छेदकतानिरूपकभेदनिष्ठाऽवच्छेदकतानिरूपकप्रतियोगितानिष्ठाऽवच्छेदकतानिरूपकाऽवच्छेदकतात्वाऽवच्छिन्नाऽभावः प्रथमं व्यापकत्वं विशेषाऽभावः स्वाऽवच्छिन्नाऽविषयकप्रतीतिविषयितावच्छेदकव्यभिचारत्वावच्छिन्नविषयितानिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धो ग्राह्यः, प्रयोज्यत्वाभावस्तु सामान्याभावः स्वावच्छिन्नाऽविषयकप्रतीतिविषयितावच्छेदकत्वसमानाधिक-

CC-0. In Public Domain. Digitization by eGangotri

रणावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपकविषयितानिष्ठावच्छेदकतानिरूपकभेदनिष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिष्ठावच्छेदकतानिरूपकावच्छेदकतात्वावच्छिन्नप्रतियोगिताकाभाववद्रूपावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वं नास्तीति सिद्धः स्वनिष्ठावच्छेदकतानिरूपकविषयित्वनिष्ठप्रतियोगितासम्बन्धावच्छिन्नावच्छेदकतानिरूपकशून्यत्वनिष्ठावच्छेदकतानिरूपकप्रतीतिनिष्ठावच्छेदकतानिरूपकविषयितानिष्ठावच्छेदकतानिरूपकावच्छेदकत्वनिष्ठावच्छेदकतानिरूपकसामानाधिकरण्यनिष्ठावच्छेदकतानिरूपकरूपनिष्ठावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकत्वनिष्ठावच्छेदकतानिरूपकविषयितानिष्ठावच्छेदकत्वनिष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठावच्छेदकत्वनिष्ठावच्छेदकतानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रूपकभेदनिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपकप्रतियोगितानिष्ठावच्छेदकत्वनिष्ठावच्छेदकतानिरूप-
कावच्छेदकतात्वावच्छिन्नप्रतियोगितानिष्ठावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकरूपनिष्ठाव-
च्छेदकतानिरूपकावच्छिन्नत्वनिष्ठावच्छेदकनिरूपकप्रयोजकतानिष्ठावच्छेदकतानिरूपकनिरूपितत्वानि-
ष्ठावच्छेदकतानिरूपकप्रयोज्यतात्वावच्छिन्नप्रतियोगिताकाभावो ग्राह्यः, अत्र सामान्याभावाऽनिवेशे
मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणमेव न सम्भवति मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाविष-
यिताप्रयोज्यायां तादृशोभयाभावप्रयोजकहेतुधर्मिकव्याप्त्यवगाहित्वाभावाधिकरणतायां तादृशव्य-
भिचारत्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकबाधत्वावच्छिन्नविषयितात्वव्यापकरूपावच्छिन्नाऽप्र-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योज्यत्वस्य सत्त्वात् तथाच स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकयत्किंचिद्रूपावच्छिन्नविषयितानिष्ठभेदप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकरूपवृत्तिप्रयोज्यताशून्यत्वं निविष्टम् एवंच व्यभिचारघटितबाधस्थले पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतानिष्ठप्रयोज्यता च न तादृशबाधाविषयकप्रतीतिविषयतावच्छेदकशुद्धव्यभिचारत्वावच्छिन्नविषयितानिष्ठभेदप्रतियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगिताऽनवच्छेदकशुद्धव्यभिचारविषयितात्वगतसमुदायत्ववृत्तिरिति नाव्याप्तिरिति दिक् ॥ श्रीः ॥

व्यभिचारादिघटितबाधादिविषयिताप्रयोज्याया दीधितिकारोक्तोभयाभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाधिकरणताया व्याप्त्याद्यवगाहिताविरहप्रयोज्यत्वेन यत्किंचिद्विशिष्टा-
न्तरविषयतात्वव्यापकरूपावच्छिन्नतादृशबाधादिविषयिताऽन्तःपातिव्यभि-
चारादिविषयिताप्रयोज्यत्वनियमात् तत्र तत्संग्रहाय तादृशोभयाभावप्रयो-
जकाभावाधिकरणतापर्यन्तनिवेश इति ॥ ॥

नन्वत्रोभयाभावप्रयोजकाभावाधिकरणतापर्यन्ताऽनिवेशे व्यभिचारघटितबाधेऽव्याप्तिरभिहिता सा-
च न संगच्छते तदनुपादानेपि यत्र धूमव्यभिचारिवह्निमान् धूमाभाववानिति दोषज्ञानं धूमव्याप्तिवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्टवह्निज्ञानं जायतामितीच्छा च तदनन्तरं जायमानानुमितौ हेतौ व्याप्त्यवगाहित्वाभावो हि सामग्र्यभावप्रयुक्तः नतु पूर्वज्ञाननिष्ठव्यभिचारविषयिताप्रयुक्तः प्रतिबन्धकज्ञाननिष्ठविरोधिविषयिताया एव प्रयोजकत्वस्वीकारात् इच्छाविरहविशिष्टविरोधिज्ञानस्यैव प्रतिबन्धकतया तादृशदोषज्ञानस्य व्याप्त्यवगाहित्वावच्छिन्नं प्रत्यप्रतिबन्धकत्वात् तथाच तादृशानुमितिनिष्ठोभयाभावाधिकरणता न व्यभिचारविषयिताप्रयुक्तहेतुधर्मिकव्याप्त्यवगाहित्वाभावप्रयुक्तेति तन्निष्ठतादृशबाधविषयिताप्रयोज्यत्वमादाय लक्षणगमनसम्भवात् । नच प्रतिबध्यतावच्छेदकशरीरेऽनाहार्यत्वनिवेशेनेच्छाकालीनविरोधिज्ञानस्यापि प्रतिबन्धकतया तदीयव्यभिचारविषयिताया व्याप्त्यवगाहित्वाभावप्रयोजकतया तदुत्तरानुमितिनिष्ठो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयाभावाधिकरणतायां व्यभिचारविषयिताप्रयोज्यत्वमस्तीति तत्राव्याप्तिरेवेति वाच्यम् । सत्प्रतिपक्षग्रन्थे इच्छाव्यक्तीनामुत्तेजकत्वेऽनन्ततद्व्यक्तीनां तत्तद्व्यक्तित्वेनोत्तेजकत्वेपि तदभावानामेकत्र द्वयमिति रीत्या विशेषणत्वे गौरवाभावात् । अनाहार्यत्वस्य प्रतिबध्यतावच्छेदककुक्षौ निवेशे आहार्यज्ञानं प्रतीच्छायाः पृथक्कारणत्वे गौरवाच्चेच्छाया उत्तेजकतामतस्यैव भट्टाचार्यैरादृतत्वात् इच्छाकालीनतादृशज्ञानस्याप्रतिबन्धकतया तन्निष्ठव्यभिचारविषयिताया अप्रयोजकत्वादिति। मैवम् । तथापि ह्रदेऽवच्छेदकावच्छेदेन वह्नेः साध्यतायामवच्छेदकावच्छेदेन बाधेऽव्याप्त्यापत्तेः अवच्छेदकावच्छेदेन बाधविषयिताप्रयोज्यायां तादृशोभयाभावाधिकरणतायां तादृशबाधाऽविषयकप्रतीतिविषयसामाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिकरण्येन बाधविषयितायाा अपि प्रयोजकत्वात्, उक्तविवक्षायां तु नाव्याप्तिः तादृशोभयाभावप्रयोजकीभूता या पक्षे सामानाधिकरण्येन साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणता तस्या अवच्छेदकावच्छेदेन बाधविषयिताप्रयोज्यायाः सामानाधिकरण्येन बाधविषयिताप्रयोज्यत्वाभावादिति तादृशोभयाभावप्रयोजकसामानाधिकरण्येन वह्न्यवगाहित्वाभावमादाय लक्षणसमन्वयसम्भवादिति स्वविषयिताप्रयोज्यत्वानुपादाने यत्र किमपि प्रतिबन्धकज्ञानं नासीत् स्वसामग्र्यभावादेव समूहालम्बनानुमित्यादिकं न जातं घटाद्यनुमितिरेव जाता तन्निष्ठोभयाभावप्रयोजकाभावाधिकरणता न किंचिद्विशिष्टान्तरविषयताप्रयोज्येति तत्र मेयत्वविशिष्टव्यभिचारेपि विशिष्टान्तरविषयित्वाप्रयोज्योभयाभावप्रयोजका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भावाधिकरणताकत्वस्य सत्त्वात्तत्रातिव्याप्तिः । नच तद्वारणाय विषयिताप्रयोज्यत्वमेवोपादीयतामिति वाच्यम् । यत्र धूमव्याप्यवह्निमानिति परामर्शः पर्वतो धूमाभाववानिति बाधभ्रमस्तदनन्तरज्ञाने उभयाभावप्रयोजिकायां पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां बाधभ्रमीयविषयिताप्रयोज्यत्वस्य विशिष्टान्तरविषयित्वाऽप्रयोज्यत्वस्य च सत्त्वात् तदधिकरणतामादाय मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिरतः स्वविषयिताप्रयोज्यत्वाभिधानं तावन्मात्रे कृते तत्रैवातिव्याप्तिरतो विशेषणदलम्, अत्रोभयाभावप्रयोजकाधिकरणतायामभावीयत्वानुपादाने धूमवान्वह्नेरित्यत्र मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः स्मृत्यनुभवसाधारणविरोधिविषयकनिश्चयत्वेनैव प्रतिबन्धकतया मेयत्ववान् धूमाभाववानिति

CC-0. In Public Domain. Digitization by eGangotri

निश्चयविशिष्टमेयत्ववान् धूमव्यभिचारिवह्निरिति स्मरणात्मकनिश्चयस्य वह्नौ धूमवत्ताज्ञानप्रतिबन्धकतया तादृशस्मरणोत्तरज्ञानवृत्तिसाध्यव्याप्तिवैशिष्ट्यावगाहित्वघटितोभयाभावं प्रति तादृशस्मरणात्मकप्रतिब-न्धकज्ञानवृत्तिमेयत्वविशिष्टव्यभिचारविषयितायाः प्रयोजकतया तदधिकरणत्वस्यापि प्रयोजकत्वात् का-र्यतावच्छेदकविषयितां प्रति कारणतावच्छेदकविषयितायाः प्रयोजकत्वात् स्मृतिनिष्ठमेयत्वविशिष्टव्यभि-चारविषयित्वाधिकरणत्वस्यानुभवीयविषयिताप्रयोज्यत्वात् विशिष्टान्तरविषयित्वाऽप्रयोज्यत्वाच्च विशे-ष्यदलस्य च सत्त्वात्, अभावीयत्वोपादानेच न साऽभावाधिकरणतेति नातिव्याप्तिः अधिकरणतात्वेना-धिकरणतामनुपादाय विशिष्टान्तरविषयित्वाऽप्रयोज्यस्वविषयिताप्रयोज्यतादृशोभयाभावप्रयोजकाभाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरूपकत्वं विशिष्टान्तराऽघटितत्वमित्युक्तौ भावभेदोऽवृत्तिरित्यत्र पक्षे साध्यप्रकारत्वाभावेऽतिव्याप्तिः तत्रहि भावभेदवान् बाधः भावभेदो ह्यभावत्वं तथाचाभावत्ववानिति ज्ञानीयाभावत्वावच्छिन्नविषयितेव पक्षे साध्यप्रकारत्वाभाव इति स्मरणात्मकज्ञानीयतादृशाऽभावत्वावच्छिन्नविषयितापि तादृशोभयाऽभावप्रयोजिका सामान्येऽवृत्तित्वज्ञानंप्रति विशेषवत्ताज्ञानस्य बाधतुल्ययोगक्षेमतया प्रतिबन्धकत्वात् स्मृतीय-

अत्रायं भावः अवृत्तिरूपसाध्यप्रकारत्वाभावो नाम प्रतियोगितासम्बन्धेन वृत्तित्वविशिष्टाभाववन्निष्ठप्रकारत्वाभावः सोऽपि प्रतियोगितासम्बन्धेन तादृशप्रकारत्वविशिष्टाभावरूपः तथाच प्रथमाभावनिर्वचनशरीरे प्रतियोगितासम्बन्धेन वृत्तित्वात्मकविशेषिताभाववत्त्वस्याभावे भानात् द्वितीयाभावे पूर्वनिखिलपदार्थघटितप्रकारत्वस्य प्रतियोगितासम्बन्धेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ताद्दशविषयिताप्रयोजिका तद्विषयकानुभवादिविषयितेति विशिष्टान्तरविषयिताप्रयोज्यताद्दशोभयाभाव-

---

विशेषणतया भानात् तत्रापि निरुक्तप्रकारत्वविशेषिताभाववत्त्वविशिष्टाभावस्य भानात् सोपि बाध एव तथाच द्विविध-दाधस्य लक्ष्यत्वेपि पक्षावृत्तित्वविशिष्टस्य मेयत्वविशिष्टव्यभिचारवदलक्ष्यत्वमेव एतदर्थमेव पक्षस्याधेयतासम्बन्धेन विशेषणत्वमुपात्तम् । नच पक्षवृत्तित्वविशिष्टाभावत्वविशिष्टावच्छिन्नमुपेक्ष्य ताद्दशसाध्यप्रकारत्वाभावपर्यन्तानुधावनं विफल-मिति वाच्यम् । तस्य भ्रमविषयत्वेनाप्रसिद्धत्वात् ताद्दशसाध्यप्रकारत्वाभावस्य च पक्षे प्रसिद्धत्वात् । नचैवं स्मृतीयविष-यितायां स्वीयानुभवीयविषयिताप्रयोज्यत्ववत् विशिष्टान्तरीयपक्षवृत्तित्वाऽघटितकेवलसाध्यप्रकारत्वाभावीयविषयितात्व-व्यापकरूपावच्छिन्नप्रयोजकतानिरूपितत्वमिति वाच्यम् । मानाभावात् ।

CC-0. In Public Domain. Digitization by eGangotri

प्रयोजकस्मृतीयविषयितात्मकताहशाभावनिरूपकत्वस्य ताहशप्रकारत्वाभावे सत्त्वात् तद्विषयकनिश्चयोत्तरानुमितिसामान्ये ताहशोभयाभावस्य च सत्त्वात्। नच भावभेदोऽवृत्तिरिति ज्ञानं नियताहार्यतया निर्वह्निर्वह्निमानिति ज्ञानतुल्यं नियमेनाभावत्वप्रकारकत्वात् तदीयसाध्यवत्पक्षविषयिताव्यापकप्रतिबध्यतावच्छेदकविषयित्वाऽप्रसिद्धिः तथाचैतल्लक्षणे ताहशस्थले दोषो ग्रन्थकारेण स्वयं वक्तव्य इति वाच्यम्। तथापि भावभेदे वृत्तिभेदसाधने तत्रातिव्याप्तिः तस्य नियताहार्यत्वाभावात्, एवमभावः प्रतियोगितासंबन्धावच्छिन्नप्रतियोगिताकप्रकारत्वाभाववानित्यत्र पक्षे साध्यप्रकारत्वाभावेऽतिव्याप्तिश्चेति अधिकरणतात्वेन तन्निवेशः। नन्वत्रासाधारण्येऽव्याप्तिः विशेष्यदलघटकनिश्चये पक्षधर्मिकहेतुमत्ताज्ञानाकालीनत्वघटि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोभयाभावं निवेश्य विशेष्यदलोपपादनेपि विशिष्टान्तराऽघटितत्वस्याभावात् असाधारण्यविषयिताप्रयो-
ज्यायास्तादृशोभयाभावप्रयोजिकायाः पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताया विशिष्टान्तर-
हेतुमत्पक्षविषयिताप्रयोज्यत्वात् , अथ सर्वं गगनवदित्यत्र गगनाभाववद्घटादौ बाधेऽव्याप्तिः सर्वं गननव-
दिति ज्ञानं प्रति गगनाभाववद्घटपटादिविषयकनिश्चयानां गगनाभावत्वावच्छिन्नप्रकारतानिरूपिता-
वच्छिन्नविशेष्यताशालिनिश्चयत्वेनानुगतरूपेणैव प्रतिबन्धकतया गगनाभाववद्घटत्वावच्छिन्नविषयिता-
प्रयोज्यायां तादृशोभयाभावप्रयोजिकायां पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां गगनाभावव-
त्पटादिरूपविशिष्टान्तरविषयितात्वव्यापकगगनाभावत्वावच्छिन्नप्रकारतानिरूपितावच्छिन्नविषयितात्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नप्रयोजकतानिरूपितप्रयोज्यतायाश्च सत्त्वात् अतो विशिष्टान्तरे स्वावच्छिन्नविषयित्वाव्यापक-विषयिताशून्यज्ञानीयविषयितानिरूपकत्वस्य तद्विषयितायां वा तादृशज्ञानीयत्वस्यावश्यं वक्तव्यतया हेतुमत्पक्षस्य विशिष्टान्तरत्वाभावात् न तद्विषयिताप्रयोज्यत्वमादायासाधारण्येऽव्याप्तिः। न चैवं ह्रदो वह्निमानित्यादौ बाधाद्यसंग्रहः तत्र बाधैकदेशवह्न्यभावादेरेव तादृशविशिष्टान्तरतया तद्विषयितात्व-व्यापकरूपावच्छिन्नप्रयोजकताया अप्रसिद्धेरिति वाच्यम्। अभावो न वह्नीय इति ज्ञानं प्रति वह्न्य-भाव इति ज्ञानस्य प्रतिबन्धकतया वह्न्यभावविषयितात्वव्यापकरूपावच्छिन्नप्रयोजकतानिरूपितप्रयो-ज्यताया अभावे वह्नीयत्वाभावावगाहित्वाभावाधिकरणतायां प्रसिद्धत्वात्। नचैवमपि पर्वतो वह्न्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाववानित्यत्र वह्निमत्पर्वतरूपबाधेऽव्याप्तिः तदेकदेशवह्न्यादिविषयितात्वव्यापकरूपावच्छिन्नप्रयोजकत्वाऽप्रसिद्धेरिति वाच्यम् । तत्रापि वह्निरवृत्तिरिति ज्ञानं प्रति तादृशबाधैकदेशवह्निमद्विषयकनिश्चयस्य प्रतिबन्धकतया प्रसिद्धिसंभवादिति । मैवम् । घटोऽवृत्तिरित्यत्र घटवति बाधे तादृशविशिष्टान्तराऽप्रसिद्ध्याऽव्याप्तेः । नच तत्रापि घटत्वावच्छिन्नविषयिताशालिज्ञानस्य घटवान् पट इति ज्ञानं प्रति घट इति स्मृतिं प्रत्यपि च कारणतया कार्यतावच्छेदकविषयितायामेव घटत्वावच्छिन्नविषयिताप्रयोज्यत्वं प्रसिद्धमिति वाच्यम् । घटवान् पट इति ज्ञानं प्रति घट इति ज्ञानस्य घटत्वप्रकारताशालिज्ञानत्वेनैव कारणतया घट इति स्मृतिं प्रत्यपि तत्तद्विषयिताशालिज्ञानत्वेनैव कारणतया घटत्वप्रकारि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तात्वस्य तत्तद्धटविषयितात्वस्य च घटत्वावच्छिन्नविषयितात्वव्यापकत्वाभावेन तादृशविषयितात्व-
व्यापकरूपावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वस्याऽप्रसिद्धेरिति चेन्न। विशिष्टान्तरविषयित्वाऽप्रयो-
ज्येत्यनेन स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयस्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छे-
दकधर्माभाववत्त्वस्य विवक्षितत्वात्, अभावप्रतियोगितावच्छेदकसंबन्धश्च स्वावच्छिन्नविषयित्वाऽव्या-
पकविषयिताशून्यज्ञानीयस्वावच्छिन्नविषयितात्वव्यापकरूपावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वसंब-
न्धः, एवंच घटोऽवृत्तिरित्यत्र घटवदात्मकबाधविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयतदविषयक-
प्रतीतिविषयतावच्छेदकघटत्वस्यायं व्यधिकरणसंबन्ध इति तेन संबन्धेन तदभाववती बाधविषयिताप्रयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्या पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणता भवतीति न तत्राव्याप्तिः, मेयत्वविशिष्टव्यभिचारादौ च नातिव्याप्तिः उक्तसंबन्धेन शुद्धव्यभिचारत्वस्य हेतौ व्याप्तिवैशिष्ट्यावगाहित्वाभावाधिकरणतायां तादृशव्यभिचारविषयिताप्रयोज्यायां सत्त्वात्। ननु तथापि अभावो गगनत्ववानाधेयत्वादित्यत्र हेतुमत्पक्षघटितासाधारण्येऽव्याप्तिः तादृशासाधारण्यविषयिताप्रयोज्यायाः पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायाः गगनत्वव्यापकाभावप्रतियोग्याधेयत्वरूपासाधारण्यविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयाऽसाधारण्याऽविषयकप्रतीतिविषयतावच्छेदकाधेयत्ववदभावत्वावच्छिन्नविषयितात्वव्यापकरूपावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वनियमात् । नच विशिष्टान्तरविषयितायां प्रकृतलक्षणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रयीभूतत्वं निवेशनीयं तथाच हेतुमत्पक्षविषयिताच न तादृशीति वाच्यम्। ह्रदो वह्निमानित्यादाव-
पि तादृशविशिष्टाऽप्रसिद्ध्याऽव्याप्त्यापत्तेः। नच प्रतियोगिनि स्वत्वमन्तर्भाव्य विशिष्टान्तराऽघटित-
त्वं निर्वाच्यं तथाहि स्वावच्छिन्नाऽविषयकप्रतीतिविषयतावच्छेदकं यत्स्वावच्छिन्नविषयित्वाऽव्यापक-
विषयिताशून्यज्ञानीययद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेद-
कं तदवच्छिन्नविषयिताप्रयोज्य-स्वविषयिताप्रयोज्योभयाभावप्रयोजकाभावाधिकरणताकं यद्यत्स्वं तत्त-
दघटितत्वं तथाच सर्वत्र मेयत्वविशिष्टदोषतावच्छेदकमादाय लक्षणसमन्वयः स्वस्य स्वाऽघटितत्वा-
भावादेव मेयत्वविशिष्टदोषे नातिव्याप्तिः, इदानीं विशिष्टान्तरविषयितायां प्रकृतलक्षणाश्रयीभूतत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवक्षणीयं अतो न हेतुमत्पक्षघटिताऽसाधारण्येऽव्याप्तिरिति वाच्यम् । आधेयत्वाऽभाववानभावो गगनत्ववानाधेयत्वादित्यत्रासाधारण्येऽव्याप्तेः तत्र हेतुमत्पक्षरूपविशिष्टान्तरस्य प्रकृतलक्षणाश्रयीभूतत्वात्, एवमनुयोगिनि स्वत्वान्तर्भावे घटो गगनाभाववदभाववत्कालीनगगनवान् अभाववद्घटकालीनपटादित्यत्राऽभाववति गगनाभावोऽव्याप्यवृत्तिरिति ज्ञानकालीनताद्दशगगनाभाववद्घटरूपबाधनिश्चयोत्तरज्ञाने ताद्दशोभयाभावप्रयोजकपक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां विशिष्टान्तरविषयित्वाऽप्रयोज्यत्वसत्त्वेन ताद्दशनिश्चयमादाय लक्षणसमन्वयः संभवति, प्रतियोगिनि स्वत्वान्तरभावेतु तत्राव्याप्तिः अभाववद्घटत्वात्मकं यदुक्तविशिष्टान्तरतावच्छेदकं तदवच्छिन्नविषयिताप्रयोज्य–स्वावच्छिन्नविषयिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयोज्योभयाभावप्रयोजकाभावाधिकरणताप्रसिद्ध्या स्वपदेन तादृशबाधत्वस्यापि धर्तुं शक्यत्वात् अभाववद्घटस्य प्रकृतलक्षणाश्रयत्वात् स्वस्य स्वाघटितत्वाभावादिति चेन्न । विशिष्टान्तरविषयितानिष्ठ-प्रयोजकतायां ज्ञानवैशिष्ट्यनिष्ठप्रयोजकतानिरूपितप्रयोज्यतावदधिकरणतानिष्ठप्रयोज्यतानिरूपितत्वाऽसाधारण्यविषयित्वाऽवृत्तित्वोभयाभावस्य निवेशनीयत्वात्, तथा चोक्तहेतुमत्पक्षघटिताऽसाधारण्ये नाव्याप्तिः हेतुमत्पक्षविषयितानिष्ठप्रयोजकतायामसाधारण्यविषयकज्ञानवैशिष्ट्यनिष्ठप्रयोजकतानिरूपित-प्रयोज्यताशालिपक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतानिष्ठप्रयोज्यतानिरूपितत्वाऽसाधारण्यविषयित्वावृत्तित्वोभयस्यैव सत्त्वेनोभयाभावाऽभावात्, इदानीमनुयोगिन्येव स्वत्वान्तर्भावः । नचैवं मेयत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टबाधेऽतिव्याप्तिः वह्निव्यापकीभूताभावप्रतियोगिधूमवान् ह्रदः वह्न्यभाववान् ह्रदः प्रमेय इति असाधारण्यभ्रमात्मकमेयत्वविशिष्टबाधविषयकज्ञानोत्तरज्ञाननिष्ठायां पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां मेयत्वविशिष्टबाधविषयिताप्रयोज्यायां शुद्धबाधात्मकविशिष्टान्तरविषयिताप्रयोज्यत्वसत्त्वेऽपि बाधविषयितानिष्ठप्रयोजकतायां निरुक्तोभयसत्त्वेनोभयाऽभाववती चान्यविषयितानिष्ठप्रयोजकतैवेति तन्निरूपितप्रयोज्यताशून्यत्वस्य तत्र सत्त्वादिति वाच्यम् । स्वविषयितानिष्ठप्रयोजकतायामपि तादृशोभयाभावस्य विशेषणत्वात् । नचैवमप्याधेयत्वं निरूपितत्वाभाववदाधेयतात्वादित्यत्र निरूपितत्वव्याप्यवदाधेयत्वरूपसत्प्रतिपक्षे बाधघटितेऽव्याप्तिः तत्र बाधसत्प्रतिपक्षविषयितयोरेकत्रैवाधिक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणतायां प्रयोजकत्वात् बाधविषयितानिष्ठप्रयोजकतायामुक्तोभयाभावस्य सत्त्वाच्चेति वाच्यम् । तत्र बाधस्यैव दोषत्वाङ्गीकारात्, अस्तु वा बाधघटितसत्प्रतिपक्षस्य दोषत्वं तथापि विशिष्टान्तरविषयितानिष्ठप्रयोजकतायां स्वविषयितानिष्ठप्रयोजकतावदन्यत्वं विशेषणं देयम्, तादृशप्रयोजकतावत्त्वंच स्वावच्छेदकानवच्छिन्नत्व–स्वनिरूपितप्रयोज्यतावदधिकरणतानिष्ठप्रयोज्यतानिरूपितत्वोभयसंबन्धेन, तथाच बाधविषयितानिष्ठप्रयोजकताच तादृशोभयसंबन्धेन सत्प्रातिपक्षविषयितानिष्ठप्रयोजकताविशिष्टैवेति तद्भिन्न्या सत्प्रतिपक्षैकदेशान्तरविषयितानिष्ठा किंचिदन्यनिरूपितप्रयोजकतैव तन्निरूपितप्रयोज्यताशून्यत्वस्य स्वविषयिताप्रयोज्याधिकरणतायां सत्त्वान्नाव्याप्तिः, इदानीं विशिष्टान्तरविषयितानिष्ठप्रयोजकतायां प्रागुक्तो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयाभावोपि न विवक्षणीयः अभावो गगनत्ववानाधेयत्वादित्यत्राधेयत्ववदभावरूपहेतुमत्पक्षविषयिता-
निष्ठप्रयोजकतायामुक्तोभयसंबन्धेनाऽसाधारण्यविषयितानिष्ठप्रयोजकतायाः सत्त्वेनाऽव्याप्तिविरहात् ,
यद्यपि स्वविषयितानिष्ठप्रयोजकतायामुक्तोभयाभावाऽनिवेशेपि न मेयत्वविशिष्टबाधादावुक्तरीत्याति-
व्याप्तिः शुद्धबाधविषयितानिष्ठप्रयोजकतायां मेयत्वविशिष्टबाधविषयितानिष्ठप्रयोजकतावच्छेदकाव-
च्छिन्नत्वसत्त्वेन तदनवच्छिन्नत्वघटितोभयसंबन्धेन स्वविषयितानिष्ठप्रयोजकतावदन्यत्वस्य सत्त्वेन तादृ-
शप्रयोजकतानिरूपितप्रयोज्यताशून्यत्वस्य स्वविषयिताप्रयोज्यतादृशाधिकरणतायामभावेन विशि-
ष्टान्तराघटितत्वाभावात्, तथापि ह्रदो वह्निमानित्यत्र वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयितानिष्ठप्रयोजकतायामुक्तोभयसंबन्धेन तादृशविषयितानिष्ठप्रयोजक-
तायाः सत्त्वेन तदन्यप्रयोजकतानिरूपितप्रयोज्यताशून्यत्वस्य तादृशविशिष्टविषयिताप्रयोज्याधिक-
रणतायां सत्त्वात्, तत्र तादृशोभयाभावनिवेशे तु स्वपदेन तादृशविशिष्टमेव न धर्तुं शक्यते तद्वि-
षयितानिष्ठप्रयोजकतायाम् असाधारण्यविषयित्वाऽवृत्तित्व–ज्ञानवैशिष्ट्यनिष्ठप्रयोजकतानिरूपितप्रयो-
ज्यतावदधिकरणतानिष्ठप्रयोज्यतानिरूपितत्वोभयसत्त्वात् । नच स्वविषयितानिष्ठप्रयोजकतायामुक्तोभ-
याभावाऽनिवेशेऽपि नोक्तविशिष्टेतिव्याप्तिः । जलवद्ध्रदस्यापि विशिष्टान्तरतया तादृशविषयिताया अपि
जलवद्ध्रदविषयितात्वेनैव प्रयोजकतया जलवद्ध्रदविषयितानिष्ठप्रयोजकतायां तादृशविशिष्टविषयितानि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठप्रयोजकतानिरूपितप्रयोज्यतावदधिकरणतानिष्ठप्रयोज्यतानिरूपितत्वसत्त्वेऽपि तदवच्छेदकानवच्छिन्न-
त्वाभावेन तादृशोभयसंबन्धेन स्वविषयितानिष्ठप्रयोजकताविशिष्टान्यजलवद्ह्रदविषयितानिष्ठप्रयोजकता-
निरूपितप्रयोज्यताशून्यत्वस्य स्वविषयिताप्रयोज्याधिकरणतायामभावादिति वाच्यम्। अभावो वह्निमा-
नित्यत्र वह्न्यभाववद्वह्निमत्यतिव्याप्तेः तत्र वह्न्यभावरूपविशिष्टान्तरविषयितानिष्ठप्रयोजकतायां तादृश-
विशिष्टविषयितानिष्ठप्रयोजकताया निरुक्तोभयसंबन्धेन सत्त्वेन तदन्यप्रयोजकतानिरूपितप्रयोज्यताशून्य-
त्वस्य स्वपदग्राह्यतादृशविशिष्टविषयिताप्रयोज्याधिकरणतायां सत्त्वात्, एवं धूमव्यभिचारिवह्निर्धूम-
वान् वह्नेरित्यत्र मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः मेयत्वविशिष्टव्यभिचारविषयिताप्रयोज्यायां पक्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां शुद्धव्यभिचारविषयिताप्रयोज्यत्वाभावात्, स्वविषयितानिष्ठप्रयोजकतायामुक्तोभयाभावनिवेशे स्वपदेन वह्न्यभाववद्वृत्तिमन्मेयत्वविशिष्टव्यभिचारश्च न धर्तुं शक्यते ज्ञानवैशिष्ट्यनिष्ठप्रयोजकतानिरूपितप्रयोज्यतावत्पक्षे साध्यवैशिष्ट्यावगाहित्वाधिकरणतानिष्ठप्रयोज्यतानिरूपितत्वासाधारण्यविषयिताऽवृत्तित्वोभयसत्त्वात् । नन्वेवमपि गगनाभाववदभाववत्कालीनघटो गगनवानित्यत्र गगनाभाववत्तादृशघटरूपबाधेऽव्याप्तिः, एवं वह्न्यभाववद्वृत्त्यभावव्याप्यवत्कालीनह्रदो वह्निमानित्यत्र वह्न्यभावव्याप्यवत्तादृशह्रदरूपसत्प्रतिपक्षे व्यापकसामानाधिकरण्यरूपव्याप्तिघटितस्य सत्प्रतिपक्षत्वे तादृशसत्प्रतिपक्षमात्रे चाव्याप्तिः सर्वत्र दोषज्ञा-

॥ २९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्य ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धकतया दोषविषयितानिष्ठप्रयोजकतायामुक्तोभयाभावाऽसत्त्वेन स्वपदेन तस्य धारणासंभवादिति चेन्न। स्वावच्छिन्नविषयितानिष्ठप्रयोजकतावदन्यविशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यताशून्यनिरुक्तोभयाभाववत्स्वावच्छिन्नविषयिता-निष्ठप्रयोजकतानिरूपितप्रयोज्यताशालिनिरुक्तोभयाभावप्रयोजकाभावाधिकरणताकान्यत्व-तादृशोभयाभावप्रयोजकाभावाधिकरणतानिष्ठप्रयोज्यतानिरूपितप्रयोजकताविशिष्टविषयितानिरूपकतानवच्छेदकत्व-तादृशविषयिताघटितधर्मावच्छिन्नकार्यतानिरूपितकारणताविशिष्टविषयितानिरूपकतानवच्छेदकत्वैतत्त्रितयाभावस्य दोषतावच्छेदकधर्मे निवेशनीयत्वात्, विषयितायां प्रयोजकतावैशिष्ट्यं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाश्रयत्व–स्वविशिष्टविषयितावदन्यत्वोभयसंबन्धेन विषयितायां स्ववैशिष्ट्यंच स्वाश्रयत्व–स्वनिरू-
पितप्रयोज्यतावदधिकरणतानिरूपकाभावप्रतियोगितावच्छेदकताविशिष्टनिश्चयोत्तरानुमितित्वव्यापक--
विषयिताप्रयुक्ताधिकरणतानिरूपकाभावप्रतियोगित्वोभयसंबन्धेन निश्चये अवच्छेदकतावैशिष्ट्यंच स्वा-
श्रयविषयतावत्त्व–स्वविशिष्टप्रकारतावच्छेदकावच्छिन्नधर्मिकाऽव्याप्यवृत्तित्वज्ञानाभाववत्त्वोभयसंबन्धेन
प्रकारतायां स्ववैशिष्ट्यंच स्वाश्रयत्व–स्वनिरूपितावच्छेदकताश्रयमुख्यविशेष्यतानिरूपितत्वोभयसंब-
न्धेन, अत्र मुख्यविशेष्यतानिवेशाद्वह्न्यभाववज्जलवद्वृत्तिजलाभाववद्वह्निमत्कालीनह्रदो वह्निमानित्यत्र
वह्न्यभाववज्जलवद्वृत्तिजलवत्तादृशह्रदे नातिव्याप्तिः, तादृशविषयितावत्ता च स्वव्याप्यत्व–स्वाऽव्याप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कत्वोभयसंबन्धेन कारणतावैशिष्ट्यं च स्वावच्छेदकत्व-स्वावच्छेदकविषयितावदन्यत्वोभयसंबन्धेन विषयितावत्त्वं च पूर्वोक्तोभयसंबन्धेन, अत्रायमनुगमः प्रकृतपक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वसाध्यव्याप्यहेतुतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वोभयाभावविशिष्टरूपवत्त्वं लक्षणं, तादृशाभाववैशिष्ट्यं च रूपे स्ववृत्तित्वं किंचिद्रूपावच्छिन्नविषयित्वाव्यापकविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयोत्तरानुमितिनिष्ठाभावीयविषयिताप्रयुक्तत्वविशिष्टस्वाधिकरणत्वसंबन्धावच्छिन्नोभयाऽवृत्तिधर्मेतरधर्मानवच्छिन्नप्रतियोगित्वं नास्तीति प्रतीतिसिद्धोऽभावस्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्निरूपितप्रतियोगित्वनिष्ठप्रतियोगितानिरूपितावच्छेदकता[1]निरूपितावच्छेदकता[2]निरूपितावच्छेदकता[3]-निरूपितावच्छेदकता[4]निरूपितावच्छेदकता[5]निरूपितावच्छेदकता[6]निरूपितावच्छिन्नत्वसंवन्धावच्छिन्नाव-च्छेदकतावत्त्व-स्वप्रयोजकाभावाधिकरणतावृत्तित्वोभयसंवन्धेन तादृशाधिकरणतावृत्तित्वं च स्वाव-च्छिन्नविषयितानिष्ठाऽसाधारण्यविषयित्वाऽवृत्तित्वघटितोऽभयाभाववत्प्रयोजकतानिरूपितप्रयोज्यताव-त्त्व-स्वविशिष्टप्रतीतिविषयितावच्छेदकरूपाभाववत्त्वोभयसंवन्धेन प्रतीतौ स्ववैशिष्ट्यं च स्वावच्छिन्न-विषयिताशून्यत्व-स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यत्वोभयसंन्वधेन रूपनिष्ठप्रतियोगिताव-

१ अभावे । २ वृत्तित्वे । ३ अनुमितौ । ४ उत्तरत्वे । ५ निश्चये । ६ विषयितायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकसंबन्धश्च स्वविशिष्टविषयितानिष्ठभेदप्रतियोगितानवच्छेदकरूपावच्छिन्नप्रागुक्तोभयाभाववत्प्रयोजकतानिरूपितप्रयोज्यतारूपः विषयितायां स्ववैशिष्ट्यं च स्वावच्छिन्ननिरूपकताकत्व– स्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयत्वोभयसंबन्धेन, त्रितयाभावनिवेशकल्पे रूपे अभाववैशिष्ट्यंच प्रागुक्तप्रथमसंबध–स्वप्रयोजकाभावाऽधिकरणत्वाऽवृत्तित्व–प्रत्येकप्रागुक्तविषयिताद्वयानवच्छेदकत्वैतत्त्रितयाभाववत्त्वोभयसंबन्धेनेति बोध्यम्, वस्तुतस्तु यद्रूपावच्छिन्नविषयिताशालिनिश्चयोत्तरानुमितित्वव्यापकोभयाभावप्रयोजकयदभावाधिकरणतायां विरोधिविषयिताप्रयुक्तत्वमस्ति तदभावाधिकरणतायां विशिष्टान्तरविषयित्वाऽप्रयोज्यत्वाविशिष्टस्वविषयिताप्रयोज्यत्वाभिधानमेव सम्यक्, एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च मेयत्वविशिष्टव्यभिचारे च नातिव्याप्तिः तादृशव्यभिचारविषयकनिश्चयोत्तरानुमितित्वव्यापकोभयाभावप्रयोजकहेतुधर्मिकव्याप्त्यवगाहित्वाऽभावा[illegible]िकरणतायामेव विरोधिविषयिताप्रयुक्तत्वसत्त्वात् तत्र विशिष्टान्तरशुद्धव्यभिचारविषयिताप्रयुक्तत्वस्य च सत्त्वात्, धूमव्यभिचारिवह्निर्धूमवान्वह्नेरित्यादौ च मेयत्वविशिष्टव्यभिचारे च नातिव्याप्तिः तत्र विशेष्यदलघटकविरोधिविषयिताप्रयुक्तत्वं हि हेतौ व्याप्त्यवगाहित्वाभावाधिकरणतायामेवास्ति तस्या एव तादृशव्यभिचारविषयकनिश्चयोत्तरानुमितित्वव्यापकत्वात् तत्र च विशिष्टान्तरशुद्धव्यभिचारविषयिताप्रयोज्यत्वमस्त्येव तादृशोभयाऽभावप्रयोजिकायां पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायामेव विशिष्टान्तरविषयित्वाऽप्रयोज्यत्वविशिष्टस्वविषयिताप्र-

CC-0. In Public Domain. Digitization by eGangotri

योज्यत्वसत्त्वात् अधिकरणताया ऐक्याभावात्, एवंच स्वविषयितानिष्ठप्रयोजकतायामसाधारण्यविषयित्वाऽवृत्तित्वघटितोभयाभाववत्त्वमपि न विवक्षणीयं तद्धारणीयोक्तस्थलीयमेयत्वविशिष्टव्यभिचारातिव्याप्तेरभावात्, एवमलक्ष्ये कुत्रापि विशिष्टे नातिव्याप्तिः, बाधघटितसत्प्रतिपक्षेऽव्याप्तिस्तु नियतज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकताश्रयज्ञानविषयसत्प्रतिपक्षसंग्रहप्रयासेनैव वार्यते, हेतुमत्पक्षघटितासाधारण्यसंग्रहस्तु यद्रूपावच्छिन्नविषयिताशालिनिश्चयोत्तरानुमितित्वव्यापकमुभयाभावप्रयोजकाभावाधिकरणत्वं तद्रूपावच्छिन्नविषयिताभिन्नत्वासाधारण्यविषयिताभिन्नत्वोभयाभाववद्विषयितानिरूपकतावच्छेदकधर्मवत्त्वमिति विवक्षणेन भवति, एवंच विशेष्यदलघटकयद्रूपावच्छिन्नविषयकनिश्चये पक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मिकहेतुमत्ताज्ञानाऽकालीनत्वघटितोभयाभावोऽपि न निवेशनीयः उक्तविवक्षयैवासाधारण्यमात्रसंग्रहात्, सर्वत्रासाधारण्यस्थले बाधस्वरूपासिद्ध्यन्यतरनियमेन तादृशदोषमादाय लक्षणसमन्वयात् मेयत्वविशिष्टासाधारण्यविषयितायाः शुद्धासाधारण्यविषयिताभिन्नत्वादेव नातिव्याप्तिः, अत्रायमनुगमः तादृशोभयाभावप्रयोजकीभूताभावविशिष्टविषयिताभिन्नत्वाऽसाधारण्यविषयिताभिन्नत्वोभयाभाववद्विषयितानिरूपकतावच्छेदकधर्मवत्त्वं लक्षणं, विषयितायामभाववत्त्वं च स्ववृत्तित्वंयः किंचिद्रूपावच्छिन्नविषयित्वाव्यापकविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्चयोत्तरानुमितिनिष्ठाभावीयविरोधिविषयिताप्रयुक्तत्वविशिष्टाधिकरणतासंबन्धावच्छिन्नोभयाऽवृत्तिधर्मेतरधर्मानवच्छिन्नप्रतियोगित्वं ना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तीति प्रतीतिसिद्धोभावस्तन्निरूपितप्रतियोगितानिरूपितावच्छेदकं[1]तानिरूपितावच्छेदकं[2]तानिरूपितावच्छेदकं[3]तानिरूपितावच्छेदकं[4]तानिरूपितावच्छेदकं[5]तानिरूपितावच्छेदकं[6]त्व-स्वनिरूपिताऽधिकरणतावृत्तित्वोभयसंबन्धेन अधिकरणतावृत्तित्वं च पूर्वोक्तसंबन्धेन, परंतु विशिष्टान्तरविषयितायां स्वविषयितायांच प्रागुक्तोभयाभावो न निवेशनीय इति बोध्यम् ॥ श्रीः ॥

विरोधिविषयितानतिरिक्तवृत्तियद्विषयिताशालिनिश्चयस्य
निश्चयान्तेन विवक्षितत्वादिति ॥ ॥

---

१ निरूपितत्वे । २ अभावे । ३ वृत्तित्वे । ४ अनुमितौ । ५ उत्तरत्वे । ६ निश्चये ।

CC-0. In Public Domain. Digitization by eGangotri

अत्र यदवच्छिन्ननिरूपकताकविरोधिविषयिता तादृशोभयाभावव्याप्येत्युक्तावसाधारण्याऽसंग्रहः असाधारण्यत्वावच्छिन्नविषयितायां निर्वाच्यविरोधिविषयितात्वाभावात् । नच यद्रूपावच्छिन्नविषयिताविरोधिविषयितानतिरिक्तवृत्तिरित्यभिधाने कथमसाधारण्यसंग्रहः असाधारण्यविषयिताया विरोधिविषयिताशून्याऽसाधारण्यज्ञाने सत्त्वादिति वाच्यम् । यद्रूपावच्छिन्नविषयितायां निरूप्यनिरूपकभावापन्नसाध्यव्यापकीभूताऽभावप्रतियोगिहेतुमत्पक्षविषयिताशालिज्ञानभिन्नत्व-निरूप्यनिरूपकभावापन्नाऽसाधारण्यविषयितावत्त्वोभयाभाववज्ज्ञानीयत्वस्य विवक्षणीयत्वात् तथाच तादृशहेतुमत्पक्षविषयितानिरूपकज्ञानमेवाऽसाधारण्यविषयकमुभयाभाववद्भवति तथाच तादृशपक्षविषयितानिरूपितसाध्याभावव्याप्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयिता विरोधिविषयिता भवतीति तत्संग्रहः । नन्वत्र यद्विषयितायां विरोधिविषयितानतिरिक्तवृत्तित्वपर्यन्तनिवेशोऽफलः यद्विषयकविरोधिविषयकनिश्चयोत्तरानुमितित्वव्यापक उभयाभाव इत्यस्यैव सम्यक्त्वात् । नच निर्वह्निः पर्वतो वह्निमानित्यत्र दोषैकदेशे पर्वतादावतिव्याप्तिः पर्वतो वह्निमानित्याकारकपर्वतविषयकविरोधिविषयकनिश्चयोत्तरानुमितिसामान्ये उभयाभावसत्त्वादिति वाच्यम् । अनतिरिक्तवृत्तित्वविवक्षणेपि ह्रदो वह्निमानित्यत्र जातिमान्वह्न्यभाववानिति ज्ञानेपि विरोधिविषयितानतिरिक्तवृत्तिवह्न्यभाववद्ध्रदविषयितायाः सत्त्वात् तदुत्तरानुमितौ उभयाभावाभावादसम्भवोतो यद्विषयिताशालिनिश्चये अव्यापकविषयिताशून्यत्वं विवक्षणीयम्, एवञ्च प्रकृतेपि यद्विषयित्वाऽव्यापकविषयि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताशून्यविरोधिविषयकयद्विषयकनिश्चयविवक्षणे पर्वतविषयित्वाऽव्यापकविषयिताशून्यपर्वतविषयकविरोधिविषयिताशालिनिश्चयाऽप्रसिद्धेरेकदेशातिव्याप्तेरनवकाशात् । नचैवमपि गोत्वाभावो गोत्वाभाववान् घटान्यघटादित्यत्र गोत्वाभावेतिव्याप्तिः गोत्वादिविषयिताया गोत्वाभावविषयिताव्यापकतया तद्विषयित्वाऽव्यापकविषयिताशून्यगोत्वाभावविषयकविषयिताशालिगोत्वाभावो गोत्ववानिति निश्चयोत्तरानुमितिसामान्ये उभयाभावसत्त्वादिति वाच्यम् । यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयिता यद्विषयित्वाऽव्यापिका तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वं विवक्षणीयम्, तथाच गोत्वाभावत्वावच्छिन्नविषयितानिरूपितसमवायावच्छिन्नविषयिताया गोत्वाभावविषयित्वाऽव्यापि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काया उक्तबाधभ्रमे सत्त्वेन तच्छून्यगोत्वाभावविषयकविरोधिविषयिताशालिनिश्चयाऽप्रसिद्धेरतिव्याप्तिविरहात् । नचैवमपि घटो द्रव्यभिन्न इत्यत्र बाधैकदेशे घटेऽतिव्याप्तिः घटो द्रव्यमित्याकारके घटविषयकविरोधिविषयिताशालिनिश्चये घटत्वावच्छिन्नविषयित्वाऽव्यापिका यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयिता तस्या अभावात्, समवायावच्छिन्नविषयितानिरूपितघटत्वावच्छिन्नविषयिताव्यापिकैव घट इति ज्ञाने घटे घटत्वस्य समवायेन भानात् बाधज्ञाने द्रव्यत्वं स्वरूपत एव भासत इति न तद्विषयिता किंचिद्रूपावच्छिन्ना तादृशनिश्चयोत्तरानुमितिसामान्ये उभयाभावस्य च सत्त्वादिति वाच्यम्। यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयता यद्विषयित्वाऽव्यापिका तद्रूपावच्छिन्नवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षयतानिरूपिततद्रूपावच्छिन्नविषयताशून्यत्वविवक्षणेऽतिव्याप्त्यभावात् घट इति ज्ञानेऽविद्यमानायाः समवायावच्छिन्नविषयतानिरूपितघटत्वावच्छिन्नविषयताया घटो द्रव्यमिति ज्ञाने सत्त्वेन तच्छून्यघटविषयकविरोधिविषयिताशालिनिश्चयाऽप्रसिद्धेरिति चेन्न । स्वरूपं स्वरूपवद्भेदत्ववदित्यत्र स्वरूपवद्भेदत्ववद्भेदवति बाधैकदेशेऽतिव्याप्तेः स्वरूपवद्भेदत्ववद्भेदवत्स्वरूपमिति बाधज्ञाने बाधैकदेशनिरुक्तविशिष्टविषयित्वाऽव्यापिकायाः कस्या अपि निरुक्तविषयिताया अभावात् तादृशानिश्चयोत्तरानुमितिसामान्ये उभयाभावस्याक्षतत्वात्, यद्विषयितायां विरोधिविषयितानतिरिक्तवृत्तित्वनिवेशे तु तादृशैकदेशविषयिताया विरोधिविषयिताशून्यैकदेशमात्रविषयकज्ञाने सत्त्वेन नातिव्याप्तिरिति दिक् ॥ श्रीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचैवं विरोधिविषयितानतिरिक्तवृत्तियदीयविषयिता तत्त्व-
मित्येतावतैव सामञ्जस्ये शेषवैयर्थ्यमिति वाच्यमिति ॥

अत्र विरोधिविषयता पक्षे साध्यवैशिष्ट्यावगाहित्वसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वोभयाभावप्रतियो-
गितावच्छेदकताश्रयविषयता[1]विशिष्टविषयता[2]–तादृशविषयताघटितधर्मावच्छिन्नजन्यतानिरूपितजनकता-
वच्छेदकविषयिताविशिष्टविषयतान्यतररूपा, विषयतायां[3] विषयतावैशिष्ट्यं[4] च स्वाधिकरणत्व–स्वनिरू-

---

१ साध्यप्रकारताख्यया । २ पक्षविशेष्यतादोषज्ञानीया । ३ विशेष्यताख्यायाम् । ४ प्रकारताख्यया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितविशेष्यतावच्छेदकावच्छिन्नत्वोभयसम्बन्धेन स्वाधिकरणत्वं च स्वविशिष्टप्रकारतानिरूपितत्व-स्वा-
वच्छेद्यविशेष्यतानिरूपितप्रतियोगितात्वावच्छिन्नसांसर्गिकविषयतावत्प्रकारतानिरूपितत्व-स्वावच्छेद्य-
विशेष्यतानिरूपिततादात्म्यसम्बन्धाऽवच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकताविशिष्टप्र-
कारतानिरूपितत्व-स्वावच्छेदकावच्छिन्नस्वावच्छेदकसम्बन्धाऽवच्छिन्ननिरूपकताकाधिकरणतावन्निरू-
पितवृत्तितात्वावच्छिन्नप्रतियोगिताकाभावावच्छिन्नप्रकारतानिरूपितत्वान्यतमसम्बन्धेन, अन्यतमघटक-
प्रथमसम्बन्धे प्रकारतायां स्ववैशिष्ट्यं च स्वावच्छेदकावच्छिन्नस्वावच्छेदकसम्बन्धावच्छिन्नप्रतियो-
गितासम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेद्यत्व-स्वावच्छेदकसम्बन्धावच्छिन्नस्वावच्छेदका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नप्रतियोगिताकाभावनिष्ठस्वाश्रयसामान्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वोभय-स्वावच्छेदकावच्छिन्नस्वावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदत्वावच्छिन्नत्वानुपदमुक्तद्वितीयसम्बन्धावच्छिन्नत्वोभयान्यतरसम्बन्धेन, द्वितीयसम्बन्धे प्रकारतायां सांसर्गिकविषयतावत्त्वं च स्वनिरूपितप्रकारतावच्छेदकधर्मावच्छिन्नत्व–स्वनिरूपितावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्सम्बन्धावच्छिन्नत्वोभयसम्बन्धेन, तृतीयसंबन्धेऽवच्छेदकतावैशिष्ट्यं च प्रकारतायां स्वाधिकरणवृत्तित्व-स्वावच्छेदकसंबन्धावच्छिन्नत्वाऽवच्छेदकतासम्बन्धावच्छिन्नस्वाभाववद्धर्मावच्छिन्नत्व-स्ववृत्तित्वैतच्चतुष्टयसंबन्धेन, अन्यतमशरीरे प्रथमसंबन्धनिवेशात् ह्रदो वह्निमानित्यत्र ह्रदो वह्न्यभाववान् ह्रदो व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्निमद्भिन्न इति ज्ञानीयविषयतयोः संग्रहः, द्वितीयसंबन्धनिवेशात्पर्वतो वह्न्यभाववानित्यत्र पर्वतो वह्निमानिति ज्ञानीयविषयतासंग्रहः, तृतीयसम्बन्धनिवेशाद्धटो द्रव्यभिन्न इत्यत्र स्वरूपतो द्रव्यत्वावगाहिघटो द्रव्यमिति ज्ञानीयविषयतासंग्रहः, चतुर्थसंबन्धनिवेशात् ह्रदो वह्निमानित्यत्र वह्निमदवृत्तिमान् ह्रद इति ज्ञानीयविषयतासंग्रहः, एवं तुल्यवित्तिवेद्यतया भानमङ्गीकृत्य पक्षवृत्तिः साध्याभाव इत्यादिज्ञानीयविषयता संग्राह्येति दिक् ॥ श्रीः ॥

निश्चयत्वं च विशेषणविशेष्यतावच्छेदकभावाऽनापन्नविरोधिकोटिद्वयप्रकारकैकधर्मिविशेष्यकज्ञानान्यज्ञानत्वमिति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताद्दशज्ञानत्वं नाम प्रकारताविशिष्टप्रकारत्वाऽनिरूपकज्ञानत्वं प्रकारतावैशिष्ट्यं च स्वनिरूपितविशेष्यतावच्छेकावच्छिन्नविशेष्यतानिरूपितत्व–स्वनिरूपकज्ञानीयत्व–स्वावच्छेदकावच्छिन्ननिरूपितविरोधितावच्छेदकधर्मावच्छिन्नत्व–स्वनिरूपितविशेष्यतावच्छेदकत्वानवच्छेद्यत्व–स्वाऽभाववत्त्वैतत्सम्बन्धपञ्चकेन, एवं च ह्रदो वह्निमान्न वेति संशयीयवह्न्यादिप्रकारता प्रकारताविशिष्टप्रकारता तत्र वह्न्यभावप्रकारतानिरूपितविशेष्यतावच्छेदकह्रदत्वावच्छिन्नविशेष्यतानिरूपितत्वस्य तन्निरूपकताद्दशसंशयनिरूपितत्वस्य ताद्दशप्रकारतावच्छेदकवह्न्यभावत्वावच्छिन्ननिरूपितविरोधितावच्छेदकवह्नित्वावच्छिन्नत्वस्य ताद्दशप्रकारतानिरूपितह्रदनिष्ठविशेष्यतानिरूपितावच्छेदकत्वानवच्छेद्यत्वस्य ताद्दशप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारत्वाभाववत्त्वस्य च सत्त्वात् तत्प्रतियोगितावच्छेदकसम्बन्धश्च स्वावच्छेद्यावच्छेदकताकविशेष्यतानिरूपितत्वरूपः अयं च सम्बन्धः संशयीयकोटिप्रकारताया व्यधिकरणसम्बन्धः संशये वह्न्यभावादेर्धर्मितावच्छेदकत्वाभावात् निर्वह्निर्वह्निमानिति ज्ञानीया निर्वह्निः पर्वतो वह्निमानिति ज्ञानीया च प्रकारता न कापि तादृशी प्रथमज्ञानीयवह्निप्रकारतायां वह्न्यभावप्रकारताया अन्यसम्बन्धचतुष्टयेन सत्त्वेऽपि स्वाभाववत्त्वसम्बन्धेनाभावात् स्वावच्छेद्यावच्छेदकतानिरूपकविशेष्यतानिरूपितत्वसत्त्वेन तत्सम्बन्धावच्छिन्नस्वाभावस्य तत्राभावात् वह्न्यभावनिष्ठप्रकारतायां वह्निप्रकारतायाः स्वनिरूपितविशेष्यतावच्छेदकत्वानवच्छेद्यत्वाभावात्, एवं द्वितीयज्ञानीयपर्वतत्वनिष्ठप्रकारतायां विरोधिताव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकधर्मावच्छिन्नत्वमपि नास्तीति तादृशज्ञानद्वयं च तादृशनिश्चयत्वाक्रान्तम्, एवं निर्वह्निर्वह्न्यभाववान् निर्वह्निर्वह्निमानिति समूहालम्बनात्मकज्ञानं च न तादृशनिश्चयत्वाक्रान्तम् वह्न्यभावावच्छिन्ने प्रकारतापन्नवह्निप्रकारतायास्तत्रैव प्रकारतापन्नवह्न्यभावप्रकारतायाश्चोक्तसम्बन्धैः परस्परविशिष्टत्वात् अतो वह्न्यभाववद्वह्न्यभावावच्छिन्नविषयित्वं तादृशनिश्चयाऽवृत्तीति, एवं ह्रदो वह्निमान् वह्निव्याप्यधूमवान्वह्न्यभाववानिति समूहालम्बनेपि न तादृशनिश्चयत्वमस्ति ह्रदे वह्नेर्वह्न्यभावस्य च परस्परविशेषणधर्मितावच्छेदकभावाऽनापन्नयोः प्रकारत्वात्, अत्र प्रथमसंबन्धानिवेशे पर्वतो वह्निमान् धूमान्यधूमादित्यत्र वह्न्यभाववद्भूतलादावतिव्याप्तिः पर्वतो वह्निमान् भूतलं वह्न्यभाववदिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानीयवह्न्यादिप्रकारताया अन्यसम्बन्धचतुष्टयेन परस्परविशिष्टत्वात् प्रकारताविशिष्टप्रकारताऽनि-
रूपकत्वरूपनिश्चयत्वस्य तादृशसमूहालम्बनेऽभावेन तादृशनिश्चयश्च वह्न्यभाववद्भूतलानवगाहिपक्षे
साध्यहेतुवैशिष्ट्यावगाहिज्ञानमेवेति तत्रच वह्न्यभाववद्भूतलविषयिताया अवृत्तित्वात्, द्वितीयसंब-
न्धानिवेशेऽसंभवः सर्वस्या अपि प्रकारतायाः समानधर्मितावच्छेदकज्ञानान्तरीयविरोधिप्रकारताविशि-
ष्टत्वात्, तृतीयसंबन्धाऽनिवेशे ह्रदो वह्निमानित्यत्र पक्षे साध्यहेतुवैशिष्ट्यावगाहितादृशनिश्चयोऽप्रसि-
द्धः तत्र परस्परविशेषणविशेष्यतावच्छेदकभावाऽनापन्नयोः साध्यसाधनयोरेकस्मिन् धर्मिणि प्रकारत्वात्।
नचैवं ह्रदो वह्निमान् वह्न्यभावादित्यत्र न कोपि दोषः स्यादिति विरोधितावच्छेदकेतरधर्मानव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नत्वस्यापि विवक्षणायत्वात्, चतुर्थपञ्चमसम्बन्धानिवेशे निर्वह्निः पर्वतो वह्निमानिति साध्यवत्तानिश्च-यस्यासंग्रह इति ध्येयम् ॥ श्रीः ॥

भ्रमान्यज्ञानीययदीयविषयितासामान्यं तादृशनिश्चयावृत्तितदीयवि-षयिताया विवक्षणेन निर्वह्निपीति ॥ ॥ ॥

'१ वस्तुतस्तु एवं सम्बन्धपञ्चकनिवेशे ह्रदो वह्निमान् वह्निमत्पर्वतकालीनवह्न्यभाववत्पर्वतकालीनधूमादित्यत्र पक्षे साध्यवैशिष्ट्य-साध्यव्याप्यहेतुवैशिष्ट्यावगाहिनिश्चयस्य उक्तसम्बन्धेन प्रकारताविशिष्टप्रकारतानिरूपकत्वरूपनिश्चय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वत्रोक्तनिश्चयस्य लक्षणघटकत्वे किं तत्कुक्षिप्रविष्टविरोधितावच्छेदकत्वं नाम यदि तद्वृत्तिता-
नवच्छेदकत्वं तदा ह्रदो वह्निमान् धूमान्यधूमादित्यत्र जलवद्ध्रदेऽतिव्याप्तिः ह्रदो वह्निमान् वह्निव्या-
प्त्यनुपपत्तिः तन्निरूपितवह्न्यभाववत्त्वावच्छिन्नप्रकारतायाः वह्नित्वावच्छिन्नप्रकारताविशिष्टत्वात् अतः चतुर्थपञ्चमस-
म्बन्धस्थाने स्वानिरूपकज्ञाननिरूपितत्वम् एकः सम्बन्धो वाच्यः, तथा चोक्तनिश्चयीयवह्न्यभाववत्त्वावच्छिन्नप्रकारतायाः
निर्वह्निः पर्वतो वह्निमानित्यादिज्ञानीयप्रकारतायाश्च स्वानिरूपकज्ञाननिरूपितत्वात्संग्रहः, एवं तज्ज्ञानीयवह्न्यभावप्र-
कारतां स्वपदेनादाय निश्चयत्वानुपपत्तिवारणाय स्ववृत्तित्वघटितोऽयसम्बन्धस्तृतीयो वाच्यः, वृत्तित्वघटकसम्बन्ध- ॥ २६९ ॥
श्चोक्तसम्बन्ध एवेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्यधूमान्यधूमवान् जलवांश्चेति ज्ञानीयवह्निजलप्रकारतयोरुक्तसंबन्धैः परस्परविशिष्टत्वात् तन्निरूपकत्वेन तादृशज्ञानस्य निश्चयत्वासंभवेन जलानवगाहिसाध्यहेत्ववगाहिज्ञानस्यैव निश्चयत्वात् तत्र च जलवद्ध्रदविषयिताया अवृत्तित्वात् । नच विरोधितावच्छेदकावच्छिन्नत्वेत्यनेन स्वावच्छेदकावच्छिन्नस्वावच्छेदकसंबन्धावच्छिन्नप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताऽवच्छेदकमुख्यविशेष्यतानिरूपितप्रकारतावच्छेदकधर्मावच्छिन्नत्वविवक्षणान्नायं दोष इति वाच्यम् । ह्रदो वह्निमान् धूमान्यधूमादित्यत्र कालिकसंबन्धेन वह्न्यभावविशिष्टे ह्रदेऽतिव्याप्तेः पक्षे साध्यहेतुवैशिष्ट्यावगाहिनः कालिकसंबन्धेन वह्न्यभावावगाहिज्ञानस्योक्तनिश्चयत्वाभावात् तेन संबन्धेन वह्न्यभावानवगाहिनि पक्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साध्यसाधनावगाहिनिश्चये तत्संबन्धेन वह्न्यभावविशिष्टह्रदविषयितायाः अवृत्तित्वात् । नच तादृशप्रकारतावच्छेदकावच्छिन्नत्वं परित्यज्य तादृशप्रकारताविशिष्टत्वं तृतीयसंबन्धो विवक्षणीयः वैशिष्ट्यंच स्वावच्छेदकरूपसंबन्धावच्छिन्नत्वसंबन्धेनेति वाच्यम् । यत्र निर्वह्नित्वसामानाधिकरण्येन वह्नेः साध्यता तत्र निर्वह्नित्वावच्छेदेन वह्न्यभाववन्निर्वह्निरूपबाधासंग्रहापत्तेः निर्वह्निर्वह्निमान् निर्वह्निर्वह्न्यभाववांश्चेति समूहालम्बनज्ञानीयवह्नितदभावप्रकारतयोः परस्परविशिष्टत्वाऽभावात्, तथाहि सामानाधिकरण्येन वह्निमत्ताबुद्धिं प्रत्यवच्छेदकावच्छेदेन तदभाववत्ताज्ञानस्य प्रतिबन्धकतया शुद्धसंयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूता या प्रकारता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदवच्छेदकसंबन्धश्च पर्वतत्वादिव्यापकप्रतियोगिकत्वविशिष्टस्वरूपमेव निर्वह्नित्वव्यापकप्रतियोगिक-
स्वरूपसंबन्धावच्छिन्नप्रकारताया निरुक्तप्रकारताघटितधर्मावच्छिन्नप्रतिवध्यतानिरूपितप्रतिबन्धकताव-
च्छेदकत्वाभावात् तादृशसमूहालम्बनज्ञानीयवह्न्यभावप्रकारता च न पर्वतत्वादिव्यापकप्रतियोगिकस्व-
रूपावच्छिन्ना तथाच तादृशप्रतिबन्धकतावच्छेदकप्रकारतायाः स्वावच्छेदकावच्छिन्नत्व—स्वावच्छेदकसं-
बन्धावच्छिन्नत्वोभयसंबन्धेन तादृशप्रकारतायामभावेनोक्तसंबन्धैः प्रकारताविशिष्टप्रकारताऽनिरूप-
के तादृशज्ञाने दोषविषयितासत्त्वादिति । नच तादृशप्रकारतावैशिष्ट्यं स्वावच्छेदकसंसर्गतावच्छेदक-
तात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकसंसर्गतानिरूपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावच्छेद्यतावत्त्वघटितं न विवक्ष्यते किंतु संसर्गतावच्छेदकधर्मावच्छिन्नावच्छेदकताकसंसर्गताघटितमेव तथाच तादृशदोषविषयकसमूहालम्बनीयवह्न्यभावप्रकारतायामपि तादृशप्रतिबन्धकतावच्छेदकप्रकारतानिरूपितसंसर्गतावच्छेदकीभूतस्वरूपत्वावच्छिन्नसंसर्गतानिरूपितावच्छेद्यत्वस्य सत्त्वात् नाव्याप्तिरिति वाच्यम्। तथा निवेशे तत्रैव सामानाधिकरण्येन वह्न्यभाववन्निर्वह्नेरपि दोषत्वापत्तिः निर्वह्नित्वसामानाधिकरण्येन वह्नितदभावावगाहिसमूहालम्बनादिज्ञानस्य निश्चयत्वाभावेन तादृशसमूहालम्बनाद्यन्यज्ञानस्यैव निर्वह्निर्वह्निमानित्यस्य तथात्वात् तत्रच सामानाधिकरण्येन वह्न्यभाववन्निर्वह्निविषयिताया असत्त्वादिति चेन्न । स्वविशिष्टप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावत्त्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबन्धेनोभयत्र प्रकारतावैशिष्ट्यस्य स्वावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्व-स्वनिरूपितसंसर्गतावच्छेदकाकिंचिद्धर्मव्यापकप्रतियोगिकत्वेतरधर्मावच्छिन्नकिंचिद्धर्मव्यापकप्रतियोगिक-त्वावच्छिन्नसांसर्गिकविषयतानिरूपित्वोभयसंबन्धेन विवक्षितत्वात् किंचिद्धर्मावच्छिन्नव्यापकत्वावच्छि-न्नत्वनिवेशेन सामानाधिकरण्येन वह्न्यभाववन्निर्वह्नौ न प्रागुक्तातिप्रसङ्गावकाशः, यत्र निर्वह्नित्वावच्छे-देन वह्नेः साध्यता तत्र तत्सामानाधिकरण्येन दोषसंग्रहाय वह्नित्वावच्छिन्नप्रकारतायां वह्न्यभावत्वाव-च्छिन्नप्रकारतावैशिष्ट्यमादाय साध्यसाधनदोषविषयकसमूहालम्बनस्य निश्चयत्वाभाव उपपादनीयः, नि-र्वह्नित्वावच्छेदेन वह्निसाधनस्थले सामानाधिकरण्येन वह्न्यभावव्याप्यवत्पक्षस्य यदि दोषत्वमावश्यकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदा स्वावच्छेदकावच्छिन्नस्वावच्छेदकसंबन्धावच्छिन्नप्रकारताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकप्रकारताविशिष्टत्वान्यतरघटितसंबन्धपञ्चकेन वैशिष्ट्यं बोध्यम् । न चैवमपि ह्रदो वह्निमान्वह्न्यभाववद्ध्रदकालीनधूमादित्यत्र न कश्चिद्दोषः स्यात् पक्षे साध्यहेत्ववगाहितादृशनिश्चयाऽप्रसिद्धेरिति वाच्यम् । पक्षे साध्यावगाहिनिश्चयवृत्तित्व–पक्षे–हेत्ववगाहिनिश्चयवृत्तित्वोभयाभावस्य विवक्षणीयत्वात् । नन्वत्र ग्रन्थकाररीतिविरोधरूपदूषणाभिधानमसंगतं ह्रदो वह्निव्याप्यधूमवान् घटान्यघटादित्यत्र वह्न्यभाववद्ध्रदेतिव्याप्तेः ह्रदे वह्न्यभाववत्तादृशसाध्यहेतुविषयकसमूहालम्बनस्य निश्चयत्वाऽसंभवेन वह्न्यभाववद्ध्रदविषयितायाः पक्षे साध्यसाधनावगाहितादृशनिश्चयाऽवृत्तित्वादिति चेन्न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुमितिघटितलक्षणस्यातिव्याप्तत्वेपि अनाहार्यमानसज्ज्ञानसामान्यघटितलक्षणस्य निर्दुष्टत्वे तात्पर्यात्, अनाहार्यमानसत्वमिच्छाविशिष्टान्यदोषविशेषाजन्यज्ञानत्वं तत्रेच्छाविशिष्टज्ञाने दोषत्वेनाभिमतताद्दृशोदासीनज्ञानोत्तराहार्यतत्तद्व्यक्तिभेदो निवेशनीयः, तथाच ताद्दृशदोषत्वेनाभिमतोदासीनज्ञानोत्तरपक्षविशेष्यकसाध्यहेतुवैशिष्ट्यावगाहिताद्दृशाहार्यज्ञानमपि सामान्यान्तर्गतं तत्र नोक्तोऽभयाभावोऽस्तीति नातिव्याप्तिरित्यभिप्रायात्। ननु भ्रमान्यज्ञानीयमेयत्वविशिष्टव्यभिचारादिविषयितासामान्यस्य ताद्दृशनिश्चयाऽवृत्तितया तत्रातिव्याप्तिवारणं कथमिति चेद्विशिष्टान्तराघटितत्वनिवेशनेनेति गृहाण, तन्निवेशश्च भ्रमान्यज्ञानीयस्वावच्छिन्नविषयितासामान्यं प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिप्रकृतसाध्यव्याप्यहे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुवैशिष्ट्यावगाहिग्रहत्वव्यापकप्रकारताविशिष्टा यावन्तः प्रकारताविशिष्टप्रकारतानिरूपकानिश्चयास्तद-
न्तर्गतयद्यन्निश्चयास्तत्तन्निश्चयावृत्तिस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नप्रमान्यज्ञा-
नीयविषयितासामान्यं तद्रूपावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं लक्ष्यतावच्छेदके विशेषणमिति,
निश्चये प्रकारतावैशिष्ट्यंच स्वावच्छेदकावच्छिन्नप्रकारतानिरूपितस्वनिरूपितविशेष्यतावच्छेदकाव-
च्छिन्नविशेष्यतावत्त्वसंबन्धेन, तादृशानिश्चयत्वघटकप्रकारतावैशिष्ट्यघटकतृतीयसंबन्धघटकप्रतिबन्धक-
तायां निश्चयविशिष्टनिश्चयत्वानवच्छिन्नत्वं विशेषणं बोध्यं नातो विशिष्टद्वयाऽघटितत्वं निवेशनी-
यम्, अत्रायमनुगमः प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वप्रकृतसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयाभाववृत्तिकिंचिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशालिनिश्च-
योत्तरानुमितिनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावनिरूपितप्रतियोगितानिरूपि-
तावच्छेदक[१]तानिरूपितावच्छेदक[२]तानिरूपितावच्छेदक[३]तानिरूपितावच्छेदक[४]तानिरूपितावच्छेदक[५]तानि-
रूपितावच्छेदक[६]तानिरूपितावच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावद्धर्मविशिष्टध-
र्मवत्त्वं लक्षणम्, धर्मे धर्मवैशिष्ट्यं च स्वतादात्म्य-स्वविशिष्टरूपावच्छिन्नाऽविषयकप्रतीतिविषयता-
वच्छेदकत्वोभयसंबन्धेन रूपे स्ववैशिष्ट्यं च स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्व-प्रमान्यज्ञा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीयस्वांवच्छिन्नविषयितावृत्तिभेदप्रतियोगितावच्छेदकत्वाभाववत्पक्षे साध्यवैशिष्ट्यावगाहिसाध्यव्याप्यहेतुवैशिष्ट्यावगाहिग्रहनिष्ठकिंचिद्रूपावच्छिन्नविशेष्यतानिरूपितकिंचिद्रूपावच्छिन्नप्रकारता नास्तीति सिद्धाभावाऽप्रतियोगिप्रकारतात्वव्यापकत्वविशिष्टोभयाभावाऽवृत्तितादृशाभावप्रतियोगितापरम्परावच्छेदक-

---

१ स्वपदग्राह्यं वह्न्यभाववद्ध्रदत्वम् ।

२ निरुक्ताभावाप्रतियोग्यसमूहालम्बनप्रकारतात्वविशिष्टेत्यस्योभयाभाववृत्तितादृशाभावीयप्रतियोगितानिरूपितपरम्परया ह्रदवृत्तिवह्न्यभावत्वनिष्ठावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकत्वेऽन्वयः तथाच यादृशप्रकारत्वं वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितावृत्तिभेदीयप्रतियोगितानिरूपितनिरुक्तसम्बन्धावच्छिन्नावच्छेदकत्वाभाववद्वति तदेव प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वोभयसंबन्धेन, भेदप्रतियोगितावच्छेदकताघटकसंबन्धश्च स्ववैशिष्टप्रकारतानिरूपकत्वविशिष्टप्रागुक्तप्रकारताविशिष्टप्रकारताऽनिरूपकत्वविशिष्टनिश्चयावृत्तित्वसंबन्धः, प्रकारतायां स्ववैशिष्ट्यं च स्वनिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्व–स्वावच्छेदकरूपसंबन्धावच्छिन्नत्वोभयसंबन्धेन, प्र-

कारत्वं ह्रदवृत्तिवह्न्यभावत्वावच्छिन्नविषयितावृत्तिभेदप्रतियोगितावच्छेदकत्वाभाववद्भवतीति स्वरूप–स्वरूपघटितसामानाधिकरण्यसम्बन्धाभ्यां व्यापकत्वविशिष्टं तादृशोभयाभाववृत्त्यभावीयपरम्परयाऽवच्छिन्नावच्छेदकत्वमिति सर्वं समञ्जसम् ।

१ अत्र स्वपदेन समूहालम्बनीयप्रकारता तद्वैशिष्ट्यञ्च समूहालम्बनप्रकारतायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारतात्वव्यापकत्वं च अप्रामान्यज्ञानीयस्वावच्छिन्नविषयितात्वव्यापकत्वसंबन्धेन व्यापकत्वं च प्रागुक्तसंबन्धेनेति ॥ श्रीः ॥

परे तु घटाऽभावादिधर्मितावच्छेदककवह्न्यादिज्ञानं प्रति तद्धर्मितावच्छेदककवह्न्यभावादिमत्ताज्ञानस्य प्रतिबन्धकत्वे कल्पनीये धर्मितावच्छेदकभे-

१ तथाच निरुक्तवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितात्वव्यापकप्रकारतात्वाधिकरणे स्वावच्छिन्नविषयितावृत्तिनिरुक्तनिश्चयाऽवृत्तित्वसम्बन्धावच्छिन्नभेदप्रतियोगितावच्छेदकत्वाभाववत्त्वसम्बन्धेन ह्रदवृत्तिवह्न्यभाववत्त्ववतो भेदाभावेनान्यस्यैव कस्य चिद्भेदस्य तथात्वेन तन्निरूपितावच्छेदकत्वाभावरूपव्यापकत्वं विपरीतबाधतावच्छेदकेस्तीति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देन तदकल्पनाप्रयुक्तलाघवानुरोधेन धर्मितावच्छेदकधर्मानानिवेश्याऽनाहार्यवह्न्यादिविशिष्टबुद्धित्ववह्न्यभावादिनिश्चयत्वाभ्यां . समानधर्मितावच्छेदकत्वप्रत्यासत्त्यैव प्रतिबध्यप्रतिबन्धकभावः कल्प्यत इति ॥

अत्राऽवच्छेदकावच्छेदेन ज्ञानस्य प्रतिबध्यत्वे वह्नित्वावच्छिन्नप्रकारतानिरूपितकिंचिद्धर्मव्यापकप्रतियोगिकत्वविशिष्टसंयोगत्वावच्छिन्नसंसर्गतानिरूपितविशेष्यतानिरूपितसमवायसंबन्धाऽवच्छिन्ननिरवच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन ज्ञानत्वावच्छिन्नंप्रति सं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नाभाव-त्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितसमवायसंबन्धावच्छिन्ननिरवच्छि-न्नावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकतासंबन्धेन निश्चयस्य प्रतिबन्धकत्वं, सामानाधिक-रण्येन ज्ञानस्य प्रतिबध्यत्वे विपरीतमूह्यम्, अयं प्रतिबध्यप्रतिबन्धकभावः पर्वतो वह्निमान् घटो वह्नि-मानित्यादिज्ञानानां पर्वतो वह्न्यभाववान् घटो वह्न्यभाववानित्यादिज्ञानानां च नीलपर्वतो वह्निमान् पी-तपर्वतो वह्निमानित्यादिज्ञानानां तद्विपरीतज्ञानानां च तद्भावस्तु अवच्छेदकावच्छेदेन प्रतिबध्यत्वे वह्नि-त्वावच्छिन्नप्रकारतानिरूपितकिंचिद्धर्मव्यापकप्रतियोगिकत्वावच्छिन्नसंसर्गतानिरूपितविशेष्यतानिरूपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावच्छेदकत्वावच्छेद्यपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसमवायसंबन्धावच्छिन्नप्रकारतानिरूपितसमवा-
यसंबन्धावच्छिन्ननिरवच्छिन्नावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन ज्ञानं प्रति संयो-
गसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नाभावत्वा-
वच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसमवायसंबन्धावच्छि-
न्नप्रकारत्वावच्छेद्यावच्छेदकतानिरूपितसमवायसंबन्धावच्छिन्ननिरवच्छिन्नाऽवच्छेदकताप्रतियोगिकपर्या-
प्त्यनुयोगितावच्छेदकत्वसंबन्धेन ज्ञानस्य प्रतिबन्धकत्वमिति, एवं सामानाधिकरण्येन बुद्धिंप्रति, एवं
घटवान् वह्निमान् पटवान् वह्निमानित्यादिज्ञानानां तद्विपरीतज्ञानानां च तद्भावः वह्नित्वावच्छिन्नप्रका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रतानिरूपितकिंचिद्धर्मव्यापकप्रतियोगिकसंयोगत्वावच्छिन्नसंसर्गतानिरूपितविशेष्यतानिरूपितावच्छेद-
कत्वावच्छिन्नसंयोगसंबन्धावच्छिन्नप्रकारतानिरूपितसमवायसंबन्धावच्छिन्ननिरवच्छिन्नावच्छेदकतात्वाव-
च्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन ज्ञानं प्रति वह्नित्वावच्छिन्नप्रतियोगितासंब-
न्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छेद्याभावत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रकारतानिरूपि-
तविशेष्यतानिरूपितसंयोगसंबन्धावच्छिन्नावच्छेदकतानिरूपितसमवायसंबन्धावच्छिन्ननिरवच्छिन्नावच्छे-
दकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन ज्ञानस्य प्रतिबन्धकत्वमिति , एवं घटाभाववान्
वह्निमान् पटाभाववान् वह्निमानित्यादिज्ञानानां तद्विपरीतज्ञानानां च तद्भावः वह्नित्वावच्छिन्नप्रका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रतानिरूपितकिंचिद्धर्मव्यापकप्रतियोगिकसंयोगत्वावच्छिन्नसंसर्गतानिरूपितविशेष्यतानिरूपितावच्छेद-
कत्वावच्छेद्यस्वरूपसंबन्धावच्छिन्नाभावत्वावच्छिन्नप्रकारत्वाऽवच्छिन्नविशेष्यतानिरूपितसंयोगसंबन्धाव-
च्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रकारतानिरूपितसमवायसंबन्धावच्छिन्ननिरवच्छिन्नधर्मविशिष्टान्याव-
च्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन ज्ञानं प्रति वह्नित्वावच्छिन्नसंयोगसंबन्धाव-
च्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नाभावत्वावच्छिन्नस्वरूपसंबन्धाऽव-
च्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितस्वरूपसंबन्धावच्छिन्नाभावत्वावच्छिन्नप्रकारत्वावच्छिन्नाऽव-
च्छेदकतानिरूपितप्रतियोगितासंबन्धावच्छिन्नप्रकारत्वावच्छेद्यावच्छेदकतानिरूपित समवायसंबन्धाऽव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्ननिरवच्छिन्नधर्मविशिष्टान्यावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन ज्ञानस्य प्रतिबन्धकत्वमिति, एवमेव सर्वत्र प्रतिबध्यप्रतिबन्धकज्ञानयोर्धर्मितावच्छेदकपरम्परायां यस्य स्वरूपतो भानं तद्वृत्तिधर्मान्तर्भावेण प्रतिबध्यप्रतिबन्धकभाव ऊहनीय इति दिक् ॥ श्रीः ॥

ज्ञानं ज्ञानसामान्यं तेन घटादिविषयकस्य कस्य चित्समूहालम्बनस्य तादृशज्ञानविरोधिबाधादिविषयकत्वेऽपि नातिप्रसङ्ग इति ॥

अत्र सामान्यपदोपादाने ह्रदो वह्निमानित्यत्र जातिमान् वह्न्यभाववानिति ज्ञानवारणायाव्याप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कविषयिताशून्यत्वस्य ज्ञाने निवेशनीयतया तत एवोदासीनातिव्याप्तिवारणसंभवात्सामान्यपदं व्यर्थमिति शङ्कासमाधानमूह्यम् ॥ श्रीः ॥

स्वावच्छिन्नविषयकत्वव्यापकतादृशज्ञानविरोधिविषयिताकधर्मवत्त्वमिति फलितार्थ इति ॥ ॥

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारता तद्व्याप्यहेतुतावच्छेदकावच्छिन्नप्रकारताविशिष्टग्रहत्वव्यापकप्रकारताविशिष्टग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानिरूपितस्वरूपसंबन्धरूपावच्छेदकता तद्विषयिता यद्रूपावच्छिन्नविषयिताशालिनिश्चयत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यापिका तद्रूपवत्त्वं लक्षणम्, अत्र प्रकारताविशिष्टत्वं च स्वविशिष्टप्रकारतावत्त्वसंबन्धेन प्रकारतायां प्रकारतावैशिष्ट्यं च स्वावच्छेदकावच्छिन्नत्व-स्वावच्छेदकसंबन्धावच्छिन्नत्व-स्वनिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वैतत्त्रितयसंबन्धेन, तादृशप्रकारताविशिष्टग्रहनिष्ठप्रतिबध्यतानिवेशे पर्वतो वह्निमानित्यत्र पर्वतो वह्निमान् ह्रदश्च तथेति समूहालम्बनग्रहनिष्ठोदासीनप्रतिबध्यतामादाय वह्न्यभाववद्ध्रदेऽतिव्याप्तिः, तादृशग्रहत्वव्यापकप्रतिबध्यतानिवेशेऽसंभवः ह्रदो वह्निमान् वह्निव्याप्यधूमवानित्याकारकग्रहत्वव्यापकप्रकारताविशिष्टग्रहत्वं ह्रदो वह्निमान् ह्रदो धूमवान् धूमो वह्निव्याप्य इत्यादिग्रहेषु वर्तते तत्र सर्वत्र कस्याश्चिदपि प्रतिबध्यताया यत्किंचिद्दोषज्ञाननिरूपिताया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभावात्, अतः प्रतिबध्यतायां तादृशप्रकारताविशिष्टप्रकारत्वावच्छिन्नत्वं वक्तव्यं प्रकारतायां पक्षे साध्यहेत्ववगाहिग्रहत्वव्यापकत्वं च तादृशग्रहानिष्ठो यः किंचिद्धर्मावच्छिन्नविशेष्यतानिरूपितार्किचिद्धर्मावच्छिन्नप्रकारता नास्तीति प्रतीतिसिद्धः सामान्याभावः तदप्रतियोगित्वं तथाच पक्षे साध्यतद्व्याप्यहेतुवैशिष्ट्यावगाहिग्रहनिष्ठोक्ताभावाप्रतियोगिप्रकारताविशिष्टप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकतावती यद्रूपावच्छिन्नविषयिता तद्रूपावच्छिन्नविषयिता यद्रूपावच्छिन्नविषयिताशाल्यव्यापकविषयिताशून्याऽनाहार्यनिश्चयत्वव्यापिका तद्रूपवत्त्वं लक्षणम्। नन्वत्र पर्वतो वह्निमानित्यत्र पाषाणमयत्वविशिष्टपर्वतेऽतिव्याप्तिः पाषाणमयत्ववत्पर्वतविषयिताया अपि पर्वतत्वावच्छिन्नविशेष्यतानिरूपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवह्नित्वावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वात्
प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वं निवेश्य तद्वारणेऽसाधारण्येऽव्याप्तिः ज्ञानवैशिष्ट्यावच्छि-
न्नत्वा-ऽसाधारण्यविषयित्वानवच्छेद्यत्वोभयाभावं तत्र निवेश्योक्तातिव्याप्त्यव्याप्तिवारणे गगनाभा-
ववदभाववत्कालीनघटो गगनवानित्यत्र बाधेऽव्याप्तिरिति चेन्न । तादृशप्रतिबध्यतानिरूपितप्र-
तिबन्धकतावच्छेदकतात्वावच्छिन्नप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं किंचिद्रूपावच्छिन्नविषयित्वा-
ऽव्यापकविषयिताशून्यानाहार्यत्वादिविशिष्टयद्रूपावच्छिन्नविषयिताशालिनिश्चयनिष्ठभेदप्रतियोगिताऽव-
च्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेदकं तद्रूपवत्त्वमिति वक्तव्यं पाषाणमयत्ववत्पर्वतविषयिता-

॥ २७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटकपदार्थनिष्ठसमुदायत्वं न तादृशज्ञानवैशिष्ट्यादिघटितसमुदायवृत्तिसमुदायत्वस्यैव तादृशत्वात् तच्च न पाषाणमयत्ववत्पर्वतविषयकतादृशनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितानवच्छेदकमिति नातिव्याप्तिः, इदानीमसाधारण्यसंग्रहाय तादृशनिश्चये पक्षधर्मिकहेतुमत्ताज्ञानाकालीनत्वासाधारण्यविषयकत्वोभयाभाववत्त्वं विशेषणं देयं तथाच सति पक्षविशेष्यतानिरूपितसाध्यप्रकारतात्मकनिरुक्तप्रकारताविशिष्टप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपिताऽसाधारण्यविषयकनिश्चयनिष्ठप्रतिबन्धकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकीभूतं यत्पक्षधर्मिकहेतुमत्ताज्ञानवैशिष्ट्याऽसाधारण्यादिविषयिताघटकपदार्थगतसमुदायत्वं तत्पक्षधर्मिकहेतुमत्ताज्ञानकालीनोक्तोभयाभाववदसाधारण्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयकताद्दशनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितानवच्छेदकं भवतीति नासाधारण्याऽव्याप्तिः । न चैवमपि कपिसंयोग्येतत्त्वादित्यादौ कपिसंयोगाभाववद्वृक्षेतिव्याप्तिः कपिसंयोगाभाववत्ताज्ञानस्य विशिष्टज्ञानत्वेनैव प्रतिबन्धकतया ताद्दशप्रतिबन्धकतावच्छेदकाऽनाहार्यत्वादिविशिष्टनिश्चयीयकपिसंयोगाभाववद्वृक्षविषयितावद्भेदस्य कपिसंयोगाभाववान्वृक्ष इत्यनाहार्यनिश्चयेऽभावादिति वाच्यम् । निश्चयेऽव्याप्यवृत्तित्वभ्रमानास्कन्दितत्वस्य निवेशनीयतयाऽव्याप्यवृत्तित्वप्रमाविशिष्टकपिसंयोगाभाववद्वृक्षविषयकज्ञाने सामान्यतः प्रतिबन्धकतायामुत्तेजकीभूताऽव्याप्यवृत्तित्वज्ञानाभावविशिष्टताद्दशनिश्चयीयकपिसंयोगाभाववद्वृक्षविषयितावद्भेदस्य सत्त्वेन ताद्दशप्रतिबन्धकतावच्छेदकतात्वाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नपर्याप्त्यनुयोगितावच्छेदकाऽव्याप्यवृत्तित्वज्ञानाभावघटितसमुदायवृत्तिसमुदायत्वस्याऽव्याप्यवृत्ति-त्वभ्रमानास्कन्दितकपिसंयोगाभाववद्वृक्षविषयकताद्दशनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकतात्वावच्छिन्न-पर्याप्त्यनुयोगितावच्छेदकतयातिव्याप्तेरभावात्, अत्र मेयत्वविशिष्टव्यभिचारवारणाय विशिष्टान्तरा-ऽघटितत्वमपि वक्तव्यं तच्चैतेन–कल्परीत्या यत्किंचित्प्रतिबन्धकताघटितं वाच्यम्, तथाच ताद्दश-प्रकारत्वावच्छिन्नयत्प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकपर्याप्त्यनुयोगितावच्छेदके ताद्दशनि-श्चयनिष्ठभेदप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितानवच्छेदकत्वं तत्प्रतिबन्धकतावच्छेदकविषयिता-सामान्ये स्वावच्छिन्ननिरूप्यतावत्त्वं वक्तव्यं व्याप्तिप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कतावच्छेदकविषयितासामान्यान्तर्गतशुद्धव्यभिचारत्वावच्छिन्नविषयितायां मेयत्वविशिष्टव्यभिचारत्वावच्छिन्ननिरूप्यत्वाभावान्नातिव्याप्तिः । नचैवं सर्वं गगनवदित्यत्र गगनाभाववद्घटादिरूपबाधेऽव्याप्तिः तादृशप्रतिबन्धकतावच्छेदकविषयितासामान्यान्तर्गतगगनाभाववत्पटादिविषयितायां तादृशघटनिरूपितत्वाभावादिति वाच्यम् । तादृशविषयितायां स्वावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वनिवेशेन तद्वारणात्, एवं ह्रदो वह्निमानित्यत्र वह्न्यभाववद्ध्रदत्वाव्यापकविषयिताशून्यह्रदो वह्न्यभाववानिति ज्ञानीयवह्न्यभावविषयिताया अपि बाधप्रतिबन्धकतावच्छेदकतया तद्विषयितायां दोषनिरूप्यत्वाभावादव्याप्तिः, अतो यद्रूपावच्छिन्नविषयितासामान्यमवच्छेदकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्रूपावच्छिन्नविषयितासामान्ये स्वावच्छिन्ननिरूप्यता विवक्षणीया तथाच ह्रदो वह्निमानित्यत्र जातिमद्वह्न्यभाववद्ध्रदेऽतिव्याप्तिः जातिमद्वह्न्यभाववद्ध्रदविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयवह्न्यभाववद्ध्रदविषयितासामान्यस्य तादृशप्रतिबन्धकतावच्छेदकत्वं नास्ति तद्विषयितायाः जातिमान्वह्न्यभाववानिति ज्ञानसाधारण्यात्, किंतु जातिमद्वह्न्यभाववद्ध्रदविषयितासामान्यमेव तदवच्छेदकं तत्रच तन्निरूप्यत्वमक्षतमेवेति तादृशविषयितायां यद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यज्ञानीयत्वमपि विशेषणं बोध्यम् , एवं हेतुमत्पक्षघटिताऽसाधारण्यसंग्रहाय तादृशविषयितायामसाधारण्यविषयिताभिन्नत्वाऽसाधारण्यविषयितात्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वोभयाभाववत्त्वमपि विशेषणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बोध्यम्, अत्रायमनुगमः पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारता-साध्यव्याप्यहेतुतावच्छेदकावच्छिन्नप्रकारता-शालिग्रहनिष्ठकिंचिद्रूपाऽवच्छिन्नविशेष्यतानिरूपितकिंचिद्रूपावच्छिन्नप्रकारता नास्तीति प्रतीतिसिद्धसामान्याभावाऽप्रतियोगिप्रकारताविशिष्टप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टधर्मवत्त्वं लक्षणम्, प्रतिबन्धकतावैशिष्ट्यंच संबन्धद्वयेन तत्र प्रथमः स्वनिरूपितावऽच्छेदकतात्वाऽवच्छिन्नपर्याप्त्यनुयोगिताऽवच्छेदकधर्मनिष्ठकिंचिद्रूपावच्छिन्नविषयित्वाऽव्यापकविषयिताशून्यकिंचिद्रूपावच्छिन्नविषयिताशालव्याप्यवृत्तित्वभ्रमानास्कन्दितानाहार्याप्रामाण्यज्ञानानास्कन्दितपक्षधर्मिकहेतुमत्ताज्ञानाऽकालीनत्वा-ऽसाधारण्यविषयकत्वोभयाभाववन्निश्चयनिष्ठभेदप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेकत्वं नास्तीति प्रतीतिसिद्धाभावप्रतियोगिता-
निरूपितावच्छेदक[१]तानिरूपितावच्छेदक[२]तानिरूपितावच्छे[३]दकतानिरूपितावच्छे[४]दकतानिरूपितावच्छेद[५]-
कतानिरूपितावच्छे[६]दकतानिरूपितावच्छे[७]दकतानिरूपितावच्छे[८]दकतानिरूपितावच्छे[९]दकतानिरूपिताव-
च्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकत्वरूपः, अपरस्तु स्वनिरूपितावच्छेदकतावृत्तिकिंचिद्रूपावच्छिन्न-
विषयित्वाऽव्यापकविषयिताशून्याऽनाहार्यज्ञानीयकिंचिद्रूपावच्छिन्नविषयितानिष्ठभेदप्रतियोगितावच्छेद-
कत्वं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितानिरूपितावच्छे[१]दकतानिरूपितावच्छे[२]दकतानिरूपितावच्छे-
[३]दकतानिरूपितावच्छे[४]दकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेकदतावद्धर्मावच्छिन्नत्वनिष्ठावच्छेद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कताभिन्ना सती किंचिद्रूपावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयत्वनिष्ठावच्छेदकताभिन्ना सती विषयितात्वनिष्ठावच्छेदकताभिन्ना सती असाधारण्यविषयिताभिन्नत्वघटितोभयाभावनिष्ठावच्छे-दकताभिन्ना याऽवच्छेदकता तदनिरूपकतादृशावच्छेदकतानिरूपिका या विषयितानिष्ठावच्छेद-कता तद्विशिष्टत्वरूपः, तद्विशिष्टत्वं च स्वनिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरूपितज्ञाननिष्ठाव-च्छेदकतानिरूपितशून्यत्वनिष्ठाऽवच्छेदकतानिरूपितविषयिताव्यापकत्वनिष्ठाऽवच्छेदकतानिरूपितवि-षयितानिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावत्त्व-स्वनिरूपकवृत्तित्वनिष्ठाव-च्छेदकतानिरूपकभेदनिष्ठावच्छेदकतानिरूपकप्रातियोगितानिष्ठावच्छेदकतानिरूपकावच्छेदकतात्वाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नप्रतियोगिताकाऽभाववत्त्वोभयसंबन्धेन, अत्र भेदप्रतियोगितावच्छेदकतावच्छेदकसंबधश्च स्वावच्छिन्ननिरूप्यतारूपः, अत्रापि क्वचिदव्याप्तिपरिहारप्रकारः स्वयमूहनीयः ॥ श्रीः ॥

आहार्यज्ञानसामग्र्यास्तादृशविषयिताप्रयोजकत्वासिद्धेः विपरीतज्ञानाभावघटितायास्तादृशविषयिताप्रयोजकानाहार्यज्ञानसामग्र्याश्चाहार्यज्ञानाऽजनकत्वात् तादृशग्रहत्वव्यापिका वह्निमत्त्वादिप्रकारितानिरूपिता तादृशपर्वतादिविषयिता साच न प्रतिबध्यतावच्छेदिकेतीति ॥

१ गगनाभाववदभाववत्कालीनघटपक्षकगगनसाध्यकस्थलेऽव्याप्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु अत्राहार्यस्थले अव्याप्त्यभिधानं किमभिप्रेत्य पर्वतत्वावच्छिन्नविशेष्यतानिरूपितनिर्वह्नित्वप्रकारतायास्ताद्दशप्रकारतात्वेन व्यापकत्वमभिप्रेत्य वा तत्तद्व्यक्तित्वेन, प्रथमे तु निर्दोषत्वमनुपदं स्वयमेव वक्ष्यते, द्वितीये असंभव एव ह्रदो वह्निमानित्यत्रापि पक्षे साध्यादिवैशिष्ट्यावगाहिग्रहत्वं ह्रदो वह्निमान् ह्रदो वह्निमद्ध्रदवान् वह्निमद्ध्रदो वह्निमानित्यादिषु ज्ञानेषु वर्तते तत्र सर्वत्र समानाकारकज्ञानविषयिताया अभेदेपि ह्रदो वह्निमानिति ज्ञानीयप्रकारताव्यक्तेरभावात् ताद्दशप्रकारताव्यक्तेस्तद्व्यक्तित्वेन व्यापकत्वाऽसंभवात् । नच प्रकारतायां व्यापकत्वमभिप्रेत्य नेयं शङ्का अपितु प्रतिबध्यतायां स्वावच्छेदकप्रकारतावत्त्वसंबन्धेन तथोक्तज्ञानेषु सर्वत्र वह्न्यभाववद्ध्रदविषयकनिश्चयप्रतिबन्धकतानिरूपितप्रतिबध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तायास्तादृशसंबन्धेन सत्त्वेनाहार्यस्थलाव्याप्त्यभिधानं युक्तमिति वाच्यम् । तथापि नियताहार्यज्ञाने तादृशसंबन्धेन प्रतिबध्यताविरहेणासंभवस्यैव सत्त्वात् आहार्यस्थलीयदोषसाधारण्याय कृतलक्षणे आहार्यभेदनिवेशशङ्काया असंभवात् । मैवम् । प्रकारतायास्तद्व्यक्तित्वेनैव व्यापकत्वमभिप्रेतं तादृशग्रहे विशेषणान्तरमप्यभिप्रेतं तच्च साध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्त्यवच्छेदकत्वानवच्छेद्यप्रकारतानिरूपितपक्षतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकधर्मवृत्तिविशेष्यताशालित्वे सति साध्यतावच्छेदकपर्याप्तावच्छेदकताकविषयतानिरूपितव्याप्तिविषयतानिरूपितहेतुतावच्छेदकपर्याप्त्यवच्छेदकताकविशेष्यत्वावच्छेद्यावच्छेद्यत्वानवच्छिन्नतादृशप्रकारतानिरूपिततादृशपक्षविशे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यताशालित्वं, तथाच ह्रदे वह्निसाधने ह्रदो वह्निमानिति ज्ञानमेव तादृशमिति न कोपि दोषः ॥ श्रीः ॥

तादृशमताश्रयणे पर्वतो वह्निमानित्यादौ वह्न्यभाववद्ध्रदादेर्दोषताप्रसङ्गात् ॥

ननु तन्मते ज्ञानत्वेनैव प्रतिबध्यप्रतिबन्धकभावस्वीकारात् घट इति ज्ञानेपि प्रतिबन्धकतासत्त्वात्सर्वत्रासंभव एव कुतो नाभिहितः मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिवारणाय विशिष्टान्तराऽघटितत्वस्य वक्तव्यतया शुद्धवह्न्यादेरपि निरुक्तलक्षणाश्रयत्वेन विशिष्टान्तरतया तद्घटितत्वात्, एवं तन्मते प्रतिबध्यप्रतिबन्धकभावस्य तत्पुरुषीयत्वादिघटिततया नानापुरुषीयनिश्चयसाधारणनिश्चयत्वव्यापकत्वं प्रतिबन्धकतायां न संभवति, यदि यस्य ज्ञानस्य प्रतिबन्धकतावच्छेदकसंबन्धः प्रसिध्यति तस्यैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिबन्धकत्वं घट इति ज्ञानस्य तादृशसंबन्धाऽप्रसिद्धेर्न तत्र प्रतिबन्धकतेत्युच्यते तदा तद्धदो व-ह्निमानित्यत्र बाधेऽव्याप्तिः तस्य वह्न्यभाववद्धदघटितत्वादिति । मैवम् । यत्किंचित्प्रतिबन्धकताघटित-लक्षणस्य कर्तव्यत्वात् तथाच यत्किंचित्कालपुरुषीयनिश्चयत्वव्यापकत्वं यत्प्रतिबन्धकतायामस्ति त-त्प्रतिबन्धकताघटितविशिष्टान्तराघटितत्वस्य वक्तव्यत्वादिति ॥ श्रीः ॥

तद्धर्मावच्छिन्नभेदमात्रावच्छिन्नप्रतियोगिताकान्योन्याभावस्य प्रतियोगि-तावच्छेदकीभूतभेदप्रतियोगितावच्छेदकतद्धर्मस्वरूपत्वेपि तादृशभेदकू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टावच्छिन्नप्रतियोगिताकभेदत्वस्य नानाधर्मेषु कल्पनापेक्षया तद्विशिष्टस्यै-कस्यैव भेदस्य लाघवेन कल्पयितुमुचितत्वादित्यभिप्राय इति ॥ ॥

नतु एकभेदस्वीकारे कथं लाघवं भेदप्रतियोगितावच्छेदकधर्मेषु कृतेषु भेदत्वकल्पने एव लाघवात्, अतिरिक्तभेदकल्पने तत्रानन्तपदार्थानां संबन्धः कल्पनीयः तस्य च भेदस्य तादृशप्रतियोग्यादिष्वनन्तेषु संबन्धः कल्पनीय इति चेदत्रायमाशयः—भेदस्य प्रतियोगितावच्छेदकापेक्षयाऽतिरिक्तत्वमेवाभिप्रेतं नतु कुत्राप्यन्तर्भावोपि तादृशभेदकूटवत्त्वप्रकारकप्रमाविशेष्यत्वाभावे एव तादृशभेदत्वं कल्पनीयम्, भेदकूटस्यैकत्र द्वयमिति रीत्या भानाङ्गीकारेणेदं, भावप्रतियोगिकाभावस्य ज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गदीशोक्तरीत्या भावस्वरूपत्वाङ्गीकरे तु तादृशभेदकूटप्रकारकप्रमाविशेष्यत्वाभावस्यापि प्रतियोगितावच्छेदकत्वसंभवादगतिरेवेति ध्येयम् ॥ श्रीः ॥

इति श्रीवृन्दावननिवासिसुप्रसिद्धपदवाक्यप्रमाणपारावारीणश्रीमत्त्रय्यन्तपथप्रतिष्ठापनदेशिक-श्रीगोवर्धनरङ्गाचार्यस्वामिप्रणीता गादाधरीसामान्यनिरुक्ति-"नवीनविवेचना" समाप्तिमगमत् ।

दण्डवान् नास्तीत्यादौ दण्डत्वनिष्ठावच्छेदकता दण्डनिष्ठावच्छेदकतया निरूपिता दण्डनिष्ठावच्छेदकता न दण्डत्वनिष्ठावच्छेदकतया निरूपिता द्वयोरपि परस्परं निरूपितत्वे दण्डवान्नास्तीत्याकारकबुद्धिं प्रति दण्डवत्वानिति बुद्धेः प्रविन्धकत्वं नतु दण्डत्वविशिष्टवत्वानिति बुद्धेः ततो दण्डत्वनिष्ट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरवच्छिन्नावच्छेदकताशालिबुद्धित्वेन प्रतिबध्यप्रतिबन्धकभावो वाच्यः निरवच्छिन्नत्वमवच्छेदकत्वाऽनिरूपकत्वं, तच्च न संभवति, दण्डत्वनिष्ठावच्छेदकताया दण्डनिष्ठावच्छेदकतानिरूपकत्वात्, यदि च निरवच्छिन्नत्वमवच्छेदकताविशिष्टान्यत्वं वैशिष्ट्यं च स्वनिरूपकत्व-स्वाऽनिरूपकनिरूपितत्वोभयसंबन्धेनेत्युच्यते तदा गौरवम्, एवं दण्डेन दण्डत्वावगाहिदण्डत्वेन दण्डावगाहिदण्डवद्विशिष्टवान्नास्तीति बुद्धिं प्रति दण्डविशिष्टवानिति बुद्धेः प्रतिबन्धकत्वमापद्यते इति ॥ ॥ श्रीः ॥

इदं पुस्तकं श्रीकृष्णदासात्मज-गङ्गाविष्णोः मोहमयीनिकटवर्ति-कल्याणस्थ-"लक्ष्मीवेङ्कटेश्वराख्य" मुद्रणयन्त्रालयेऽङ्कनमभूत्। संवत् १९५० शकाब्दाः १८१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरोमणेरन्तिमभाववर्णनं गदाधरः संप्रथयाम्बभूव ।
गदाधरस्यान्तिमभावपत्रिकां चकार रङ्गार्यसुधीर्महात्मा ॥

श्रीरङ्गदेशिककवीन्द्रविनिर्मितेयं वर्वर्ति सर्वभुवने तु विवेचनेति ॥ तस्या इदं कविवराः पृथु वृत्तजालं संश्रूयतां निखिलमेव निरूप्यते हि ॥ १ ॥ वाङ्गालपत्रमिति नाम तु कल्पयित्वा ह्मैसूरपत्तननिवासिमहामनीषी ॥ आन्ध्रायसाक्षरकमुद्रणपूर्वकं तामात्मीयकौशलसमं प्रथयाम्बभूव ॥ २ ॥ एतद्व्याख्यारत्नं यदुपज्ञं तस्य तत्र नाम्नोपि॥ उल्लेखाभावो यः स एव तस्यास्ति कौशलोल्लेखः॥३॥पाण्डित्यविज्ञस्य तु पण्डितेन्द्रैरेतन्न शोच्यं खलु कृत्यजातम्॥जीर्णेषु पत्रेषु दुरूहवर्णैर्यन्मुद्रणं शोच्यमिदं तदेव॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तच्छोकपरिहाराय सुदर्शनसुधीः स्वयम् ॥ कृतोद्यमो मुद्रणाय तस्याः कल्याणमाययौ ॥ ६ ॥ श्रीमाँल्लक्ष्मीवेंकटेशाख्ययन्त्राधीशो गङ्गाविष्णुरेवं गृहीत्वा ॥ तस्यानुज्ञां नैजयन्त्रालये तां समुद्र्याथो सुप्रसिद्धामकार्षीत् ॥ ६ ॥ ❋ निवेदयिता—यथार्थवादी ❋

पुस्तक मिलनेका ठिकाना—गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" छापाखाना. कल्याण—(मुंबई.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सामान्यनिरुक्तिविवेचना समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०३६

॥ ॥अथवादसुधाकरः प्रारम्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बा०र० ॥श्रीगणेशायनमः॥शाब्देब्रह्मणिनिष्णातः परंब्रह्माऽधिगच्छति॥इतिवात्सल्यवान्बिभ्रत्तद्रूपंपातुमाधवः॥१॥कोलाहलोऽत्रकुधि
१ यांनप्रत्यूहोविवेकिनाम्॥कलिदोषोरमानाथदासमीक्ष्येनवीक्षितुम्॥२॥आख्यातस्यकृतौशक्तिर्नतुकर्त्तरिकृत्स्नाश्रयत्वमेवहिकर्तृ
त्वंतच्चकृतिरूपमित्यनंतकृतीनांशक्यतावच्छेदकत्वेगौरवादितितार्किकाः॥नचैवंरथोगच्छतीत्यादावचेतनेरथेकृतेर्बाधादाश्रयत्वा
देलक्षणायांलक्ष्यतावच्छेदकगौरवेणसाम्यमितिवाच्यम्॥अतिरिक्तशक्तिकल्पनापेक्षयाक्लृप्तायांशक्तिसंबंधरूपलक्षणायांगौरवाभा
वात् ननुलक्षणाश्रयणेकथंवर्तमानत्वादीनामन्वयः।युगपद्वृत्तिद्वयाऽनभ्युपगमादितिचेन्न।शक्ततावच्छेदकलक्ष्यतावच्छेदकयोर्भेदात्॥
लट्त्वेनहिवर्तमानत्वेशक्तिः।लकारत्वेनलक्षणेति।अतएवसकृदुच्चरितइतिन्यायात्कथंकृतिवर्तमानत्वयोर्युगपद्बोधइत्यपिनाशंक्यम्
लकारत्वलट्स्वरूपशक्ततावच्छेदकभेदात् ननुतथापिलक्षणाज्ञानजन्याऽश्रयत्वाद्युपस्थितेर्युगपत्हेतुत्वकल्पनेगौरवमितिचेन्न तद्विष
यकशाब्दबोधंप्रतितद्विषयकवृत्तिज्ञानजन्योपस्थितित्वेनैवहेतुतयालक्षणाज्ञानस्यपृथक्हेतुत्वाऽभावात् घटपदात्समवायेना
काशस्मरणेतच्छाब्दबोधवारणायवृत्तिज्ञानेतिविशेषणम्।अथैवमनुकूलत्वादीनांसंसर्गाणांशाब्दबोधविषयत्वंदुर्लभमिति
चेन्न घटपदादुपस्थितस्यघटत्वस्यविशेष्यतयान्वयवारणायतत्धर्मप्रकारकतद्विशेष्यकशाब्दबोधंप्रतितत्धर्मप्रकारकत(
द्विशेष्यकवृत्तिज्ञानजन्योपस्थितेर्हेतुत्वावश्यकतयासंसर्गस्यतत्धर्मप्रकारकत्वाभावेनादोषात् स्यादेतत् वृत्त्यनुपस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यापि संसर्गस्य शाब्दबोधविषयत्वे राजपुरुष इत्यादौ यावत्संबंधभानापत्तिः जन्यजनकभावादेरपि संभवादिति चेन्न तात्प-
र्यस्य नियामकत्वात् अत्रेदमवधेयं आख्यातस्य कर्तृवाचकत्वाभावे पच्यते तंडुलेनेत्यादौ कर्मवत्कर्मणा तुल्यक्रिय इत्यतिदे
शात्कर्मणि द्वितीयापत्तिः वैय्याकरणानां तु लिङ्शाशिष्यङिति ङिल्कारकाद्ध इत्यनुवृत्तेर्लकारवाच्यः कर्ता कर्मवदित्यर्थान्ना
तिप्रसंगः॥ भावे लकारे च लकारेण कर्त्तुरनुपस्थितेः एवं भेत्तव्यं कूसूलेनेत्यत्रापि कर्मवत्कर्मणेति कर्मवद्भावाभ्दावे प्रत्ययाना
पत्तिः अस्मन्मते च लकारवाच्यस्यैव कर्तुः कर्मवद्भावात्कृतिकर्तुः कर्मवत्वाभावेनोक्तदोषाभावः न च लकारवाच्यकृ
त्याश्रयः कर्ता कर्मवदित्यर्थान्निस्तारः शंक्यः लकारस्य तत्र विकृत्याश्रयवाचकत्वेन कृतिवाचकत्वाभावात् तदाश्रयत्व
स्याप्यसंभवाच्च न च लकारार्थसंख्याश्रयः कर्मकर्ता कर्मवदित्यर्थ इति वाच्यम् पच्यमानस्तंडुल इत्यादौ लकारेण संख्याया अ
नुपस्थित्या कर्मवद्भावानापत्तेः अत एव लकारार्थकर्तृत्वाश्रयः कर्ता कर्मवदित्यर्थेऽप्यत्र न निर्वाहः वाचनिकातिरिक्तवचनारंभस्यै
व गुरुत्वात् किंच लक्षणायाः शक्यानुसंधानपूर्वकत्वाल्लक्षणायां लाघवं निर्युक्तिकमेव अत एव निषादस्थपतिं याजयेदित्यत्र निषाद
श्चासौ स्थपतिश्चेति कर्मधारयो न तु निषादानां स्थपतिरिति तत्पुरुषः॥ ॥ पूर्वपदे लक्षणाप्रसंगादिति सकलसिद्धांतः अत एव
राजपुरोहितौ स्वाराज्यकामौ यजेतामित्यत्र राजा च पुरोहितश्चेति द्वंद्वो न तु राज्ञः पुरोहिताविति तत्पुरुषो लक्षणाप्रसंगादिति सर्वसिद्धां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः अतएवोद्भिदायजेतपशुकाम इत्यत्रोद्भिच्छब्दः कर्मनामधेयमुद्भिच्छब्देन खनित्रादिकं गृहीत्वोद्भिद्भूतायागेनेत्यर्थाश्रयणे
तुमत्वर्थलक्षणापत्तिरितिउद्भिदधिकरणं संगच्छते वस्तुतस्तु फलव्यापारयोरुभयोर्धातुलभ्यत्वादखंडशक्तिरूपमाश्रयत्वमेवाख्या
तशक्यतावच्छेदकमितिन गौरवसंभवना तार्किकपरिभाषाया यत्नत्वस्येव शाब्दिकपरिभाषयाआश्रयत्वस्याप्यतिरिक्तत्वे बाधकाभावा
त् कुमारीभार्य इत्यादौ जातेश्चेति पुंवद्भावप्रतिषेधसिद्धये कौमारादीनामपि जातित्वमभ्युपगच्छतां भाष्यकारादीनां निर्त्येवजाति रि
ति नियमात् अतएव दीधितिकृतापि सिद्धांतलक्षणेऽधिकरणत्वादीनामतिरिक्तत्वं स्वीकृतं तस्य हि अधिकरणस्वरूपत्वे आधेयस्वरू
पत्वे वा परस्परासंयुक्तघटभूतलसत्वेपीदानीं भूतलं घटवदिति प्रत्ययप्रसंग इति विस्तरस्तत्रैव किं चाश्रयत्वं नित्यमेवास्तु उत्पादविना
शाव्यवहारस्तु निरूपितत्वाद्युत्पत्त्यादिकमादायैवास्तु वायुत्वरूपयोः समवायस्यैकत्वेपि रूपनिरूपितत्वाभावेन वायौ रूपवत्ताप्रतीत्य
भाववत् किं च लकारस्य यत्नार्थत्वे पचंतं चैत्रं पश्येत्यादावपि यत्नमात्रबोधापत्तिः तथा चानन्वयः न हि तत्र यत्नस्याश्रयतासंबंधेना
न्वयः संभवति नामार्थयोरभेद इति नियमात् न च तत्र शत्रादीनां कर्तरि शक्तिः शक्यास्थानिनामेव तार्तिकमते वाचकत्वात् स्थान्य
र्थेन निराकांक्षतया कर्तरि शक्तिरित्यस्य तत्रानुपस्थितेः अन्यथा पच्यमान इत्यत्रापि तदापत्तेः अथ पचंतमित्यादौ लकारस्य कर्तरि लक्ष
णेति चेत्सत्यं पाकपद्दादीनां तद्वति लक्षणया पाको देवदत्त इत्यादेरप्यापत्तेः किं च लाक्षणिकं नानुभावकं लाक्षणिकार्थस्य बोधे पदांतर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समभिव्याहारः कारणमिति तार्किकसिद्धांतात्स्वादिसमभिव्याहारस्य तादृशबोधं प्रतिहेतुत्वकल्पने पचमानः पच्यमान इत्यनयोर्वैल
क्षण्यानापत्तिः यत्तु किं करोतीत्यत्र किं विषयको यत्न इत्येवं यत्नार्थककरोतिना प्रश्ने पचतीत्युत्तरदर्शनादाख्यातस्य यत्नार्थत्वमिति त
त्तुच्छं यत्नार्थत्वे यतिवदकर्मकत्वापत्तेः किंच यत्नमात्रार्थत्वे क्रियते घटः स्वयमेवेत्यादौ कर्मवद्भावानापत्तेः यगाद्यनापत्तेः कर्मावस्था
यां या क्रिया सा कर्त्रवस्थायां चेत्तदैव कर्मवत्कर्मणा तुल्यक्रिय इत्यस्य प्रवृत्तेः कृतिश्च न घटादिनिष्ठा प्रश्नवाक्ये यत्नविशिष्टजिज्ञा
सितसंबंध उत्तरे त्वाश्रयत्वादिविशिष्ट इति वैषम्यात् एतेन पचति पाकं करोतीति यत्नार्थककरोतिना विवरणादाख्यातस्य यत्नो ऽ
र्थ इत्यपास्तं उक्तरीत्या कृञो यत्नार्थत्वाभावात् किंचाचेतने स्वरसतः कर्तृपदप्रयोगाभावात्कृञो यत्नार्थत्वमित्येव भवतामाग्रहः स र
थापार्थः बीजादीनां कुरः कृतो रथो गमनं करोतीत्यचेतनेपि कृञः प्रयोगात् अत एव भवतामचेतने कर्तृपदप्रयोगः अत एव पचतीत्युक्ते कः
किंजातीय इति कर्तृविषयकप्रश्नानुभवः सार्वजनीनः किंच लः कर्मणि चेति सूत्रे कर्तृशब्दस्य कर्तृत्वपरतया कर्तृत्वं कृतिरेवेति तद्विरोध
परिहारे कर्तरि कृदित्यत्रापि कृत्यर्थत्वापत्तेः तत एव कर्तरीत्यस्यानुवृत्तेः शब्दाधिकाराश्रयणेपि क्लेश एव अथ तत्र नामार्थयोरभेद इति
नियमात् कर्तृवाचित्वमिति चेत् पचन् चैत्र इत्यादावपि लकारस्य कर्तृवाचकत्वापत्तिः अभेदस्योभयत्र तुल्यत्वात् कीदृशोत्र नियमः ॥
नामार्थयोरभेद एवेति अभेदो नामार्थयोरेवेति आद्ये राज्ञः सुतस्य धनमित्यादौ व्यभिचारः द्वितीये तु स्तोकं पचतीत्यत्र ननु नामार्थधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बा०र०
२

त्वर्थयोर्नामार्थयोश्च साक्षाद्भेदान्वयो नेत्येव नियमः राज्ञः सुतस्येत्यादौ विभक्त्यर्थसंबंधद्वारान्वयो न स्यात् राजपुरुष इत्यत्र तु राजपदस्य राजसंबंधिनि लक्षणया ऽभेद एव ॥ प्राप्तोदकादावप्युदकपदस्योदककर्तृकप्राप्तिकर्मणि लक्षणा उपकुंभमित्यादौ कुंभादिपदस्य कुंभादिसमीपादौ धवखदिरावित्यादौ तु द्वयोरपि प्रधानत्वेन परस्परं संबंधाभावादेवं तर्हि पचतिकल्पमित्यादावुक्तव्युत्पत्तिबलादेव कर्त्तार्थोऽस्तु न च तत्र नाम्नः समुदायस्यार्थ एव नास्तीति शंक्यं। पाचक इत्यादावपि तन्मते समुदायार्थविरहात् तस्मान्नामजन्यबोधविषयत्वमेव नामार्थत्वं किं च कर्तुरवाच्यत्वे पचति चैत्र इत्यादौ कर्त्तुरनभिधानात्तृतीयापत्तिः अथायमाशयः अभिहितसंख्याके कर्तरि तृतीया तद्यथा कर्तृकरणयोर्द्वैकयोरित्यादीनामेकवाक्यतया ऽनभिहिते कर्तृगते कत्वे इत्यर्थ इति चेदेवं तर्हि कृष्टपच्या व्रीहय इत्यत्र कर्मकर्त्तरि कर्तृसंख्याभिधानाभावात्तृतीयापत्तिः पाचको देवदत्त इत्यादौ कृत्तद्धितसमासेषु संख्याभिधानाभावेनागतेः नन्वनभिहिते कर्तृत्वे इत्यर्थोऽस्तु अस्ति च पाचक इत्यादावपि विशेषणतया कृतेरभिधानमिति चेन्न कृष्णस्य कृतिरित्यत्र कृतेरभिहितत्वेन कर्तरि षष्ठ्यनापत्तेः तंडुलः पच्यते स्वयमेवेत्यादौ तंडुलपदात्तृतीयापत्तेः तत्रापि कृतेरनभिधानात् सिद्धांते तु कर्तुरभिहितत्वात्तत्र प्रथमा किं च धातुनैव कृतेरभिधानात् देवदत्तेन क्रियत इत्यत्र तृतीयानापत्तिः आश्रयत्वं तृतीयार्थ इति तु दुर्वचमनुशासनाभावात् नन्वाख्यातस्याश्रयार्थत्वे बीजाभावः देवदत्तादेराधेयतया पाकादावन्वयसंभवादिति चेन्न नामार्थधात्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थयोः साक्षाद्भेदान्वयस्याव्युत्पन्नत्वात् अन्यथा तंडुलः पचतीत्यपि प्रयोगापत्तेः कर्मतासंबंधेन तंडुलस्य पाकेन्वयसंभवात्
किंचाख्यातस्य कर्तृवाचित्वाभावे पचति चैत्र इत्यादावनुभवसिद्धस्य सामानाधिकरण्यस्यानुपपत्तिः ततश्च पचति चैत्र इ
ति प्रयोगप्रसंगः अस्मन्मते त्वभेदान्वयथा उपपत्त्यान्यायसिद्धं समानवचनकत्वम् अथ चैत्रादिगतसंख्याभिधायित्वमेव चैत्रा
दिसामानाधिकरण्यमिति चेदेतन्मते संख्यायाः कुत्रान्वय इत्यत्रैव नियामकाभावः अत्राहुः भावनान्वयिनि संख्यान्वयः भा
वनान्वययोग्यश्चेतरविशेषणीभूतप्रथमांतपदोपस्थाप्यः चंद्र इव मुखं निदर्श्यत इत्यत्रेवार्थसादृश्यस्य विशेषणे चंद्रे संख्या
न्वयवारणाय इतरविशेषणेति भावना च संख्याकालातिरिक्तप्रत्ययार्थ इति अथ कथं न पचति चैत्र इत्यत्र भावना न्वयिनि
पाकानुकूलकृत्यभाववति चैत्रे संख्यान्वय इति चेन्न भावनान्वययोग्यताया एव विवक्षितत्वात् अत एव भावनान्वययोग्यश्चे
त्युक्तम् परे तु परंपरया भावनान्वयमूरीचक्रुः अत्र वदंति भावनान्वयिनि संख्यान्वये पचेतेत्यत्रेष्टसाधनत्वान्वितपाके संख्या
न्वयापत्तिः इष्टसाधनत्वाद्यतिरिक्तत्वेन विशेषणे तु तदेव गौरवम् यत्तूक्तनियमस्वीकारे लाघवमेव बीजं तथा हि भावनान्वयबोधा
याः परपदार्थ चैत्राद्युपस्थिति कल्पनमावश्यकम् तथा च तत्र संख्यान्वयस्वीकारे पदार्थांतरोपस्थित्यकल्पनं प्रत्युक्तलाघवम
क्षुण्णमेवेति चेन्न शाब्दिकमते भावनाया आख्यातवाच्यत्वाभावात् आख्यातार्थ आश्रये संख्यान्वयस्वीकारे पदांतराः ननु सं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धानेनलाघवात् तथाचसंख्याबोधंप्रत्याख्यातजन्याश्रयोपस्थितेर्हेतुत्वंबोध्यम् एतेनयुष्मदादिसमानाधिकरणेइत्यस्य
युष्मदर्थगतसंख्याभिधायि नीत्यप्यर्थोऽपास्तः संख्यान्वयस्यानिश्चयात् अतित्वंभवतीत्यत्रापिमध्यमत्वापत्तेश्च त्व च्छब्द
स्येवत्वत्कर्मकातिक्रमणकर्तरि लक्षणयायुष्मदर्थएवसंख्यान्वयात् इत्यलम् आख्यातस्थले क्रियाविशेष्यकःशा
ब्दबोधःप्रथमान्तविशेष्यक :शाब्दबोधोवाअत्राहुः पश्यमृगोधावतीत्यत्रप्रधानदर्शनक्रियांप्रतिमृगस्यकर्मत्वात्
द्वितीयापत्तिः ननुतार्किकमतेनायंदोषः वाक्यार्थस्यकर्मत्वाद्वाक्यस्यप्रातिपदिकत्वाभावेनद्वितीयायाअसंभवात्॥
अतएवकेयटादयोपीत्थमेवसमादधुः अतएवक्रमादमुंनारदइत्यबोधिसइत्यादौवाक्यार्थस्यकर्मत्वान्नद्वितीयेतिस
मादधते॥ यत्तुतत्रनिपातेनाभिहितत्वान्नद्वितीयेतितन्न अनभिधानेचतिङ्कृत्तद्धितसमासैरित्येवभाष्येपाठादितिचेत्सत्यम्
तदेवतुभवन्मतेदुर्वचम् तथाहिवैयाकरणानांमतेकारकविशिष्टाक्रियावाक्यार्थः तत्रधावतीत्यस्यप्रातिपदिकत्वाभावेन
द्वितीयेतियुक्तोऽयंसमाधिः तार्किकमतेतुक्रियाविशिष्टप्रथमान्तार्थस्यवाक्यार्थतयातस्यकर्मत्वंदुर्वारमेव अन्यथापचन्तंचै
त्रंपश्येत्यादावपिपाकानुकूलकृतिविशिष्टस्यचैत्रस्यकर्मतयाद्वितीयानापत्तेः अतएवनीलोघटःकरोतीतिनप्रयोगः नच
नीलंकरोतिघटंकरोतीतिपृथगेवभाष्यरीत्याकर्मत्वात् द्वितीयेतिवाच्यम् एवमपिविशिष्टस्यकर्मतामादायप्रथमापत्तेर्दुर्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्वात् स्यादेतत् पश्य लक्ष्मण पंपायां बकः परम धार्मिक इत्यादौ बकादेः प्रातिपदिकत्वसंभवात् द्वितीयादुर्वारे
ति चेन्न तत्राप्यस्त्यादिक्रियाध्याहारेणैव बोधात् अत एव धिक् देवदत्तेत्यादौ दिधिगादियोगेपि न द्वितीया संबोधनं
क्रियायां विशेषणमिति सिद्धांतितत्वेनास्मन्मते ध्यात्व्हत क्रियाया एव विशेष्यत्वात् अत एव पांडुदेवदत्तो मा गायती
त्यत्र गानादेरेव कर्मत्वमनुभवसिद्धं एतेन श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभा इत्यत्रोत्पत्ते रिति द्वितीयावारण
यार्थत्वं स्वीकुर्वतः परास्ताः तत्राप्यध्यात्व्हतायाः संतीत्यादिक्रियाया एव विशेष्यत्वात् अथ प्रथमांतस्य विशेष्यत्वाभा
वे सुरथो नाम राजाभूत्समस्ते क्षितिमंडले ॥ तस्य पालयतः सम्यगित्यादौ तच्छब्देन सुरथपरामर्शानापतिरिति चेदेवं त
र्हि तुल्ये पराधे स्वर्भानुर्भानुमंतं चिरेण यत् हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलमित्यादौ तच्छब्देन ग्रसनस्य परा
मर्शानापत्तिः अत एव च भावप्रधानमाख्यातमिति यास्कवचनमप्युपपद्यते न चाख्यातार्थेषु संख्याकालादिषु भाव
वप्रधाने क्रियाप्रधाने इत्यर्थ इति तद्भाष्यव्याख्याया असंगतिः किं च पठन् गच्छतीति वत्पठति गच्छती त्य पि प्रयोगाप
त्तिः ॥ पाठानुकूलकृतिमांश्चैत्रो गमनानुकूलकृतिमानिति बोधसंभवात् शाब्दिकमते तु क्रिययोः परस्परमनन्वयान्नतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वा०सु० श्चाप्रयोगः कथं तर्हि पचति भवतीत्यत्र पाकक्रिया भवतिक्रियायाः कर्त्री भवंतीति भाष्यम् अत एव तिङंतोपस्थापि
५ ताक्रिया क्रियांतरैः समवायं न गच्छतीति उक्तं भाष्य एवेति चेत्सत्यम् कर्तृकर्मभावेन क्रिययोः परस्परमन्वयो भवति न
तु करणत्वेनेति कैयटेन व्याख्यातम् किं च धात्वर्थव्यापारप्रकारकशाब्दबोधं प्रत्याख्यातजन्योपस्थितेस्तार्किकम
तिहेतुतया पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामरांगनाः विगृह्य चक्रे नमुचिद्विषा बलीय इत्थमस्वास्थ्यमहर्निशं
दिव इत्यादौ पुर्यवस्कंदनरूपाः स्वास्थ्यक्रियेत्याद्याकारकान्वयाभावे धातुसंबंधे विहितस्य लोडादेरनापत्तिः किं च धातु
संबंधे प्रत्यया इत्यस्य धात्वर्थानां परस्परसंबंधे सति यस्मिन्काले प्रत्यया उक्तास्ततोऽन्यत्रापि भवंतीत्यर्थः वर्तमानसामी
प्य इत्यादिना कालबाधस्यैव प्रक्रांतत्वात्काल एव बाध्यते तत्रापि गौणत्वात्कृदुपस्थाप्यस्य गौणत्वानापत्तौ उक्तकालबाध
रूपव्यवस्थाया अनुपपत्तिर्बोध्या अपि च सुवृष्टिश्चेद्भविष्यत्सुभिक्षमभविष्यदित्यादौ क्रिययोः कार्यकारणभावेना
न्वयाभावे हेतुहेतुमतोर्लृङित्यादेरप्रवृत्त्यापत्तेरिति दिक् धातूनां तु फलव्यापारोभयवाचकत्वं न तु व्यापारमात्रवाचक
त्वं न च कर्मणि द्वितीयेत्यत्र कर्मपदस्य कर्मत्वपरतया कर्मत्वं च फलमेवेति फलं द्वितीयार्थ एवेति नैयायिकनव्योक्तं ग्रंथस्य
सकर्मकाकर्मकत्वविभागानापत्तेः फलव्यापारोभयवाचकत्वं सकर्मकत्वं केवलव्यापारवाचकत्वमकर्मकत्वमि

CC-0. In Public Domain. Digitization by eGangotri

त्तितेः स्वीकारात् नचयत्धातुसमभिव्याहारे फलं व्यापारश्च प्रतीयते स धातुः सकर्मक इति तल्लक्षणमस्त्विति वाच्यं कर्मप्रयो
गे सकर्मकत्वज्ञानं सकर्मकत्वज्ञाने च कर्मप्रयोग इत्यन्योन्याश्रयापत्तेः अथायमाशयः संयोगरूपफलबोधे गमधातुस
मभिव्याहारः कारणमावश्यकश्चायं कार्यकारणभावः अन्यथा गच्छतीत्यत्र विभागानुकूलव्यापार एव कुतो न प्रतीयत इ
त्यत्र नियामकाभावात् गमधातुसमभिव्याहारस्य कारणत्वापेक्षया गमधातोः कारणत्वे एव लाघवात् अत एव पाको गमन
मित्यत्र न पर्यायता नच तत्र तत्तत्फलावच्छिन्ने व्यापारे लक्षणा तात्पर्यग्राहकं विना लक्षणाया अप्यसंभवात् स्वरसत एव
तद्बोधोदयेन लक्षणाया अयुक्तत्वाच्च बोधकत्वं स्वीकृत्य वाचकत्वं नास्तीत्यस्य दुर्वचत्वाच्च किंच शाब्दबोधे वृत्त्या पदज
न्यपदार्थोपस्थितेर्हेतुतया फलविषयकशाब्दबोधं प्रति द्वितीयाजन्योपस्थितेर्हेतुत्वे गौरवम् नच धातुजन्यफलोपस्थि
तेर्हेतुत्वं कल्प्यमिति साम्यमिति वाच्यम् फलविशेषबोधे धातुविशेषसमभिव्याहारस्य नियामकत्वेन तदंशे साम्यात् अथा
श्रयमात्रं द्वितीयार्थ इति द्वितीयाजन्योपस्थितेर्हेतुत्वकल्पने साम्यमिति चेन्न ग्राममध्यास्ते अधिशेते इत्यादिप्रयोगानुरोधेना
श्रयत्ययबोधं प्रति तद्धेतुत्वस्य भवतोप्यावश्यकत्वात् किंच व्यापारमात्रस्य धात्वर्थत्वे पच्यते तंडुलः स्वयमेवेत्यादौ कर्मवद्भा
वानापत्तिः नच धात्वर्थजन्य फलाश्रयत्वमेव कर्मवद्भावविषय इति वाच्यम् पच्यते घटः स्वयमेवेत्यस्याप्यापत्तेः धात्वर्थज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्ययत्नजन्योत्पत्तिरूपफलस्य घटे सत्वात् अन्यथा क्रियते घटः स्वयमेवेत्यस्यानापत्तेः क्रिया च व्यापारसमुदायः। तदुक्तं हरिणा यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते इति एतेन धात्वर्थः क्रिया तद्वाचकत्वं च धातुत्वमित्यन्योन्याश्रयो ऽपास्तः साध्यत्वं च क्रियांतरानुत्थापकत्वं तदेवासत्वभूतत्वं एतदेवाभिप्रेत्योक्तं हरिणा असत्वभूतो भावश्च तिङ्पदैरभिधीयते इति व्यापाराणामनंतत्वे ति तद्वादिन्यायेन बुद्धिविशेषादेरेव शक्यतावच्छेदकानां नियामकत्वात् लकारविशेषाणां लडादीनां तु वर्तमानत्वादिकमप्यर्थः वर्तमानत्वं च प्रारब्धाऽपरिसमाप्तक्रियोपलक्षितत्वम् वर्तमानत्वादीनां तु धात्वर्थव्यापार एवान्वयः सतत्सत्वे एव पचतीत्यादिप्रयोगात् तार्किकास्तु यत्न एव वर्तमानत्वादीनामन्वयः यत्नाभावेऽग्निसंयोगादिरूपव्यापारसत्वेप्ययं न पचतीति प्रयोगात् वस्तुतस्तु यत्नस्यापि व्यापारविशेषत्वाददोषः किं च जानातीत्यादौ व्यापार एव तेषां वर्तमानत्वान्वयः दृष्टं नश्यतीति प्रयोगवारणायोत्पत्तेरप्याख्यातार्थत्वं स्वीकृत्य तत्रैव वर्तमानत्वादीनामन्वय इति दीधितिकृतापि स्वीकारादनेककार्यकारणभावप्रसंगः न च व्यापारे तदन्वये नाशस्य वर्तमानत्वान्नष्टेपि घटे नश्यतीति प्रयोगापत्तिरिति वाच्यम् प्रतियोगित्वसहितनाशसामग्नीसमवधानस्यैव तत्र व्यापारात् तच्चेदं वर्तमानत्वादिलकारद्योत्यं वाच्यं वेति पक्षद्वयमपि क्षोदक्षममेव कालस्य क्रियारूपतया क्रियामात्रस्य च धातुवाच्यत्वात् लकारो द्योतक एव अथवा क्रिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतंवर्तमानत्वादिलकारवाच्यमेवेत्यन्यत्रविस्तरः परोक्षत्वमतीतत्वमनद्यतनत्वंचलिडर्थः परोक्षत्वंच वक्तृसाक्षात्काराविष
यत्वं व्याख्यातेनेकिरणावलीमुदयनइतित्वयुक्तमेव एवंचकेसुबंधुःसुजनैकबंधुरित्यपि यत्तुणलुत्तमोवेतिज्ञापकादपरोक्षेपिलि
ड्भवतीतितन्न चित्तविक्षेपादिनास्वक्रियायाः प्रत्यक्षत्वाभावेउत्तमप्रयोगात् यथाबहुजगदपुरस्तात्तस्यमत्ताकिलाहमिति
यत्तूक्तंवर्धमानेनतिङंतप्रतिरूपकोयंनिपातइतितच्चिंत्यम् तथासतिधात्वर्थतावच्छेदकफलाश्रयत्वाभावेनकिरणावलीमित्य
स्यकर्मत्वानापत्तेः इत्याख्यातार्थधात्वर्थनिर्णयः समासस्थलेविशिष्टस्यैवार्थवत्वं घटादिपदेघकारादीनामिवतत्राप्यवय
वानांनिरर्थकत्वादितिशाब्दिकाः तार्किकास्त्ववयवशक्त्यैवनिर्वाहमिच्छंति तन्मतेसमासेवृत्तिमत्वरूपार्थवत्वाभावात्प्रातिप
दिकत्वानापत्तिः अवयवार्थमादायसमुदायस्यार्थवत्वंतुनसंभवति एवमपिसमुदायस्यशक्तिलक्षणयोरसंभवात् अर्थवत्वंत्वत्रसू
त्रेवृत्तिमत्वमेव अन्यथागवित्ययमाहेत्यादावपिप्रातिपदिकत्वापत्तिः सिध्धांतेतुअनुकार्याऽनुकरणयोरभेदविवक्षायांसादृश्याद
र्थोशब्दादीनामुपस्थापकत्वेपिवृत्त्योपस्थापकत्वाभावान्नार्थवत्वं नचतत्रसमासग्रहणात्प्रातिपदिकत्वं तथासतिसमासग्रहण
स्यनियमार्थत्वाभावेवाक्यस्यापिप्रातिपदिकत्वापत्तौसुब्लुगापत्तेः मूलकेनोपदंशमित्यादौकृद्ग्रहणपरिभाषयाप्रातिपदिकत्वापत्ते
श्च राजपुरुषइत्यादौनामार्थयोरितिनियमाद्राजाभिन्नःपुरुषइतिबोधापत्तिश्च राजपदस्यराजसंबंधिनिलक्षणयाराजसंबंध्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिन्नः पुरुष इव बोधाभ्युपगमे तु राज्ञी दासी इत्यत्र समानाधिकरणलक्षणपुंवद्भावापत्तिः वृत्तेः प्राक् यत्र सामानाधिकरण्यं तत्रैव पुंव
द्भावः इत्युक्तौ तु मृगी व चपला मृग चपले त्यादावपि पुंवद्भावानापत्तेः अत्र हि सदृशलक्षणया सामानाधिकरण्यं एवं चित्रगुरि
त्यादावपि चित्राः भिन्ना गौरिति बोधवारणाय गोपदस्य चित्रगवीस्वामिनि लक्षणा चित्रपदं तात्पर्यग्राहकमिति सिध्धांतः सोऽप्य
संगतः समानाधिकरणलक्षणपुंवद्भावानापत्तेः अनेकपदस्यैकस्मिन्नर्थे वर्त्तमानत्वाभावात् देवदत्तं पंडितं जानीहीत्यादावि
व देवदत्तपंडितं जानीहीत्यादावपि पांडित्यस्य विधेयत्वापत्तेश्च अतएव पटुरहं ब्रवीमीत्यत्रास्मदो द्वयोश्चेत्यनेन प्राप्तस्य बहुव
चनस्य सविशेषणानामित्यनेन प्रतिषेधो भवति वयं ब्राह्मणा इत्यत्र तु ब्राह्मणत्वस्य विधेयत्वेन विशेषणत्वाभावान्न निषेधः।
किं चावयवानामर्थवत्त्वे ऋध्धस्य राज्ञः पुरुष इत्यादाविव ऋध्धस्य राजपुरुष इत्यपि विशेषणयोगापत्तिः न च यत्र समासघटकी
भूतपदबहिर्भूतपदसापेक्षत्वमभेदेन तत्र समासोऽसाधुः अतएव शरैः शातितपत्रोऽयमित्यादौ न दोष इति वाच्यं एतद्वचनारंभस्यैव
गुरुत्वात् मम तु सापेक्षमसमर्थवदिति न वाचनिकं किं तु पदार्थैकदेशत्वान्न ऋध्धादीनामन्वय इतीत्यभिप्रायिकम् देवदत्तस्य
गुरुकुलमित्यादौ तु लोके बोधोदयेन व्युत्पत्तिवैचित्र्यादेकदेशेऽप्यन्वयः स्वीक्रियते एतदभिप्रायेणैवोच्यते भवति वै नित्यसापे
क्षस्य वृत्तिरित्यसमर्थमित्यस्य हि लोके बोधाजनक इत्यर्थः अथ तार्किकमतेऽपि राजपदस्य राजसंबंधिनि लक्षणाभ्युपगमेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदेशत्वादेव नञ्स्थादीनामन्वय इतिचेन्न कंठेकालोदास्याः पुत्र इत्यादौ लक्षणायांमानाभावेन तत्र विशेषणान्वयापत्तेः किं
च यस्य राजपुरुष इत्यत्र लुप्तषष्ठ्यनुसंधानाच्छाब्दबोधस्तस्य पुरुषस्य तादृशप्रयोगापत्तेर्दुर्वारत्वात् नहि तत्र षष्ठीनानुसंधेयेति
राजशासनमस्ति अपिच वृत्तेरर्थवत्वाभावे पुरुषो व्याघ्र इव शूर इत्यादाविव पुरुषव्याघ्रः शूर इत्यस्य तुल्यार्थत्वापत्तेरुपमितं
व्याघ्रादिभिरित्यत्र सामान्याप्रयोग इति निषेधात्समासानापत्तेः सिद्धांते तु प्राप्तधर्मातिरिक्तधर्मेण सादृश्यग्रहणे समासो भव
त्येव अतएव भाष्याब्धिः क्वातिगंभीर इत्यत्रापि तत्तदुरवगाहत्वादिना सादृश्यं अतएव वषट्कर्त्तुः प्रथमभक्ष इत्यत्र भक्षणमुद्दि
श्य न प्राथम्यविधिरिति मीमांसकसिद्धांतः अतएव चेदृशविशेषयोः समासे सति अविमृष्टविधेयतादोषापत्तिरित्यालंकारि
काः एवं राज्ञः पुरुषः शूरश्चभवतीति वाक्ययो राजसंबंधशूरत्वोभयस्य पुरुषे बोधवद्राजपुरुषः शूरश्चेत्यपि प्रयोगापत्तिः किंच
राजपुरुष इत्यादौ षष्ठ्यादिलोपे पाणिपादमित्यादौ चादिलोपे च गोरवात् तस्मात्पंकजादिपदवत्समासेपि शक्तिकल्पनमुचितं
अथ राजपुरुषादेः समुदायस्य शक्तत्वे निषादस्थपतिं याजयेदित्यत्र निषादानां स्थपतिरिति न तत्पुरुषः पूर्वपदे संबंधिनि लक्ष
णाप्रसंगात् किंतु कर्मधारयो लाघवादिति सिद्धांतासंगतिरिति चेन्न तत्पुरुषे संबंध्यादिरूपाधिकपदार्थांतर्भावेणैकार्थीभाव
कल्पनमित्यतएव गुरुत्वात् अतएव बहुव्रीहावन्यपदार्थांतर्भावेणैकार्थीभावः कल्पनीय इति तत्पुरुषापेक्षया तस्य जघन्यत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म् नञ्समासे त्वारोपितत्वस्य नञा द्योतितत्वाद्ब्राह्मण इत्यस्यारोपितब्राह्मण इत्यर्थः ब्राह्मणभिन्न इत्यादिस्त्वार्थिकोऽर्थः अतए
वौत्सर्गिकं तत्पुरुषस्योत्तरपदार्थप्राधान्यमपि सिध्यतीत्यसर्वस्मै इत्यादौ सर्वनामत्वात्स्मायादयः ननु शाब्दिकमते नञो द्योतक
त्वाद्ब्राह्मण इत्यादावेकार्थीभावासंभवः भिन्नार्थशब्दानामेकार्थवृत्तित्वस्यैवैकार्थीभावपदार्थत्वादिति चेन्न ब्राह्मणत्वमारो
पश्च ब्राह्मणशब्दार्थः तयोश्च परस्परं विषयविषयिभावेनान्वयः आरोपविषयब्राह्मण्यवानित्यर्थः इदमेव नञो द्योतक
त्वं एवं च तादृशपदार्थयोः परस्परमन्वयमात्रेणैकार्थीभावव्यवहारात् भाष्यानुसारिणस्तु नञोऽभाव एवार्थः स च प्रतियोगिनि
विशेषणं विशेष्यो वेति पक्षद्वयम् आद्ये घटो नास्तीत्यत्राभावप्रतियोगिघटकर्तृका सत्तेति बोधः अत्वं भवसीत्यत्र भेदप्रतियो
गित्वद्भिन्नाश्रयिका भवनक्रियेति बोध इति युष्मदर्थसामानाधिकरण्यसत्त्वान्मध्यमत्वादिव्यवस्था सिध्यति त्वत्प्रतियो
गिकभेदवानित्यर्थे तु तदसिद्धेः एवं न घटा वर्तन्त इत्यत्र बहुवचनमपि सिध्यति अभावपरत्वे तु तस्यैकत्वात्तदनापत्तेः एवं से
व्यतेऽनेकया सन्नतापांगयानेकमन्यपदार्थे इत्यत्रोत्तरपदार्थप्रधानत्वादेकवचनं सिध्यति तपंत्यनेके जलधेरिवोर्मय इत्यत्र
त्वनेकशब्दस्यैकशेषेण बोधः द्वितीये त्वभावविशेष्यक एव बोधः उत्तरपदकार्यं तु अनञ्समास इति ज्ञापकादित्यन्यत्र वि
स्तरः इति समासार्थनिर्णयः उपसर्गाणां द्योतकत्वमेव न वाचकत्वं अनुभूयते सुखमित्यत्र धात्वर्थतावच्छेदकफलशा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लित्वाभावेन कर्मणि लकारानापत्तेः एवं चादीनामपि द्योतकत्वम् अतएव साक्षात्क्रियते हरिरित्यादौ हरेः साक्षात्कारकर्मता
एतेन प्रादीनां द्योतकत्वं चादीनां वाचकत्वमित्यर्धजरतीयमपास्तम् ननु चादीनां वाचकत्वाभावे स्वीकारार्थादौ मिति पदा
च्छाब्दबोधानापत्तिरिति चेन्न निपातानामेव द्योतकत्वेनाव्ययान्तरस्य द्योतकत्वाभावात् ननु लौकिकविषयत्वं निपातार्थः क
रोतेश्च तदनुकूलो व्यापारोऽर्थः तथा च ग्रामं गच्छतीत्यत्र द्वितीयार्थफलाश्रयत्वेन साक्षात्क्रियते हरिरित्यत्रापि करोत्यर्थ
जन्यनिपातार्थफलाश्रयत्वादेव कर्मत्वमस्त्विति वाच्यम् केवलव्यापारवाचकत्वस्य पूर्वमेव निराकृतत्वात्। किंच निपातानां वाचकत्वे शोभनः
समुच्चयो द्रष्टव्य इतिवच्छोभनश्च द्रष्टव्य इत्यपि प्रयोगापत्तिः घटस्य समुच्चय इतिवद्घटस्य च इति प्रयोगापत्तिश्च ननु शोभनः समुच्च
य इत्यादौ नामार्थत्वादभेद एव शोभनश्चेत्यादौ तु निपातार्थत्वाच्छोभनवृत्तिः समुच्चय इति भेदान्वय एव निपातातिरिक्तना
मार्थयोरेवाभेदस्वीकारादिति चेन्न निपातातिरिक्तत्वविशेषणप्रवेशस्यैव गुरुत्वात् अपि च शरैरुस्रैरिवोदीच्यानुद्धरि
ष्यन्रसानिवेत्यादावनन्वयः अत्रोस्रसदृशैः शरैरस्रसदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः स चोस्रादिपदानां तत्सदृशपरत्वे
इवशब्दस्य द्योतकत्वं च संगच्छते तथा हि उस्रैरिति करणे तृतीया न चोस्राणां करणमिवशब्दार्थसदृशस्य करणत्वे तु
ननु तत्क्रियाया आवृत्त्योस्रकरणकसकर्मकोद्धरणसदृशशरकरणकोदीच्यकर्मकोद्धरणमित्यर्थान्न दोष इति वाच्यं वार .द्यमिवशब्दप्रयोगासंगतेः उपस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्गत्वापेक्षयानिपातत्वस्याधिकवृत्तितयातस्य वच्छेदेनद्योतकतायाः कल्पयितुमुचितत्वाच्च सामान्येप्रमाणानांपक्षपातात्
निपातत्वंचाखंडोपाधिरूपंजातिरूपंवोभयथापिप्रादिचादिसाधारणमेव नञ्तत्पुरुषेउत्तरपदार्थप्राधान्यमितिप्रवाद
स्यपूर्वपदार्थोत्यंप्रतिप्राधान्यमित्याशयः द्योत्यार्थेनचार्थवत्वात्प्रातिपदिकत्वमपि इतिचाद्यर्थनिरूपणम् जातिरेवशब्दा
र्थइतिमीमांसकाः तथाहिव्यक्तीनामानंत्यादेकव्यक्तौशक्तिग्रहेव्यक्त्यंतरबोधाच्च नव्यक्तौशक्तिसंभवः जातिविशिष्टा
यांव्यक्तौशक्तिरित्युक्तौतुनागृहीतविशेषणाबुद्धिर्विशेष्यमुपसंक्रामतीति न्यायादावश्यकत्वाच्चजातावेवशक्तिरस्तु।
व्यक्तिबोधस्त्वाक्षेपात् नचाक्षेपितव्यक्तेःपदार्थत्वाभावाद्गामानयेत्यादौकथंव्यक्तौकर्मत्वाद्यन्वयः प्रत्ययानांप्रकृत्य
र्थान्वितस्वार्थबोधकत्वादितिवाच्यं लक्षणयातस्याअपिप्रकृत्यर्थत्वात् लक्षणेवत्यत्राक्षेपशब्दार्थः नचानुपपत्तिप्र
तिसंधानंविनाकथंलक्षणेतिवाच्यं निरूढलक्षणायांतदनपेक्षणात् ननुस्वार्थादन्येनरूपेणज्ञातेभवतिलक्षणेतिनि
यमात्कथंघटत्वेनोपस्थितेलक्षणेतिचेन्न एतन्नियमेमानाभावात् अतएवनीलंघटमानयेत्यादौनीलरूपवतिलक्षणे
त्याहुः नैयायिकास्तुजात्याकृतिव्यक्तयःपदार्थाइत्याहुः अत्रयद्यपिएकंद्विकंत्रिकंचाथेत्यादिनाबहवःपक्षाःशास्त्र
संमतास्तथापिकेवलव्यक्तिरेवशब्दार्थइतिपक्षोज्यायान् शक्तिग्राहकशिरोमणेस्तत्रैवपक्षपातात् ननुव्यक्तीनामे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशब्दार्थत्वे आनंत्याद्व्यभिचाराच्चेति प्रागुक्तो दोषइति चेन्न जातेरुपलक्षणत्वस्वीकारात् तदुक्तं भट्टपादेन आनंत्येपिहि भा
वानामेकं कृत्वोपलक्षणं शब्दः सुकरसंबंधो न चव्यभिचरिष्यतीति अत्रवदंति व्यक्तीनामानंत्याद्गोत्वादिविशिष्टव्यक्तौ श
क्तिकल्पने गोत्वादौ शक्यतावच्छेदकत्वकल्पनस्यावश्यकतया व्यक्तिशक्तिकल्पने प्रयोजनविरहः यथाहि गोत्वांशे शक्यता
वच्छेदकता निरवच्छिन्ना तथास्मन्मते शक्तिरपि निरवच्छिन्नेति न गोत्वत्वप्रवेशाद्गौरवं अथजातिशक्तिवादिमतेपि गोर्नष्टाइत्या
दौ व्यक्तिभानस्यावश्यकतया शक्तिर्दुर्वारैवेति चेन्न व्यक्तिशक्तिज्ञानत्वेन शाब्दबोधे हेतुतानस्वीक्रियतइति एतावतैव व्य
क्तेरवाच्यत्वव्यवहारात् अतएव व्यक्त्यंशेऽकुंठाशक्तिरिति व्यवहारः अतएव संसर्गाणां शाब्दबोधविषयत्वेपि न वाच्यता॥
एवंच गोर्गोपदशक्य इति व्यवहारोपि न विरुध्यते अत्रकेचित् घटपदाद्घटत्वेन रूपेणोपस्थितिर्नतु द्रव्यादिरूपेणेति वैषम्यानु
पपत्तिः घटे घटत्वस्येव द्रव्यत्वादेरपि वैशिष्ट्ये विशेषाभावात् तस्माद्घटत्व विशिष्टएव शक्तिरुपेया घटत्वविशिष्टइत्यस्य
चघटघटत्वयोरित्येवार्थः घटत्वस्योपलक्षणत्वेउक्तदोषानुद्धारात् अत्रेदंतत्वम् अलक्ष्यस्य लक्ष्यतावच्छेदकत्ववद कारणस्य
च कारणतावच्छेदकत्ववदशक्यस्य शक्यतावच्छेदकत्वे बाधकाभावाद्घटत्वादिकमुपलक्षणं अतएव दीधितौ शक्यतावच्छेदके
शक्तिर्दूषितैवेत्यलम् विशेषणविभक्तेरभेदार्थत्वमित्येके साधुत्वार्थकत्वमित्यन्ये अत्रेदंबोध्यं नीलंघटंकरोतीत्यादौ घटपदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शा०सु
३०

CC-0. In Public Domain. Digitization by eGangotri

तरद्वितीयया कर्मत्वस्याभिहिततया नीलपदोत्तरं द्वितीया न प्राप्नोतीत्याशङ्क्य नीलं करोति घटं करोतीति पृथगेवान्वयः पश्चा न्मानसो नीलघटयोरभेदावगम इति समाहितं तिङ्कृत्तद्धितेति परिगणनं तु नाश्रयणीयमित्याशयः यद्वा याचितमंडनन्याये नैकस्मिन्नेव कर्मणि घटपदादिव नीलपदादपि द्वितीयेति पक्षस्तदा साधुत्वार्थकत्वप्रवादः अत एवोक्तं भाष्ये अथवा कट एव कर्म तत्सामानाधिकरण्याद्भीष्मादिभ्योपि द्वितीयेति विशेष्यसमानविभक्तिकत्वं विशेषणस्य न्याय्यमिति भावः तद्यथा ईश्वरसुहृदः स्वयं निर्धना अपि तद्धनेन धनफलभाजस्तद्वत् भाष्ये तु पक्षान्तरमप्युक्तं अथवा कटोपि कर्म भीष्मादयोपीति कटपदोत्तरद्वितीयया कटगतकर्मत्वस्योक्तावपि भीष्मगतकर्मत्वबोधनाय भीष्मपदोत्तरमपि द्वितीयावश्यकीत्यस्मिन्पक्षे भीष्मरूपकर्माभिन्नं कटरूपं कर्मेत्यर्थः एवं च विशेषणविभक्तेरभेदे वृत्तिकल्पनं निर्मूलं पदार्थभेदे द्वंद्वः पदार्थतावच्छेदकभेदे कर्मधारय इति तार्किकाणां प्रवादः अत्र पदार्थत्वं पदजन्यप्रतीतिविषयत्वं तच्च पदार्थतावच्छेदकसाधारणं तत्रापि प्रकारतारूपविषयतासत्वात् एवं च नीलघटयोरभेद इत्यादौ पदार्थतावच्छेदकयोर्नीलत्वघटत्वयोर्भेदादेव द्वंद्वः इष्टमेव प्रमाणप्रमेयप्रयोजनेत्यादिगौतमसूत्रेपि प्रमाणप्रमेययोर्भेदाभावेपि पदार्थतावच्छेदकयोः प्रमाणत्वप्रमेयत्वयोर्भेदादेव द्वंद्वः अथैवं द्वंद्वापवाद एकशेष इति प्रवादविरोधः घटा इत्यादौ पदार्थतावच्छेदकस्यापि भेदाभावेन द्वंद्वाप्राप्त्या पवादत्वासंभवात् यत्तूक्तं जगदीशेन घटा इत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दौव्यक्तिभेदसत्वात् द्वंद्वप्राप्त्युपपादने घटकलशावित्यत्र पदबोध्यभेदसत्वात् द्वंद्वापत्तेः न हि तत्रैकशेषः संभवति विरूपत्वादि
तितदभ्युत्थं विरूपाणामपि समानार्थानामिति वार्तिकेन तत्राप्येकशेषस्य दुर्वारत्वात् यत्तु तार्किकैकदेशिनः एकशेषः कृतद्वंद्वाना
मेवान्यथाश्रूयमाणपदोत्तरमेकवचनप्रसंगादिति तन्न। कृतद्वंद्वानामेकशेषकरौ करा इत्यत्र द्वंद्व एव प्राणितूर्यसेनांगानामित्येकवद्भावापत्तेरि
ति चेदत्राहुः पदार्थशब्दः पदजन्यप्रतीतिविषयपरः घटे विशेष्यता घटत्वे च प्रकारतारूपा सेति घटा इत्यादौ नीलघटयोरभेद इ
त्यादौ च पदार्थभेदसत्वात् यत्तु पदार्थतावच्छेदकभेद एव द्वंद्वः एकशेषेपि हरय इत्यादावेव अपवादत्वप्रवादोपि तत्रैव द्वंद्वप्राप्ते
ति तन्न घटोयं घटोयमिति प्रयोगवत् व्यक्तिमात्रविवक्षायां घटघटावित्यस्यापि प्राप्त्या तत्राप्येकशेषस्यावश्यकत्वात् एतेनावि
शिष्य एवैकशेषः एकघटशब्दादेव बहुवचनेनानेकघटबोधसंभवात् सकृदुच्चरितः सकृदर्थं गमयतीति न्यायस्याप्रामाणिक
त्वात् हरय इत्यादावपि सति तात्पर्ये युगपदनेकबोधे इष्टापत्तिरेवेति परास्तम् हरिहरी इत्यादिद्वंद्ववारणायैकशेषस्यावश्यक
त्वात् किं च पदार्थतावच्छेदकभेदस्यैव नियामकत्वे एकस्मिन्नपि पुंसि दंडिकुंडलिनौ गच्छत इति प्रयोगापत्तिः पदार्थतावच्छेद
कस्य दंडकुंडलादेर्भेदसत्वात् न च द्वित्वानन्वयः शंक्यः नीलघटयोरभेद इत्यादाविव पदार्थतावच्छेदके तदन्वयसंभवात् ग
दीधितिकृदनुयायिनस्तु एकपदार्थेऽपरपदार्थाभेदतात्पर्यसमासकत्वं कर्मधारयत्वं भेदतात्पर्यकत्वं द्वंद्वत्वमित्याहुः शाब्दि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कमतेतुशब्दस्वरूपस्यापिशब्दबोधेविशेषणतयाभानान्नीलघटयोरित्यत्रनीलपदोपस्थाप्यघटपदोपस्थाप्ययोरित्यर्थः तत्र
विशेषणीभूतशब्दस्वरूपभेदात्पदार्थभेदादेवद्वंद्वः अतएवचासुरादैत्यदैतेयदनुजेंद्रारिदानवाइत्यत्रविरूपाणामपिसमाना
र्थानामित्येकशेषोनभवतिसमानप्रवृत्तिनिमित्तकस्यैवसमानार्थत्वात् संज्ञाशब्देद्रव्यस्यैवप्रवृत्तिनिमित्तत्वात्।एवंचेंद्रपद
वदभिन्नौमघवत्ववानितिबोधः ध्वनीनांसर्वत्रानित्यत्वात्तदभिव्यंग्यःस्फोटइवार्थवानितिसिद्धांतः तार्किकास्तुश्रूयमाण
पदानामेववाचकत्वमिच्छंति यत्तुइदंपदमत्रशक्तमित्यर्थात्कोशेपदमेवपदार्थइतितन्न।नामार्थयोरभेदइतिन्यायविरो
धापत्तेः नन्वेकैकवर्णानांवाचकत्वेघकारमात्रश्रवणेपिघटबोधापत्तिः समुदायस्तुतेषामसंभवीवर्णानामाशुविनाशि
त्वादितिचेन्नतत्तद्वर्णानुभवजनितसंस्कारैस्तावद्वर्णगोचरायाःसमूहालंबनात्मकैकस्मृतेःस्वीकारात् अत्रेदंचिंतनीयम् च
रमवर्णानुभवकालेतन्नाशानंतरंवापूर्ववर्णस्मरणंकल्प्यते नाद्यः ज्ञानद्वययौगपद्यस्यैतैरस्वीकारात् नद्वितीयःउद्बोधका
भावात् ननुपूर्ववर्णानुभवजनितसंस्कारसहितचरमवर्णानुभवएवतावद्वर्णस्मरणहेतुरितिचेन्न संस्कारानुभवस्मरणा
नांसमानविषयकत्वेनकार्यकारणभावात् एतेनतावद्वर्णसंस्कारैःसमूहालंबनात्मकमेकंस्मरणमुत्पद्यतइत्यपास्तम्।उद्बो
धकाभावात् किंचसमूहालंबनस्वीकारेघकारटकारोमकारइत्यतोघटमित्यस्यवैलक्षण्यानापत्तेः सरोरसइत्यनयोर्वैलक्ष

CC-0. In Public Domain. Digitization by eGangotri

ण्यानापत्तेश्च नत्वेकस्मरणविषयाणां वर्णानां पौर्वापर्यसंभवः अथयेन क्रमेणानुभूतास्तेनैव क्रमेण स्मृत्यारूढाः शाब्दबोधं
जनयंतीति चेन्न क्रमेणानुभूतानामपि व्युत्क्रमेण श्लोकादौ स्मरणदर्शनात् यत्तु वर्णानां प्रत्येकं स्फोटव्यंजकत्वं मिलितानां
वेति शाब्दिकमते पि प्रागुक्तविकल्पाद्दोष इति तन्न घकारादिभिर्वर्णैरवयवव्यंजनद्वारा समुदायाभिव्यक्तेः यदपि गृहीतसंके
तानां वर्णानां स्फोटव्यंजकत्वमगृहीतसंकेतानां वा आद्ये तैरेव सिद्धौ किं तेन द्वितीये तु सर्वस्यापि तद्बोधापत्तिरिति तन्न अगृही
तसंकेतैरपि व्यंजनात् अतएवागृहीतार्थके प्येकं पदमिति व्यवहारः तस्मात्समूहालंबनव्यावृत्त एकं पदमित्यनुभवसाक्षिक आ
नुपूर्वीविशेषविशिष्टः कश्चिदवश्यं शब्दपदार्थः स्वीकार्यः स एव शाब्दिकानां स्फोटः अतएव घटादीनामतिरिक्तव्यंजकत्वं न तु त्रस
रेणुपुंजात्मकत्वं विशकलितेषु तेष्वपि घट इति बुध्यापत्तेरिति वैशेषिकाः यत्तु एकं पदमित्यर्थो नुभवो ऽर्थैकत्वनिबंधन इति तन्न
अर्थबोधाभावे पि पदत्वग्रहात् तदेव पदमिति बुध्येस्तज्जातीयविषयत्वे तज्जातीयं पदमिति व्यवहारापत्तेश्च किं च हरेव विष्णो
वेत्यादावेकादेशे कृते पदविभागासंभवेन समुदायशक्तिरावश्यकी किं चोच्चारणभेदाभिन्नेषु व्यक्तिवाद इव शास्त्यनापत्तेः८
आनंत्यादिदोषात् अपि चानुपूर्वीविशेषविशिष्टस्यैव पदत्वेन समूहालंबने पदत्वानुभवो दुर्घटः यत्तु पूर्ववर्णध्वंसविशिष्ट
चरमवर्णानुभव एवानुपूर्वीति तन्न। यत्र घकारमुच्चार्य प्रहरानंतरं टकार उच्चारितस्तत्रापि पूर्ववर्णध्वंससत्वेनातिव्याप्तेः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा॰सु॰
१२

किंच श्लोकादौ पदविभागे क्रीयमाणे शाब्दबोधस्यानुभवसिद्धस्यापलापापत्तिः वर्णानां पौर्वापर्यस्य पदविभागात्प्रागिवोत्त
रत्रापि समत्वात् अपि च घटमानय देवदत्तेत्यादौ यदि प्रथमक्षणे घटपदस्मरणं द्वितीयादिक्षणे आनयनादिस्मरणं तदा तृती
यादिक्षणे पूर्वस्मरणस्य नाशाच्छाब्दबोधानुपपत्तिस्तदवस्थैव अतो युगपत्तेषां स्मरणमित्यभ्युपेयं तदुक्तं वृद्धा युवानः
शिशवः कपोताः स्थले यथामी युगपत्पतंति तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवंतीति एवं च गिरिर्भुक्तमः
ग्निमान् देवदत्तेनेत्यादावपि समूहालंबनेपदार्थानां विशेषविषयत्वाविशेषात् अत्रासत्त्वभावाच्छाब्दबोधाभाव इति ताः
र्किकप्रवादविरोध इत्यलम् ते च स्फोटा अष्टौ यूपः सूप इत्यादौ वर्णभेदेनार्थभेदाद्वर्णा अपि वाचका इति वर्णस्फोटः प
दवाक्यस्फोटौ तूक्तावेव पदादौ वर्णादयो न संतीति अखंडः पदवाक्यस्फोटः वर्णपदवाक्यानां च जातिरेव वाचिकेति व
र्णपदवाक्यजातिस्फोटः अत्रेदं तत्त्वम् परा पश्यंती मध्यमा वैखरीति चतुर्विधा वाक् तथा हि भगवतो जगत्सिसृक्षः
या माया पुरुषाविर्भवतः तत्र त्रिगुणं पदव्यक्तं तस्माद्बिंदुरूपाच्छब्दाद्ब्रह्मनामधेयं वर्णादिविशेषरहितं नादमात्रमुत्प
द्यते तदेव जगदुपादानं परा वागित्युच्यते बिंदुरवस्य जगतो व्यंजनात् तदुक्तं भारते क्रियाशक्तिप्रधानायाः शब्दशब्दा
र्थकारणं प्रकृतेर्बिंदुरूपिण्याः शब्दब्रह्माभवत्परा स्वरूपज्योतिरेवांतः परा वाग नपायिनी तस्यां दृष्टस्वरूपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामधिकारोनिवर्त्तत इति श्रोत्रविषयावैखरी त्हृदयदेशस्थामध्यमा पश्यंतीतुलोकव्यवहारातीतायोगिनांत्वस्ति तत्रापिप्र
कृतिप्रत्ययविभागः तदुक्तंभारते प्राणवृत्तिरनुक्रम्यमध्यमावाक्प्रवर्तते प्राणवृत्तिरनुक्रम्यप्राण व्यापारमाश्रित्य अ
विभागात्तुपश्यंतीसर्वतःसंत्हृतक्रमा स्थानेषुविवृतेवायौकृतवर्णपरिग्रहा वैखरीवाक्प्रयोक्तॄणांप्राणवृत्तिनिबंधनी
प्राणवृत्तिनिबंधनीति प्राणएवस्थानाभिघातद्वारातद्धेतुत्वेनापिवर्ततइत्यर्थः हरिरप्याह वैखर्यामध्यमायाश्चपश्यंत्याश्चैत
दद्भुतं अनेकतीर्थभेदायाः त्रय्यावाचःपरंपदमिति अनेकतीर्थभेदायाः नामाख्यातादिभेदभिन्नायाःपरायायोगिनामपि
प्रकृतिप्रत्ययविभागोनास्तीतित्रय्याइत्युक्तं तथाचश्रुतिः चत्वारिवाक्परिमितानिपदानितानिविदुर्ब्राह्मणायेमनीषिणः॥
गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्यावदंतीति तथाचहरिवंशेपि अक्षराणामकारस्त्वंस्पोटस्त्वंवर्णसंश्रयइति
स्फुटत्यर्थोस्मादितिस्फोटोनित्यशब्दः अतएवाक्षरशब्दस्यब्रह्मवाचकस्यसादृश्याद्वर्णेषुप्रयोगःसादृश्यंचनित्यत्वेनैव
तत्रनित्यत्वंव्यवहारनित्यापेक्षमित्येके आकाशवत्तन्निष्ठशब्दस्यापिनित्यत्वंव्यंजकविरहाच्चनसर्वदोपलंभइत्यन्ये॥ध्व
निशब्देनवैखरीवागुच्यते स्फोटशब्देनमध्यमावागुच्यते अतएवसर्वेसर्वार्थवाचका इतिप्रवादः शब्दमात्रस्यार्थमात्रस्य
चब्रह्मोपादानकत्वेनततोभेदाभावात् अतएवनित्यःशब्दार्थसंबंधइतिप्रवादः अतएवोक्तंयोगवाच स्यत्येसर्वेचश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्दाः सर्वार्थाभिधाने समर्था ईश्वरसंकेतस्तु प्रकाशक इति अत एवोक्तं न्यायवाचस्पत्ये सर्गादिभुवां महर्षिदेवताना
मीश्वरेण साक्षात्कृतः संकेतस्तद्व्यवहारादस्मदादीनामपि सुग्रहः संकेत इति सर्वेषामर्थानां सर्वशब्दैः संबंधश्च योगिप्र
त्ययगम्य एव तेषामुभयरूपतापराप्रत्ययातात् अत एवोक्तं हरिणा व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचिदिति क्वचि
त्संज्ञिनि संज्ञाया नियमो व्यवहारायेत्यर्थः यथास्मदीयशास्त्रे वृद्धिशब्देनादैच एव ग्राह्या इति पुरुषव्यापारात्प्राग्वाचक
स्य पुरुषव्यापारेण वाचकता कर्तुं न शक्यते शब्दार्थसंबंधस्य नित्यत्वादिति तदाशयः अत एव घटपदस्य घटे संकेते सति तद
र्थबोधो भवत्येव ननु व्यवहाराय नियम इत्ययुक्तं वृद्धिरादैजित्यादिसूत्राणां संकेतप्रकाशकत्वेन विधित्वस्यैव न्याय्य
त्वादिति चेत्सत्यं यथा विद्यमाने एव घटे नीलो घट इति नीलसंबंधः पुरुषेण बोध्यते न तु तत्र नीलादियोगः क्रियते तेन तत्र
नील एव न पीत इति नियमः फलति तदुक्तं हरिणा वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः अकृत्रिमोऽभिसंबंधो
विशेषणविशेष्यवदिति शक्त्यवच्छेदः शक्तिसंकोचः विशेषणविशेष्यवदित्यस्यार्थ उक्त एव अत एव तत्र वाचक
ताबोधनेऽपि तदनुत्पादनान्न शब्दार्थसंबंधस्यानित्यत्वं पाणिन्यादिसंकेतग्राह्यत्वात्संज्ञानामनित्यत्वप्रवादः वृ
द्धिशब्दस्यादैक्ष्वेव प्रयोग इत्यत्र पाणिनीच्छाया एव नियामकत्वाद्यदृच्छा शब्दत्वव्यवहारः अत एव स्वेच्छया संज्ञाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रीयंते इत्यपिप्रवादः गौणमुख्यव्यवहारस्तुप्रसिध्द्यप्रसिध्दिनिबंधनएव अतएवोक्तं हरिणा सर्वशक्तेस्तुतस्यैवश
ब्दस्यानेकधर्मणः प्रसिध्दिभेदाद्गौणत्वंमुख्यत्वंचोपचर्यतइति गौणमुख्यार्थबोधकः शब्दएवप्रकरणादिरूपनिमित्ता
भावाच्चनसर्वस्ययुगपत्प्रकाशनम् सर्वशक्तेरित्यस्यव्याख्यानमनेकधर्मणइति गोशब्दस्यगोत्वजातौप्रसिध्द्यामु
ख्यत्वंवाहीकेत्वप्रसिध्द्यागौणत्वमित्यर्थः। शक्तिर्नामशब्दार्थयोस्तादात्म्यमेव अतएवपुरोवर्तिपदार्थंदृष्ट्वावाचकजि
ज्ञासयाकोयमितिप्रश्नेदेवदत्तोयमित्युत्तरं अतएवोक्तंपातंजलभाष्ये संकेतस्तुपदपदार्थयोरितरेतराध्यासरूपः
स्मृत्यात्मकोयोयंशब्दः सोर्थोयोर्थः सशब्दइति इतरेतराध्यासः परस्परात्मिकतारोपः अन्यस्मिन्नन्यधर्मावभासो
ध्यासः स्मृत्यात्मकइत्यनेनज्ञातएवसंकेतः शक्तिबोधकइतिसूचितम् कः शब्दः कोर्थइतिप्रश्नेघटइत्ययंशब्दो
घटइत्ययमर्थइतिसामानाधिकरण्योत्तरदर्शनाच्छब्दार्थयोरध्याससिध्दिः अतएवरामेतिद्व्यक्षरंनाममानभंगंपिनाकिनइ
त्यादौशब्दार्थयोरप्यभेदेनव्यवहारः ओमित्येकाक्षरंब्रह्मेत्यादिश्रुत्यादावपिअभेदेनैवनिर्देशः अभेदस्याध्यस्तत्वाच्चभे
दव्यवहारोपि अस्यार्थस्यायंवाचकइति अतएवोक्तंहरिणा तादात्म्यमुपन्यस्यैवशब्दार्थस्यप्रकाशकाइति अत्रैवशब्दे
नतादात्म्यस्यातात्विकत्वंसूचितम् यत्तुशब्दशब्दार्थयोरभेदे अग्न्यादिशब्दैर्मुखदाहापत्तिरितितन्न उक्तयुक्त्यातादात्म्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा॰सु स्यारोपितत्वेनदाहकत्वादिशक्तेरभावात् लक्षणायावृत्त्यंतरत्वमप्युक्तं बोधकता रूपायामभगवदिच्छायावाशक्तेर्लाक्षणिके
१४ प्यविशिष्टत्वात् शाब्दबोधेवृत्त्यापदजन्यपदार्थोपस्थितिःकारणंतत्रवृत्तित्वस्यशक्तिलक्षणावच्छेदकत्वेगौरवाच्च ननुगं
गापदस्यगंगातीरेशक्तिस्वीकारेस्वारसिकप्रयोगापत्तिरितिचेन्न तत्रगंगापदस्याप्रसिद्धत्वात् अतएवहरिपदस्यक्लीबा
दिवाचकत्वाविशेषेपिनझटितितेषांप्रत्ययः अतएवहनधातोर्गतौशक्तितोप्यत्येपिनस्वारसिकःप्रयोगइतिदिक् घटकर्मत्व
नं मानयँकृतिरित्यादौपदार्थोपस्थित्यादिसत्वादन्वयबोधापत्तिवारणायाकांक्षाहेतुः यस्यपदस्ययत्पदव्यतिरेकप्रयुक्तान्वया
ननुभावकत्वंतत्पदेतत्पदवत्त्वमाकांक्षा ननुनीलपदंविनापिघटमानयेत्यादावन्वयदर्शनान्नीलघटयोराकांक्षासिद्धयेभेदबो
धाभावेसमानविभक्तिकपदांतराभावएवप्रयोजकोवाच्यः तथाचघटकर्मत्वमितिनिराकांक्षत्वेतिव्याप्तिरितिचेन्न तत्रा
कांक्षासत्वेपियोग्यताविरहेणशाब्दबोधाभावात् एकपदार्थेऽपरपदार्थसंबंधोयोग्यता वह्निनासिंचतीत्यादावयोग्य
त्वान्नदोषः ननुएकेत्यादिपदविशेषणंवापदार्थविशेषणंवाआद्येएकधातुपदोपस्थाप्ययोःफलव्यापारयोःपरस्परमन्वय
बोधानापत्तिः द्वितीयेतुप्रमेयत्वेप्रमेयत्वमित्यादौपदार्थभेदाभावादव्याप्तिरितिचेन्न पदार्थेपदार्थसंसर्गस्यविवक्षितत्वात्॥
अव्यवधानेनोपस्थितिरासत्तिः तेनगिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौनबोधः ननुपदजन्यसमूहालंबनेसकलपदार्थोपस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिसत्वादासत्तिरस्त्येव अन्यथाकाव्यादावन्वयवाक्याच्छाब्दबोधानापत्तिरिति चेत्सत्यम् अव्यवहितपदार्थोपस्थित्यनुकूल
व्यापार एवासत्तिः एकपदानंतरमपरपदे कश्चिदुच्चारणं कश्चित्प्रतीतीच्छेव व्यापारः श्लोकादौपदतात्पर्यप्रदर्शनायैव योजनाश्रा
वयम् शुकवाक्येपि शिक्षकस्येव व्यापारः कारकत्वं नाम क्रियान्वितकर्तृत्वकर्मत्वादिषट्कान्यतमान्वयित्वं दुह धातोर्विभागा
नुकूलव्यापारोर्थ इति विभागरूपफलाश्रयत्वाद्गोः कर्मतेति तार्किकास्तन्न फलद्वयार्थत्वे गोः पयो दुग्धे इति पंचम्यनापत्तेः नचा
पादानत्वविवक्षयासेति वाच्यं तथासति ग्रामान् त्यजतीत्यस्याप्यापत्तेः क्रियान्वितेति विशेषणस्याप्यर्थत्वाविषयादयि
क्रियान्वितविभक्त्यर्थान्वयित्वं कारकत्वमिति तदपि न वर्षासु भवति वर्षाभूरित्यत्र विभक्त्यभावेन कारकत्वानापत्तौ यणनापत्तेः
तन्मते लक्षणाभ्युपगमेन विभक्त्यनुसंधानस्याप्यभावात् अनुसंधाने वानटश्रुतमित्यादौ कारकत्वापत्तौ कारकाद्दत्तश्रुतयोरि
त्युदात्तत्वापत्तिः एतेन फलाश्रयत्वं कर्मत्वमित्यपास्तम् गां दोग्धीत्यत्राऽव्याप्तेरित्यलम् अनादित्वमनपभ्रष्टत्वमभ्युदययोग्य
त्वं वा साधुत्वम् बोधकत्वं तत्त्वमित्युक्तौ गाव्यादावतिव्याप्तेः शक्तत्वं तत्त्वमित्युक्तौ विकरणानामसाधुतापत्तेः टिघुभादिसंज्ञा
सु अभ्युदययोग्यत्वाभावेपि अनपभ्रष्टत्वादेव साधुत्वम् देशभाषया क्रियमाणानां कूचीमंचीत्यादीनामसाधुत्वमेव आ
धुनिकनाम्नां संकल्पादौ प्रयोगस्तु म्लेच्छैव कृतं कुर्यादित्यादिनियमात् असाधुशब्दानां त्वानंत्यान्न शक्तत्वम् अर्थबोध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुसाधुस्मरणद्वाराऽव्युत्पन्नानांतुशक्तिभ्रमाद्बोधः अन्येत्वाहुः बोधकतारूपाशक्तिरपभ्रंशेष्वपिदुर्वारैव॥ ॥इतिश्रीमद्दीक्षितात्मजरामसेवकतनूद्भवकृष्णाचार्यकृतौवादसुधाकरःसमाप्तिमियात् ॥श्रीशंकरप्रसन्नोस्तु॥शुभंभवतु॥

वाराणसीप्रसादस्यनियोगेनतुयत्नतः॥काशीसंस्कृतमुद्रायामङ्कितेयंविचक्षणेः॥१॥काश्यांत्रिपुरभैरवीसन्निधौश्रीउत्तबाबूसाहबबाबूफतहनारायणसिंहजीत्यभिधायुजोनिकेतनेकाशीसंस्कृतमुद्रायन्त्रेऽङ्कितम्॥सम्वत्१९२३॥ ॥

अशुद्धम्	शुद्धम्
पत्र ९	त्वेनतु
पङ्क्ति १०	
त्वेतुननु	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥इतिवादसुधाकरः समाप्तः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

4035

हेत्वाभास सव्यभिचारः.

तस्य चिंतामणि, शिरोमणि सहिता गादाधरी.

श्रीमन्महाराजाधिराज गोस्वामी तिलक श्री १०८ श्रीगोवर्द्धनलालजी महाराजाज्ञया
मैथिल पंडित गंगाधर विरचित "गोवर्द्धन चरण कल्प मंजरी" नामक टिप्पणी भूषिता

स्वीय सुदर्शन यंत्रालये मुद्रिता कविवर रविनी शर्मणा संशोध्य प्रकाशिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ अथ चिंतामणिः ॥ सव्यभिचारोऽपि त्रिविधः साधारणासाधारणानुपसंहारिभेदात्' तत्र सव्यभिचारः साध्यतदभावप्रसंजक इति न त्रितयसाधारणं लक्षणम्' एकस्योभयं प्रत्यसाधकत्वात् अनापादकत्वाच्च' नाप्युभयपक्षवृत्तित्वं उभयव्यावृत्तम् वा तत्त्वम्' अननुगमात् । अथ साध्यसंशयजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमतः सः, विप्रतिपत्तिस्तु प्रत्येकं न तथा न वा पक्षवृत्तिः, साधारणमन्वयेन असाधारणं व्यतिरेकेण अनुपसंहारी पक्षएवोभयसाहचर्येण कोटिद्वयोपस्थापकः । केवलान्वयिसाध्यकानुपसंहारी अयं घट एतत्त्वादित्यसाधारणश्च सद्धेतुरेव' तदज्ञानं दोषः पुरुषस्य । अतएवासाधारणप्रकरणसमयोरनित्यदोषत्वम्' अन्यथा सद्धेतौ वाधादिज्ञाने हेत्वाभासाधिक्यापत्तिः' नच प्रमेयत्वेनाभेदानुमाने शब्दोऽनित्यः शद्बाकाशान्यतरत्वादित्यत्र च साधारणेऽव्याप्तिः' तयोः साध्यवदवृत्तित्वेन विरुद्धत्वादिति चेन्न' एतदज्ञानेऽपि साधारण्यादिप्रत्येकस्य ज्ञानादुद्भावनाच्च स्वपरानुमितिप्रतिबन्धात् उद्भावितैतन्निर्वाहार्थं साधारणादेरवश्योद्भाव्यत्वेन तस्यैव दोषत्वाच्च । एतेन पक्षवृत्तित्वे सत्यनुमितिविरोधिसंबंधाव्यावृत्तिरनैकांतिकः' सपक्षविपक्षवृत्तित्वमुभयव्यावृत्तत्वमनुपसंहारित्वं चानुमितिवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोधि, तत्सम्बन्धः प्रत्येकमस्ति विरुद्धोऽप्यनेन रूपेण सव्यभिचारएव उपाधेश्च न संकरइति वक्ष्यतइतिनिरस्तम् एतदज्ञाने ज्ञानेऽपि वा ऽवश्यकप्रत्येकज्ञानस्य दोषत्वात् असाधकतानुमितौ व्यर्थविशेषणत्वाच्च अतएव साध्याव्याप्यत्वे सति साध्याभावाव्याप्यहेत्वाभासत्वं साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं वेति परास्तं व्यर्थविशेषणत्वात् प्रथमं हेत्वाभासत्वाज्ञानाच्च गगनमनित्यं शब्दाश्रयत्वादित्यादिबाधविरुद्धसंकीर्णासाधारणाव्याप्तिरिति कश्चित् नापि सपक्षविपक्षगतसर्वसपक्षविपक्षव्यावृत्तान्यतरत्वं व्यर्थविशेषणत्वात् अनुपसंहार्य्यव्याप्तेश्च। किंच पक्षातिरिक्तसाध्यवतः सपक्षत्वे प्रमेयत्वेनाभेदसाधनेऽनुपसंहार्य्येऽव्याप्तिः पक्षातिरक्तसाध्यवतोऽप्रसिद्धेः साध्यवतः सपक्षत्वे विवक्षितेऽप्रसिद्धिः वृत्तिमतोधर्मस्य साध्यवद्विपक्षान्यतरवृत्तित्वनियमात् । नापि पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वे सति पक्षातिरिक्तसाध्याभाववन्मात्रवृत्तिभिन्नत्वम् अनुपसंहार्य्यव्याप्तेः धूमादावतिव्याप्तेश्च तस्य पक्षे साध्यवति वृत्तः नापि पक्षवृत्तित्वे विरुद्धान्यत्वे च सत्यनुमित्यौपयिकसंबंधशून्यत्वं व्यर्थविशेषणत्वात् एतेनानुगतं सर्व्वमेव लक्षणप्रत्युक्तं प्रत्येकमेव दूषणत्वात् उद्भावने वादिनिवृत्तेश्च । उच्यते । उभयकोट्युपस्थापकता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छेदकरूपवत्त्वं तत्वं तत्र साधारणत्वादिविरुद्धान्यपक्षवृत्तित्वे सत्यनुमितिविरोधिसंबंधाव्यावृत्ति-
र्वा तेनैव रूपेण ज्ञातस्य प्रतिबंधकत्वात् परस्य तथैवोद्भावनाच्च लक्षणानुरोधेन प्रत्येकमेव हे-
त्वाभासत्वम् । यद्वा साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं तेनासाधारणस्य
साध्यतदभावोपस्थापकतया दूषकत्वपक्षे नाव्याप्तिः नचैवमाधिक्ये विभागव्याघातः स्वरूपस-
तानुगतरूपेण त्रयाणामेकीकृत्य महर्षिणा विभागकरणात् नचैवं साध्याभावज्ञापकत्वेन बाधप्र-
करणसमयोस्तद्ज्ञापकतयान्येषामुपसंग्रहः कुतोनकृत इति वाच्यं स्वतन्त्रेच्छस्य नियोगपर्य्य-
॥ अथ साधारणग्रन्थः ॥
नुयोगानर्हत्वात् । तत्र साधारणत्वं न साध्याभाववद्गामित्वं सर्व्वमनित्यं मेयत्वादित्यनुपसंहार्य्ये
भूर्नित्या गन्धवत्त्वादित्यसाधारणे संयोगादिसाध्यकद्रव्यत्वे चातिव्याप्तेः अतएव न साध्यवत्त-
दन्यवृत्तित्वं नापि निश्चितसाध्यवत्तदन्यवृत्तित्वं साध्यवदन्यवृत्तित्वस्य दूषकत्वेन शेषवैयर्थ्यात्
अतएवामुकेनायमनैकान्तिक इत्येवोद्भाव्यते ततएव वादिनिवृत्तेश्च नतु सपक्षगतत्वमपि । अनु-
पसंहार्य्योऽव्यावर्त्त्यो ऽन्यथा तस्यैतद्विशेषत्वापत्तिरिति चेत् त्यज तर्हि तमधिकं क्लृप्तेऽन्तर्भावात् ।
नापि सपक्षविपक्षगतत्वं व्यर्थविशेषणत्वात् । विरुद्धोऽव्यावर्त्त्य इति चेन्न विपक्षगामित्वस्यैव दूष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्वे तस्याप्येतदन्तर्भावात् ॥ अथ पक्षान्यसाध्यवत्तदन्यवृत्तित्वं साधारणत्वं तेन सर्वमनित्यं मेयत्वादित्यनुपसंहार्य्यै नातिप्रसंगः नन व्यर्थविशेषणता घटोऽनित्यो घटाकाशोभयवृत्तित्विद्वा श्रयत्वादित्यनुपसंहार्य्यस्य विरुद्धस्यानैकांतिकभिन्नस्य व्यवच्छेद्यत्वादिति चेन्न दूषकताप्रयोजकरूपभेदमंतरेण भेदस्यैवानुपपत्तेः। साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्तित्वमित्यपि नव्यर्थ विशेषणत्वात् एकव्यक्तिकसाध्ये तदभावाच्च एतेन हेत्वाभासान्तरव्यवच्छेदकं लक्षणान्तरेऽपि विशेषणं व्यर्थमिति। उच्यते विपक्षवृत्तित्वं साधारणत्वं तन्मात्रस्य दूषकत्वात् विरुद्धस्यापि तत्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारणत्वम् अन्यथा तस्य हेत्वाभासान्तरतापत्तेः उपाधेरसंकरएव। सर्वमनित्यं मेयत्वादित्यनुपसंहारी शब्दो नित्यः शब्दत्वात् भूर्नित्या गन्धवत्त्वादित्यसाधारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोऽपि पक्षतादशायाम् उद्भावयितुं न शक्यतइत्युभयोर्भेदेनोपन्यासः ॥ इतिचिंतामणिः ॥ छ छ छ छ छ छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशायनमः ॥ अथ ॥ शिरोमणिः ॥ यद्यपि लक्षणतः सामान्यमप्रतीतवतो विशेषजिज्ञासानुदयात् सामान्यलक्षणानन्तरमेव विशेषविभागो युक्तस्तथापि सव्यभिचारपदस्य साधारणमात्रे प्रसिद्धतया तन्मात्रस्य लक्ष्यभावं बुध्यमानैरन्तेवासिभिरसाधारणादिसाधारणस्य लक्षणस्यातिव्याप्तिस्तद्व्यावृत्तस्यैव च साधुता प्रतीयेत अतस्तद्वारणाय लक्ष्यान्तरमपि दर्शयति सव्यभिचार इति। कश्चित्तु सामान्यज्ञानाधीनो विभागो न तल्लक्षणतः प्रत्ययमपेक्षतेऽतः प्रथमं विभागकरणेऽपि न दोष इत्याह। प्रसक्तिरनुमितिरापत्तिर्वा 'तदुपधानमव्यापकमतिव्यापकंच तथाविधव्याप्तिभ्रमेण सद्धेतावतस्तद्योग्यता वाच्या' सा च तादृशव्याप्त्यादिरूपा 'न च विरुद्धो भयव्याप्यत्वमेकस्य संभवतीत्याह' एकस्येति। साध्येति कोटिद्वयोपस्थापकं सत् साध्यसंदेहजनकं साध्यसंदेहजनककोटिद्वयोपस्थितिजनकमिति यावत्। आश्रयतया विषयितया वा नित्यत्वानित्यत्वोपस्थापकस्य नित्यत्वे साध्ये ज्ञानस्यानुवृत्तत्वव्यावृत्तत्वाभ्यां वन्हितदभावोपस्थापकस्य वन्हौ साध्ये धूमस्य वारणाय जनकान्तम्। तथोपस्थितेः साध्यसंदेहाजनकत्वात् 'धर्म्मितावच्छेदकपुरोवर्त्तित्वादिविशिष्टधर्म्मिज्ञानस्य संशयजनकतया तद्वारणाय कोटिद्वयोपस्थापकेति। न च तदसाधारणतया संग्राह्यमेवेति वाच्यम् 'तथात्वेऽपि तदुत्तीर्णतादशायां विशेषदर्शनात् संशयानुपधायकत्वेऽपि तज्जननयोग्यताया अनिवृत्तेः। अन्यथा यथायथं पक्षे साध्यतदभावनिश्चयदशायां साधारणाव्याप्तिप्रसंगात्। प्रतिपक्षसम्बलनदशायां हेतुमत्ताज्ञानस्य साध्यसंदेहजनकत्वपक्षे हेतुवारणाय कोटीत्यादिहेतुना साध्यस्य प्रतिहेतुना तदभावस्य उपस्थापनादुभयोपस्थापकत्वं न कस्यापीत्यपि कश्चित्। इदं द्व्यणुकं नित्यमणुत्वादित्यादौ साधारणधर्म्मवत् धर्म्मिज्ञानस्य कोटयुपस्थितिं संशयंच प्रतिहेतुतयातद्विषये धर्म्मिणि सद्धेतौ अतिप्रसंगः स्यादतः पक्षधर्मतेति पक्षपदं धर्मिमात्रपरम्। नचैवं नित्यो घटः शब्दत्वादित्यत्र बाधाद्यवतारेऽसाधारण्यापत्तिरिष्टत्वात् 'अन्यथा बाधासिद्ध्योरन्यतरावतारदशायां साधारणासंग्रहापत्तेः' असिद्धिसंकीर्णत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सव्यभिचारमध्याप्रवेशे सव्यभिचारसंकीर्णतया असिद्धेऽप्यनंतर्भावापत्तौ तस्यातिरिक्तहेत्वाभासत्वापत्ते । न च व्याप्यविरुद्धयोः साधारण्यभ्रमाद्यायाः नातिप्रसंगः । धर्मिणि यद्रूपावच्छिन्नवत्ताज्ञानं साध्यसंशयजनकं तद्रूपावच्छिन्नत्वस्योक्तत्वात् तद्रूपं साधारणत्वादिति सिद्धांते स्फुटीभविष्यति । इदं सविषयकमात्मवृत्ति वा ज्ञानत्वात् इत्यादौ प्रामाण्याप्रामाण्यसंशयस्य तद्-घटकीभूतसाध्यतदभावाविषयकतया कोट्युपस्थितिरूपस्य जनकीभूतज्ञानविषये ज्ञानत्वे तु नातिप्रसंगशंकापि । साधारणधर्म-वत्ताज्ञानस्य तज्जन्यकोट्युपस्थितेर्वा संशयजनकतया तज्ज्ञानस्य तादृशसंशयाहेतुत्वात् । प्रामाण्यसंशयस्थले तु ज्ञानत्वलक्षण-साधारणधर्मदर्शनात् ज्ञाने प्रामाण्यस्य ज्ञानविषयतात्मकसाधारणधर्मदर्शनाच्च विषये तद्वत्त्वस्य संदेह । अप्रामाण्यशंकाद्यन्वया-नुविधानंतु भ्रमत्वज्ञानशून्यविरोधिज्ञानस्य प्रतिबंधकतया तदपसारणप्रयुक्तमित्यस्याकरे व्यक्तत्वात् । व्याप्यवत्तासंशयस्य पृथग्-व्यापकवत्तासंशयहेतुत्वपक्षे ज्ञानपदं निश्चयपरं । हेतुत्वाभिमतविशेषणंतु येन सम्बंधेन तदुभयसाहचर्य्यं तेन सम्बंधेन तद्वत्ता-ज्ञानस्य संशयादिजनकतासूचनार्थं । तेनात्मत्वकपालत्वादिसाध्यके समवायसम्बंधेन हेतौ ज्ञानघटादौ विषयत्वसंयोगादिना तत्संदेहजनके नातिप्रसंग इति । विप्रतिपत्तेः प्रत्येकं कोटिद्वयोपस्थापकत्वाभावात् लक्षणस्थद्वयपदेन तद्वारणान् मिलितस्य तदुपस्थापकत्वेऽपि तद्वत्ताज्ञानं न तथा न वा मिलित्वा द्वयोर्ज्जनकत्वं तथात्वेऽपि वा येन सम्बंधेन तद्वत्ताज्ञानमुभयकोट्युप-स्थापकं तेन सम्बंधेन हेतुत्वेऽवश्यं सव्यभिचारत्वमिति । अनुपसंहारी पक्षएवेति । अनुपसंहारितादशायां साध्यतदभावसहित-त्वनिर्णयाभावेऽप्युक्तक्रमेण वास्तवतत्सहचरितत्वमादायैव लक्षणसमन्वय इति भावः । केचित्तु व्याप्यादिधर्मेऽपि साधारण्य-ज्ञानात् संशयस्योदयात तदज्ञाने च वस्तुतः साधारणज्ञानेऽप्यनुदयात् साधारण्यज्ञानं हेतुस्तत्र निश्चयत्वमकिंचित्करं गौरवात् तथाच पक्षएव तत्संशयात्मकतदुभयसाहचर्य्यज्ञानाद्भवति तथात्व मिति भाव इत्याहुः तच्चिंत्यम् । ननु केवलान्वयिसाध्यका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुपसंहारिणि साध्याभावाप्रसिद्ध्या तत्संशयाद्यभावादव्याप्तिः। एवं यत्र स्थिरे धर्म्मिणि पूर्वं घटत्वं गृहीतमुत्तरदशायां तत्रैव दोषात् घटत्वाग्रहे तद्घटभिन्नोऽयमिति भ्रमे च घटत्वनिश्चयविषयीभवद्धर्मिव्यावृत्तत्वेन गृह्यमाणतया असाधारणे इदन्त्वेऽपि वस्तुतस्तद्व्यावृत्तत्वाभावेन तत्र लक्षणायोगादित्यतस्तयोर्लक्ष्यत्वाभावेन परिहरति। केवलान्वयीति। अतएवेति। अतएव पुरुषदोषाधीनं तद्दोषत्वम् अतएव तस्यानित्यदोषत्वं साहजिकत्वे कादाचित्कत्वानुपपत्तेः। एवंच यत्र दोषताप्रयोजकं वस्तुतो हेतौ तत्रानित्यदोषत्वमपि यत्र पुरुषस्य तद्भ्रमो न तत्र तदपि भ्रममात्राद्दुष्टत्वेऽतिप्रसंगमाह। अन्यथेति केचित्। परे तु अयं घट एतत्त्वादित्यादावव्याप्तिः। साध्यसंदेहप्रयोजकं हि तस्य साध्यतदभाववद्व्यावृत्तत्वं नह्येकस्य धर्मस्य तदुभयव्यावृत्तत्वं संभवति असाधारण्यंतु तस्य पक्षमात्रवृत्तितया अतस्तस्यालक्ष्यतयोत्तरयति अयं घट इत्यादि। एवंचावृत्तिगगनादिकमेवासाधारणं पक्षवृत्तित्वभ्रमदशायांचासाधारण्यस्याशंकरः नचोभयव्यावृत्तत्ववृत्तिमत्त्वयोः स्वरूपतो विरोधः निश्चितसाध्यतदभाववद्व्यावृत्तत्वंच न संदेह प्रयोजकं तथा सति तुल्यन्यायतया निश्चितसाध्यतदभाववद्वृत्तित्वस्यापि तथात्वे सद्धेतावपि साध्याभाववत्त्वभ्रमविषयवृत्तित्वग्रहदशायामतिप्रसंगात् नच तादृशनिश्चयविषयस्य धर्मिणो वास्तवं साध्याभावादिमत्त्वमपि तंत्रं मानाभावात् किंच संदेहजनकतावच्छेदकरूपस्य विशेषणत्वे व्यभिचारिणि रासभादौ महानसादिवृत्तितादशायामव्याप्तिः उपलक्षणत्वे असाधारण्योत्तीर्णतादशायामतिव्याप्तिः असाधारणप्रकरणसमययोस्तत्त्वेन भ्रमविषययोरनित्यदोषत्वंविशेषादर्शनदशायामनुमित्यनुत्पादप्रयोजकत्वं नतु वास्तवं हेतुदोषत्वं अन्यथानुमित्यनुत्पादप्रयोजकज्ञानविषयतामात्रेण वास्तवहेतुदोषत्वे इत्याहुः। अनवगतसाध्यसहचारत्वे सत्ति अवगतसाध्याभावसहचारतया विरुद्धत्वमेव तयोरिति इदंचाभ्युपगमवादेन वस्तुतो यथोपवर्णितलक्षणस्य न तत्राव्याप्तिरिति ध्येयम् यद्रूप ज्ञान मनुमिति प्रतिबंधकम् तदेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभाजकं अन्यथा अतिप्रसंगइत्यभिप्रेत्य दूषयति नैतदिति । वस्तुतस्तु उपस्थापकत्वादिज्ञान मनुमिते स्तज्जनकस्य वा न प्रतिबंधकं विरोधिविषयकत्वाभावात् एवमुत्तरत्रापि पक्षवृत्तित्वेसतीति विरोधित्वं विरोधिज्ञान विषयत्वं अव्यावृत्तिपदं अत्यंतायोगव्यच्छेदार्थकं तेन संयोगसंबंधेन व्यभिचारिणि द्रव्ये हेतौ व्यभिचाराभावदशायां नाप्रसंगः साध्यवद्वृत्तिस्तुनासाधारण इति हृदयं । अपक्षधर्म धूमादि वारणाय सत्यंतं पक्षः संदिग्धसाध्योधर्मी विशिष्ट हेतौ तद्वृत्तित्वग्रहाविरोधित्वंच तदर्थः तथाच पक्षतावच्छेदकरूपेणपक्षे साध्यतावच्छेदकरूपेण साध्यस्यहेतुतावच्छेदकरूपेणहेतोर्व्वा यज्ज्ञानम् तद्विरोधित्वस्यलाभात् पक्षसाध्यसाधनाप्रसिद्धिस्वरूपासिद्धिवाधप्रतिरोधानां निरासोऽसिद्धिसंकीर्णसंग्रहश्च विरोधोऽपि फलतः प्रतिरोधएव तदन्यत्वेन वा विरोधिविशेषणीयं वक्ष्यते च सिद्धांते विरुद्धान्येति हेतुसाध्यसामानाधिकरण्यग्रहाविरोध्यर्थकं संबंधपदबलेन प्रकृतहेतुसंबंधितया विरोधित्वे तात्पर्योपवर्णनेन प्रायशो बाधादिवारणेऽपि घटत्वमनित्यं घटत्वादित्यादौ प्रयत्नसाध्यमिवतत्प्रतिभाति वस्तुतस्तुअनुमितिपदं तत्कारणज्ञानपरं आश्रयासिद्ध्यादिवारणाय सत्यंतं तादृशपक्षकतादृशहेतुकग्रहाविरोध्यर्थकं अनया च वाचोभंग्याव्याप्तिग्रहविरोधित्वमेवाभिविवक्षितं तेन वन्हिमान् वन्हिमान्ह्रदत्वादित्यादौ हेतोः साध्यवद्वृत्तित्वादेर्नासंग्रहः विवेचयिष्यते चेदमुपरिष्टात् । सपक्षेति संपातायातं अतएवानुपदं विरुद्धोपीऽत्यादिकं व्यर्थेति विशेषणं पक्षवृत्तित्वं साध्याव्याप्यत्व इति हेत्वाभासत्वम् हेतुवदाभासमानत्वम् वत्यर्थश्च वृत्तिमत्वं एवंच साध्यतदभावव्याप्यत्वग्रहविरोधिवृत्तिमत्वग्रहाविरोधिरूपवत्वमर्थः। साध्यतद्भाववद्वृत्तित्वं साधारण्यम् निश्चितसाध्यतद्भाववद्व्यावृत्तत्वमसाधारण्यम् तच्च व्याप्तिद्वयग्रहविरोधीति हृदयं असिद्धिविशेषस्त्ववृत्तित्वं वृत्तिमत्वग्रहविरोधि साध्यतद्भाववद्व्यावृत्तत्वमपि यदीदृशं तदा असिद्धिरेवनोचेदिदमेवासाधारण्यं बोध्यं साध्याप्रसिद्ध्यादिवारणाय विशिष्टसाध्यसाधनग्रहाविरोत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच्यं व्यापकसामानाधिकरण्यमिह व्याप्यत्वं तेन च द्वितीयस्य भेदः रीतिस्तुल्यैव। केचित्तु असाधारण्याभावकालावच्छिन्न-साध्यतदभावव्याप्तिशून्यत्वं विवक्षितं विशेषणाभावात् वस्तुतो व्याप्यस्य विरुद्धस्य वा असाधारणस्य संग्रह इत्याहुस्तच्चिंत्यम् व्यर्थेति विरोधादेर्वारकं साध्याभावेत्यादि व्यर्थं तस्य पार्थक्ये प्रमाणाभावादितिभावः। प्रथममित्यादि गगनमित्यादि च दूषणं यथाश्रुते नापीत्यादि सपक्षविपक्षत्वावच्छिन्नव्यावृत्तत्वं सर्वतद्व्यावृत्तत्वं व्यर्थेति सपक्षवृत्तित्वविपक्षव्यावृत्तत्वयोर्दूषकतायामनुपयोगादितिभावः। पक्षातिरिक्तेत्यादि व्याप्यविरुद्धयोरसाधारण्योः संग्रहाय पक्षातिरिक्तपदे पक्षत्वं संदिग्धसाध्यकत्वम् धूमेत्यादि दूषणं यथा श्रुते नतु सप्तमीसमासात् पक्षातिरिक्ते वर्त्तते यत्साध्यवन्मात्रवृत्ति साध्याभाववन्मात्रवृत्ति च तद्भिन्नत्वमित्यर्थे इति ध्येयम्। पक्षवृत्तीत्यादि विरोधः साध्यासामानाधिकरण्यं पक्षवृत्तित्वसाध्यासामानाधिकरण्यग्रहाविरोधी योऽनुमितेरौपयिकस्य जनकज्ञानविषयस्य संबंधस्य सपक्षसत्त्वादेरभावस्तद्वत्वमित्यर्थः सपक्षविपक्षव्यावृत्तत्वस्य चासाधारण्यस्य असाधारण्य निश्चये पक्षे साध्यसामानाधिकरण्यसंदेहान्न तस्य तज्ज्ञानविरोधित्वं पक्षवृत्तौ विरुद्धभिन्ने च वर्त्तते यस्तादृशोऽभावस्तद्वत्त्वमर्थ इति केचित्। पूर्वोक्तलक्षणानां यथोक्तरीत्या यथामतं नाव्याप्त्यादिसंभावना। परंतु तज्ज्ञानस्यानुमित्यप्रतिबंधकतया तेषां हेत्वाभासतावच्छेदकत्वं नघटते। नघटतां किं तेन तेषां हेत्वाभासविभागमात्रोपयोगित्वादित्याशयेनाहउच्यत इति। संदेहं प्रत्येव साधारण्यादिविशिष्टधर्म्मवद्धर्मिज्ञानत्वेन हेतुता तज्जनककोटिद्वयोपस्थितिं प्रति तु तादृशधर्म्मज्ञानत्वमात्रेणेत्यभिप्रेत्याह उभयेति साध्यसंदेहजनकेति प्रकृतं यथाकथंचित् कोटिद्वयोपस्थितिः स्मृत्यनुभवसाधारणीसंदेहजननीनियामकंतु साधारण्यादिविशिष्टधर्मवत्ताज्ञानम् अतएव धारावाही संदेह इति मते तु धर्मितावच्छेदकविशिष्टे धर्मिणि यद्रूपविशिष्टज्ञानं साध्यसंदेहजनकं तद्रूपवत्त्वमेव वक्तव्यं कोटिद्वयसहचरितत्वादिना ज्ञातस्य उर्द्ध्वत्वादेरूर्द्ध्वत्वत्वादिना धर्मिणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानमेव संशयजनकं नतु तदानीं साहचर्य्यज्ञानमपेक्षत इति नये तु यद्रूपविशिष्टत्वे न गृहीतस्य धर्म्मस्य धर्मिवृत्तिताज्ञानं तथा तद्त्त्वमेव वाच्यम्। तच्चेति ननु साधारण्यं न साध्यतदभाववद्व्यावृत्तत्वं वृत्तिमतस्तथात्वासंभवात् एककोटिव्याप्यस्येव एककोटिमद्व्यावृत्तस्यापि धर्म्मस्य बुद्धेर्विशेषदर्शनतया संशयविरोधित्वाच्च सत्प्रतिपक्षे च परामर्शाप्रामाण्यसंशयोत्तरमेवसाध्यसंदेहा न्नापि निश्चितसाध्यतदभाववद्व्यावृत्तत्वं तद्धि यत्र यत्र साध्यादिमत्तानिश्चयस्तद्व्यावृत्तत्वं येन येन रूपेण यत्र यत्र तन्निश्चयस्तेन तेन तद्व्यावृत्तत्वं वा। आद्ये सर्व्वाणि साध्यव्याप्यवंति साध्यवंति सर्व्वाणि वा असाध्यवंति प्रमेयाणीत्यादिनिश्चये सामान्यतः पक्षेऽपि साध्यादिनिश्चयादतथात्वप्रसंगः। द्वितीये तु विशिष्यपक्षे साध्यनिश्चयं विनैव शब्दादिना साध्यव्याप्यत्वनिर्णयेऽपि तथात्वापत्तिः नैष दोषो यादृशव्याप्तिग्रहे सति नासाधारण्यं तदग्रहभावेन विशेषलक्षणस्य साधारण्याभावविशिष्टस्य तदग्रहस्य चाभावेन सामान्यलक्षणस्य विशेषणादतिव्याप्तिनिरासात् विशिष्टाभावादेव च साधारण्ये व्याप्तिभ्रमदशायां नाव्याप्तिरितिचेत् एवं सत्येकेन व्याप्तौ गृहीतायामसाधारणस्य न किंचिदपि प्रति सव्यभिचारित्वं स्यात् स्याद्वा तदपि तत्तत्पुरुषघटितमसाधारण्यवत् साध्यादिव्याप्यवत्त्वेन रूपेण साध्यादिमत्त्वानिश्चयेऽव्याप्तिप्रसंगाच्च न हि घटोऽनित्यो घटाद्व्यावृत्तं शब्दत्वमितिवत् अनित्यत्वव्याप्यवतो व्यावृत्तं शब्दत्वमिति तदानीं निश्चयः अभिहितंच निश्चितसाध्यतदभाववद्व्यावृत्तत्वं न संशयप्रयोजकं किंतु साध्यतदभावाभ्यां सहचरितत्वमिव तत्सहचारिताभावप्रतियोगित्वम् व्याप्यविरुद्धयोस्तु तत्त्वेन निश्चितयोर्द्दर्शने विशेषदर्शनवशादेव न संशय इति विभाव्य लक्षणान्तरमाह विरुद्धान्येति विशिष्टसाध्यहेतुसामानाधिकरण्यग्रहाविरोध्यर्थकमर्थतो विरोधिविशेषणं तेन साध्यसाधनयोरप्रसिद्धेरवृत्तित्वस्य परंपरासामानाधिकरण्यादीनांच निरासः पक्षपदंच धर्म्मिमात्रपरं तथाच यद्यद्धर्म्मिवृत्तित्वं हेतोर्ज्ञायते तत्र तत्रैवानुमितिविरोधि यद्रूपं तद्त्त्वमित्यर्थः साध्यव्यापकीभू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताभावप्रतियोगित्वंतु तथा बाधप्रतिरोधौ तु धर्म्मिविशेषितत्वात् न तादृशौ सर्वं साध्याभाववत् तद्व्याप्यवत्त्वेत्यादिकंच सा-
ध्यवत्त्वग्रहविरोधित्वेन सामानाधिकरण्यग्रहविरोधिसाध्यानुमितिसामान्याविरोधित्वं वा विशेषणं तेनैवेत्ति तेनानुमितिविरोधि-
ना विपक्षवृत्तित्वादिना एवकारेणानुगमकं रूपं व्यवच्छेद्यं तस्य हेत्वाभासतावच्छेदकत्वं निरस्यति हेत्वाभासस्य लक्षणानुरो-
धेनेति तेनानुमितिविरोधित्वघटितलक्षणकरणेन असाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषणत्वपक्षे नाव्याप्तिरितरथा पुनरव्या-
प्तिरेव साध्याभावज्ञापकत्वेन साक्षात्साध्यवत्तानुमितिविरोधित्वेन । सर्वमनित्यमित्यादि संप्रदायमनुरुध्योक्तम् अतएव तावद्ग्रे-
ऽन्तर्भावयिष्यति नापीति निश्चितेसाध्यवति साध्यवद्भिन्ने च वर्त्तमानत्वमित्यर्थः । अनुपसंहार्य्य इति साध्यवदन्यवृत्तित्वां-
शस्य तत्रापि सत्त्वादिति भावः नापीति इह सपक्षत्वं न निश्चयगर्भमतो नाभेदः घट इत्यादि इत्यस्य विरुद्धस्य अनुपसं-
हार्य्यस्य प्रसिद्धस्य च विरुद्धांतरस्य व्यवच्छेद्यत्वादित्यर्थः अन्वयतो व्यतिरेकतश्च सहचाराग्रहदशायामीदृशं द्वित्वमनुपसंहा-
रीति मतेनेदमित्यपि कश्चित् । विपक्षेति अत्र विपक्षत्वं साध्याभाववत्वम् अनुपदमेव वस्तुगत्या साध्याभाववद्वृत्तित्वेन
साधारण इति मूलएव स्फुटतरमभिधानात् न तु निश्चयगर्भं तज्ज्ञानस्याप्रतिबंधकत्वात् न च वस्तुतो यत्र तन्निश्चयस्तद्वृत्ति-
त्वज्ञानं प्रतिबंधकं रूपांतरेण साध्याभाववत्तया निश्चिते रूपान्तरेण हेतुज्ञानेऽप्यप्रतिबंधात् नचैकेन रूपेण तत्तथा गौरवात्
हेतुसाध्याभावयोः सामानाधिकरण्यास्फुरणेनाविरोधात् साध्याभाववद्वृत्तिर्हेतुरित्यादि शुद्धज्ञानानामप्रतिबंधापाताच्च यत्तु
साध्याभावांशे निश्चयरूपं शेषांशे संशय साधारणं साध्याभाववद्वृत्तित्वज्ञानं प्रतिबंधकमन्यथा पक्षएव साध्यसंदेहेन संदिग्धा-
नैकांतिकत्वापत्तेरिति यदाहुः नहि पक्षे पक्षसमेवा व्यभिचार इति तन्न व्याप्तिनिश्चये हेतौ व्यभिचारसंशयायोगात् तदनि-
श्चयदशायाम् अनुकूलतर्कास्फूर्त्तौ संदिग्धानैकांतिकत्वस्येष्टत्वात् हेतुसाध्याभावसामानाधिकरण्यावगाहितयैव ज्ञानस्य व्याप्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रहप्रतिबंधकत्वात्' अतएव पक्षः साध्यातिरिक्तपक्षधर्मातिरिक्तधर्मवान् मेयत्वादित्यादयोऽनुकूलतर्कविरहिणोबाधप्रतिरोधयोरनवतारेऽपि पक्ष एव संदिग्धानैकान्तिकतया अप्रयोजका गीयंते' एवं वन्हिर्द्राहानुकूलेत्यादयः शक्तिसाधका अपि' अन्यथा पक्षातिरिक्ते सर्वत्र साध्यवत्तानिर्णयाद्व्याप्तिग्रहस्य दुर्वारत्वात् पक्षविपक्षान्यतरत्वादिना सर्वत्र सत्प्रतिपक्षप्रसंगाच्च' अथ' साध्यतद्वदत्यन्तान्योऽन्याभावगर्भव्यभिचारयोरेकोपादानेऽन्यतराव्याप्तिः' साध्यवत्ताज्ञानप्रतिबंधकज्ञानविषयत्वेनाभावद्वयानुगमेऽपि हेतुमति तादृशाभाववत्त्वस्य तादृशाभाववति हेतुमत्त्वस्य तादृशाभावे हेतु सामानाधिकरण्यस्य साध्यतद्वदादौ हेतुसमानाधिकरणतादृशाभावप्रतियोगित्वादेश्चासंग्रह इति चेत्' अत्र वदंति' प्रकृतसाध्यसाधनसामानाधिकरण्यग्रहाविरोधिनो ज्ञानस्य विषयतया अन्वयव्याप्तिग्रहविरोधितावच्छेदकत्वेन विभजनान्नासंग्रहः' अविरोधिन इत्यंतेन साध्याप्रसिद्ध्यादीनां निरासः' यदि पुनरत्यंतान्योऽन्याभावयोरेकतरगर्भव्यभिचारज्ञानस्य नान्यतरगर्भव्याप्तिग्रहविरोधित्वम् इत्यादिकं विभाव्यते' तदा साध्यसामानाधिकरण्यघटितत्वेनान्वयव्याप्तयोऽनुगमनीयाः' प्रातिस्विकरूपेणोपादाय वा तावद्व्याप्त्यवगाहित्वम् ग्रहस्य वक्तव्यं' साध्याव्यभिचरितसामानाधिकरणस्य व्याप्ये प्रसिद्धस्य हेतौ विरहोऽप्येतद्विशेष एव' विशिष्टसाध्यसाधनवत्त्वग्रहाविरोधिनोज्ञानस्य विषयतया व्यापकत्वग्रहविरोधितावच्छेदकरूपत्वं वा विभाजकं' शेषं पूर्ववत्। साध्य तद्वतोरत्यन्तान्योऽन्याभावौ साध्याभावव्याप्यादिव्यावृत्तेन साध्यवत्ताज्ञानविरोधित्वेनानुगमस्य तत्र हेतुसामानाधिकरण्याभावग्रहविरोधित्वं साध्यवत्ताज्ञान विरोधिनि तादृशाभावग्रहविरोधिहेत्वाभासतावच्छेदकरूपवत्त्वं वा तथा वक्तव्यं' साध्याभावव्याप्यादौ तु हेतुसामानाधिकरण्यादिकमविरोधित्वान्नाभासः विरोधित्वं पूर्वोक्तदिशावसेयम्' उपदर्शितविशिष्टव्याप्तिविरहो व्याप्यत्वासिद्धिरेवेति व्याप्तिग्रहकारणसहचारग्रह सहकार्य्यभावप्रतियोगिग्रहविषयत्वेनानुगम इत्यपि कश्चित्। प्राचां मतेनोत्तरयति' न सर्वेत्यादि। सर्वेति विपक्षे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽप्यन्वेति तेन साध्याभाव न्यूनवृत्तेर्व्युदासः विपक्षत्वस्य निश्चयगर्भत्वात् भूरनित्या गंधवत्वात् नित्यः शब्दः शब्दत्वादित्यादौ नाव्याप्तिः पृथिवी रूपवती रसादित्यादौ जलादेर्नीरसत्वभ्रमे पुनरसाधारण्यभ्रम एवेति मंतव्यम् । तथापीति पक्षत्वं संदिग्ध-साध्यकत्वं मतं दूषयति अथेत्यादि । व्याप्तीति तथाच स्वतो दूषणाक्षमत्वान्नाभासत्वम् उपाधिवदिति भावः एकधर्मिण्या-वृत्तत्वंच न सामानाधिकरण्यग्रहविरोधिधर्म्यन्तरे तत्संभवात् अन्यथा सतोरपि साध्यसाधनयोर्व्यतिरेकित्वं दोषायस्यात् अथायं शंकितुरभिप्रायः पक्षे साध्याभावस्य संशयो निश्चयश्चानुमितिविरोधी विरोधिविषयकत्वात् तत्सामग्री च विरोधिसामग्रीत्वेन तत्रादिमस्य सामग्रीमक्षे सव्यभिचारस्य हेतोर्ग्रहः द्वितीयस्य प्रतिहेतोः परामर्शः अतस्तयोराभासत्वम् अतएव सव्यभिचार लक्षणे पक्षवृत्तित्वं विशेषणं साध्याभाववद्वृत्तित्वमात्रं पुनरसिद्धिरेवेति विरोधान्यस्य परामर्शविरोधिनो रूपस्य तत्त्वादिति मैवं बाधसंशयस्य प्रतिबंधकत्वानंगीकारात् साधारणधर्म्मवत्ताज्ञानस्य संशयसामग्रित्वाभावात् सामग्रित्वेन प्रतिबंधकत्वे हेत्वाभा-सत्वायोगाच्च अन्यथा पक्षस्य साध्यतदभावावद्वृत्ति प्रमेयत्वादिमत्त्वं सर्वत्र हेतावाभासीभवेत् तथा कामिनीजिज्ञासाप्रयोजकं तज्ज्ञानेष्टसाधनत्वादिकमपि । एवं विशिष्टस्यानुग्राह्यत्वं व्युत्पाद्य केवलस्यापि सपक्षव्यावृत्तत्वस्य तथात्वं व्युत्पादयति किंचेति । वाय्युपदर्शितदृष्टांतस्य साधनवैकल्यंतु नासाधारण्यं सपक्षान्तरवृत्तित्वेऽपि तत्संभवात् तद्भावनंतु तस्य निग्रहस्थानत्वात् तद्वि-भाजकसूत्रस्थानुक्तसमुच्चायकचकारेण तस्य समुच्चितत्वात् तदाहरणस्याभासता प्रदर्शनायैव वा आवश्यकश्च प्राचां दृष्टांतप्रयोग इति भावः। माभूत् परार्थानुमानेऽऽसाधारण्यं दोषः स्वार्थे तु स्यादत आह स्वार्थेति । स्वमते सिद्धांतमुपक्रमते उच्यत इति अर्थादिति व्यतिरेकिमुद्रया अर्थादुभयं साधयेत् अर्थवशसंपन्नमेवोभयसाधकत्वम् उभयसिद्ध्यनुकूलव्याप्त्यादिग्रहादि-त्यर्थः व्यतिरेकितया वेति पाठे अर्थात् अर्थापत्तिविधयेति परमतेन एवंच पक्षधर्म्मतया ज्ञायमानो हेतुः साध्याभावव्यापकी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूताभावप्रतियोगित्वज्ञानात् साध्यस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानाच्च साध्याभावस्य साधनायोन्मखो मिथो विरोधेन नैकमपि साधयति। न च शब्दे नित्यत्वानित्यत्वसंदेहे तदुभयव्यापकत्वं शब्दत्वाभावस्य ग्रहीतुमशक्यं व्यापकत्वाभिमतशब्दत्वाभावाभाववच्छब्दवृत्तित्वस्य नित्यत्वानित्यत्वयोः संदिह्यमानत्वादिति वाच्यं तथात्वेऽपि तादृशसंशयाभावदशायां तथात्वनिश्चये तदुभयव्यापकीभूताभावप्रतियोगिशब्दत्ववत्त्वस्य शब्दे प्रतिसंधातुं शक्यत्वात् स्वाश्रयमप्रतीत्यैव प्रतीतस्य सौरभादेरभावस्य पानीयपाषाणादौ पृथिवीत्वतदभावसहचारेण तदुभयव्यापकताग्रहे तादृशाभावप्रतियोगिसौरभस्य चंदनादौ परामर्शे पृथिवीत्वादौ साध्ये तदसाधारण्यस्यातिसुलभत्वाच्च। नन्वयं सत्प्रतिपक्ष एव व्याप्तेरन्वयनिरूप्यत्वस्याव्यापकत्वेनाप्रयोजकत्वादित्यत आह सत्प्रतिपक्ष इति। नचैवं विधभेदेन पृथगभिधानेऽति प्रसंगः स्वतंत्रेच्छाया इत्यादेर्ग्रन्थकृतैवाभिधानात् तदभावसाधके तत्साधकत्वभ्रमरूपाशक्तिविशेषसूचनार्थत्वाच्च सत्प्रतिपक्षसव्यविचारोभयलक्षणाक्रांततया उभयांतर्भावस्याविरुद्धत्वादित्यपि कश्चित्। सर्वसपक्षेति सपक्षः साध्यवान् पक्षवृत्तित्वे सति साध्याव्यापकीभूताभावप्रतियोगित्वमित्यर्थः इदंच साक्षादनुमितिविरोधि विरोधश्च साध्यासामानाधिकरण्यादिरूपोऽन्वयव्याप्तिग्रहाविरोधीति न सांकर्य्यशंकापि साध्यसमानाधिकरणंतु नासाधारणं दशाविशेषे तद्भ्रमस्तु पुरुषदोषो व्याप्य इव साधारण्यभ्रमः। नवीनाः पुनरेवं वर्ण्यंति सामग्रीद्वयविरोधेन हेत्वभावस्य साध्यतदभावव्यापकताग्रहविरोधोऽसाधारणस्य दूषकतावीजं तथाहि वृत्तिमताहेतुना क्वचिदपि वर्त्तितव्यं तत्र चावश्यं साध्यतदभावयोरन्यतरेण भवितव्यं न च तत्र हेत्वभावः संभवति अतोऽवश्यमन्यतराव्यापकत्वं तस्य एवंविधविरोधध्रौव्ये साध्येन तदभावेन च हेत्वभावस्य सहचारज्ञानं नैकतरनिरूपितामपि व्यापकतां ग्राहयति मिथो विरोधात् विरोधिपरामर्शद्वयमिव साध्यतदभावौ एवंच्च वृत्तिमत्त्वविशेषितं हेतोर्याविद्विपक्षसपक्षव्यावृत्तत्वं वृत्तिमत्प्रतियोगित्वविशेषितं वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेत्वभावस्य यावत्सपक्षविपक्षवृत्तित्वमसाधारण्यमिति योजयंति च ग्रंथमित्थं शद्बत्वं यदि साध्यतदभाववद्व्यावृत्तत्वेन तदुभयव्यापकीभूताभावप्रतियोगित्वेन ज्ञातं ज्ञानयोग्यं स्यात् तद्वत् स्यादिति यावत् तदा व्यतिरेकितया तादृशव्यतिरेकप्रतियोगित्वेनार्थात् पक्षे तदुभयं साधयेत् तदुभयसहचरितं भवेत् व्यापकाभाववति व्याप्याभावस्यावश्यंभवात् अतथाभावे पक्षधर्म्मताया व्याप्तेर्व्वानुपपत्तिर्न्न च तथाभावः संभवति न वा पक्षवृत्तित्वं बाधितम् अतः साध्यतदभावो व्यापकतया तदुभयसिद्ध्यनुकूलविरोधिव्याप्तिद्वयग्राहकव्यतिरेकसहचारद्वयग्रहाविषयतया असाधारणो दोषो व्याप्तिद्वयग्रहप्रातिबंधकः । ननु यदि विरोधिव्याप्तिद्वयं न गृह्यते तदा सत्प्रतिपक्षोच्छेदः गृहीतविरोधिव्याप्तिद्वयहेतुसमुच्चयत्वात् तस्येत्यत आह सत्प्रतिपक्ष इति। तत्र हेत्वोर्भिन्नतयाधिकरणभेदेन तथा ग्रहःसंभवति अत्र पुनरेकस्मिन् हेतौ तदुभयग्रहो विरुद्ध इत्यर्थः। अत्र चेदं चिंत्यम्। एवं सति सपक्षादेर्यावत्त्वाविशेषणं व्यर्थं दूषकतायामनुपयोगात् व्यभिचाराग्रहमात्रोपक्षीणत्वात् वृत्तिमत्त्वादिविशेषितस्यापि चासाधारण्यस्य ज्ञानं न व्याप्तिज्ञानविरोधि विरोधिविषयकत्वाभावात् उपदर्शितविरोधस्य तच्छरीरेऽनंतर्भावाच्च व्यापकतयोरपि च न स्वतो विरोधः उपदर्शितरीत्या तदवधारणे चावश्यं व्यभिचारज्ञानमेव प्रतिबंधकमत एव सत्यपि असाधारण्यज्ञाने एकत्रानुकूलतर्कावतारे भवति व्याप्तिधीरिति एतेन तादृशसहचारज्ञानं तुल्यबलविरोधिव्याप्तिग्रहसामग्रीत्वेन प्रतिबंधकं तर्कावतारेपुनस्तुल्यबलतैव नास्तीति परास्तं तर्कस्य व्यभिचारशंकानिवर्त्तकत्वेनैवोपयोगित्वात् सामग्रित्वेन प्रतिबंधकत्वे हेत्वाभासत्वायोगाच्च सत्प्रतिपक्षे च विरोधिव्याप्यवत्तानिर्णयत्वेन प्रतिबंधकत्वं नतु विरोधिसामग्रित्वेन बाधावतारे त्वापाततः सत्प्रतिपक्षितत्वेऽपि बाधेन प्रतिहेतोरव्याप्यत्वादिज्ञान एव साध्यानुमित्युदयादिति कृतं पल्लवितेन । केवलान्वयीत्यादि सद्धेतुत्वं साधारणत्वंच केवलान्वयिनः साधनस्य व्यतिरेकिणस्तु भागासिद्धत्वं साधारणत्वं विरुद्धत्वंच यथासंभवं बोध्यम् । नापीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केवलान्वयिसाध्यकवारणाय सत्यंतं व्यतिरेकिसाध्यकसद्धेतुवारणाय केवलान्वयीत्यादि पक्षत्वं साधकबाधकमानशून्यत्वं केवलान्वयिसाध्यकेऽपि बाधकमानप्रसिद्धिरुक्तैवेति न सत्यन्तवैयर्थ्यं निश्चितसाध्याभाववत्तन्मात्रवृत्तित्वे त्वसाधारण्य विरुद्ध इति साधारण्याद्यग्रहदशायामसांकर्य्यमिति वा हृदयम् । अव्यापकत्वादिति सद्धेतुत्वंच व्याप्तिनिश्चयदशायामेवेति भावः । अथेत्यादि पक्षातिरिक्तेन प्रतीतो निश्चितो व्याप्तिग्रहानुकूलोऽन्वयेन व्यतिरेकेन वा सहचारो यस्य स तथा सद्धेतुरेवेति तथाच लक्षणे पक्षातिरिक्तपदं सहचारग्रहस्थलमात्रोपदर्शकं न तु विशेषकमिति विशेषकत्वाभिप्रायेण दूषणद्वयमाह तत्रैवेत्यादि असाधारणे सपक्षव्यावृत्ते पक्षतादशायां शब्दोऽभिधेयः शब्दत्वादित्यादौ जलं निःस्नेहं शीतस्पर्शवत्त्वादित्यादौ च रूपं जलं वा द्रव्यभिन्नं गुणवत्वात् गुणकर्म्मावृत्तिजातिमत्त्वादित्यादौ विरुद्धे चातिव्याप्तिरित्यर्थः ॥ दूषकतायामिति सहचाराभावस्यैव ज्ञानं विरोधि न तु तत्प्रत्यांशस्यापीति अर्थगत्येति अनैकांतिकशब्दार्थविवेचनेन प्रातिस्विकरूपेणैवप्रतिबंधकत्वामित्यवस्थितेरित्यर्थः । केचित्तु दूषकतायामसाधकतायाम् । अर्थेति अनेकांतिकशब्दार्थे उभयकोट्युपस्थापकत्वादौ साध्योपस्थापकत्वाद्यंशस्य व्यर्थत्वादित्यर्थ इत्याहुः। विप्रतिपत्तिः पक्षसाध्याभावप्रतीतिः साध्ये पक्षनिष्ठाभावप्रतियोगित्वप्रतिपत्तिर्व्वा आद्ये केवलान्वयीति साध्याभावाप्रसिद्ध्या अव्याप्तिरित्यर्थः। उभयत्र सर्वस्येति अतिव्याप्तेरिति पाठे तन्मात्रवृत्तित्वं तत्वंव्याप्यवृत्तिकत्वं तदितरावृत्तित्वं वा आद्ये केवलेति इदंच यथाकथंचिद्व्याप्तिग्रहदशायां द्वितीये सर्वस्येति व्याप्तीत्यादि यत्र यस्येत्यर्थः तथाच हेत्वभिमतशब्दोपसंधानात् तद्धेतुकप्रकृतसाध्यसिद्धौपयिकव्याप्तिग्रहानुकूलोपसंहाराभावस्तस्यानुपसंहारित्वमित्यर्थलाभाद्व्यतिरेकिणि नातिव्याप्तिः। ननूपसंहारः सहचारः तन्निश्चयो वा आद्ये तादृशस्याभावो निखिलप्रसिद्धानुपसंहार्य्यव्यापकः अतिव्यापकश्च रूपं द्रव्यभिन्नं गुणावत्त्वाद्गुणकर्म्मावृत्तिजातिमत्त्वादित्यादेः द्वितीये पुनरज्ञानरूपासिद्धिपर्य्यवसायी ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणाभावतया स्वरूपसन्नेव दोषो न हेत्वाभास इत्यत आह केवलान्वयीति पक्षः साध्यानिश्चयविरोधिनः साध्यवान्नवेत्यादेः संदेहस्य विषयोऽवच्छेदकत्वंच स्वान्यूनवृत्ति तत्कत्वं तच्च स्वरूपसतोऽप्यविरुद्धं तेन प्रातिस्विकद्रव्यत्वादिरूपेण सर्वत्र साध्यसंदेहदशायां नाव्याप्तिः एवंच सर्वत्रैव हेत्वादिमति साध्यतदभावसंदेहाद्व्याप्त्यग्रहेणाभासत्वम्। परार्थस्थले वहिर्भावं व्युत्पादयति एवमित्यादिना असिद्धिरनिश्चयः ज्ञाने ज्ञापने स्वार्थस्थलेऽन्तर्भावम् एतेनेत्यादिनाशंक्य निरस्यति उपजीव्यत्वादिति अत्रेदं चिंत्यं हेतुमति साध्याभावसंदेहो नाभासः सत्तयैव विरोधित्वात् तद्विषयस्तु हेतोः साध्याभावसामानाधिकरण्यं साध्यस्य वा हेतुमन्निष्ठाभावप्रतियोगित्वं नास्त्येव केवलान्वयिसाध्यके व्यतिरेकिसाध्यके तु साधारण्य रूपतया संदिग्धानैकांतिकत्वं पर्य्यवसितं विश्वविषयकसाध्यतदभावसंदेहे च कारणीभूतान्वयव्यतिरेकसहचारग्रहविरहात् संशयसामग्र्या साध्यतदभाववत्त्वनिश्चयप्रतिबंधाद्वा व्याप्त्यग्रहेऽज्ञानरूपासिद्धिरेव उपजीव्योऽपि च साध्याभावसंदेहादिर्नाभासः सत्तयैव विरोधादिति यत्तु व्याप्तीति व्याप्तिग्रहानुकूलसहचारनिश्चयत्वावच्छिन्नविरोधिरूपत्वमर्थः विरोधस्तु संशयसाधारणमन्वयमात्रसहचारग्रहं विरुणद्धि असाधारणे व्यतिरेकिणि च न व्यतिरेकसहचारग्रहविरोधः तादृशरूपमंतरेण लक्षणस्यासंभवितया तदेव रूपं लक्षणमाह केवलेति तादृशावच्छिन्नः पक्षः संदिग्धसाध्यकोयस्याश्रयः स तथा तथाच केवलान्वयिधर्म्मावच्छिन्नसाध्यसंदेहविषयवृत्तित्वमनुपसंहारित्वं व्यतिरेक्यादौ केवलान्वयी न साध्यसंदेहविषयतावच्छेदकः साध्यवत्तानिश्चयसामान्यविरोधिसंशयविषयवृत्तित्वं वा तत्त्वं धर्म्मिविशेषनियंत्रितस्तु संदेहो नान्यधर्म्मिकनिश्चयविरोधी साध्यसंदेहविषयताव्याप्य साध्यसिद्ध्यनुकूलव्याप्तिग्रहोपायिकसत्ताकत्वं वा तादृशी च सत्ता अन्वये हेतोर्व्यतिरेके च तदभावस्येति न कश्चिद्विशेषः स्वरूपसत्तादृशसंशयविषये च हेतुमत्ताज्ञानं हेतौ साध्यसामानाधिकरण्यं संशयसामग्रीत्वेन तन्निश्चयप्रतिबंधकं सर्वत्र संशयसामग्र्या निश्चयप्रतिबंधक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वकल्पनात् हेतुमति सर्वत्रसाध्याभावसंदेहे हेतौ साध्यसामानाधिकरण्याभावसंशयस्योचित्यावर्जितत्वात् साध्याभावेन साध्यसामानाधिकरण्याभावोपस्थापनादिति नन्न सर्वत्र साध्यसंदेहदशायां क्वचिदपि साध्यसामानाधिकरण्यस्यागृहीतत्वेन तदभावस्य गृहीतुमशक्यत्वात् प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनिश्चयस्याभावधीहेतुताया असकृदावेदितत्वात् अस्तुवा स यथाकथंचित् साध्ये हेतुसामानाधिकरण्याभावसंशयहेतुत्वेन वा तथात्वं न तथापि सामग्रित्वेनप्रतिबंधकतयाहेत्वाभासत्वम् अन्यथा व्यभिचरिताव्यभिचरितसमानासमानाधिकरणव्याप्याव्याप्यपक्षधर्मापक्षधर्मादिसाधनवन्हिः साधनादिसाधारणद्रव्यःत्वादिमत्त्वं हेतोः पक्षस्य चाभासान्तरं स्यात् तदुपदर्शितस्येव तस्यापि ज्ञानस्येतरसाचिव्येन तत्तन्निश्चायिविरोधिसंशयसामग्रित्वात् एवमसिद्ध्यादिनिश्चायकप्रत्यक्षसामग्र्यपि अपि च हेतोः साध्याभावसंदेहविषयमात्रवृत्तित्वं दूषणमिति प्राप्तं तच्च व्यतिरेकिणि हेतौ नियतविषयेणापि संदेहेन सम्पद्यते दूषकतावीजसत्त्वे चासाधारण्यादिसाधारण्यं न दोषाय न वा अत्रैव निर्भरः कर्त्तव्यो हेत्वाभसत्वानुपपत्तेरुक्तत्वादित्यलं पल्लवितेन । इति सव्यभिचार शिरोमणिः॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐश्रीगणेशायनमः ॥ अथगादाधरी ॥ सव्यभिचारसामान्यलक्षण मनुक्त्वा मूलकृत स्तद्विभजन माक्षिपति । यद्यपीति लक्षणतः लक्षणवाक्यतः ' सामान्यम् साधारणासाधारणानुपसंहारित्रितयसाधारणधर्म मंऽप्रतीतवतों ऽतेवासिन इतिशेषः ' विशेषजिज्ञासानुदयात् ' आवांतरधर्मप्रकारकज्ञानेऽत्पत्यसंभवात् ' सामान्यज्ञानस्य विशेषजिज्ञासायां स्वातंत्र्येणे (१) ष्टसाधनताज्ञानधर्मितावच्छेदकज्ञानसंपादकतया वा हेतुत्वादितिभावः । सामान्यलक्षणानंतरं । सव्यभिचारसामान्यलक्षणानंतरं ' विभागः ' सव्यभिचारविभागः ' सव्यभिचारत्वावान्तरधर्मपुरष्कारेणधर्मिप्रतिपादनमितियावत् ' नायंग्रंथोविभागपरः ' अपितु असाधारणानुपसंहारिणो रलक्ष्यताभ्रमनिबंधनवक्ष्यमाणसामान्यलक्षणातिव्याप्तिभ्रमनिराकरणाय त्रयाणां लक्ष्यताप्रदर्शनपर इति समाधत्ते' तथापीति । साधारणमात्रे प्रसिद्धतया 'भूरिप्रयोगविषय साधारणमात्रकतया ' तन्मात्रस्य साधारणमात्रस्य' अतिव्याप्तिः प्रतीयेत इति संबद्ध्यते' तद्व्यावृत्तस्य' असाधारणादिव्यावृत्तस्य ' साधुता' निर्दोषता' लक्ष्यांतरमिति' तथाच सव्यभिचार इति मूलस्य वक्ष्यमाणसव्यभिचारसामान्यलक्षणलक्ष्य इत्यर्थः' एतद् ग्रंथस्य विभागपरत्व मुपपादयतो मत माह। कश्चिदिति । सामान्यज्ञानाधीनः' सामान्यज्ञानसामान्याधीनः' तल्लक्षणप्रत्ययम् ' लक्षणवाक्याधीनसामान्यज्ञानमात्रम् ' अन्यच विभागोपयुक्तसामान्यज्ञानस्यो पायान्तरतो ऽभ्युपगमे पश्चादपि सामान्यलक्षणाभिधान मसंगत मनाकांक्षितत्वा दित्यस्वरससूचनाय कश्चि दित्युक्तम्' अथवा सामान्यज्ञानाधीनः ' त्रितय साधारण किंचिद्धर्मावच्छिन्नज्ञानाधीनः ' तल्लक्षणप्रत्ययम् ' सव्यभिचारपदार्थतावच्छेदकवक्ष्यमाणलक्षणज्ञानम् ' अपेक्षते अत इति ' तादृशलक्षणाज्ञानेपि

(१) टिप्पणी—श्रीगणेशायनमः ॥ इष्ट साधनता ज्ञानस्याकारं च सव्यभिचारत्वा वान्तर धर्म प्रकारक ज्ञान मदीष्ट साधनं तादृशज्ञान धर्मितावच्छेदकं । आवान्तर धर्मप्रकारक ज्ञानत्वं तत्तु सव्यभिचार ज्ञानाधीनं । अतः धर्मिता वच्छेदक संपादकतया हेतुत्व मस्तीति भावः ॥

Nepal Sanskrit University, Balmeeki Campus; Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सव्यभिचारपदार्थत्वरूपसामान्यज्ञानस्य शिष्याणां स्वत एव संभवेन विशेष जिज्ञासा संभवा दिति भावः। अत्रच सव्यभिचार पदार्थत्वेन त्रयाणां ज्ञानेपि प्रथमं सव्यभिचार पदार्थ एव कीदृश इत्येव जिज्ञासो देति नतु सव्यभिचार पदार्थाः कतीति प्रथमं विभागो ऽनुचित इत्यस्वरसबीजम् ।' प्रसंजक पदस्या नुमापका पादकयो रेकतर मात्र परत्वे ऽसाधकत्वा दित्यादि दोष द्वया संगते स्तत्संगमनाय प्रसक्ति पदार्थं वितर्कयति ' प्रसक्तिरिति 'प्र पूर्वक संज धात्वर्थ इत्यर्थः ' तत्कोटि व्याप्यस्यापि व्याप्तिभ्रमेण तद्विरुद्ध कोटेरापादकत्व मनुमापकत्वं च संभवती त्येकस्योभयं प्रत्यसाधकत्वादित्यादिदोषा संगति रित्यत आशयं पूरयति ' तदुपधान मिति ' प्रसक्त्युपधायकत्व मित्यर्थः ' अनुमापक मिति । येन हेतुना कदाचिदपि साध्यस्य तदभावस्य वा अनुमिति रापत्ति र्वा नजनिता प्रत्येकमपि तदसंग्राहक मित्यर्थः । तथापिचेति ' साध्याभाव निरूपितेत्यर्थः ' तद्योग्यता ' प्रसक्तियोग्यता ' वाच्या ' प्रसंजकपदेन विवक्षणीया ' तद्योग्यताया स्तत्स्वरूपयोग्यज्ञानविषयतारूपत्वे व्याप्तिभ्रमाविषयता मादाय पुनरुक्तदोषप्रसंग इत्यतो योग्यतां व्याचष्टे ' साचेति ' तत्कोटिप्रसक्तियोग्यताचेत्यर्थः ' व्याप्त्यादिरूपा ' (१) तत्कोटिनिरूपितव्याप्त्यादिरूपा ' साध्यसंदेहेत्यादि ' यथाश्रुतमूलग्रंथात्पक्षधर्मताज्ञानस्य साध्यसंदेहजनकत्वं कोटिद्वयोपस्थितिजनकत्वं च लभ्यते ' तत्रच नित्यत्वादिसाध्यकज्ञानादिहेतौ वक्ष्यमाणातिव्याप्ति र्वारयितु मशक्यैवं नित्यत्व तदभाव विषयक ज्ञानवा नयमिति ज्ञानस्य नित्यत्व तदभावो पस्थापकत्वात् धर्मितावच्छेदकप्रकारक ज्ञान मुद्रया तादृश ज्ञान वदिदंत्वावाच्छिन्न धर्मिक नित्यत्वादि संशय हेतुत्वात् ' (२) नच फलीभूत संशय धर्मिता

(१) टि० —तथाच प्रकृत साध्यानुमिति जनकतावच्छेदकत्वे सति। तदभावा नुमिति जनकता वच्छेदक व्याप्ति विशिष्टत्वं। वैशिष्ट्यं च स्वरूपसंबंधेन ॥

(२) टि० —फलीभूत संशय धर्मिता वच्छेदकता यादृश धर्मे पर्याप्ता तादृश धर्मा वच्छिन्न विशेष्यक यद्रूपावच्छिन्न प्रकारक ज्ञानत्वं संशय जनकताव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकं तद्रूपवत्वं विवक्षितं। पर्याप्त्यधिकरणत्वा निवेशे नित्यत्व तदभाव विषयक ज्ञानवानयंनित्यो नवेति संशयं प्रति इदंत्वा वच्छिन्न विशेष्यक नित्यत्व तदभाव विषयक ज्ञान प्रकारक ज्ञानत्वेन जनकतया नित्यत्व साध्यक ज्ञानादि हेतोः सव्यभिचारत्वापत्तिः। नचैवं धूमवत् पर्वत कालीन वन्हिमान् नवेति संशय जनकता वच्छेदकी भूत साध्य विषयतांतःपाति पर्वतत्वावच्छिन्न विशेष्यता निरूपित धूमत्वा वच्छिन्न प्रकारताया फलीभूत संशय धर्मिता वच्छेदकता पर्याप्त्यधिकरण धर्मा वच्छिन्न विशेष्यता निरूपितत्वा दतिव्याप्ति रिति वाच्यं तादृश धर्मा वच्छिन्न विशेष्यता निरूपित यद्रूपावच्छिन्न प्रकारता फलीभूत संशय जनकता नतिरिक्त वृत्तिः तद्रूपवत्वस्यैव विवक्षितत्वात्। एवं सति नित्यत्व तदभाव विषयक ज्ञानवान् इति ज्ञानीय तादृश विशेष्यता निरूपित शुद्ध ज्ञानत्वा वच्छिन्न प्रकारतायाः नित्यत्व तदभाव विषयक संशय जनकता नतिरिक्त वृत्तित्वेन नित्यो ज्ञाना दित्यत्रा तिव्याप्ति रतो ऽनतिरिक्त वृत्तित्वं विहाय स्वरूप संबंध रूपा वच्छेदकत्वस्य निवेशनीय-तया धूमवत् पर्वत कालीन वन्हिमान् धूमा दित्यादा वतिव्याप्तेः फलीभूत संशय धर्मिता वच्छेदक धर्मावच्छिन्न मुख्य विशेष्यता निरूपित यद्रूपावच्छिन्न प्रकारता संशय जनकता वच्छेदिका इति विवक्षणेनैव वारणात्। अथ नित्यत्व तदभाव विषयक ज्ञान वानयं नित्यत्व तदभाव विषयक ज्ञान वानिति ज्ञानीय तादृश विशेष्यता निरूपित विशिष्टज्ञानत्वावच्छिन्न प्रकारताया अवच्छेदकत्वेन तत्रा तिप्रसंगोऽशक्य वारणाय चफलीभूत संशय धर्मिता वच्छेदकता पर्याप्त्य धिकरण धर्मा वच्छिन्न विशेष्यतात्वा वच्छिन्न निरूपकत्व विशिष्ट यद्रूपा वच्छिन्न प्रकारत्वं संशय जनकता वच्छेदकं तद्रूप वत्व मिति विवक्षणे न दोषः। इदंत्व मात्रा वच्छिन्न विशेष्यतात्वा वच्छिन्न निरूपकताकत्व घटित रूपस्या वच्छेदकत्वा वच्छेदकत्वेन नित्यत्व तदभाव विषयक ज्ञान वदि दंत्वा वच्छिन्न विशेष्यतात्वा वच्छिन्न निरूप्यताया एक व्यक्तिवया इदन्त्वा वच्छिन्न विशेष्यता निरूपितत्व रूपेण तादृश जनकता वच्छेदकत्वात् तादृश प्रकारतात्वस्य जनकता वच्छेदकता वच्छेदकत्वा च विशिष्टस्य सुतरां जनकता वच्छेदकतावच्छेदकत्वात्। यदिच तादृश विशिष्ट धर्मे जनकता वच्छेदकता वच्छेदकता पर्याप्ति निवेश्यते तदा ऽसंभवः। लाघवेन तद्धर्मा वच्छिन्न विशेष्यता निरूपित प्रकारता त्वेनावच्छेदकत्व स्वीकारेनैवोपपत्ते रनवच्छेदकी भूत विशेष्यतात्वा वच्छेद्यत्वांशान्तर्भावेन जनकता वच्छेदकत्वस्य पर्याप्ति रसंभवात्। एतच्चा नुमिति ग्रंथे प्रकारान्तरा नुसरणे च गौरव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्यादिना भट्टाचार्येण स्फुटी कृत मिति विभावनीयं ॥ ॥
वच्छेदकता यादृश धर्मे पर्याप्ता तादृश धर्मावच्छिन्न विशेष्यक यत्प्रकारक ज्ञानत्वेन संशयं प्रति हेतुतेति विव-
क्षणे नायं दोषः । तादृश ज्ञानस्य धर्मितावच्छेदक प्रकारक ज्ञान मुद्रया नित्यत्व तदभाव विषयक ज्ञानवदिदंत्व पर्याप्त
धर्मितावच्छेदकताकसंशयं प्रत्येव हेतुत्वात् । तादृश धर्मं धर्मितावच्छेदकीकृत्य तज्ज्ञानवत्वानवगाहित्वात् । शुद्ध
मिदंत्वम् धर्मितावच्छेदकीकृत्यैव तदवगाहित्वादिति [illegible] । एवं सति वक्ष्यमाण धर्मितावच्छेदकातिव्याप्ते रप्रसक्त्या
कोटिद्वयो पस्थापकत्वांश निवेश वैय्यर्थ्य प्रसंगादि त्यतो मूल मन्यथा व्याचष्टे । साध्येतीति 'कोटिद्वयो पस्थापकं सदिति'
एतेन कोटिद्वयो पस्थापकत्वे साध्य संदेह जननो द्देश्यता वच्छेदकता लभ्यते । एवंच [illegible] धनवान् सुखीत्यादौ धनादेः सुखा
दि प्रयोजकता बोधस्या नुभविकतया उद्देश्य विधेय भावस्थले ऽसति बाधके उद्देश्यता वच्छेदक विधे ययोः प्रयोज्य प्रयो-
जक भाव बोधस्य व्युत्पत्ति सिद्धत्वा त्कोटिद्वयो पस्थिति जनकतायाः साध्य संदेह जनन निर्वाहकता लाभेन व्यापार
जनकतायाश्च फल जनन निर्वाहकत्वात् कोटिद्वयो पस्थिते र्द्वारत्व लाभ इति कोटिद्वयो पस्थिति द्वारा साध्य संदेह जन-
कत्वं लभ्यते । दर्शित ज्ञानवत्ता ज्ञानस्य धर्मिता वच्छेदक प्रकारक ज्ञान मुद्रया साक्षादेव साध्य संदेह जनकतया नातिप्र-
संगः । कोटिद्वयो पस्थिति द्वारा साध्य संदेह जनकत्वं च साध्य संदेह जनक कोटिद्वयो पस्थिते र्जनकत्वे सति साध्य
संदेह जनकत्वं' तत्रच विशेष्यांश शरीरनिवेशो निष्फलः' सत्यंतदलमात्रनिवेशेनैव सामंजस्यादतस्तंपरित्यज्य निष्कृ
ष्टार्थ माह 'साध्य संदेह जनकेति'जनकांतनिवेशप्रयोजन माह' आश्रयतयेत्यादिना' आश्रयतया विषयितया वा नित्य-
त्वा नित्यत्वो पस्थापकस्य'नित्यत्वा नित्यत्वो पस्थिति जनकी भूताश्रयत्वादिरूप संबंधज्ञानविषयस्य' ज्ञानस्य 'नित्यत्वे ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साध्ये वारणाय' नित्यत्व साध्यक स्थले सव्यभिचारत्वाभाव संपादनायेत्यर्थः' एकज्ञानस्य नित्यत्व तदभावो भयाश्रयता विरहा दाश्रयतासंबंध मादाय यथा श्रुतेनातिव्याप्तिसंभव इत्याश्रयवृत्ति ज्ञानत्ववत्वसंबंधो ऽनुसरणीयो ऽत स्तद पेक्षया लघु संबंध मादाय व्यावृत्ति माह' विषयितया वेति' एक ज्ञानस्य तदुभय विषयकत्वम् निष्प्रत्यूह मेवेति ध्येयं' समवायेन हेतावतिव्याति मुक्त्वा संयोगेन हेतावपि तामाह' अनुवृत्तत्वेति' अनुवृत्तत्वं सामानाधिकरण्यम्' व्यावृत्तत्वं विरोधः' ताभ्यां वन्हि तदभावो पस्थापकस्य' वन्हि तदभावो पस्थिति जनकीभूत तादृश संबंध द्वय ज्ञान विषयस्य' धूमस्य वन्हौ साध्ये' वन्हि साध्यक स्थले' वारणाय' सव्यभिचारत्वाभाव संपादनायेत्यर्थः। जनकांतस्य वारकत्वे हेतु माह' तयोपस्थि-ते रिति' तादृश संबंध ज्ञान जन्यो पस्थिते रित्यर्थः। संदेहा जनकत्वादिति' संदेहं प्रति साधारण धर्मा साधारण धर्मवद् धर्मि विप्रतिपत्ति ज्ञानजन्याया एव कोट्युपस्थिते र्हेतुत्वा दितिभावः' जनकता च साध्य संशयत्वा वच्छिन्न जन्यता नि-रूपिता ग्राह्या। अतः संबंधान्तर ज्ञानजन्य कोट्युपस्थिते र्विशेषण ज्ञानादि मुद्रया साध्य संशय हेतुत्वेपि नक्षतिः यद्यसाधारण धर्म ज्ञानादि जन्य संशये व्यभिचार वारणाय साधारण धर्म ज्ञानादि जन्यो पस्थिति जन्यता वच्छेदक कोटौ तादृशो पस्थित्यव्यवहितोत्तरत्व निवेशस्या वश्यकतया साध्य संशयत्वं तत्र प्रयोजन विरहेण न निवेश्यत इत्युच्यते तदा संशयत्वा वच्छिन्नत्वं परित्यज्य तादृश संशयत्व न्यूनवृत्तित्वमेव निवेशनीयम्' विशेषण ज्ञानादि जन्यताच न तन्न्यूनवृत्ति रिति नातिप्रसंगः। नचैव मपि नित्यत्व नित्यत्वाभाव सहचरित प्रमेयत्ववानयम् नित्यत्व तदभाव विषयक ज्ञान वांश्चाय मित्याकारक ज्ञानाभ्यां नित्यत्व तदभाव विषयिणी एकै वोपस्थिति र्जनिता तत्र तादृशो पस्थिति जनक पक्षधर्म-ता ज्ञान विषयत्व मादाय ज्ञाने ऽतिव्याप्ति र्दुर्वारा' तादृशो पस्थिति व्यक्तेः साधारण धर्मवत्ता ज्ञान जन्यतया साध्य संश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्वा वच्छिन्नं प्रति जनकत्वा दिति वाच्यम् । साध्य संशयत्वावच्छिन्न निरूपित जनकता नियतजन्यता निरूपकीभूत जनकताया एव पक्ष धर्मता ज्ञान विशेषणत्वोपगमा न्नित्यत्वा नित्यत्व विषयक ज्ञानवत्ता ज्ञान जन्यतायाः संशया जनक साधारण धर्मवत्ता ज्ञानाद्यजन्य तदुभयो पस्थिति साधारणतया संशयत्वावच्छिन्न जनकता व्यभिचारित्वेनाति प्रसंग विरहात्'.साधारण्यादि विशिष्ट धर्मवत्ता ज्ञान जन्य तदुभयो पस्थितीनां च सर्वासां तादृशो पस्थितित्वेन संशयत्वा वच्छिन्नं प्रति हेतुतया तादृश ज्ञान निरूपित कोट्युपस्थिति निष्ठ जन्यतायाः संशयत्वा वच्छिन्न निरूपित जनकता नियतत्व मक्षत मेव । अथवा उक्ताऽतिप्रसंग वारणाय तादृश जनकता वच्छेदका वच्छिन्नत्व मेव जन्यतायां निवेशनीयम्'अव्यवहितोत्तरत्व संबंधेन साधारण्यादि विशिष्ट धर्मवत्ता ज्ञानविशिष्ट तत्कोट्यु पस्थितित्व रूप तादृश ज्ञानजन्यता वच्छेदक धर्म एव च संशय जनकता वच्छेदकः'। नतु तादृश ज्ञान जन्य तत्तत्कोट्यु पस्थितित्वं'जन्यता पेक्षया तद्घटकस्या व्यवहितोत्तरत्वस्य लघुत्वात्" अतै आत्माश्रयेण साधारण्यादि धर्मवत्ता ज्ञान जन्यत्वस्य तादृश ज्ञान जन्यता नवच्छेदकत्वेपि नक्षतिः'जनकतावच्छेदकावच्छिन्नत्वंच जनकता वच्छेदक पर्याप्ता वच्छेदकताकत्वं'तेन साध्यसंदेह जनकतावच्छेदक घटक ज्ञानादे र्नित्यत्व तदभाव विषयक ज्ञानवत्ता ज्ञानादि जन्यतावच्छेदक घटकत्वेपि नक्षतिः। जनकतावच्छेदकतायाः पर्य्याप्ति र्न निवेश्यते'प्रयोजन विरहात्'तेन साधारण्यादि विशिष्ट धर्मवत्ता ज्ञानस्य जन्यतावच्छेदक कोटौ तद्वैशिष्ट्य मात्रनिवेशनैवोपपत्तौ प्रयोजन विरहेण संशय जनकतावच्छेदक घटकस्य साध्योपस्थितित्वादेः साधारण धर्मवद्धार्मि ज्ञान जन्यतावच्छेदक कोटा वनिवेशेपि नक्षतिः'नचैवम् साध्य संशय निवेशनं व्यर्थम्'यत्किंचि ज्जनकतावच्छेदकावच्छिन्न जन्यता निवेशनै वोपपत्ते र्नित्यत्व तदभाव विषयक ज्ञानवत्ता ज्ञानजन्यतावच्छेदकस्या व्यवहितोत्तरत्व संवधेन तादृश ज्ञानविशिष्ट नित्यत्वादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयकोपस्थितित्वस्य किंचिदपि कार्यं प्रति जनकतावच्छेदकत्वाभावे नातिप्रसंगविरहादिति वाच्यम् 'तथासति वन्हयादौ साध्ये रासभ तदभाव साहचर्यादि विशिष्ट प्रकारक ज्ञान मादाय धूमादा वतिप्रसंगा पातात् प्रकृत साध्य संदेह जनकताया अवश्यं निवेशनीयत्वात् ' नच कोटिद्वय पदस्य प्रकृत साध्यतावच्छेदकावच्छिन्न तदभाव परतया प्रकृत साध्यता वच्छेदकावच्छिन्नादि विषयकोपस्थितित्व घटित धर्मावच्छिन्न जनकतावच्छेदकावच्छिन्न जन्यता निवेशान्नेयमतिव्याप्तिरिति वाच्यम् । एवं सति एतल्लाभायैव संशय पदोपादानात् । ननु साध्य संदेह जनक पक्षधर्मता ज्ञान विषयत्व निवेशेनैव सामंजस्ये कोटिद्वयो पस्थापकत्वां शनिवेशो ऽनतिप्रयोजनक. इत्याशंका मपनेतुं तत्प्रयोजन माह ! धर्मिता वच्छेदकेति' तद्वारणाय ! वन्हयादि व्याप्ये तद्विरुद्धे वा पुरोवर्त्तित्वादौ वन्हयादि व्यभिचारित्व वारणाय । कोटिद्वयेति । नच साध्यसंदेह जनकोपस्थिति जनकत्व मेव निवेश्यतां किमुपस्थितौ कोटिद्वय विषयकत्व निवेशने नेति वाच्यम् । तथासति व्याप्य विरुद्धयो रतिव्याप्ते 'तथाहि' संशयं प्रति तत्कोटि सहचरित धर्मवत्ता ज्ञान जन्य तदुपस्थितित्वेन तदभाव कोटि सहचरित धर्मवत्ता ज्ञानजन्य तदभावो पस्थितित्वेन पृथगेव तत्तत्साहचर्य्य विषयता मन्तर्भाव्य हेतुता कल्प्यते ' एवं तत्त त्कोट्युपस्थितिं प्रत्यपि तथैव तत्त त्कोटि सहचरित धर्मवता ज्ञानत्वेन हेतुता ' इत्थं च वन्हयभाव सहचरित धूमवानिति ज्ञानजन्य वन्हयभावो पस्थिति सहकारेण वन्हि संशय जनक वन्हयुपस्थिति जनकीभूतं वन्हि सहचरित धूमवानिति ज्ञान मादाय धूमे वन्हि सहचरित जलत्ववानिति ज्ञान जन्य वन्हयुपस्थिति सहकारेण वन्हि संशय जनक वन्हयभावोपस्थिति जनकीभूतं वन्हयभाव सहचरित जलत्ववानिति ज्ञान मादाय च जलत्वे ऽतिव्याप्ति ' कोटि द्वयोपस्थिति निवेशे च तथाविध ज्ञानयोः प्रत्येकं कोटिद्वयो पस्थापकत्वा भावान्नातिप्रसंगः ' नच वन्हिसहचरित धूमवान् वन्हयभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहचरित धूमवांश्च इत्येतादृश समूहालंबन ज्ञानस्य कोटिद्वयोः पस्थापकत्वे नैतद्दोष तादवस्थ्य मिति वाच्यम्। साध्योपस्थिति जनकता वच्छेदकीभूता या साध्याभावो पस्थिति जनकतावच्छेदकीभूत प्रकारता तदाश्रयत्व निवेशात्' तादृश समूहालंबन ज्ञान निरूपितयो र्वन्हि तदभाव साहचर्यावच्छिन्न प्रकारतयोः प्रत्येकं तादृश जनकता द्वया वच्छेदकत्व विरहेणाति प्रसंग विरहात्' धूम सहचरित वन्हिमान् धूमाभाव सहचरित वन्हिमांश्च पर्वत इत्यादि समूहालंबन ज्ञाने प्रकारता वच्छेदक भेदेन वन्ह्याद्दि प्रकारता भेदात् प्रत्येकं कस्याश्चिदपि प्रकारताया स्तादृश जनकता द्वया वच्छेदकत्वा संभवेपि धूमधूमाभाव सहचरित वन्हिमान् पर्वत इत्यादि ज्ञानीयो भयधर्मावच्छिन्न विलक्षणैक प्रकारताया स्तथात्वेन वन्ह्यादौ लक्षणसमन्वयः। वन्हि तदभाव सहचरित धूमवान् पर्वत इत्याकरको भय साहचर्य्यावच्छिन्न प्रकारताशालि ज्ञान मादायातिप्रसंगस्तु तादृश प्रकारता वच्छेदकता पर्य्याप्त्यधिकरण धर्मावच्छिन्नत्व विवक्षया स्वयमेव निराकरिष्यते" अत्र (१) वन्हि साहचर्य्य मात्रेण वन्ह्यभाव साहचर्य्य मात्रेण वा वच्छिन्ना याव्याप्यस्य विरूद्धस्य वा प्रकारता तस्याश्च उद्बोधकान्तर वशात् साध्य तदभावो भय विषयक समूहालंबनो पस्थिति जनक ज्ञानीयतया प्रत्येकं साध्यो पस्थिति जनकतायां साध्यभावो पस्थिति जनकतायां चावच्छेदकत्वेनातिप्रसंगः' यदिच (२)

(१) टि०—कल्प द्वया नुसारेण स्थल द्वय मुक्तं यत्रा दो व्याप्य विरुद्धयोः कारणता मादाय द्वितीये विरुद्ध प्रकारता मादाया तिव्याप्ति र्बोध्या॥

(२) टि०—अत्र जनकता समानाधिकरण्य प्रवेशे वन्ह्यभाव सहचरित जलत्व वानि त्यादि ज्ञानीयो भय साहचर्यावच्छिन्न प्रकारता या वन्ह्यू पस्थितित्वा वच्छिन्न जनकता समानाधिकरण सैवालो भय विषयक समूहा लंबनो पस्थिति वृत्ति सैवालो पस्थितित्वा वच्छिन्न जन्यता निरूपित जनकता वच्छेदक तया वन्ह्यभावो पस्थिति जनकता वच्छेदक कल्पे च विरुद्धे वन्हिमान जला दित्यादा वतिप्रसंगः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साध्या विशेषणको (१) पस्थितिं वृत्ति साध्य संदेह जनकत्व नियतं यज्जन्यत्वं तन्निरूपितायां साध्या विशेषणको पस्थित्यवृत्ति साध्य संदेह जनकत्व नियतं यज्जन्यत्वं तन्निरूपितायां च जनकताया मवच्छेदिका या प्रकारता तस्याः साध्याभाव विषयकत्व घटित धर्मावच्छिन्न संशय जनकता वच्छेदका वच्छिन्न जन्यता निरूपितायां तादश धर्मा न वच्छिन्न साध्य (२) विषयकत्व घटित धर्मावच्छिन्न जनकतावच्छेदकावच्छिन्न जन्यता निरूपितायां च जनकताया मवच्छेदिका या त्रकारता तस्या वा निवेशा न्नोक्त दोषः। साध्याभावो पस्थितित्वा वच्छिन्नाया अपि जनकतायाः साध्य विषयकत्व घटित धर्मावच्छिन्नतया विरुद्धातिव्याप्ते दुर्वारतया साध्य विषयकत्व घटित धर्मावच्छिन्न जनकतायां साध्याभाव विषयकत्वा नवच्छिन्नत्व प्रवेशः साध्य मुख्यविशेष्यता घटित धर्मा वच्छिन्नत्वं निवेश्यैव वा तादशातिव्याप्ति वारणीये त्युच्यते। तथापि (३) वन्हिमद्वृत्ति वन्ह्यभाववद् व्यावृत्त धूमवानयं वन्हिमद् व्यावृत्त वन्ह्यभाववद्वृत्ति जलत्व वानय मित्यादि ज्ञानीय धूमादि प्रकारता मादायाति प्रसंगो दुर्वार एव (४) वन्हि मद्वृत्ति धर्मवत्ता ज्ञान जन्य वन्ह्युपस्थिते र्वन्ह्यभाव वद्वृत्ति धर्मवत्ता ज्ञानजन्य वन्ह्यभावोपस्थिति सहकारेण संशयजनकता वद्वन्ह्यभाव वद्व्यावृत्त धर्मवत्ता

(१) टि०—साध्यता वच्छेदका वच्छिन्न प्रकारता निरूपित प्रकारिता शून्य इत्यर्थः ॥

(२) टि०—अत्र मुख्य विशेष्यत्वं वक्तव्यं अन्यथा वन्हि कालीन रासभ वा न्नवे ति संशय जनक वन्हि कालीन रासभ वन्ह्यभाव कालीन रासभाभाव सहचरित धूमवानिति ज्ञान मादाय वन्हिमान धूमादित्य त्रा तिव्याप्ति रिति ध्येयं ॥ ॥

(३) टि०—तथाच परदले साध्याभाव विषयकत्व घटित धर्मा न वच्छिन्नत्वं न देय मिति भावः॥

(४) टि०—साध्य समानाधिकरण धर्म वत्ता ज्ञान जन्यो पस्थिति तदभाव समानाधिकरण धर्म वत्ता ज्ञान जन्यो पस्थित्यो मिथ स्सहकारेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गादा० १४

साध्य संशय जनक तयो क्तसमूहालंवनो पस्थिति वृत्ये कतर जनकतायां साध्य प्रकारत्वा भाव विशिष्टो पस्थिति वृत्तित्व तद वृत्तित्वयो रसत्वेन नाति प्रसंग व्यभिचारे तु तादृश जनकता व्याप्य जन्यता निरूपित जनकता द्वया वच्छेदक प्रकारता मादाय लक्षण समन्वयः ॥

ज्ञान जन्य वन्हृयभावोपस्थिते रपि वान्हिमद् व्यावृत्त धर्मवत्ता ज्ञान जन्य वन्हृयुपस्थिति सहकारेण संशय जनकत्वात् तादृश ज्ञानीय धूम प्रकारताया वन्हि साहचर्य्या वच्छिन्नत्वेन संशय जनक वन्हृयुपस्थिति जनकतायां वन्हृयभाव वद्व्या-वृत्तत्वा वच्छिन्नत्वेन च तथाविध वन्हृयभावोपस्थिति जनकतायां तादृश ज्ञानीय जलत्व प्रकारतायाश्च वन्हिमद्व्यावृत्तत्वा वच्छिन्नत्वेन तथाविध वन्हृयुपस्थिति जनकतायां वन्हृयभाव वद्वृत्तित्वा वच्छिन्नत्वेन च तथाविध वन्हृयभावोपस्थिति ज-नकताया मवच्छेदकत्वात्। मैवम्। साध्य विषयकत्व घटित धर्मावच्छिन्न जनकता वच्छेदको योधर्म स्तदवाच्छिन्न जन्यता निरूपितायां तदवाच्छिन्न सहकारिता वच्छेदक साध्याभाव विषयकत्व घटित धर्मावच्छिन्न जनकतावच्छेदकावच्छिन्न जन्यता निरूपितायांच जनकताया मवच्छेदकीभूत प्रकारता निवेशेहि नाति प्रसंगः(१) तदवाच्छिन्न सहकारिता वच्छेदकत्वंच तदवाच्छिन्ना समवधान प्रयुक्त फलोपधायकत्वा भाववत् स्वावच्छिन्नकत्व निष्फलं फलवितेन्येति 'वाच्यमिति परेणान्वयः' तत्र' संशय धर्मिताव च्छेदकेदंत्वादिकं 'असाधारण्यतयेति' संशय विषय मात्र वृत्तित्वेन सपक्ष विपक्ष व्यावृत्तत्वा दितिभावः 'संग्राह्यमेव' संशय दशायां सव्यभिचार सामान्य लक्षण लक्ष्यमेव' तथा च संशय दशायां लक्ष्यतयैव नातिव्याप्ति संभवः' तदवच्छिन्न साध्यादि निश्चय दशायां च तत्प्रकारक ज्ञानस्य संशयाऽजनकतया संशय जनकता घटितस्य लक्षणस्यै तत्साधारण्यं न संभवतीति तदपम्' (२)

(१) टिप्पणी—तद वच्छिन्ना समवधाने त्यादि ना त्र विरूद्धेप्य तिव्याप्ति वारणं बोध्यं ॥

(२) टिप्पणी—इदंतु बोध्यं। यत्र पर्वतत्वादे पक्षता वच्छेदकता तत्र पर्वतत्वा दि सामानाधिकरण्येन साध्य निश्चय दशाया मपि असाधारण्या

CC-0. In Public Domain. Digitization by eGangotri

भाव दशायां सामानाधिकरण्येना भाव कोटि मवगाहमान संशयो त्पत्तौ वाधका भावा त्तदानीमपि पक्षता वच्छेदकातिव्याप्ति वारणाय तादृशविशेषणं सार्थकं भवती दमयुक्तं ॥

तादृश निश्चय दशाया मेवाति व्याप्तिं संगमयति' तथात्वेपीति । तथात्वेपि 'तदवच्छिन्न विशेष्यक संशय दशायां तस्य लक्ष्यत्वेपि 'तदुत्तीर्णता दशाया मसाधारण्यो त्तीर्णता दशायां 'तादृश धर्मवति साध्यस्य तदभावस्य वा निश्चय दशाया मिति यावत् 'विशेष दर्शनात्' विपरीत निश्चयात्' तज्जनन योग्यताया इति 'तत्प्रकारक ज्ञानस्येत्यादिः 'अनिवृत्तेरिति ' अतिव्याप्ते रितिशेषः वक्ष्यमाण दोषेण संशय फलोपधायकता निवेशा संभवा दिति भावः । इद मुपलक्षणं' फलोपधायकता निवेशेपि संशय जनक ज्ञान शून्यता दशायां साधारणा व्याप्ति भयेन तादृश ज्ञानस्यो पलक्षणविधयैव लक्षणे निवेशनीय तया संशयोपधायक कालान्तरीण ज्ञान विषयता मादाया प्यतिव्याप्तिः संभवतीति योध्यम्' अन्यथा' फलोपधायक ज्ञानस्य विशेषण विधया लक्षण घटकत्वे । पक्षादाविति । पक्षे साध्यादि निश्चय सत्त्वेपि धर्मेतर विशेष्यक साध्य संदेह जनकता मादायापि लक्षण गमन संभवादा दिपदं । हेतुमत्ता ज्ञान विषयी भूत पक्ष पक्षेतर यावद्धर्मिपरम् । निश्चयदशाया मित्युपलक्षणम् साधारण्यादि विशिष्ट स्वप्रकारक धर्मिज्ञान शून्यता दशाया मप्यव्याप्ति र्बोध्या । साधारण्यात्वादीति' साधारण्यस्य नित्यदोषतया तदा तस्यालक्ष्यतोपगमासंभवादितिभावः' कोटिद्वयोपस्थापकत्वांशस्य प्रयोजनान्तरं वर्णयतो मत माह 'ज्ञानीयत्वेति' स्वमते व्याप्यवत्तानिश्चयस्य संशय प्रतिबंधकत्वमेव नतु कारणत्वं विरोधि परामर्शयो रप्रामाण्यग्रहेतु साधारण धर्मादि ज्ञानादेव संशय इत्यतो 'जनकत्व पक्षइति' हेतुवारणाय' व्याप्यवारणाय' तस्यापि परामर्शात्मक संशय जनक पक्षधर्मताज्ञान विषयत्वादितिभावः' ननु साधारण्यादि विशिष्ट धर्मवत्ता ज्ञानस्येव परामर्शयो रपि साध्यतदभावोपस्थिति द्वारैव संशय जनक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वात् कोटयुपस्थिति निवेशेपि न प्रतीकार इत्यत आह हेतुनेति । उभयोपस्थापकं साध्योपस्थिति जनकतावच्छेदिका सती तदभावोपस्थिति जनकतावच्छेदकीभूता या प्रकारता तदाश्रयत्वम् निश्चित साध्याभाववद्वृत्तित्वस्य साधारण्य घटकता मते केषुचिद् द्वणुकेषु साध्याभावनिश्चयस्य सत्त्व एव अणुत्वस्य तथात्वं संभवतीत्याभिप्रेत्य तादृश निश्चयसत्त्वं सूचयितुं यत्किंचिद् द्व्यणुकस्य पक्षता लाभाय इदमिति । साधारणधर्मवद्धर्मिज्ञानस्य नित्यत्वानित्यत्व सहचरिता णुत्व वद्द्व्यणुक ज्ञानस्यधर्मिणि द्व्यणुके नित्यत्वसाध्यकस्थले तस्याऽलक्षत्व सूचनाय सचेतावेति । प्रसंगो ऽतिव्याप्तिः नच समूहालंवन विषयता मादायातिप्रसंग वारणाय कोटिद्वयोपस्थिति जनकतावच्छेदकीभूत विषयता श्रयत्व निवेशन मावश्यकं तथाच कथं-धर्मिण्यतिव्याप्ति यत स्तत्तत्कोटि स्मृतौ तत्तत्साहचर्य्यादि विशिष्ट विषयक ज्ञानत्वेनैव हेतुता नतु तद्विशिष्ट वद्धर्मिज्ञानत्वेन संबंधिविशेष्यक ज्ञानादपि संबंध्यंतर स्मरणादन्यथा ऽयं हस्तिसंबंधी घटपदं घटे शक्त मित्याद्याकारक ज्ञानाद्धस्तिघटस्मरणा-नुदयप्रसंगात् । तथाच धर्मिविषयतायाः कोटिद्वयोपस्थापकता वच्छेदकत्व मेव नास्तीति वाच्यम् एकसंबंधि विशिष्ट धर्मि-ज्ञानत्वेनैवापरसंबंधि स्मारकतेति मतानुसारेणैवैतल्लक्षण प्रणयनात् एतन्मतस्य निर्युक्तिकतया पक्षधर्मता पदस्य निष्प्रयोजकत्व माकलय्य तत् परित्यागेन सिद्धांतलक्षणस्य वक्ष्यमाणत्वात् । वस्तुतस्तु साध्यसंदेहजनक कोटिद्वयोपस्थितिजनक ज्ञानविषय-त्वमित्यस्य कोटिद्वयोपस्थितिनिष्ठा या साध्यसंदेहजनकता जन्यतासंबंधेना ऽव्यवहितोत्तरत्वसंबंधेन वा ऽवच्छिन्नायां तदव-च्छेदकताया मवच्छेदिका या विषयता तदाश्रयत्वमर्थः (१) एवंच साधारण धर्मादिविशेष्यक ज्ञानस्य कोटिद्वयस्मरणजनकत्वेपि संशये धर्मिविषयता नियमाय तद्धर्मिक संशयं प्रति साधारण्यादिविशिष्ट धर्मवत्तद्धर्मिज्ञानविशिष्ट कोट्युपस्थितित्वेन हेतुतेति

(१) टिप्पणी—अत्र मते धर्मि ज्ञानस्य स्वातंत्र्येण कारणता नास्ती तिध्येयं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१) टिप्पणी—साधारण धर्म विषयक ज्ञानत्वे नैवा व्यवहितोत्तरत्वेन जन्यताया वा संबंधेनै तादृश ज्ञान विशिष्टो पस्थितिं प्रति कारणत्वं । उपस्थिते स्तत् संदेहं प्रति साधारण धर्म व द्धर्मि ज्ञान विशिष्टो पस्थितित्वे नैवा ता घटपदं घटे सक्त मित्यादि स्मरणो दयादि तिभावः ॥

(२) टिप्पणी—निरुक्त संदेह जनकतावच्छेदकता वच्छेदकताया स्तादृश प्रकारत्वेन विवक्षणे द्व्यणुके ऽति प्रसंगा भावात् । पक्ष पदं व्यर्थं । धर्मिता पदस्यैव तादृशार्थ तात्पर्य ग्राहकत्वे पक्ष पदस्य धर्मि मात्र परतया व्याख्याना नर्थक प्रसंग इत्यव ध्येयं ॥

(१)धर्मिविषयताया अपि तादृशसंदेह जनकतावच्छेदकतावच्छेदकत्वा दतिव्याप्तिरतः पक्षधर्मता पदोपादान मावश्यकमिति । पक्षधर्मतेति (२) । नन्व पक्षधर्मता पदोपादानेपि तद्दोष तादवस्थ्यं धर्मिणोपि पक्षधर्मताज्ञान विषयत्वादिति वाच्यम् । तदुपादान वलेन (३) निरुक्तायां जनकतायां जनकतावच्छेदकतायां वा अवच्छेदकीभूता या धर्मिविषयता निरूपित विषयिता प्रकारता पर्य्यवसिता तदाश्रयत्वस्य लाभेनातिप्रसंग विरहात् प्रकारतायाः प्रकारतात्वेनावच्छेदकत्वं विवक्षणीयं । तेन साधारणधर्मादें धर्मितावच्छेदकीभूत सद्धेतौ नातिप्रसंगः (४) धर्मिता वच्छेदकीय विषयतायाः प्रकारतात्व व्याप्येन धर्मितावच्छेदकतात्वेनैव निवेशात् प्रकृतपक्ष प्रकृतपक्षताया अनिवेशे प्रयोजनाभावात् पक्षपदं धर्मिमात्रपरतया व्याचष्टे । पक्षपदमिति धर्मिमात्रेति मात्रपदेन पक्षतानिवेशव्यवच्छेदः यत्तु धर्मिपद मत्र मुख्यविशेष्यपरं तेन वन्ह्यभावसहचरित धूमवद्वृति प्रमेयत्वान् पक्ष

(३) टिप्पणी—मत द्वयाभि प्रायेण द्विधा भान मिति ज्ञेयं ॥

(४) टिप्पणी—वन्हि तदभाव सामानाधिकरण द्रव्यत्ववान पुरोवर्ती पर्वत इत्यादि ज्ञानीय साध्य संदेह जनकतावच्छेदकी भूत प्रकारता श्रयत्व मादाय पर्वतो वन्हि मान पुरोवर्तित्वा दित्यादि सध्येतौ नाति प्रसंगः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादि ज्ञानीय धूमादि विषयता मादाय नातिप्रसंग इति। तन्न। साहचर्य्य धर्मितावच्छेदकीय विषयताया जनकतावच्छेदक कोटौ प्रयोजन विरहेणा निवेशा न्निवेशेपिवा धर्मितावच्छेदकतात्वेनैव तस्यानिवेशनीयतया प्रकारतात्वेनानिवेशात्। साहचर्य्यस्य धर्मितावच्छेदकविषयतात: पाति धूमादि विषयता मादाया तिप्रसंगासंभवात्। पक्षपदस्य पक्षताविशिष्ट प्रकृतपक्ष परत्व मावश्यक मन्यथा घटादिरूप पक्षे शब्दत्वादिना नित्यत्वसाधने वाधस्या सिद्धे र्वा ऽवतारदशायामपि सपक्ष विपक्ष व्यावृत्त शब्दत्ववान् शब्द इत्यादि ज्ञान विषयता मादाय शब्दत्वादे स्सव्यभिचारत्वापत्तिः। नचेष्टापत्ति र्दोषान्तरशंकरप्रसंगात् अस्मन्मते च पक्षताविशिष्ट प्रकृतपक्ष वृत्तिताज्ञानस्य विशेषण विधया लक्षणघटकत्वा न्नातिप्रसंगो वाधग्रहस्थले पक्षताया असिद्ध्यवतारे हेतौ प्रकृत पक्षधर्मताज्ञानस्या भावा दित्याशंकते। नचैवमिति। एवं पक्षपदस्य धर्मिमात्रपरत्वे। वाध संपादनायानित्यत्व मुपेक्ष्य नित्यत्वसाध्यत्वानुसरणम्। एवंच घटो नित्य इत्युक्तौ तत्र नञ्प्रश्लेष शंकया नित्यत्व साध्यकत्वं न स्फुटीभवतीति नित्यो घट इत्युक्त' वाधादीत्यादिना असिद्धिपरिग्रहः। असाधारण्यापत्तिः' असाधारण्यज्ञानमादाय सव्यभिचारत्वापत्तिः। एतेनास्य सव्यभिचार सामान्य लक्षणतया एतदतिप्रसक्ते रसाधारण्या नापादकत्वा दसंगति रित्यपास्तम्। सपक्षावृत्तित्वेन साधारण्यस्य केवलान्वयि धर्मस्य पक्षता नवच्छेदकत्वा दनुपसंहारित्वस्य चा संभवात् परिशेषेणा साधारणापत्ति रिति वार्थः। तदानीं सपक्ष विपक्ष व्यावृत्तत्व सत्त्वे दोषान्तरावतारेऽपि सव्यभिचारत्व मसाधारण्यं चेष्ट मेव क्षतिविरहा दित्याशयेनाह। इष्टत्वादिति। अन्यथा'पक्षतायाः प्रकृतपक्षधर्मताज्ञानस्य वा विशेषणत्वे। वाधासिद्ध्योरिति। वाधस्या सिद्धेर्वा ऽवतारदशायां ह्रदादौ धूमादि साधने वन्ह्यादे रसंग्रहापत्ते रित्यर्थः। साधारण्यस्य नित्यदोष तया तत्रेष्टापत्ति र्नसंभवतीति भावः। ननु दोषान्तरावतार दशायां सव्यभिचारत्वं क्वापि नेष्यत एव भवतु साधारण्ये प्यनित्यदोषता इत्यत १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आह । असिद्धीति । साधारण्यभ्रम मादायेति । यथायथं साध्याभाववद्वृत्तित्व साध्यवद्वृत्तित्वांशे भ्रमात्मकं साधारण्यज्ञान मादायेत्यर्थः । धर्मिणि फलीभूत संशयधर्मितावच्छेदकता पर्य्याप्त्यधिकरणा वच्छिन्ने । यद्रूपावच्छिन्नवत्ताज्ञानं । यद्रूपावच्छिन्न प्रकारता शालि ज्ञानत्वावच्छिन्नं । साध्यसंदेहजनक मिति । एतच्च संशयं प्रति कोट्युपस्थिति विशेषणज्ञानादि मुद्रयैव हेतुः साधारण धर्मवद्धर्मि ज्ञानं च साक्षादेव तथेति निष्कृष्टमते कोट्युपस्थितिजनकत्वा घटितमेव लक्षणं कर्त्तव्य मित्याभिप्रायेण। यथाश्रुत मूलानुरोधे तु संशयजनक कोटिद्वयोपस्थिति जनकत्व मेव निवेशनीयम् । साध्यसंशयजनकं साध्यसंशयजनक कोटिद्वयोपस्थिति जनक मित्यपि व्याचक्षते तन्मते धर्मिणीति प्रकारतात्वेनावच्छेदकतालाभायेतिध्येयम् । अथैवम् साधारण्यादिघटक केवलसाध्यवद्वृत्तित्वाद्यवच्छिन्नत्व मादायातिप्रसंगो दुर्वारः । (१) नच धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपित यद्रूपावच्छिन्न प्रकारता शालिज्ञानत्वं संशयजनकता नतिरिक्तवृत्ति तद्रूपवत्वस्य साध्यसंशयजनकतावच्छेदकीभूता या धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकारता तदवच्छेदकतापर्य्याप्त्यधिकरणधर्मवत्वस्य वा निवेशान्नातिप्रसंगः (२)। संशयंप्रति कोटिद्वयसाहचर्याद्यवच्छिन्नप्रकारताशालिनिश्चयत्वेन साधारण्यादिविशिष्टधर्मवत्ताज्ञानस्यै वैकहेतुता कल्पना देकैककोटिद्वयसाहचर्य्याद्यवच्छिन्नप्रकारताशालिज्ञानस्य संशयाजनकतया उभयकोटिसाहचर्य्यादेरेव तादृशधर्मत्वा विनिगमनम् । उक्तरूपेणैकैकहेतुताकल्पने एककोटिसाहचर्य्यावच्छिन्नत्व विशिष्टा परकोटिसाहचर्यावच्छिन्नत्वेनैव प्रकारताया निवेशनीय-

(१) टिप्पणी—धूमे ऽतिव्याप्ति विशिष्टान्तरा घटितत्व निवेशनेन वारणेपि वन्हि तदभाव समानाधिकरण द्रव्यत्व वत्पर्वत वृत्ति धूमवान पर्वत इति ज्ञान मादाय अयं नित्यो ज्ञानादि त्यादौ धर्मि ज्ञान विधया हेतुत्व मादाया तिव्याप्ते द्वितीय कल्पादरः ॥

(२) टिप्पणी—यावत्ता भावात् प्रमीय प्रकारतावच्छेदकता निवेशयितुं शक्यत एवे त्याशयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१) टिप्पणी—एकत्र द्वय मिति रीत्या वच्छिन्नत्व द्वयं प्रकारताया निवेशे गौरवा नवकाशा दित्यत आह व्याप्येति ॥
(२) टिप्पणी—व्याप्या भाव विषयकत्व घटित संशयतोत्क्कीर्तनस्या संगतत्वा पातात् ॥

तया ऽवच्छिन्नत्वयो र्विशेष्यविशेषणभावे विनिगमनाविरहात्(१) व्याप्यसंशयस्य साधारणधर्मवत्ताज्ञानांतर्भावा नुपपत्तेश्च । तत्र व्याप्यतदभावयोः प्रत्येकमुभयकोटिसहचरितत्वाभावात् । नच व्याप्यसंशयस्य पृथक्कारणतामत एवेदं लक्षण मितिवाच्यम् । व्याप्यसंशयस्येत्यादिग्रंथविरोधात्(२) (३)नच यद्यद्रूपावच्छिन्नप्रकारकज्ञानत्वेन संशयजनकता तत्तद्रूपवत्त्वस्य संशयजनकतावच्छेदकप्रकारतावच्छेदकतापर्य्याप्तिमंतो ये ये धर्मा स्तत्तद्धर्मवत्त्वस्य वाविवक्षया नातिप्रसंग इतिवाच्यम् । सत्तावत्समवेतजातिमान् सत्ताभाववत्समवेतजातिमानयमित्यादिभ्रमविषयतावच्छेदक सत्तावत्समवेतत्वा द्यादाय सत्तादिसाध्यके जात्यादावतिव्याप्तेः सत्ताभाव वत्समवेतत्वस्या प्रसिद्ध्या यत्पदेन तदुपादाना संभवात् । वस्तुतस्त्वेवं विवक्षणे ऽसाधारण्यादे रपि तादृश धर्मतया साधारणादेरपि तादृश यावद्धर्मवत्वाभावा दसंभव एव । नच स्वनिष्ठ तादृश प्रकारतावच्छेदक यावद्धर्मवत्त्व विवक्षणे ऽसाधारण्यादि वारणं व्याप्यसंशयेत्यादि ग्रंथसंगतिश्च संभवति साधारणादे रप्य ऽसाधारण्यादि प्रकारेण ज्ञानस्य संशायकत्वात् एतेन संशय जनकतावच्छेदकीभूतायां या प्रकारता तत्तदवच्छेदकता पर्य्याप्त्यधिकरण धर्मवत्व निवेशेपि नतिस्तारः । यद्धर्मिणि यद्रूपावच्छिन्नप्रकारक ज्ञानस्य स्वनिष्ठ यद्रूपावच्छिन्नप्रकारक ज्ञान सहकारेण साध्यसंशयजनकत्वं तदुभयरूपवत्त्वस्य विवक्षितत्वेपि व्याप्यसंशयस्येत्यादि ग्रंथासंगति रशक्य समाधिरेव ।

(३) टिप्पणी—अग्रिम ग्रंथे संशयस्य पृथक् कारणता मत माश्रुत्या तिव्याप्ति रभिहिता एतल्लक्षणस्य व्याप्य संशयस्य पृथक् कारणता मत एवाभिधाने तादृश ग्रंथे पृथक् कारणत्वस्योपादानं व्यर्थम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याप्यत्वावच्छिन्न प्रकारकज्ञान सहकारिणो धर्मिविशेष्यकस्वनिष्ठरूपान्तरावच्छिन्नप्रकारकज्ञानस्या प्रसिद्धे र्व्याप्यत्व मादाय व्याप्ये ऽतिप्रसंगा प्रसक्तेः मैवम् । यत्किंचि त्साध्यसंदेह निरूपितायां जनकताया मवच्छेदिका या धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकारता तदवच्छेदकता पर्य्याप्त्यधिकरण धर्मवत्वं सव्यभिचारत्वम् । साधारण्यादिविशिष्ट हेतुमत्ता ज्ञानजन्य संशयजनकतावच्छेदकी भूता तादृशी प्रकारता साध्याभाववद्वृत्तित्वाद्यवच्छिन्नापि तदवच्छेदकवत्वाभावा न्न व्याप्यादा वतिप्रसंगः । यत्किंचित् संशयनिवेशा दसाधारण्यादेः साधारणादा वसत्वेपि नक्षतिः' व्याप्यसंशयस्यच व्याप्यवत्ता ज्ञानत्वे नैव हेतुता नतु व्याप्याभाव प्रकारकत्व मपि तत्र निवेश्यते + व्याप्यवत्ता निश्चयदशायां तस्य प्रतिबंधकत्वा देव संशयापत्यसंभवात् । अतो व्याप्याभावत्वावच्छिन्न प्रकारतायाः संशयजनकतानवच्छेदकतया व्याप्याभावत्वस्य व्याप्ये ऽसत्वेपि न तत्र वक्ष्यमाणाया अतिव्याप्ते रप्रसक्तिः नच व्याप्यसंशयहेतुताया मप्रामाण्यनिश्चयानास्कंदितत्वस्यैव निवेशाद् व्याप्यवत्ता निश्चया दप्रामाण्यशंकास्कंदिताद् व्यापकसंशयापत्तिः तस्या विरोधित्वा दिति (१)व्याप्यसंशयत्वेनैव व्यापकसंशयहेतुत्व मावश्यक मिति वाच्यम् । यादृश विषये व्याप्यवत्ता निश्चय दशायां व्यापकसंशयस्ये तरसकलकारणसमवधाने तादृश निश्चये ऽप्रामाण्यसंशय एव न जायते तत्रो क्तातिप्रसंगा संभवेन निश्चय साधारण व्याप्यवत्ताज्ञानत्वेन हेतुताया निष्प्रत्यूहत्वात् तादृशस्थलीयाति व्याप्त्यभिप्रायकतयैव तद्ग्रंथस्य व्याख्येतत्वात् । अथवा व्याप्यवत्ताज्ञानत्वेन या व्याप्यसंशयहेतुता तदवच्छेदक कोटिप्रविष्टा प्रामाण्यनिश्चयानास्कंदितत्वघटक निश्चयत्वं साध्यव्याप्यत्वावच्छिन्नाभाव ज्ञान विशिष्टाप्रामाण्यसंशयान्याप्रामाण्यज्ञानत्वम्' तथाच व्याप्याभाववत्ताज्ञानशून्यकालीनाप्रामाण्यसंशयस्यापि यथोक्त निश्चयत्वा त्तद्विशिष्ट व्याप्यवत्ता-

(१) टिप्पणी—अप्रामाण्य यहानास्कंदित व्यावर्त्तक धर्मवत्ता ज्ञानस्यैव हेतुत्वा दिति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१= आपत्ते रभावात्

ज्ञानकाले आपत्ते रभावात् । न च तथापि व्याप्यवत्ताज्ञानत्वेन च संशयहेतुता नसंभवति तथासति धर्मितावच्छेदक-सामानाधिकरण्यमात्रावगाहि व्याप्यवत्तानिश्चया त्तदवच्छेदेन व्यापकवत्ता तत्सामानाधिकरण्यमात्रेण व्यापकाभाव मवगाह-मानस्य संशयस्या पत्ते स्तादृशसंशये तादृशनिश्चयस्या विरोधित्वा दिति वाच्यम् । धर्मितावच्छेदकावच्छेदेन व्याप्यवत्ता वगाहिनः संशयादेव तदवच्छेदेन व्यापकवत्तावगाहिसंशयोदया त्तादृशव्यापकवत्तावगाहिसंशये तादृशव्याप्यवत्तावगाहिज्ञानत्वे नैव हेतुत्वो पगमा दुक्तापत्ते रप्रसक्तेः । अथवा संशयजनकतावच्छेदक प्रकारतायां सव्यभिचारिता घटक संबंधावच्छिन्नत्व निवेशस्या वश्यकतया वन्हिव्याप्यधूमवान्नवेति संशयीया भावप्रकारतायाः संयोगादि संबंधानवच्छिन्नतया तत्संबंधावच्छि-न्नव्याप्यप्रकारतैव संशयजनकतावच्छेदिके त्यतिव्याप्ति प्रशन्त्या नव्याप्यसंशयस्येत्यादेर संगतिः । अथ साधारणधर्मवत्ताज्ञा-नस्य संशयजनकत्वे धर्मैक्यस्या प्रयोजकतामते तत्संबंधैक्यस्याप्य प्रयोजकतया तन्मते संशयजनकतातदवच्छेदकयावत्प्रका-रतासु प्रत्येक मवच्छेदकीभूतानि यानि रूपाणि तद्वत्त्व निवेशे अयमात्मा ज्ञानादित्यादौ विषयतया आत्मत्वाभावसमाना-धिकरणज्ञानवत्ताज्ञानसहकारेण साध्यसंदेहजनकं यत्समवायेन साध्यसहचरितज्ञानादिमत्ताज्ञानं तदीयप्रकारता मादाय सम-वायेन ज्ञानादे रसव्यभिचारितापत्ति रितिचेत् सत्यं । विषयतासंबंधेना भावकोटि सहचारित तद्वत्ता ज्ञानीय प्रकारतायाः समवायसंबंधानवच्छिन्नतया सव्यभिचारताघटकसंबंधावच्छिन्नयावत्प्रकारतानंतर्गतत्वात् अतो यत्किंचि त्साध्यसंशयनिरूपित जनकतावच्छेदकीभूता धर्मितावच्छेदकावच्छिन्ना या या विशेष्यता तन्निरूपितसव्यभिचारिताघटकसंबंधावच्छिन्ना या या प्रकारता तत्तदवच्छेदकधर्मवत्त्व मेव विवक्षणीयम् । तथासति उक्तस्थले विषयतासंबंधावच्छिन्नज्ञानप्रकारतानिरूपित विशेष्य-ताया अपि निरुक्त यावद्विशेष्यतांतर्गतत्वा त्तन्निरूपितसव्यभिचारिताघटकसंबंधावच्छिन्नप्रकारत्वा प्रसिद्ध्या नातिव्याप्तिः । १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एव मपि संशयसमुच्चयवैलक्षण्याय उभयप्रकारतानिरूपितएकविशेष्यतास्वीकर्तृमते व्याप्यसंशयीय कोटिद्वयप्रकारतानिरूपितविशेष्यतानिरूपितव्याप्यताघटकसंबंधावच्छिन्नप्रकारतावच्छेदकव्याप्यत्वमात्र मादाया तिव्याप्तिः संभवतीत्याशंक्या व्याप्यसंशयेत्यादिक मभिहितम्। वस्तुतस्तु जनकतावच्छेदक याव त्प्रकारतावच्छेदकवत्त्वादि निवेशे धूमतदभावसहचरितकांचनमयवन्हिमा नित्यादि ज्ञानीय प्रकारताया अपि धूमसहचरित वन्हिमानित्यादि ज्ञानजन्य संशयजनकता वच्छेदक धूमसहचरित वन्हित्वावच्छिन्न प्रकारतात्वादिना निवेशेन निरुक्त यावत्प्रकारतान्तर्गततया तदवच्छेदकतापर्य्याप्त्यधिकरण कांचनमयत्वादि घटित धर्मवत्ताया वन्ह्यादौ दुरुपपादतया ऽसंभव इति यत्किंचि त्संशयनिरूपिता धर्मितावच्छेदकावच्छिन्नविशेष्यता घटित धर्मावच्छिन्ना या या जनकता तदवच्छेदकीभूततादृशविशेष्यतानिरूपित प्रकारता वच्छेदकता पर्य्याप्तिमद्धर्मवत्त्व मेव विवक्षणीयम्। एवंच कांचनमयत्वाद्यवगाहि तदनवगाहिज्ञानसाधारणकारणताया ऐक्या त्तदवच्छेदकीभूत कांचनमयत्वाद्यनवगाहि ज्ञानीय प्रकारतावच्छेदकता पर्य्याप्त्यधिकरण धर्मवत्त्व मादायैव धूमादिसाध्यक वन्ह्यादौ लक्षणसमन्वयः। संशयं प्रति तत्तत्कोटि साहचर्य्यावच्छिन्न प्रकारताशालि ज्ञानत्वेन साधारण्यादिविशिष्ट धर्मवत्ता ज्ञानस्य कारणताद्वयीति व्याप्यविरुद्धयो रतिप्रसंगो निरस्तः। एवंच व्याप्यसंशयत्वावच्छिन्नाया उभयकोटिप्रकारकत्वावच्छिन्नाया जनकताया ऐक्या त्तदवच्छेदकीभूतव्याप्यप्रकारता वच्छेदकव्याप्यत्व मादाय व्याप्ये ऽतिप्रसंगो दुर्वार एवेत्याशंक्य व्याप्यसंशयस्य पृथक्कारणतामते ज्ञानपदस्य निश्चयपरत्व मुपदर्शितम्। नच व्याप्यसंशयस्य उभयप्रकारकत्वेन नैकहेतुता विशेष्यविशेषणभावे विनिगमनाविरहा दपितु प्रत्येक प्रकारतां निवेश्य हेतुताद्वय मेव कल्पनीय मिति नाऽतिव्याप्ति प्रसक्ति रिति वाच्यम्। हेतुताद्वयकल्पने यत्र व्याप्यवत्तानिश्चयस्य स्वांशे ऽप्रामाण्यसंशयात्मकस्या नंतरक्षणे व्याप्याभाववत्तानिश्चय स्तदुत्तरक्षणे व्यापकसंश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यापत्तेः। एतेन याव त्प्रकारता निवेशपक्षेपि सव्यभिचारिताघटक संबंधावच्छिन्न निरुक्त जनकतावच्छेदक प्रकारताया यावत्त्वेन ननिवेशः। अयमात्माज्ञानादित्यादावतिव्याप्तेः। अपितु निरुक्त जनकतावच्छेदकीभूता यावत्यः प्रकारताः सव्यभिचारताघटकसंबंधावच्छिन्नानां तासां प्रत्येकावच्छेदकरूपवत्त्वं निवेश्यं एवंचा यमात्माज्ञानादित्यादौ नोक्त क्रमेणा तिव्याप्ति संभवः विषयितासंबंधावच्छिन्ननिरुक्त जनकतावच्छेदकज्ञानादिप्रकारताना मपि निरुक्त यावत्प्रकारतांतर्गततया सव्यभिचारिताघटकसंबंधावच्छिन्नत्वस्य तत्रासत्त्वेनतेनरूपेण तदुपादानासंभवात्' तथाच' तावता व्याप्यसंशयहेतुता मादायाप्यऽतिप्रसंगवारणसंभवेन विशेष्यता यावत्त्वे-न निवेशनं ज्ञानपदस्य निश्चयपरत्वं च नयुक्त मिति पूर्वपक्षानवकाशः अथवा व्याप्यसंशयस्य साधारणधर्मवत्ताज्ञानांतर्भावमते एकैककोटि सामानाधिकरण्य मादाय सद्धेतावतिप्रसंगवारणाय यत्किंचि त्संशयजनकतावच्छेदकयावत्प्रकारतापर्य्यंतं निवेशनीयं' व्याप्यसंशयस्य पृथक् कारणतामते तु नोक्तक्रमेण सद्धेता वतिप्रसंगशंकावकाशः' तन्मते कोटिद्वयसामानाधिकरण्यावच्छिन्नत्वेनैव प्रकारताया जनकतावच्छेदकत्वोपगमात् एकैककोटिसाहचर्य्यावच्छिन्नप्रकारतायाः संशयजनकतानवच्छेदकत्वात्' अतो यावत्प्रकारकतानिवेशनं संशये यत्किंचित्त्वनिवेशनंच न कर्त्तव्यम्' अपितु व्याप्यसंशयहेतुता मादाया तिप्रसंगवारणाय ज्ञानपदमेव निश्चयपर मुपगंतव्य मित्येव व्याप्यसंशयेत्यादिना अभिहितम् नच धर्मैक्यस्य संशयजनकतायां तंत्रतामतेपि कोटिद्वयसामानाधिकरण्यावच्छिन्नत्वेनैकत्र निवेश्यते' विशेष्यविशेषणभावे विनिगमनाविरहात् 'अपितु प्रत्येकसामानाधिकरण्यावच्छिन्नत्वं प्रत्येकं निवेश्य कारणताद्वयमेव कल्प्यते' धूमसहचरितवन्हिमत्ताज्ञान धूमाऽभावसहचरितवन्हिमत्ताज्ञानयोः परस्पर सहकारित्वा न्न कोटिद्वयसहचारित विभिन्नधर्मवत्ताज्ञाना त्संशयप्रसंगः धूमसहचरितवन्हिमान् तदभावसहचरितवन्हिमा नितिज्ञानद्वयादितोऽपि संशयः स्वीक्रियते तथाच सद्धेतावतिप्रसंगवारणाय याव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्प्रकारतानिवेशनं संशये यत्किंचित्त्वनिवेशनं चावश्यक मितिवाच्यम्' विभिन्नहेतुत्वे साहचर्य्यधर्मितावच्छेदकवन्हित्वद्रव्यत्वा-
दिधर्माणां विशिष्यानिवेशे कोटिद्वयसहचरितधर्मवत्ताज्ञानयोः परस्परसहकारितोपगमेपि विभिन्नधर्मवत्ताज्ञाना त्संशयापत्ते
र्दुर्वारतया तादृशधर्माणां विशिष्यनिवेशनीयतया कारणतानन्त्यापत्ते रितिसंक्षेपः" अथ द्रव्यं विशिष्टसत्वा दित्यादेः सव्यभि-
चारिता प्रसंगः' विशिष्टस्या नतिरिक्ततया विशिष्टसत्तात्वादौ साध्यतदभावसहचरितत्व तद्वृत्तित्वयोः सत्वा दितिचेत्'
गुणकर्मान्यत्व सामानाधिकरण्यरुपं तद्वैशिष्ट्यं' वैशिष्ट्यंच हि क्वचिदुपलक्षणतया हेतुतावच्छेदकं क्वचिद्विशेषणतया 'आद्यं यथा
नुमित्यादिलक्षण प्रविष्ट मितरभेदानुमापकतावच्छेदकं यत्तद्व्यक्तिसमवेतत्वादिकं 'तद्विशिष्टानुमितित्वादिजाते र्व्यक्त्यंतरे ऽस-
त्वेन भागासिद्धे स्तस्य विशेषणत्वा योगात्' अतएव तादृशजाता वनुभवत्वान्यत्वादिविशेषणं व्यभिचारवारकतया सार्थकं'
द्वितीयंच यथा' शद्बो ऽनित्यः वाह्यकरणकप्रत्यक्षत्वेसतिसत्वा दित्यादौ सत्यन्तार्थः' तस्यच विशेषणत्वे एव सद्धेतुत्वनिर्वाहात्'
तथाच दर्शितस्य वैशिष्ट्यस्य उपलक्षणतया हेतुतावच्छेदकत्वे सव्यभिचारित्वमिष्ट मेव' विशेषणत्वे विशिष्टनिरूपितसमवा-
यादिरेव हेतुतावच्छेदकसंबंधो वाच्यः' अन्यथा यद्धर्मविशिष्टनिरूपितत्वानवच्छिन्न समवायादि र्हेतुतावच्छेदकसंबंध स्तस्य
हेतुप्रकारस्य उपलक्षणतया हेतुतावच्छेदकत्वा द्विशेषणत्वानुपपत्तेः' नच विशिष्टनिरूपितसमवायादे र्हेतुतावच्छेदकसंबंधत्वे
तेनशुद्धसत्तादे रप्यव्यभिचारितया तद्विशेषण वैयर्थ्यमिति गुणकर्मान्यत्वेसति सत्वादिति हेतुप्रयोगे निग्रहप्रसंग इति वाच्यम्
विशिष्टविशेषणकवुद्धावेव विशिष्टनिरूपितत्वस्य संबंधतावच्छेदकतया तद्रूपविशिष्टनिरूपितसमवायादिना तद्रूपानवच्छिन्नस्य
हेतुत्वा संभवात्' एवंच विशिष्टनिरूपितसमवायादिना संबंधेन सद्धेतो र्विशिष्टसत्वादे र्न तेन संबंधेन सव्यभिचारत्वप्रसंगः
यादृशेन संबंधेन पक्षधर्मताविषयकं यज्ज्ञानं तस्य तादृशेन संबंधेन कोटिद्वयसहचारावगाहितायाः संशयजनकता प्रयोजक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वात् सम्वायसामान्यसंबंधेन साहचर्य्यावगाहिनो दर्शित विशेष्यसंबंधेन पक्षधर्मताज्ञानस्य च संशयजनकत्व विरहात् तादृश विशेष्यसंबंधेन द्रव्यत्वा द्यभावसाहचर्य्यस्य सत्तादावभावात तादृश साहचर्य्यावगाहि भ्रममादायाति प्रसंगा नवकाशात् 'अथ यथा हेतुतावच्छेदकोपलक्षिते व्याप्तिज्ञानस्थलेपि पक्षे तद्विशिष्टवैशिष्ट्यज्ञानादनुमितिरधिकंत्वित्यादि न्यायात्तथा विशिष्टसत्तात्वोपलक्षिते सहचारो यत्र गृह्यते तत्र तद्विशिष्टवैशिष्ट्यस्य पक्षधर्मताज्ञाना दपि संशयोत्पत्ति रुचितेति चेन्न । उभयोः स्थलयो र्विशेषात् 'तथाहि सामान्यरूपेण सामान्यसंबंधेन वा व्याप्तिग्रहे सामान्यघटितेन विशेषरूपेण विशेषसंबंधेन वा पक्षधर्मता ज्ञानादनुमिति र्युज्यते हेतो स्तत्संबंधस्य वा संकोचे व्याप्तेरव्याघातात् । सामान्यरूपेण सामान्यसंबंधेन वा सहचार ग्रहे विशेषरूपेण विशेषसंबंधेन वा पक्षधर्मताज्ञानेतु नसंशयः संकोचस्य साधारण्यव्याघातकत्वात् 'अतएव वन्हित्वादिना धूमतदभावादिसहचारग्रहे आर्द्रेंधनप्रभववन्हित्वादिना धर्मिवृत्तित्वज्ञाना न्नधूमादि संशयो'नवा संयोगसामान्येन धूमतदभाव सहचरित वन्ह्या दे र्महानसाद्यनुयोगिक संयोगेन धर्मिणि ज्ञानात् तत्संशयः' नवा तत्रसाधारण्यप्रसंगादिति॥ अथ द्रव्यंगुणकर्मान्यत्वे सति सत्वादित्यत्र सद्धेतौ द्रव्यंगुणत्वेसातिसत्वादित्यत्र विरुद्धे चाति व्याप्तिः विशेष्ये साध्यतदभावोभयसामानाधिकरण्यसत्वेन विशिष्टेपि तत्सत्वा दितिचेन्न साध्यतदभाववद्वृत्तितावच्छेदकविशिष्टवत्ताज्ञानस्यैव साधारणधर्मदर्शनविधया साध्यसंदेहजनकत्वात् यत्किंचित्साध्यसंशयजनकतावच्छेदकीभूता यांया प्रकारतावच्छेदकता वच्छेदकतापर्य्याप्त्यधिकरणधर्मविशिष्ट प्रकृतहेतुतावच्छेदकत्वविवक्षणे नातिप्रसंगविरहात् विशिष्टसत्तात्वरूप प्रकृतहेतुतावच्छेदकस्यो भयवद्वृत्तितावच्छेदकत्वविरहात् उभयसहचरितवृत्तित्वाद्यवच्छिन्न प्रकारतावच्छेदकताकज्ञानस्य संशायकत्वेपि नोक्तातिप्रसंगः तथासति यादृशयादृशधर्मावच्छिन्न प्रकृतहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहि ज्ञानत्वेन यत्किंचित् साध्यसंशयजनकता तादृश तादृश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपविशिष्ट तद्दत्वस्य विवक्षणीयत्वात् यत्रोभयसहचारिततद्वृत्तित्वं प्रकारतावच्छेदकेभासते तत्र तदुपलक्षिततद्दत्ता ज्ञानस्यापि हेतुतया तद्विशिष्टवैशिष्ट्यावगाहित्वेनाऽजनकत्वात् उभयवद्वृत्तितावच्छेदकत्वेन प्रकारतावच्छेदकस्य यत्र भानं तत्रोभयसहचारघटक तद्वच्छिन्नप्रकारतानिरूपिताधिकरणतावगाहिज्ञानस्यैव हेतुतया तद्विशिष्टवैशिष्ट्यावगाहित्वेन हेतुत्वमावश्यक मिति तादृश हेतुतामादाय साधारणे उभयवद्वृत्तितानवच्छेदकविशिष्टवैशिष्ट्यबोधत्वेन हेतुता मादायवा साधारणे लक्षणं संगमनीयं॥१०॥ प्रकृतपक्ष धर्मताज्ञानानिवेशे घटज्ञानं सविषयकं आत्मवृत्तिवाज्ञानत्वादित्यादावतिव्याप्ति स्तथाहि घटज्ञानं सविषयक मित्यादि निश्चय कालीन घटज्ञानं सविषयं नवेत्यादिसंशयंप्रति घटज्ञानधर्मिक सविषयकत्वज्ञानं प्रमानवेत्याद्याकारकसंशयोहेतुः। अर्थनिश्चयोत्तरार्थसंशये तद्धर्मिक प्रामाण्यसंशयस्य हेतुत्वात् सच प्रामाण्यसंशयः सविषयकत्वतदभावादिरूपकोटिद्वयोपस्थित्यात्मकः सविषयकत्ववति सविषयकत्वप्रकारकत्वरूपप्रामाण्यस्य सविषयकत्वेन तदभाववति तत्प्रकारकत्वरूपा प्रामाण्यस्यच तदभावेनघटितत्वात्। तादृशप्रामाण्यसंशयेच सविषयकत्वादिज्ञानधर्मिक प्रामाण्याप्रामाण्य सहचरितज्ञानत्वादिमत्ताज्ञानं हेतुरिति सविषयकत्वादिरूप साध्यसंदेहजनककोटिद्वयोपस्थितिजनकधर्मिवृत्तिताज्ञानविषयत्वं ज्ञानत्वादा वक्षत मेवेति प्रकृतपक्षधर्मताज्ञाननिवेश आवश्यक स्तन्निवेशेच सविषयकत्वादिज्ञानधर्मिकज्ञानत्व वत्ताज्ञानस्य तादृशज्ञानविषयघटज्ञानादिरूपप्रकृतपक्ष धर्मत्वाविषयकत्वा न्नातिव्याप्तिरिति निष्कर्षमतं दूषयति (१)इदंतावदित्यादिना सविषयकत्वस्य स्वरूपसंबंधात्मकत्वेना ननुगत-

(१) टिप्पणी—अत्रा यीदं चिंत्यते स विषयकत्व प्रकारक ज्ञानत्वा वच्छेदेन सविषयकत्वस्य साध्यत्वे ज्ञानत्वादि हेतावति व्याप्तिः तादृश धर्मावच्छिन्न विशेष्यक सविषयकत्व संशय जनक प्रामाण्या प्रमाण्यो पस्थित्या त्मक तदुभय संशय जनक निरुक्त धर्मा वच्छिन्न विशेष्यक ज्ञान विषयत्वस्य ज्ञानत्वे ऽक्षतत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तया तस्मिन् साध्येज्ञानत्वादिकं व्यभिचार्य्येवेत्यत आह । आत्मवृत्तिवेति । अप्रामाण्यं भ्रमत्वं नतु प्रमात्वाभाव स्तस्य साध्याभावाघटितत्वात् । तज्जन्यकोट्युपस्थितेर्वेति मतभेदेन 'तज्ज्ञानस्य' प्रामाण्याप्रामाण्यसहचरितज्ञानत्ववत्ताज्ञानस्य' तादृशसंशयाहेतुत्वात् 'सविषयकत्वादि संशयजनककोटिद्वयोपस्थित्यहेतुत्वात् ' प्रामाण्यसंशयात्मककोटिद्वयोपस्थितिजनकत्वेपि प्रामाण्यसंशयस्य कथितार्थसंशयहेतुताया अप्रामाणिकतया तादृशकोट्युपस्थितेः साध्यसंशयाहेतुत्वादितिभावः । ननु विनापि साधारणादिधर्मज्ञानं प्रामाण्यसंशयस्थले विषयसंशयोदयात् साधारणादिधर्मवत् प्रामाण्यसंशयस्य संशयजनकत्व मावश्यक मित्यत आह । प्रामाण्यसंशयेति ' ज्ञानत्वलक्षणसमानधर्मदर्शनात् ' प्रामाण्याप्रामाण्यसहचरितज्ञानत्ववत्ता ज्ञानात् । प्रामाण्यस्य संदेह इति योजना । एतच्च दृष्टांत विधयोक्तं ' ज्ञानविषयतात्मकसाधारणधर्मदर्शनात् ' तत्प्रकारकज्ञानविशेष्यत्वरूपतत्तदभावसहचारितधर्मवत्ताज्ञानात् । विषये 'घटज्ञानादौ ' तद्वत्त्वस्य ' सविषयकत्वादेः । संदेहः 'तादृशधर्मवत्ताज्ञानासत्वे च संशयो ऽसिद्धयेति भावः । नन्वेवमर्थ निश्चयदशायां सत्यपि साधारणादिधर्मज्ञाने प्रामाण्यसंशये ऽर्थसंशयः असतितु तस्मिन्ने त्यन्वयव्यतिरेकानुविधानं नोपपद्यत इत्यत आह । अप्रामाण्यसंशयेति ' तदपसारणप्रयुक्तं ' तादृशविशिष्टप्रतिबंधकाभावसंपादकत्वानिबंधनं ' तथाच प्रयोजकत्वेनैवान्वयव्यतिरेकानुविधानोपपत्ते र्नतत्कारणता साधक मितिभावः । व्याप्यसंशयस्येति ' व्याप्यतदभावयो व्यापकतदभावसहचरिततया साधारणधर्मदर्शनविधयैव व्याप्यसंशयो व्यापकसंशयहेतुः ' धर्मस्यैकताया ज्ञानस्य निश्चयताया, अप्रयोजकत्वात् ' यदाच व्याप्याभावस्य व्यापकाभावसाहचर्य्यन्न प्रतिसंधत्ते तदा धर्मिणितद्व्याप्यधर्म संशयानोपि न तं संदिग्ध इति स्वीयमते(१) साध्यसंशयजनकतावच्छेदकप्रकारतावच्छेदक साध्याभाववद्वृत्तित्वस्य व्याप्ये ऽसत्वेनातिव्याप्त्यनवकाशात् ' पृथगिति हेतुत्वविशेष-

(१) टिप्पणी—इति व्यापक संशयं प्रति व्याप्य संशयस्य हेतुता वादि मते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णं पृथक्कारणतामते व्याप्ति मादायातिव्याप्तिः (१)प्रागेवोपपादिता ज्ञानपदं निश्चयपरमिति तादृशजनकतायां निश्चयत्वावच्छिन्नत्वं संशयत्व न्यूनवृत्तित्वंवा (२) विशेषणं देयमित्यर्थः सद्धेतावतिव्याप्ते र्वास्तवसाधारण्यादि मत्वाभावेना प्रसक्ते र्हेत्वभिमतपदोपादान मनर्थक मित्याशंकायामाह हेत्विति तेन संबंधेन सव्यभिचारत्व घटकतयाभिमतसंबंधेन जनकतासूचनार्थं जनकताया लक्षणघटकता लाभार्थं तथाच तादृशपदोपादानस्वरसाद् यादृशरूपावच्छिन्न यत्संबंधावच्छिन्न प्रकारताशालिज्ञानं साध्यसंदेहजनकं तादृशरूपवां स्तेनसंबंधेन सव्यभिचार इत्येव लक्षणं कर्त्तव्यमितिभावः समवायेनहेतौ समवायेनव्याप्ये एतेनालक्ष्यत्वं दर्शितं ज्ञानघटादौ नातिप्रसंग इति योजना नसमवायेन सव्यभिचारत्वप्रसंग इत्यर्थः अतिप्रसंगप्रसंजकं विशेषणमाह विषयत्वसंयोगादिना तत्संदेहजनक इति विषयत्वसंयोगादिसंसर्गघटित साध्यतदभावसाहचर्य्यप्रकारेण तादृशसंबंधेन स्वप्रकारकं यत्संशयजनकंज्ञानं तद्विषयइत्यर्थः नच तेन संबंधेन तद्वत्ताज्ञानस्य लक्षणघटकत्वेपि समवायेन विषयता संयोगादिघटित कोटिद्वयसामानाधिकरण्यावच्छिन्नज्ञानघटादि प्रकारकज्ञान मादायाति प्रसंगइति वाच्यम् तेनसंबंधेन तद्वत्ताज्ञानस्य तत्संबंधघटितत्तत्सहचारविषयकस्यैव संशयजनकतया समवायसंबंधावच्छिन्नायां संशयजनकतावच्छेदकप्रकारतायां समवायसंबंधघटित साध्यतदभावसाहचर्य्यस्यैवा वच्छेदकतया तद्वत्ताया ज्ञानघटादावसत्वेना तिव्याप्त्यनवकाशात् विप्रतिपत्तिस्त्वित्यादिमूले तथापदस्य कोट्युपस्थापकपरत्वे ऽसंगति स्तद्घटक साध्यतदभावोपस्थापकपदयोः प्रत्येकं प्रत्येकोपस्थापकत्वात् प्रत्येकमतथात्वेपिवा कथंतत्र लक्षणासत्व मित्यपिनस्फुटमिति तद्ग्रंथ मधृत्वैव तदर्थं पूरयित्वा व्याचष्टे निरुक्तयोरिति विप्रतिपत्ति

(१) टिप्पणी—व्याप्य वत्ता ज्ञानत्वेन व्याप्य संशयस्य हेतुता इति ॥

(२) टिप्पणी—लाघवा दाह संशयत्व शून्य वृत्तित्वे ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गादा० २२

घटकतत्तत्पदज्ञानस्येत्यर्थः' तत्तत्पदविषयकप्रत्येकज्ञानयोः कोटिद्वयोपस्थापकत्व विरहेपि समूहालंबनज्ञानस्य तथात्वा त्तमादायैवाति व्याप्ति र्भविष्यती त्याशंकायां नवा पक्षवृत्तिरिति मूलावतार इति सूचयितुं पूरणसंमिलितं तदर्थ माह! मिलितत्वेति! मिलितविषयकज्ञानस्येत्यर्थः' तदुपस्थापकत्वेपि कोटिद्वयोपस्थापकत्वेपि' तद्वत्ताज्ञानं तादृशवाक्यप्रकारताशालि ज्ञानत्वावच्छिन्नं' तथा कोटिद्वयोपस्थापकं । तथाच पक्षधर्मतापदोपादानादेव न तत्रातिव्याप्तिरिति भावः! पक्षधर्मतापदानुपादानेपि नतत्रातिव्याप्तिः संभवति पदद्वय विषयकज्ञानस्य कोटिद्वयोपस्थितिजनकत्वेपि विषयभेदेन विषयताभेदा त्रित्यपद नञ्पदविषयतायाः प्रत्येकं कोटिद्वयोपस्थितिजनकतावच्छेदकत्व विरहा ल्लक्षणेच कोटिद्वयोपस्थितिजनकतावच्छेदकैक विषयताया एव निवेशादित्याह! नवेति! मिलित्वा एकविषयताश्रयीभूयद्वयोः पदयो र्जनकत्वं जनकतावच्छेदकघटकत्वं' कोटिद्वयोपस्थितिजनकतावच्छेदकीभूता या विषयता तदाश्रयत्व मितिपर्यवसितार्थः! ननु दिप्रतिपत्तिघटकपदानां प्रतिपाद्यत्वादिसंबंधेन कोटिद्वयसहचरिततया तेनसंबंधेन तद्वत्ताज्ञानस्य संशयहेतुत्वात् तेषां प्रत्येकं संदेहजनककोटिद्वयोपस्थितिजनकतावच्छेदकविषयताश्रयत्व मक्षतमेवेत्यत आह! तथात्वेपीति । विप्रतिपत्तिघटकपदानां प्रत्येकं तादृश विषयताश्रयत्वेपीत्यर्थः । [illegible] [illegible]मिति । तथाच लक्ष्यतयैव न तत्राति व्याप्तिरिति भावः। नन्व नुपसंहारीपक्ष एवेति मूलमसंगतं संबंधनिश्चयस्यैव संबधिस्मारकतया पक्षे साध्यस्य तदभावस्यच संदिग्धतया तदंतर्भावेन हेतौ तत्सामानाधिकरण्यस्य निश्चेतु मशक्यत्वेन हेतोः कोटिद्वयोपस्थापकत्वासंभवा दतो ऽभिप्रायंव्याचष्टे! ऽनुपसंहारीति । अनुपसंहारितादशायां पक्षे साध्यसंदेहदशायां' उक्तक्रमेण लक्षणसमन्वय इतियोजना। यद्रूप विशिष्टवत्ताज्ञानं साध्यसंदेहजनकं वास्तव तद्रूपवत्त्वस्यैव लक्षणार्थतयोपवर्णितत्वात्। सर्वमनित्यं प्रमेयत्त्वादित्यादौ पक्षएव क्वचित्साध्यस्य क्वचिच्च साध्याभावस्य निश्चयदशायां नित्यत्वतदभावसह- २२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरितप्रमेयत्ववत् सर्वमित्यादिज्ञानस्य संभवेन तद्विषयतावच्छेदकोभयसाहचर्य्य मादाय साध्यसंदेहदशाया मपि लक्षणसमन्वयइत्यर्थः। अनुपसंहारितोत्तीर्णतादशायां तदुभयसाहचर्य्यसत्त्वेपि तदानीं तादृशहेतोः साधारणतया नसामान्यलक्षणातिव्याप्ति रितिभावः॥ साधारण्यविषयकज्ञानत्वावच्छिन्नस्यैव संशयान्वयव्यतिरेकानुविधायित्वात् तेन रूपेण संशयहेतुता न तु तद्विषयकनिश्चयत्वेन तदवच्छिन्नस्या न्वयव्यतिरेकानुविधायिताया असिद्धत्वात् तथाच साध्यसंशयकाले साहचर्य्यनिश्चयासंभवेपि तदंशे संशयात्मक संशयजनकज्ञान मादायलक्षणसमन्वयः संभवतीति केचिदाहुः तन्मतमुपन्यस्यति। केचिदिति वस्तुतो' वस्तुगत्या यत्साधारणं' तज्ज्ञानेपि' तत्रतद्धेतुतायां 'अकिंचित्कर अनवच्छेदकं' पक्षएव पक्षान्तर्भाविनैव। तदंशेति। साहचर्य्यांशे संशयेत्यर्थः' साहचर्य्यज्ञानात् साहचर्य्यविशिष्टप्रकारकज्ञानात्। तथात्त्वं सव्यभिचारत्त्वं। तद्विषयमिति' संबंधांशे निश्चयात्मकं संबंधिज्ञानं संबंध्यंतरस्मारकं शक्त्यादिसंशयात् पदार्थस्मरणा द्यनुत्पत्ते रिति साधारण्यसंशये कोटयुपस्थापकत्वं न संभवति। एवं संशयसाधारणसहचारज्ञानस्य हेतुत्वे अप्रामाण्यनिश्चयानास्कंदितत्व मेवावच्छेदककोटौनिवेशनीयं तन्निश्चयत्वेन हेतुत्वेतु अप्रामाण्यज्ञानानास्कंदितत्वमेवेति लाघवात् संशयात्मकसहचारज्ञानं न हेतु रेव मनुपसंहारितादशायां संशयजनकज्ञानसंपादनप्रयासोपि विफलः तादृशज्ञानासत्त्वदशायां साधारणाव्याप्तिभयेन तादृशज्ञानस्यो पलक्षणविधयैव लक्षणघटकत्वादित्यादिचिंतावीज मूलेपि॥ केवलान्वयीत्यादि मूलमवतारयति नन्वित्यादिना। अयंघटएतत्त्वादित्यादिस्थले पक्षतादशायां संशय प्रयोजक निश्चितसाध्यतदभाववद्व्यावृत्तत्वस्य सत्त्वादव्याप्त्यप्रसक्ते स्तस्यालक्ष्यतया ऽव्याप्तिपरिहारोपि न संगच्छत इत्यत स्तत्र निश्चितसाध्यवद्वृत्तित्वं संपादयति। एतदिति। हेतुभूतेदंत्ववति पूर्वं घटत्वग्रहएव तन्मूलकात् सघटइत्याकारकस्मरणात् तद्घटत्वेनैव तद्घटभेदोत्र घटेगृहीतुं शक्यंते 'नान्यथा प्रतियोगितावच्छेदकप्रकारक प्रतियोगिज्ञानाविरहा दिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मिणि पूर्वं घटत्वग्रहस्या नुसरणं तद्घटभिन्नोयमिति भ्रमपर्य्यंतं तद्घटानवस्थाने तादृशभ्रमएव न संभवति विशेष्य-
विरहा दतः इत्युक्तं । तद्घटभिन्नोयमिति भ्रमदशायां इदंत्वावच्छिन्ने घटत्वग्रह इदंत्वस्य साध्यसहचारितत्वेन निश्चित-
तया ऽसाधारण्यं नशंकाऽस्पद मपीत्यतआह तत्रैवदोषाद्घटत्वग्रहइति । तत्रेइदंत्वावच्छिन्ने तदघटभिन्नोयमिति भ्रमानुधा-
वनं इदंत्वस्य निश्चितसाध्यवद्धर्मिव्यावृत्तत्वज्ञान संपादनाय तदाधर्मिणि घटत्वनिश्चयसत्वे एव संशयप्रयोजकस्य तत्कालीन
तत्पुरुषीय साध्यनिश्चयविषय व्यावृत्तत्वस्येदंत्वे ऽसत्वमतः केवलतद्व्यक्तित्वेन प्रतियोगिविधया तद्घटभान मुपेक्ष्य तदघट-
त्वेन तद भानानुसरणं तथासति तादृशभ्रम एव तद्व्यक्तित्वं विशिष्टेधर्मिणि घटत्वस्य निश्चयइति तन्निष्ठेदंत्वे दर्शितसंशय-
प्रयोजकरूपाभावा दव्याक्ति प्रसक्तिरिदं त्वविशिष्टे घटसामान्यभेदभ्रमे इदंत्वे विपक्षवृत्तित्वनिश्चय संभवात् तदव्यावृत्तत्वज्ञाना
संभवाद साधारण्यं नशंकाऽस्पदमपीति प्रतियोगिकोटौ तत्वभानानुधावनम् । इदंत्वेपीति । अव्याप्तिरित्यनुषज्यते वस्तुत
स्तद्व्यावृत्तत्वाभावेन वास्तविकस्य साध्यनिश्चयविषयीभूत धर्मिव्यावृत्तत्वस्या भावेन लक्षणयोगादिति वास्तवसंशय प्रयोजक
रूपवत्वस्यलक्षणघटकत्वादितिभावः अतएवेत्यत्रेदंपदेन पूर्वाभिहितायाः सद्धेतुत्वाज्ञानस्य पुरुषदोषतायाः परामर्षे ऽसंगतिः
तस्या असाधारण्यादे रनित्यदोषताया मनुपष्टंभकत्वा दतस्तत्परामर्शनीयं व्याचष्टे अतएवेति पुरुषदोषाधीनं पुरुषस्य हेतुम-
तिपक्षेच साध्यतदभावानिश्चय साध्याभावव्याप्यवत्ताभ्रमाधीनं तद्दोषत्वं तादृशहेतो रसाधारण्य सत्पातिपक्ष रूपदोषत्वं
तस्यासाधारण्यस्य सत्प्रतिपक्षस्य च अनित्वदोषत्वं दशाविशेष एव हेतोर्दुष्टता संपादकत्वं साहजिकदोषत्वे तादृशपुरुषदोष-
विरहदशाया मपि हेतोर्दुष्टतासंपादकत्वे कदाचित्कत्वं कदाचिदेवहेतोर्दुष्टता संपादकत्वम् एतावता ऽयंघटएतत्वादित्यादौ दशा
विशेषे पुरुषदोषाधीन दुष्टत्वशंकाया अनिवृत्ते स्तन्निवृत्यर्थ मन्यथेत्यादि ग्रंथसंगमनाय चाभिप्रायं पूरयति एवंचेति दोषता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयोजकं निश्चित साध्यतदभाववद्व्यावृत्तित्वादिकं हेतौ तिष्ठतीति शेषः तत्रानित्यदोषत्वमपि अनित्यदोषमपितत्रैवं भ्रमोदोषता-प्रयोजकरूपस्य अन्यथा पदार्थव्याचष्टे [illegible]नादिति तादृशरूपभ्रमादित्यर्थः केचिदित्यस्वरससूचनाय सच निश्चितसाध्यतदभाववद्व्यावृत्तत्वस्य संशयप्रयोजकताया अग्रेखंडनीयत्वाद ऽसाधारण्यादेः पुरुषदोषाधीनदोषतायाः (१) प्रकृतानुपयोगितया मूलानुक्ततया वा ऽतएवेत्यत्रेदंपदेन तत्परामर्शे संदर्भविरोधाचेति तस्यासाधारणस्य वृत्तिमतः ननु तादृशहेतोः संशयप्रयोजकरूपशून्यत्वे ऽसाधारण्यमेवकथं बीजाभावादित्यत आह असाधारण्यंत्विति अत इत्याशंकातः नन्वयं घटएतत्वादित्यादेरिव तुल्ययुक्त्या शब्दोऽनित्यः शब्दत्वादित्यादे रपि सद्धेतुत्वमेव शब्दो नित्यः शब्दत्वादित्यादिकमपि विरुद्धमेव नत्वसाधारणं साध्यसाध्याभाववद्व्यावृत्तत्वाभावा दित्युदाहरणाभावाद साधारणहेत्वाभासस्यैवा प्रसिद्धिरित्यत आह एवंचेति अवृत्तीति वृत्तिमतः साध्यतदभाववद्व्यावृत्तत्वा संभवादितिभावः ननु पक्षधर्मताज्ञानविरहादेव गगनादिहेतुकस्थले अनुमित्यनुत्पाद निर्वाहादसाधारण्य ज्ञानस्या नुमित्यनुत्पाद प्रयोजकत्व मेव नास्तीति कथं तस्य हेत्वाभासतेत्यत आह पक्षवृत्तितेति असंकरइतरानधीनानुमित्यनुत्पादप्रयोजकज्ञानविषयत्वं ननू भयवद्व्यावृत्तत्वस्य वृत्तिमत्व विरुद्धतया तदुभयज्ञानस्य नैकदासंभवः मिथः प्रतिबंधकत्वात् नचैवं पक्षधर्मताज्ञानाभावसंपादकतयैव तस्य हेत्वाभासत्वं निष्प्रत्यूहं तथासत्य सिद्धावेवान्तर्भावेन सव्यभिचारप्रभेदत्वा नुपपत्ते रतआह नचोभयेति स्वरूपतोविरोधः परस्पराभावव्याप्यत्वाविशेषितयोः परस्पर ज्ञानप्रतिबंधकीभूत ज्ञानविषयत्वं वास्तव विरुद्धविषयकस्यापि ज्ञानस्य विरोधाविषयकस्या प्रतिबंधकत्वादितिभावः ननु निश्चितसाध्यतदभाववद्व्याव-

(१) टिप्पणी—यद्यपि तद ज्ञानं दोषः पुरुषस्ये ति। मूलेन पुरुष दोषा धीन दोषता भिहिता तस्या ऽनित्य दोषत्वा नुपष्टंभकत्वा त्तयो पष्टंभिकाया हेतुने ति। साध्य तदभावा निश्चय पक्षे साध्याभाव व्याप्य वत्ता भ्रम रूपाया मूला पुक्तत्व मिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२- साध्यतदभावनिश्चयविषयीभूतधर्मित्वात्तत्वं न साध्यसन्देहजनकतावच्छेदक
विषयतावच्छेदकमित्यर्थः।। निश्चितसाध्यतदभाववद्वृत्तित्वस्य। गु.प्र. २

त्तत्व रूप संशय प्रयोजकधर्मस्यो क्तहेतौ सत्वा त्कथं तत्राव्याप्तिशंका कथंवा ऽलक्ष्यत्वाभ्युपगमेन तत्परीहारइत्यत आह निश्चितेति'साध्यतदभाव निश्चयविषय वृत्तित्वस्य'तथात्वे'संशयप्रयोजकत्वे'सद्धेतौ। वन्ह्याद्यधिकरणवृत्तितया निश्चिते धूमादौ धर्मिवृत्तित्व ग्रहदशापर्य्यन्तानुधावनं संशयजनकज्ञानस्य विशेषण विधया लक्षणघटकत्वे प्यतिव्याप्तिः संभवतीत्यभिप्रायेण'वस्तुतो यदाहेतुमति साध्याभावभ्रमोवर्त्तते तदा हेतौ तदधिकरणवृत्तित्वाग्रहेप्यतिव्याप्तिसंभवति तादृशज्ञानस्यो पलक्षणत्वादित्येयं। तादृशेति' साध्यतदभावविषयकेत्यर्थः। तंत्र'संशयप्रयोजकरूपघटकं'किंचेति'संदेहजनकतावच्छेदकरूपस्य' जनक-तावच्छेदकप्रकारतावच्छेदकस्य'विशेषणत्वे' धर्मिविशेषणतयासव्यभिचारपदप्रतिपाद्यत्वे'महानसादिवृत्तितादशायामव्याप्तिः' तत्कालान्तर्भावेणाव्यभिचारित्व व्यवहारापत्तिः'तदानीं साध्याभाववद्वृत्तित्वाभावस्य तत्रा क्षतत्वात् तादृशव्यवहारविषयस्या वाधित्वा दितिभाव:' नन्व द्रव्यत्वविशिष्टसत्त्वादित्यादा वतिव्यातिवारणाय साध्यसंदेहजनकतावच्छेदकप्रकारतावच्छेदकधर्मवत् प्रकृतहेतुतावच्छेदक वत्त्व मेव व्यभिचारपदार्थोवाच्यः साधारणस्थलेच तादृशोधर्मः साध्यतदभाववद्वृत्तितावच्छेदकत्व मेव तत्तद्विशिष्ट हेतुतावच्छेदकावच्छिन्नहेतुमत्ताज्ञानस्या पि संदेहजनकतोपगमात् एवंच रासभादेर्महानसादिवृत्तितादशायां वन्ह्यभाववद्वृत्तित्वविरहेपि तदवच्छेदकरासभत्वादिसत्त्वेन तादृशव्यभिचाराभावो नास्तीति कथमुक्त व्यवहारापत्ति रितिवाच्यम् एवमपि अनित्यधर्मस्य हेतुतावच्छेदकत्वे(१)तदसत्त्वदशाया मापत्ति तादवस्थ्यात्'विशेषणत्वे कालविशेषावच्छिन्नतया तदानीं व्यभिचारीत्यादिव्यवहारविषयत्वे ऽव्याप्ति स्तत्कालांतर्भावेण दुष्टत्व व्यवहारानुपपत्तिरिति तुनार्थः। साधारण्यस्य नित्यदोषतया कालविशेषान्तर्भावेण व्यभिचारित्वव्यवहाराजनकतायाः तत्रेष्टत्वात्। उपलक्षणत्वे। अत्यन्तायोगव्यवच्छेदपरिचायकतया व्यभिचा-

तावच्छेदक

(१) टिप्पणी—तदानी वन्हि साधने रासभो दुष्टः इत्यादि व्यवहारा नुपपत्तिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यादि पदप्रतिपाद्यत्वे । तादृशरूपात्वंतायोगव्यवच्छेदस्य तत्पदार्थत्वोपगम इतियावत् 'असाधारण्योत्तीर्णतादशायां' हेतुमति साध्य-तदभावयो रन्यतरनिश्चयदशायां 'तत्कालान्तर्भावे णातिव्याप्तिः कालान्तरीय मसाधारण्यमादाय सव्यभिचारव्यवहारापत्तिं इदं-पुनरिहावधेयम् 'शब्दो ऽनित्यः शब्दत्वादित्यादौ पक्षतादशायां सव्यभिचारव्यवहारनियामकं यद्घटगगनादिव्यावृत्तत्वरूप मसाधारण्यं तच्छब्दादौ साध्यादिनिश्चयदशाया मक्षत मेवेति विशेषणत्वे प्युक्तदोषतावस्थ्यं' अथ संशयप्रयोजकरूपस्य तथा-त्वेन न व्यभिचारपदप्रतिपाद्यता' किंतु साध्यतदभाववद्वृत्तित्व निश्चितसाध्यतदभाववत्व्यावृत्तत्वरूपेणैव' विभाजकमात्रमुक्ता नुगतरूपं' एवंच साधारण्य मुपलक्षण मसाधारण्यं विशेषण मित्यविरोधः निश्चयघटितरूपावच्छिन्नपरवाक्याच्च कालविशेषो न्निश्चयांश एवान्वे ति साध्यतदभावनिश्चयादौ खंडशक्तिस्वीकारेणान्वयबलात्' साध्यतदभावनिश्चयविषयवृत्तित्व सामान्याभाव-भिन्नस्यापि तत्कालीन तन्निश्चयविषयवृत्तित्वत्वाच्छिन्नाभावस्य लाभः' व्यभिचारादिपदस्य साधारण्या साधारण्यादिरूप नाना-र्थत्व मिष्टमेवेति चेदुच्यते 'तदोपलक्षणत्वेपि नोक्तदोषावसरइति' एवंच निश्चयाघटितं साध्यतदभाववद्वृत्तत्वमेव संशयप्रयोजकं ब्याहु तदवच्छिन्नप्रकारकज्ञानस्य विशेषदर्शनतया संशयप्रतिबंधकत्वेपि तत्कोटिविशिष्टवुद्धौ तत्कोटिमद्व्यावृत्त्वावच्छिन्नप्रकारक-ज्ञानप्रतिबंधकतायां विपरीत कोटिमद्व्यावृत्तत्वावच्छिन्नप्रकारकज्ञानस्यो त्तेजकतया सत्प्रातिपक्षस्थल इवसंशयनिर्वाहः। तथा-चार्य घटएतत्त्वादित्यादौ साध्यतदभाववद्व्यावृत्तत्वस्या सत्वेनाव्याप्त्याशंकायां अलक्ष्यत्वा भ्युपगमेन तत्परीहारस्य च नासं-गति रिति समुदिततात्पर्यार्थः' संशयप्रयोजकरूपंचेदानी मुपलक्षणविधयैव सव्यभिचारव्यवहारनियामकं अतो महानसादौ रासभादिवृत्तितादशायां नाव्याप्ति रसाधाणश्च हेतुः सर्वदैव तथेति नातिप्रसंगोपीतिध्येयम् । अदुष्टहेतो र्वास्तवासाधारणप्रक-रणसमत्वाभावाद साधारणप्रकरणसमयो रितिव्याचष्टे! असाधारणेति' भ्रमविषयस्य नव्यमते दोषत्वाभावा दनित्यदोषत्वमिति'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गादा० २५

व्याचष्टे' विशेषेति 'प्रयोजकत्वं 'प्रयोजकज्ञानविषयत्वं 'अतएवे त्यत्रेदं पदार्थस्य सद्धेतोः सर्वदा ऽदुष्टत्वस्य भ्रमविषयस्या नुमि- त्यनुत्पादप्रयोजकताया मनुपष्टंभकतया तदुपष्टभ्यं पूरयति 'नत्विति' तथाच यतएव सद्धेतुः सर्वदैवतथा नतुकदाचिदपि दुष्टल- क्षणलक्ष्यो ऽतएव तत्स्थलीयानुमितिविरोधी यो भ्रमरूपो ग्रह स्तस्यानुमित्यनुत्पादप्रयोजकत्वेपि तद्विषयो नहेतुदोषः भ्रमद- शायां सद्धेतो र्दुष्टत्वे भ्रमविषयस्यदोषत्व मावश्यकं स्यादित्यतएवेत्यादि मूलस्य पर्य्यवसितो ऽर्थः 'ननु भ्रमस्या नुमित्यनुत्याद प्रयोजकत्वे तद्विषयस्य दोषत्वमपीष्यत एवेति भ्रमविषयोनदोष इत्येवासिद्ध मित्याशंकाया मन्यथेत्यादि मूलावतारएतादृश- शंकोद्धारं स्फुटीचिकीर्षु रन्यथापदंव्याचष्टे 'अन्यथेति' मूले वाधादिज्ञानइति 'पक्षविशेष्यक साध्याभावादिभ्रमदशायामित्यर्थः' हेत्वाभासाधिक्यापत्तिः' अतिरिक्तहेत्वाभास स्वीकारापत्तिः 'वाधादे र्नित्यदोषतायाः सर्ववादिसिद्धतया भ्रमविषयस्य तदन्त- र्भावासंभवादितिभावः 'अभेदे साध्ये प्रमेयत्वस्या नित्यत्वे साध्ये शद्वाकाशान्यतरत्वस्यच वास्तव साध्यवद्वृत्तित्वविरहेण विरु- द्धत्वा संभवा त्प्राचीनमताभिप्रापकतया तयो र्विरुद्धत्वोक्ति मुपपादयति दीधितौ 'अनवगतेति' एवंच साध्यवद्वृत्तित्वेनेति मूलस्य ८ साध्यवद्वृत्तितया अनवगतत्वेनेत्यर्थः 'ननु तादृशस्थले पक्षतादशायां हेतौ साध्यतदभावोभयसहचारस्या शक्यनिर्णयत्वेपि कालान्तरीय तन्निर्णयविषय वास्तवतदुभयसहचार मादाय लक्षण गमन संभवा दलक्ष्यतया ऽव्याप्तिपरिहारो न घटत इत्पत- आह 'अभ्युपगमेति 'संशयजनकपक्षधर्मताज्ञानस्य विशेषणविधया लक्षणकटकत्व मभ्युपगमेत्यर्थः' यथाश्रुतलक्षणे व्याप्त्यादि- ग्रहदशायां सद्धेतौ अतिव्याप्तिवारणाय तादृशज्ञानं विशेषणविधयैव निवेशनीयं' तादृशज्ञानदशायां अतिप्रसंग श्चास्त्येव (१) तत्र तादृशज्ञानाविरहदशायां चा गत्या साधारणस्यापि सव्यभिचारत्वं नोपगंतव्य मेवेत्यतो 'प्रवर्णितेति' यथाव्याख्यातेत्यर्थः' अनु- २५

(१). टिप्पणी—मूलोक्त प्रमेयत्वे तादृशा न्यतरत्वा दावितिशेषः ॥

यथो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्यविरोधिज्ञानविषयस्यापि हेत्वाभासविभाजकत्वे क्षतिविरहात् एतादृशाज्ञानेपीत्यादिनो (१) क्तविभाजकधर्मज्ञानस्या नुमित्य विरोधित्वकथन माकिंकर मित्याशंकामभिप्रायो पदर्शनेन निराकुरुते यद्रूपज्ञानमिति यद्रूपावच्छिन्नविषयकज्ञानामित्यर्थः तदेव तद्रूपावच्छिन्नमेव एतेन निरुक्तपक्षधर्मताज्ञान विषयतावच्छेदकधर्मवत्वस्यैव विभाजकतया साधारण्यादिरूप तादृशधर्मविषयकज्ञानस्य चा नुमितिविरोधितया तादृशनियमोपगमेपि तथाविधधर्मस्य न विभाजकत्वानुपपति रितिपरास्तं साधारण्यत्वादिनैव साधारण्यादिज्ञानस्य विरोधितया तादृशपक्षधर्मताज्ञान विषयतावच्छेदकत्वेन तस्य विभाजकत्वानुपपत्तेः एवंचै तदज्ञानेपीति मूलस्य निरुक्तविभाजकतावच्छेदकावच्छिन्नाज्ञानेपीत्यर्थः साधारण्यादिप्रत्येकस्येत्यस्य साधारण्यत्वादिरूप प्रत्येक धर्म्मावच्छिन्नस्ये त्यर्थ इत्यवधेयं अन्यथा (२) तादृशरूपावच्छिन्नस्यापि विभाजकत्वे अतिप्रसंगः। अनुमितिकारणीभूतज्ञानविरोधि धर्मवत्वादिना अन्यतमधर्मवत्वादिनावा सव्यभिचारविरुद्धादीनामैक्यप्रसंगः मूले प्रतिबंधादित्यस्य निरुक्तसामान्यधर्म ज्ञानस्या प्रतिबंधकत्वा दितिशेषः तस्यैव दोषत्वा दित्यस्य प्रत्येकधर्मस्यैव विरोधित्वादित्यर्थः (३) तत्रैवायंहेतुरिति नतु दोषत्वाच्चेति चकारासंगतेः तस्यैव दोषत्वा च्चेत्यस्य प्रथमतः तस्यैव दोषतयाउद्भावयितुमुचितत्वात् नतु अनुगतधर्मस्येत्यर्थः एवंच दोषविधया यादृशधर्मो द्भाव्यते सएव विभाजकः उक्तानुगतधर्मस्यच दोषविषया ऽनु द्भावनीय तया नतथात्वमिति तत्वं नतु तदज्ञानदशायां अन्यज्ञाना दनुमिति प्रतिबंधस्य तज्ज्ञानीयानुमित्यविरोधिता बीजत्वं मणिकृता ऽभिहितं नघटते तथासति

(१) टिप्पणी—सव्यभिचार सामान्य लक्षण ज्ञानस्य ॥

(२) टिप्पणी—यादृश धर्मा वच्छिन्न विषयक ज्ञानस्या नुमित्य प्रतिबंधकत्वं ॥

(३) टिप्पणी—तत्र सामान्य धर्म ज्ञानस्या प्रतिबंधकत्वे अयं अस्यैव दोषत्वा दित्यादिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्प्रतिपक्षादिज्ञानस्या नुमितिविरोधितया बाधादिज्ञानस्या प्यतथात्वापत्तेः अतः स्वयं तद्बीजमाह वस्तुतस्त्विति उपस्थापकत्वा दीति कोटिद्वयोपस्थापकज्ञानाविषयत्वादीत्यर्थः आदिपदा त्स्वयंनिष्कर्षिततादृशज्ञानविषयतावच्छेदक रूपवत्वपरिग्रहः विरोधिवि-षयकत्वा भावात् ग्राह्यनिरूपितप्रतियोगितावच्छेदकावछिन्न तद्व्याप्यत्वावच्छिन्ना विषयकत्वात् इदंत्ववधेयं मूलेप्रतिबंधा दित्यनं तरं मानाभावे नतु निरुक्तधर्मज्ञानस्या नुमित्यप्रतिबंधकत्वादितिशेषः एवंच प्रत्येकज्ञानस्यानुमितिप्रतिबंधकत्वं नानुगतधर्म ज्ञान-स्यानुमित्यप्रति बंधकता संपादकतया मूलेऽभिहितं किंतु तथात्त्वेन प्रमाणाभावे कथिते अनंतरं प्रत्येकं नानाधर्मज्ञानस्या नुमिति विरोधित्वकल्पनापेक्षयाविरोध्यविषयकस्यापि अनुगतधर्मज्ञानस्यैकस्य तथात्वं विशेषदर्शिनां साधरणादि हेतुकानुमिति वारणाय कल्पयितु मुचितमित्याशंकावतारात्त त्परिजिहीर्षया प्रत्येकज्ञानस्या वश्यकल्पनीय प्रतिबंधकताकत्वं दोषत्वाच्चे त्यंते नाभिहित मिति एवं तादृश युक्तेः अन्यत्रापि निर्वक्ष्यमाणानुगतधर्मांतरे प्यनुमिति विरोधिज्ञानाविषयत्वं बोध्यमितिशेषः" विरोधिपदस्य प्रतिबंधकार्थकत्वे ऽसंगतिः साधारण्यादेर तथात्वादतो व्याचष्टे विरोधित्वमिति विरोधिज्ञानेतिप्रतिबंधकीभूतज्ञाने त्यर्थ अनु-मिति विरोधि संबंधनिवेशेनैवोपपत्तौ अव्यावृत्तिपदमनर्थकमित्याशंकांनिराचिकीर्षु स्तस्य व्यभिचारिणो साध्याभाववद्वृत्ति-त्वादिविरहदशायां अव्याप्तिवारकतया सार्थकता संपादनायतद्व्याचष्टे अव्यावृत्तीति अत्यंतायोगः प्रतियोगिवैयधिकरण्याव-च्छिन्नो ऽभावः नातिप्रसंग इति रासभादौ महानसादि वृत्तितादशायां वन्ह्यभाववद्वृत्तित्वासत्वेपि प्रतियोगिवैयधिकरण्या-वच्छिन्नतदभावस्य तत्रासत्वेन तद्व्यवच्छेदस्य तदानीमपि सत्वादितिभावः नच व्यावृत्तिपदस्या त्यंतायोगव्यवच्छेदार्थकत्वे शब्दो ऽनित्यः शब्दत्वादित्यादाव साधारण्योत्तीर्णतादशायां अतिप्रसंग इत्यतआह साध्यवद्वृत्तिस्त्विति नासाधारण इति निश्च-यागर्भितस्य साध्यतदभाव वद्व्यावृत्तत्वस्यैवा साधारण्य पदार्थत्वा दितिशेषः "तथाचो क्तस्थले कदाचिदपि असाधारण्यस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

(२) टिप्पणी—पक्ष धर्मिक साध्य तदव्याप्य हेतुमत्वा वगाहिं निष्ठ प्रतिबध्यता निरूपित प्रतिबंधकता वच्छेदक विषयता निरूपकत्व मादाय असाधारण्यादौ दोषःस्यात् अतः सामान्येति। साध्य व्यापकीभूता भाव प्रति योगित्व रूपा साधारण्य संग्रहाय तादृश विषयतायां स्वरूप संबंध रूपा वच्छेदकत्वं परित्यक्तं ॥

सत्वा न्नाति प्रसंग इतिभावः' वाधादिवारणाय विवक्षणीयस्य पक्षे साध्यवैशिष्ट्यग्रहाविरोधित्वस्य लाभाय पक्षपदं व्याचष्टे' पक्ष इति' संदिग्धसाध्यः' संदिग्धसाध्यविशिष्टः' धर्मी' पक्षतावच्छेदका वच्छिन्नः' विशिष्टहेतौ हेतुतावच्छेदकावच्छिन्ने' तद्-निरत्वेति' तादृश साध्य विशिष्टपक्षतावच्छेदकावच्छिन्न पक्षवृत्तित्वेत्यर्थः' वैशिष्ट्यंच वैज्ञानिकं' तेन वाधादि संकरस्थले साध्यविशिष्टपक्षा प्रसिद्धावपि नक्षतिः' बाधादिज्ञानस्य साध्यविशिष्ट पक्षतावच्छेदकावच्छिन्न विषयक ज्ञानविरोधित्वा न्नवाधादिक मादाय न्हदोवन्हिमान् धूमादि त्यादाव तिव्याप्ति रिति भावः' अत्रच साध्यवदवृत्तित्वरूपासाधारण्यस्या संग्रहः तज्ज्ञानदशायां हेतौ साध्यविशिष्टपक्षवृत्तित्वज्ञानानुदयात् एवं साध्यांशे संशयविषयत्वरूपविशेषण मनर्थक मित्यत स्तत्परित्यज्य निष्कृष्टार्थ माह' तत्त्वेति' पक्षतावच्छेदकेति' पक्षतावच्छेदकावच्छिन्न पक्षविशेष्यता निरूपिता या साध्यतावच्छेदकावच्छिन्न साध्यप्रकारता या च तादृशी हेतुतावच्छेदकावच्छिन्न हेतुप्रकारता तन्निरूपक (१) लौकिकसंनिकर्षाद्यजन्य ज्ञानाविरोधित्वस्य लाभादित्यर्थः' (२) तादृशज्ञानाविरोधित्वं नतादृशज्ञानसामान्यनिरूपित प्रतिबंधकतानातिरिक्तवृत्तिविषयित्वा निरूपकत्वं' हेतुमन्निष्ठसाध्याभावादिरूप व्यभिचारस्यापि पक्षनिष्ठसाध्याभावत्वादिना बुद्धेस्तादृशज्ञानंप्रति प्रतिबंधकत्वा त्तादृशविषयितानिरूपकत्वे

(१) टिप्पणी—असंकीर्णबाधस्य संखः पीत इत्यादि स्थलीय बाधस्य संग्रहाय लौकिकेति।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१) टिप्पणी—अथात्र तादृश यत् किंचित् ज्ञान निरूपित प्रति बंधकता नतिरिक्त वृत्ति विषयता निरूपकता नवच्छेदकत्व निवेशे नैव वाधादौ व्याप्त्य विषयक ज्ञान मादाय व्यभिचारादौ चातिव्याप्त्यो वारण संभवे सामान्य पदं व्यर्थमिति चैन्न यत्र व्यभिचारज्ञानप्रतिबंधकअभावो वृत्तित्वाभाववान वृत्तित्वं निरूपितत्वाभाववत् इत्याद्येकतर ज्ञानविषयकमेव साध्यवान् पक्षः हेतुमान् इति ज्ञानं जायते । तत्र व्यभिचारे अव्याप्त्यापत्तेः व्यभिचारज्ञानस्य तादृश-यत् किंचित् ज्ञाननिरूपितप्रतिबंधकत्वात् । तन्निवेशे च व्यभिचारज्ञानप्रतिबंध कस्या पि प्रतिबंधकताया स्तादृश ग्रहत्वव्यापकत्वविरहा न्नाव्याप्तिः । ननु तथापि तादृश ग्रहत्वव्यापक प्रतिबध्यतानिरूपित प्रतिबंधकत्वाभाववद वृत्तित्वमेव लक्ष्यतावच्छेदकविषयितायां प्रवेशे वाधादा वतिप्रसंगवारणसंभवा दलंनञ्द्वयप्र-

ना संभवःस्यात् (१)किंतु तादृशविषयितानिरूपकतानवच्छेदक धर्मवत्वं 'तदनवच्छेदकत्वं च तदवच्छेदकतापर्य्याप्त्यधिकरणत्वं तेन हेतु मन्निष्ठ साध्याभावत्वादे स्तादृशप्रतिबंधकता नतिरिक्तवृत्ति विषयिता निरूपकतावच्छेदक पक्षनिष्ट साध्याभावत्वा-दितो ऽनतिरिक्तत्वेपि नक्षतिः 'वाधादि निष्ठाना मनुमिति विरोधितानवच्छेदकधर्माणां प्रमेयत्वादीनां तादृशविषयिता निरूप-कतानवच्छेदकत्वेपि तादृशविषयितानिरूपकता नवच्छेदकीभूतानुमिति विरोधिता वच्छेदक रूपावच्छिन्नत्वस्य समुदायार्थत्वा न्नाति प्रसंगः 'तादृश यत्किंचि ज्ज्ञानं यादृश रूपावच्छिन्न विषयकनिश्चय सामान्या प्रतिबध्यं तादृशो ऽनुमिति विरोधिता

वेशे नेति चेन्न । यत्र वाधस्वरूपासिद्ध्याद्ये कतर विषयकमेव व्यभिचारविषयकबोधो जायते तत्रत्यव्यभिचारेऽव्याप्तिः बाधस्वरूपासिद्धादे रेकतरविषयकव्याभि-चारज्ञाने साध्यवत् पक्षधर्मिकहेतुमत्ता ज्ञानत्वव्यापकप्रतिबध्यतानिरूपित प्रतिबंधकत्वा भावासत्वात् । नच नञ्द्वय प्रवेशे पि तत्रा व्याप्तिः दुर्वारैवे ति वाच्यम् तादृश प्रतिबंधकतानिरूपित स्वरूप संबंधरूपावच्छेदकतावति या तादृश प्रतिबंधकतानतिरिक्त वृत्तिविषयतातन्निरूपकतानवच्छेदकत्वस्य लक्ष्यतावच्छेदके निवेश-नीयत्वात् स्वरूपासिद्धाद्ये कतर विषयकव्यभिचार ज्ञानीयविषयिताया तादृश प्रतिबंधकता नतिरिक्त वृत्तित्वसत्वेपि तन्नि रूपित स्वरूपसंबंधरूपावच्छेदकत्ववि-रहात् । नाव्याप्त्य तिव्याति इति ध्येयं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१) टिप्पणी—अथा त्र साध्यवत् पक्षधर्मिकहेतुमत्ताग्रहत्व व्यापकप्रतिबध्यतानिरूपित प्रतिबंधकताभिन्न प्रकृता नुमिति विरोधितावच्छेदक विषयितानिरूपकतावच्छेदकत्वनिवेशे नैव सर्वसामंजस्ये गुरुतर निवेशनंव्यर्थ मिति चेन्न। एत दपेक्षयापि लघुतर निवेशनं अनुमिति विरोधिता घटकप्रतिबध्यताया मेव तादृश बुद्धित्वव्यापकत्वम् निवेश्यं इत्यादिना भट्टाचार्येणोक्तं तथाचोक्त पूर्वपक्षस्या किंचित् करत्वात् तत्रच त द्वीत्यानिवेशे लाघवान वकाशा दिति निपुणतर विभावनीयं।

वच्छेदको धर्म स्तदवच्छिन्नत्वं वासमुदायार्थः (१)वस्तु तस्तु निरुक्त तादृश ज्ञाना विरोधिनि ज्ञानविरोधितानवच्छेदकत्वं वाऽनुमिति विरोधिता वच्छेदके न निवेशनीयं परंत्व नुमिति विरोधिता घटकानुमिति निष्ठप्रति वध्यताया मेव तादृश ज्ञानत्व न्यूनवृत्तित्वं निवेशनीयं लाघवात् बाधादि ज्ञाननिरूपितप्रतिबध्यतानां च तादृश सकल ज्ञान साधारणतया न तादृशज्ञानत्व न्यूनवृत्तित्व मतो नाति प्रसंगः व्यभिचारज्ञानप्रति बध्यत्वं च तन्न्यूनवृत्ति व्याप्त्य विषयक तादृशज्ञानावृत्तित्वात् अग्रेपि सर्वत्रै वैतादृश दिशानिष्कर्षणीय मिति अत्र च (२)यत्र प्रकृतपक्षे व्यभिचाराभावो निविष्ट स्तत्र व्यभिचारोऽसिद्धिमध्ये एव

(२) टिप्पणी—अथात्र प्रमेयत्व मवृत्ति प्रमेयत्वात् इत्यत्र वृत्तित्व वद्वृत्ति प्रमेयत्वरूप व्यभिचारे अव्याप्तिः तादृश व्यभिचार विषयकनिश्चय सामान्या प्रतिबध्यत्वस्य तादृश यत् किंचित् ज्ञाने अभावात्। इति चेन्न। यादृश रूपावच्छिन्न विषयक निश्चयत्वव्यापकयत् किंचित् प्रतिबंधकतानिरूपितप्रतिबध्यत्वाभाववत्वस्यैव तादृशयत् किंचित् ज्ञाने निवेशनीयत्वात् तत्र चव्याप्ति ग्रहनिरूपित व्यभिचारविषयकज्ञानप्रतिबंधकतामादायै व लक्षणसमन्वयात् नच वन्ह्याभाववत्न्हदत्वावच्छिन्न विषयकनिश्चयत्वव्यापकत्ववन्ह्य भाववान् ह्रदइति ज्ञाननिष्ठप्रतिबंधकतानिरूपित प्रतिबध्यत्वाभावस्य तादृश यत्किंचित् ज्ञाने सत्वात् बाधादावतिव्याप्ति रिति वाच्यम्। तादृश यत् किंचित् प्रतिबंधकतायाः समूहालंबना नुमितित्वव्यापकप्रतिबध्यतानिरूपितत्वस्य निवेशनीयत्वात् एवंचा त्र सामान्य पदानुपादाने वन्हिव्यापकीभूता भावप्रतियोगित्वाभाववज्जलत्व ह्रदकालीन वन्हिमान जलादि सत्र वन्हिव्यापकीभूताभावप्रतियोगित्वव ज्जलत्वव ह्रूपासिद्धा वसाधारण्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयकतादृशसमूहालंबननिश्चयीया साधारण्य प्रतिबंधकतामादाया ति व्याप्तिः नच तादृश रूपावच्छिन्नविषयक तत्र स्वासाधारण्य विषयकनिश्चयनिष्ठ य त्किंचित् प्रतिबंधकतान्तगतासाधारण्य प्रतिबंधकतानिरूपित प्रतिबध्यत्वाभावस्य तादृश यत् किंचित् ज्ञाने सत्वात् कथ मति व्याप्तिरि ति वाच्यम् असाधारण्या व्याप्ति भयेन तादृश यत् किंचित् प्रतिबंधकतायां हेतुमान् पक्षः साध्यवानि त्याकारक ग्रहत्व व्यापकप्रतिबध्यतानिरूपितत्वा साधारण्य विषयकत्वा नव-च्छिन्न त्वोभयाभावस्य निवेशनीयतया तत्रा तिव्याप्ते दुर्वारत्वात् कथंवा धूमाभाववद् वृत्तिवन्हित्ववदवन्हिकालीन धूमवान वन्हे रित्यादौ धूमाभाववद् वृत्ति वन्हित्ववद्रूपासिध्यौ व्यभिचार विषयक तादृशसमूहालंबननिश्चयीय व्यभिचारप्रतिबंधकता मादायातिव्याप्तिरतः सामान्य पदोपादान मावश्यकं नच तथापि स्वानवच्छेदक विषयताशून्य ज्ञानीयत्वमेव यत्कि ंचित् प्रतिबंधकतायां निवेशनीयम् स्वपदं यत्कि चित् प्रतिबंधकतापरम् तादृश समूहालंबनज्ञाने स्वानवच्छेदकीभूता सिद्धिघटकजलत्वत्वावच्छिन्नविषयताशून्यत्व विरहात् सामान्य पदस्य वैयर्थ्यं दुर्वारमे वेति वाच्यम् यतः सत्ववत् हेतुकस्थलीय साध्याभावव द्वृत्ति घटादिरूपसव्यभिचारे ऽव्याप्तिः तत्रा वच्छिन्न विषयतानिरूपित साध्या भावव द्वृत्तित्वावच्छिन्नविषयताशालि निश्चयत्वेन व्याप्तिबुद्धिप्रतिबंधकतया स्वानवच्छेदकीभूत शांसर्गिकविषयताशून्यत्वा भाववत् स्वानवच्छेदकविषयताशून्यज्ञानीयत्वस्य तादृश यत्कि चित् प्रतिबंधकतायां निवेशयितु मशक्यत्वात् । परेतु यत्र दोषविषयकनिश्चयो नियमतः स्वानवच्छेदकीभूतविषयितावान् तत्र व्यभिचाररूप दोषे ऽव्याप्ति रतः तन्नि वेशयितुं नशक्यते इत्याहुः ।

निवेश्यते इति हृदयं पक्षसाध्यसाधनानाम प्रसिद्ध्या सम्मन्वयनिरास इति तेषां ज्ञानस्य यथोक्त ज्ञान प्रति बंधकत्वादिति भावः । असिद्ध संकीर्णो ह्रदादौ धूमादि साधने वन्ह्यादि हेतुः तत् संग्रहः । तत्र यथा श्रुत पक्षवृत्तित्वा सत्वेपि यथोक्त ज्ञाना विरोधित्व विशिष्टा नुमिति विरोधि साध्याभाववद्वृत्तित्व मादाय लक्षणसमन्वय संभवादिति भावः नु विरोधोपि यथोक्त ज्ञाना विरोधी अनुमिति विरोधीचे त्यति प्रसंगः । नच विरुद्धो हेतुः साध्य वद्व्यावृत्ततया असाधारणएवेति न तत्र सव्यभिचार लक्षणाति व्याप्ति प्रसक्ति रिति वाच्यम् यथोक्त ज्ञाना विरोधित्वविशिष्टा नुमिति विरोधित्वस्य विरोध २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(४) टिप्पणी—ननु पक्षवृत्तित्वेसतीत्यनेन पक्षधर्मिकसाध्यवत् विरोधित्वनिवेसेनैव बाधस्वरूपासिद्धिसाध्या सामानाधिकरण्य रूपविरोधानां वारणसंभवे व्यर्थं पृथक् विरोधान्यत्व विशेषणमि ति चेन्न। घटो धूमवान घटनिरूपितत्वाभाववद्वृत्तित्व कालीन वन्हेरि त्यत्र धूमाभाववद्वृत्तित्व। घटनिरूपितत्वाभाववद्-वृत्तित्वकालीन वन्हिरूप व्यभिचारे ऽव्याप्तिः धूमवद् घटवृत्ति घटनिरूपितत्वाभाववद्वृतित्व कालीन वन्हिरि त्याकारकहेतु धर्मिक साध्यत्व पक्षवृत्तित्वग्रहस्या

साधारण्ये तस्य सव्यभिचार पदप्रवृत्ति निमित्तत्वा संभवात् तदवच्छिन्नवतः सव्यभिचारपदार्थत्वे तत्पदस्य पारिभाषिकत्वा पत्तेः सव्यभिचारलक्षणा तिव्याप्ते श्चाशक्यपरिहारत्वा दत आह विरोधोपीति फलतः तदभावव्याप्य वत्ताज्ञान विधया अनु-मिति प्रतिबंधरूपफलप्रयोजकज्ञानविषयत्वेन प्रतिरोधएवप्रतिरोधतुल्यएव। तथाच पक्षे साध्यं वत्ताज्ञानं प्रतिबंधकत्वा न्नतत्रा ति प्रसंग इति भावः पक्ष वृत्तित्वे सति साध्यव्यापकीभूता भाव प्रतियोगित्वं विरोधः। तादृशाभाव प्रतियोगित्वं च सा-ध्याभावस्य व्यतिरेकव्याप्ति रिति तज्ज्ञानं तदभावव्याप्यवत्ताज्ञानविधया पक्षे साध्यवत्ताज्ञानं विरुणद्धीति तदर्थं साध्यासामा नाधिकरण्यस्यैव चिंतामणिकार मते विरोधतया तस्य पक्षे साध्यवत्ताज्ञाना विरोधितया ऽति व्याप्ति दुर्वारैवे त्यत स्तन्मता-भिप्रायेण तद्वारणाय प्रकारांतर मनु सरति तदन्यत्वे न चेति विरोधान्यत्वेन चेत्यर्थः (१)विरोधि अनुमिति विरोधि अत तन्मते किमसाधारण्यं न तावत् सपक्षवृत्तित्वेसति साध्यव्यापकीभूताभावप्रतियोगित्वं तज्ज्ञानस्य पक्षे साध्यवत्ताज्ञानंप्रति साध्याभा-व व्याप्यवत्ताज्ञान मुद्रया विरोधित्वेन सत्यंतार्थ विरहात्। नापि निश्चित साध्यवद्व्यावृत्तत्वं तज्ज्ञानस्या नुमितौ तत्कारणी भूतज्ञाने वा प्रतिबंधकता विरहेण हेत्वाभाससामान्यलक्षणस्यै तल्लक्षणस्य च तत्साधारण्य विरहात् अनुमिति कारणीभूत हार्य्यत्वात् तदविरोधित्वस्या प्रसिद्धे अनाहार्य्यत्वाभावाचे त्यतो हेतु धर्मिक साध्यवत्प क्षवृत्तित्वग्रहा विरोधित्व मपहाय साध्यवान पक्ष इत्याकारक ग्रहाविरो-धित्वनिवेश एव युक्तः। तथाच विरोधा न्यत्वविशेषणस्य सहजतएवसार्थक्यमि ति विभावनीयं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साध्यसामानाधिकरण्य ज्ञानं प्रति साध्यवद्वृत्ति विशेषा वृत्तित्वज्ञानस्या प्रतिबंधकत्वात् कथंचित्प्रतिबंधकत्वे साध्यसामा नाधिकरण्य ग्रहा विरोधित्वरूप विरोधान्यत्वस्य तत्रा सत्वेन प्रकृत लक्षणस्य तत् साधारण्या संभवात्। नापि पक्षवृत्तित्वा विशेषितं साध्यव्यापकीभूता भाव प्रतियोगित्वं तज्ज्ञानस्यापि अनुमितौ तज्जनकज्ञाने वा ऽविरोधित्वात्। यदि धर्मिणि प्रकृत हेतुमत्ता ज्ञानसहकृत प्रकृतहेतौ साध्यव्यापकीभूताभाव प्रतियोगित्वज्ञान मनुमितिं प्रतिबध्नाति स्थाणुत्वा भावव्याप्य करादिमांश्चाय मित्यादिज्ञान दशाया मपि अयं स्थाणु रितिज्ञाना नुदयात् धर्मिविशेष्यक तद्दताज्ञान विशिष्ट तत्धर्मिक ग्राह्याभाव व्याप्यत्व निश्चयत्वे नैव तदभाव व्याप्यवत्ता ज्ञानस्य प्रतिबंधकत्वा दित्युच्यते तदा तादृश धर्मस्य पक्षे साध्यवत्ताज्ञानविरोधित्वात् सत्यंतार्थविरहादिति केचित् पक्षवृत्तित्वाविशेषितं साध्यव्यापकीभूता भाव-प्रतियोगित्वमेवा साधारण्यं सत्यंतदलेचाविरोधिताघटक प्रतिबंधकतायां तादृशा साधारण्य विषयकत्वानवच्छिन्नत्व विशे-षणं प्रक्षिप्य तत्साधारण्यं प्रकृत लक्षणस्यो पपादनीय मित्याहुः। परेतु हेतुनिष्ठ साध्यव्यापकीभूता भाव प्रतियोगित्व मेवा साधारण्यं तद्विषयकत्वस्य पक्षधर्मिक हेतुमत्ताज्ञानविरहकालीनानुमित्य प्रतिबंधकज्ञान साधारणतया ऽनुमिति प्रतिबंधकता तिरिक्त वृत्तित्वेपि पक्षधर्मिक हेतुमत्तानिश्चय विशिष्ट यादृशविशिष्टविषयक निश्चयत्व मनुमिति प्रतिबंधकता नतिरिक्त वृत्ति तादृशत्वस्य सामान्यलक्षणे ऽत्र च विवक्षणीयतया सामान्यलक्षणस्यप्रकृतलक्षण विशेष्यदलस्य च तत् साधारण्य निर्वाहः। पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदक विशिष्ट साध्यवत्तादि ज्ञाना विरोधित्वस्य च तादृश यत्किंचिज्ज्ञानं यादृश धर्मावच्छिन्न विषयकनिश्चय सामान्या प्रतिबध्यं तादृश धर्मवत्वस्य पस्य शरीरे निश्चयांशे पक्षधर्मिकहेतुमत्तानिश्चय वैशिष्ट्या निवेशा त्तादृश निश्चय विरहकालीन हेतुनिश्चय व्यापकीभूता भाव प्रतियोगित्व विषयकनिश्चयस्या पि तद्विषयकनिश्चयसा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१) **टिप्पणी**—यादृश विशिष्ट विषयक निश्चयत्व मनुमिति प्रतिबंधकता शून्य पक्षधर्मताज्ञान कालीन ज्ञानावृत्ति तादृशत्व मेव विवक्षणीयं स्वव्यापक तत्कत्वरूपा नतिरिक्तवृत्तित्व निवेशो विफल इति विभावनीयं। धर्मिकहेतुमत्ताज्ञानकालीनज्ञानाशून्यीति पाठः

मान्यां तर्गतत्वेन पक्षेसाध्यवत्ता ज्ञानस्य च तद प्रतिबध्यतया तद्दलस्या प्येतत् साधारण्यो पपत्ति रित्याहुः वस्तुतो (१)यादृश विशिष्टविषयकनिश्चयत्वं अनुमिति प्रति बंधकता शून्य पक्षधर्मता ज्ञाना वृत्ति तादृशत्वं बोध्यं। अथ वा स्वव्यापकतत्कत्व रूपा नतिरिक्त वृत्ति त्व निवेशे यादृश विशिष्टविषयकनिश्चयत्व व्यापकः पक्षधर्मताज्ञानकालीनत्वानुमित्य प्रतिबंधकत्वो भयाभावः तादृशत्वं विवक्षणीयं। अन्यथा स्वरूपासिद्धि वारकस्य हेतुमत्ता ग्रहाविरोधित्व दलस्यै व वैयर्थ्यापत्तेः पक्षधर्मिक हेतुमत्तानिश्चयकालीन तद्विषयकनिश्चयस्या प्रसिद्ध्या यादृश विशिष्टविषयकपदेन तस्योपादाना संभवात् एवं सामान्य लक्षणस्यापि अव्याप्तिः (२) यथा विवक्षितेतु तद्विषयकनिश्चयत्वस्या नुमिति प्रतिबंधकता शून्यपक्षधर्मिकहेतुमत्तानिश्चय कालीन ज्ञाना वृत्ति-

(२) **टिप्पणी**—नच ह्रदधर्मिकधूमवत्ताज्ञानोत्तरं लौकिक संनिकर्षजन्यधूमाभाव वद्ध्रद विषयकज्ञानस्य धूमाभाव व्याप्यवद्ध्रद विषयकज्ञानस्य चानाहार्य्यस्य प्रसिद्ध्यापक्षधर्मिकहेतु मत्तानिश्चय विशिष्ट धूमाभाववद्ध्रद विषयकत्वस्य धूमाभावव्याप्यवद्ध्रद विषयकत्वस्य वा यादृश विशिष्ट विषयकत्वपदे नोपादानसंभवात् धूमाभाववद्ध्रदे धूमाभावव्याप्यवद्ध्रदेवातिव्याप्ति वारकतया तद्दलसार्थक्यात् सामान्यलक्षणेच लौकिकसंनिकर्ष जन्य ज्ञानमादाय लक्षणसमन्वयसंभवात् कथंमुक्तं तद्दलस्य वैयर्थ्यापत्तेः कथंवा सामान्यलक्षणे ऽव्याप्तिः चेतिवाच्यम् प्रकारता विशिष्टान्यत्व मेवानाहार्यत्वं वशिष्ट्यं च स्वनिरूपक ज्ञान कालीनत्व स्वावच्छेदक धर्मावच्छिन्न प्रतिबध्यतानिरूपित प्रतिबंधकतावच्छेदक विषयतावच्छेदक धर्मावच्छिन्न विषयता वत्वोभयसंबंधेन एतादृशंचा नाहार्यज्ञं धूमवान् ह्रदोधूमाभाववान इति ज्ञाने धूमवान् ह्रद इंति ज्ञानोत्तर लौकिक संनिकर्षजन्यधूमाभाववान ह्रद इति ज्ञाने धूमवान्ह्रदो धूमाभावव्याप्यवान ह्रद इति ज्ञाने चासत्वात् तथाचात्र लक्षणे ऽति व्याप्तिः सुघटै वेति ध्येयं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वेन तत्रा ति व्याप्ति वारकतया तत्सार्थक्यात् सामान्यलक्षणस्या पि संगमात्र अत्र वदंती त्यादि निष्कृष्टकल्पेच पक्षवृति-त्वासहितोक्तरूपस्य स्वविषयकनिश्चया व्यवहितोत्तरा नुमिति सामान्ये उभयाभावसत्वात् सामान्य लक्षणाक्रांत त्वं विशेष-लक्षणाक्रांतत्वंच निर्वहति हेतौ साध्यव्यापकीभूता भाव प्रतियोगित्व ज्ञानानंतरं हेतुमान् साध्यवानि त्यनाहार्यज्ञानस्य कदाप्यनुदयात् एतादृश विशेषणप्रक्षेपे मूलकृतः संमति माह वक्ष्यतीति नन्वु हेतुनिष्ठसामानाधिकरण्या त्यंता भाव तद्भेद साध्य-निष्ठहेतुसामानाधिकरण्या भावादि साध्यासामानाधिकरण्य विशिष्ट साधनादि रूपविविधविरोधाना मेकस्य भेदनिवेशे ऽन्यत्राति व्याप्ति दुर्वारैव एवं साध्या सामानाधिकरण्य विशिष्ट साधनादिरूप विरोध भेदनिवेशे साध्याभाव वद्वृत्तित्व विशिष्ट साधनादिरूप विरुद्धस्थलीय व्यभिचारस्या संग्रहः गोत्ववद् वृत्तित्व विशिष्टा श्वत्वादितो गोत्वाभाव वद्वृत्तित्वादि विशिष्टा श्वत्वादे रनतिरिक्तत्वादि त्यत आह हेत्विति हेतुतावच्छेदका वच्छिन्न धर्मिक साध्यता वच्छेदकावच्छिन्न सामानाधिकरण्य प्रकारकज्ञाना विरोध्यर्थक मित्यर्थः तेन विरोधग्रहदशाया मपि रूपांतरेण साध्य हेतुविषयकसामानाधिकरण्य ग्रहो त्पत्ता वपि नक्षतिः । नवा ऽवृत्ति हेतुकस्थले तदुभय सामानाधिकरण्या प्रसिद्ध्या तत्स्थलीया साधारण्या संग्रहः । सामानाधिकरण्येपि साध्यतावच्छेदकावच्छिन्नीयत्वं वैज्ञानिकं नतु वास्तवं तेन नावृत्ति साध्यकसाधारण्या संग्रहः अविरुद्ध हेतुकस्थलीय व्यभि-चारलक्षणे च तद्विशेषण मनुपादेय मेव तेन तत्र हेतुसाध्यसामानाधिकरण्य ग्रहविरोध्यप्रसिद्धा वपि नक्षतिः वस्तु तस्तु तादृश सामानाधिकरण्यग्रहत्व न्यून वृत्तित्वस्यै वा नुमिति विरोधित्वघटका नुमिति निष्ठ प्रतिबद्ध्यतायां निवेशनीयतया धूमवान्वन्हेरित्यादौ सामानाधिकरण्य ग्रहविरोधिनो ऽप्रसिद्धा वपि नक्षतिः । केचित्तु सत्यंतस्य विशिष्ट हेतौ विशिष्टपक्ष वृत्तित्वग्रहा विरोधित्व मेवार्थं वर्णयंतोवाधादिवारणाय पंथानमन्यमेवाश्रयंते तन्मत माक्षिपति । संवंध पदेति । प्रकृत हेतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबंधितया विरोधित्वे प्रकृत हेतुतावच्छेदकावच्छिन्न विशेष्यता निरूपितयद्रूपावच्छिन्न प्रकारताशालि निश्चयत्वं अनुमिति प्रतिबंधकतावच्छेदकं तद्रूपावच्छिन्नत्वं यत्किंचि द्रूपावाच्छिन्न हेतुविशेष्यतानिवेशे द्रव्यं वन्हिमत् धूमादित्यादौ पक्षतावच्छेदकावच्छेदेन साध्यसिद्धे रूद्देश्यतायां द्रव्यत्वाद्य वच्छिन्न धूमादि विशेष्यतानिरूपितसाध्याभावादि प्रकारताशालि निश्चयत्व स्यानुमिति प्रतिबंधकता वच्छेदकत्वात् न साध्याभावादि वारणा संभव इत्यतो हेतुतावच्छेदकावच्छिन्नेति" अथैवं हेत्व घटित साध्याभाव वद्वृत्तित्वादिकमेव व्यभिचारः स्यात् । नचेष्टापत्तिः तस्य सामान्य लक्षणा नाक्रांतत्वात् । हेतुतावच्छेदकावच्छिन्न हेतुनिष्ठत्वस्य विरोधिविशेषणत्वोपगमे तादृशाति प्रसंगवारणे पि साध्याभाववद्वृत्तित्वादिविशिष्टसाधनादेः साध्याभावनिष्ठसाधन सामानाधिकरण्यादे श्चा संग्रहः । नन्व हेतुतावच्छेदकावच्छिन्न घटितत्वे सति विरोधित्वमेव प्रकृते हेतुसंबंधितया विरोधित्वं तत्र विशेषण विशेष्य भाव भेद भिन्नसकल व्यभिचारसाधारण मेवेति वाच्यम् । तथा सति ह्रदो वन्हिमानभावादि त्यादौ वन्ह्यभाववत् ह्रदादि रूप वाधादौ गगनवान भावादि त्यादा ववृत्तित्व वत् गगनादि रूपव्याप्यत्वासिद्धौ चातिव्याप्त्यापत्तेः । नैवं व्यभिचारलक्षणस्य न तादृशरीत्या परिष्कारः । अपितु सव्यभिचारलक्षणस्यैवेति न साध्याभाव निष्ठ साधनसामानाधिकरण्याद्यसंग्रहे हेत्वघटित साध्याभाववद्वृत्तित्वादेः संग्रहे वाक्षतिः अथवा हेतुनिष्ठत्व विशेषित तादृशविरोध्येव वा व्यभिचारपदार्थः । अन्यविधोपदर्शित व्यभिचारस्तु तन्मते व्याप्यत्वा सिद्धावेवांतर्भवतु तावता क्षतिविरहात् । प्रायश इत्यस्य प्रयोजनं स्वयमेव प्रकाशयिष्यते । वाधादीत्यादिना सत्प्रतिपक्षादि परिग्रहः तत् साध्यक तद्धेतुकानुमिति सामान्यं प्रति हेतु संबंधितया विरोधित्व विवक्षणे तादृशवाधादि वारणसंभवा दसाध्यत्व मुपेक्ष्य प्रयत्नसाध्यत्व कथनं नचैवं हेतुसंबंधितये त्यस्य वैय्यर्थ्य मिति वाच्यम् । तदनुपादाने साध्यनिष्ठावृत्तित्व रूप व्याप्यत्वा सिद्धावतिप्रसंगापातात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्य तत्साध्यकानुमितिमात्र एव विरोधित्वात् । नच तदुपादानेपि हेतुनिष्ठावृत्तित्वेतिप्रसंगो दुर्वार इति वाच्यं । सत्यंतदलेनैव तद्वारणा दंतएव हेतुनिष्ठ पक्षावृत्तित्वादे स्तादृशानुमिति सामान्याविरोधित्वादेव वारणे सत्यंत वैयर्थ्य मित्यपि परास्तं' कांचनमय वन्हिमान् वन्हे रित्यादौ साध्याप्रसिद्धि वारणंतु विशिष्ट साध्यग्रहाविरोधित्व विशेषण प्रक्षेपेणैव संभवतीति ध्येयं'तत्'बाधादिवारणं । अत्रच व्यभिचारज्ञानस्य प्रकृतपक्षे प्रकृतसाध्यानुमित्य विरोधितया प्रकृतपक्षे प्रकृतसाध्य तद्व्याप्य प्रकृतहेतु वैशिष्ट्यावगाह्य नुमितिपरत्व मावश्यकं'तत्र निष्प्रयोजनकं साध्यवैशिष्ट्या वगाहित्वं निवेश्य तन्निबंधन वाधाद्यति व्याप्तिवारक विशेषणान्तर प्रक्षेपः प्रक्षालनाद्धीत्यादि न्यायेना युक्त इत्यतो ज्ञाने साध्यवैशिष्ट्यावगाहित्वं विरोधिनि वाधादि वारक विशेषणं च परित्यजति'वस्तुतस्त्विति' आश्रयासिद्ध्यादीत्यादिना स्वरूपासिद्धि साधनाप्रसिद्धि परिग्रहः । यथाश्रुते आश्रयासिद्ध्यादिं वारणा संभवाद सिद्धि संकीर्ण व्यभिचारासंग्रहाच्च (१) सत्यंतार्थं व्याचष्टे । प्रथमं तादृशेति'प्रक्षतावच्छेदकविशिष्टेत्यर्थकं । उदीच्यं तद्धेतुतावच्छेदकाविशिष्टार्थकं । ननु वन्हिमान् वन्हिमान् न्हदत्वादित्यादौ हेतुनिष्ठ साध्या सामानाधिकरण्यादि रूपा साधारण्या संग्रहः । तत् ज्ञानस्य साध्यात्मकपक्षतावच्छेदकविशिष्टे हेतुमत्ता ग्रह विरोधित्वा दतआहेनयेति'(२) अनुमिति कारणीभूतं व्याप्तेः पक्षधर्मतायाश्च ज्ञानं'तथाच पक्षधर्मताज्ञानाविरोधित्व कथनेन परिशेषाद्व्याप्तिग्रहविरोधित्व मेव लभ्यत इतिभावः । ननु एतत् साध्यसाधनयोरप्रसिद्धावतिव्यापकं अन्योन्यात्यंताभावगर्भव्याप्त्यो प्रथमं

(१) टिप्पणी—असिद्धि संकीर्णे न्हदो धूमवान वन्हे रित्यादौ व्यभिचारस्य धूमाभाव वद्वृत्तित्व विशिष्टस्य वन्हेः पक्षी भूत न्हद्वृत्तित्वा दसंग्रह इत्यर्थः ।

(२) टिप्पणी—यदधिकरण वृत्तित्वाभावो यत्र गृह्यते तद्धर्मितावच्छेदकक तत् प्रकारक ज्ञानानुदयात् घटो भूतला वृत्ति रिति ज्ञान सत्वे भूतलं घटव दित्यनुभवात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२–३ इदं पूर्वं दुष्टत्वाव्यभिचारित्वादित्यादि

रेकतरोपादाने ऽन्यतरासंग्राहकं साध्याव्यभिचरितत्व विशिष्ट साध्यसामानाधिकरण्याभावरूपव्याप्यत्वासिद्धावतिव्यापकं चेत्यत आह । विवेचयिष्यत इति । विशिष्टसाध्यसाधनग्रहाविरोधित्वं निवेश्य साध्याप्रसिद्ध्यादिकं वारयिष्यते विशिष्ट साधनग्रहाविरोधी व्यभिचारो ऽसिद्धावेवान्तर्भावनीयः । समूहालंबनात्मकनानाविधव्याप्तिज्ञानमादायात्यंतान्योन्याभाव गर्भ-विविधव्यभिचाराः संगृहीष्यंते व्याप्त्यभावोव्यभिचारएवांतर्भावयिष्यते । तस्य वहिर्भावनीयत्वे विशकलितयोरेवा व्य-भिचार सामानाधिकरण्ययो र्ज्ञान मुपादेयमिति न कस्यचिदपि दोषस्या वकाश इतिभावः । ननु सपक्षवृत्तित्वज्ञानस्या नुमित्याद्यविरोधितया सपक्षविपक्षवृत्तित्वस्यानुमितिविरोधित्वोक्ति र्न संगच्छते । नच विपक्षवृत्तित्व ज्ञानस्या नुमिति प्रतिबंधकतया तद्घटित विशिष्टस्यानुमितिविरोधित्व मक्षतमेवेति वाच्यं । तथासत्यपिविपक्षवृत्तित्वमात्रस्यापि तथात्वा त्तदादायैव· लक्षणगमनसंभवे विशिष्टमादाय लक्षणसंगमनस्य संदर्भविरुद्धत्वात् । विपक्षवृत्तित्वमात्रस्यातथात्वे तदादाय विरुद्धे ऽतिव्याप्तेरप्रसक्तेः विरुद्धोपीत्यग्रिमग्रंथासंगति श्चेत्यत आह । सपक्षेतीति । तथाच विपक्षवृत्तित्वमात्रं विवक्षित मितिभावः । अतएव । सपक्षवृत्तित्वस्या विवक्षितत्वादेव । मूले एतद्ज्ञानमिति दृष्टांतविधयोक्तं तथाच एतादृशानुगत धर्माज्ञान-दशाया मिव तत् ज्ञानदशायामपि अवश्यकल्प्यप्रतिबंधकताकं प्रत्येक ज्ञानस्यैव दोषत्वात् । अनुमित्यनुत्पादप्रयोजकत्वादित्यर्थः । तथाचा नुगत धर्मज्ञानदशायां प्रत्येकज्ञानस्या सत्वे ऽनुमिति रिष्टैव तत्सत्वे ततएवानुमित्यनुत्पाद इति तज्ज्ञानस्य प्रति-बंधकताया अप्रामाणिकत्वा न्न तस्य विभाजकत्व मिति भावः । व्यर्थविशेषणत्वा दिति मूले विशेषणपदस्या नुमिति विरो-धित्वरूप विशेषणपरत्वं न संभवति तदनुपादाने सद्धेतौ व्यभिचारादतोव्याचष्टे । विशेषण मिति । स्वरूपासिद्ध्यादि हेतो रप्यसाधकतया तत्र व्यभिचाराप्रसक्ते स्तद्वारकं विशेषणं व्यर्थमिति भावः । सद्धेतोः साध्यव्याप्यतया तत्रा तिव्याप्त्य·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसक्ते हेत्वाभासपदं व्यर्थ मित्याशंकां निराचिकीर्षु र्दोषलक्षणे ऽसिद्धि विशेषात्मकावृत्तित्वाति व्याप्ति वारकतया तत्सार्थकीकर्तुं तदर्थ माह । हेतुवदिति । दशाविशेषे व्याप्यविरुद्धयो रप्यसाधारणत्वात् तयोः प्रत्येकं यथाश्रुतलक्षणघटकदलद्वय विरहाद व्याप्तिः' एवं हेत्वाभासपदस्य वृत्तिमदर्थकत्वे ऽवृत्तेरपि साध्य तदभाववद्व्यावृत्तत्वेना साधारणतया तत्रा व्याप्तिरतः पर्य्यवसितार्थ माह । एवंचेति' ननु साध्याभाववद्वृत्तित्वं साधारण्यं साध्यवदवृत्तित्वं चासाधारण्यं तच्च साध्य सामानाधिकरण्य ग्रहएव विरोधि नतु साध्याभाव व्याप्ति ग्रहेपीति कथं तत्संग्रह इत्यत आह । साध्येति । साध्यतदभाववद्व्यावृत्तत्वस्य वृत्तिमत्व विरुद्धतया तत्ज्ञानं वृत्तिमत्व ग्रहप्रतिबंधक मित्यभिप्रेत्याह' निश्चितेति । तच्च । तादृश साधारण्यमसाधारण्यं च' व्याप्तिद्वयेति । साध्यव्याप्ति साध्याभावव्याप्तीत्यर्थः । साध्यस्य साध्याभावाभावतया साध्याभावनिरूपित व्याप्तिग्रहे साध्यवद्वृत्तित्वस्य ज्ञानंप्रतिबंधकमिति तत्घटितस्य साधारण्यस्य साध्याभावव्याप्ति ग्रहविरोधित्वमेव' साध्याभाववद्व्यावृत्तत्वस्य ज्ञानमपि-साध्याभावसामानाधिकरण्यघटित साध्याभावव्याप्तिग्रहे प्रतिबंधकमिति तद्घटितस्या साधारण्यस्यापि तथात्वमिति भावः । हृदयमित्यस्वरससूचनाय । एवं साध्याभावाभावत्वेन साध्यविषयक तद्वद्वृत्तित्वज्ञानस्यैव साध्याभावाभाववद्वृत्तित्वघटितस्य साध्याभावे हेतुसमानाधिकरणाभावाप्रतियोगित्वघटितस्य वा साध्याभावव्याप्यत्वस्य ग्रहे प्रतिबंधकतया साध्यतावच्छेदक रूपेण साध्यविषयक तद्वृत्तित्वज्ञानस्य न प्रतिबंधकत्वं निश्चितसाध्यादि मद्व्यावृत्तत्वज्ञानस्य साध्यादि सामानाधिकरण्य सामान्याभावा विषयकतया साध्यादि व्याप्तिग्रहाप्रतिबंधकत्वंचेति । विशेष्य दलप्रयोजनं स्फुटयति । असिद्धि विशेष इति । स्वरूपा सिद्धि र्व्याप्यत्वा सिद्धिर्वेत्यर्थः' एतच्चालक्ष्यता लाभाय । ननु निश्चया घटितस्य साध्यतदभाववद्व्यावृत्तत्वस्य वृत्तिमत्व ग्रहा विरोधितया एतदनंतर्भावे तस्या यिकहेत्वा भासतापत्तिरित्यत आह । साध्येति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदीदृशं यदिवृत्तिमत्व ग्रहविरोधि वृत्तिमत्वग्रहे ग्राह्याभावावगाहितया तत्सामान्याभावावगाहि ज्ञानमेव विरोधि नत्वेकविशेषा
भावविशिष्टापरविशेषाभाव रूपसाध्यतदभाववत्व्यावृत्तत्व ज्ञानमित्यस्वरसात् यदीति । निष्कृष्टमता भिप्रायेणाह । नोचेदिति ।
इदमेवंनिश्चया घटितं साध्यतदभाववद्व्यावृत्तत्वमेव । एवकारेण निश्चय घटितस्य व्यवच्छेदः (१) । नन्वत्र साध्यादि व्याप्य-
त्वंयदिसाध्यादिमदन्या वृत्तित्वेसति साध्यादि मद्वृत्तित्वं तदा द्वितीयलक्षणाभेदः साध्यव न्मात्र वृत्यादि पदस्यापि तादृश
व्याप्तिमदर्थकत्वादि त्यत आह । व्यापकेति । द्वितीय लक्षणस्या पि यथाश्रुतार्थपरत्वे पूर्ववद्व्याप्य विरूद्धयो र्दशाविशेषे
ऽसाधारणयो रसंग्रह इत्यत आह । रीतिरिति । तत्रापि साध्य तदभाव वन्मात्रवृत्तिग्रहविरोधि वृत्तिमत्वग्रहा विरोधिधर्म-
वत्व मेव विवक्षणीय निष्कर्षः । उपाध्याय मत माह । केचिदिति । असाधारण्या भावकालः प्रकृतहेतुनिष्ठा साधारण्या
भावस्या वच्छेदक क्षणः । तेन यदा शद्बत्वादे रसाधारण्यं तादृशक्षणस्य घटत्वादि निष्ठा साधारण्याभावावच्छेदक त्वेपि
न क्षतिः । अथ शद्बादौ साध्यसंदेह दशायां शद्बत्वादौ असाधारण्यव्यवहारप्रयोजकस्य तत्कालीनसाध्यादिनिश्चयविष-
यीभूत घटादिवृतित्वविरहस्य शद्बादौ साध्यनिश्चय दशाया मपि तत्र सत्वात् । प्रकृत हेतुनिष्ठासाधारण्याभावस्या प्रसि-
द्ध्या ऽव्याप्तिः । नच तत्कालीन साध्यादि निश्चय विषयीभूत धर्मिव्यावृत्तत्वरूपा साधारण्य घटक तत्कालादि विरहात् तदानीं
तद्घटिता साधारण्य विरहो ऽक्षत एवेति वाच्यं । प्रतियोगि कोटि प्रविष्ट विशेषणा सत्वस्याभावीय विशिष्टाभावाप्रयोज-
कत्वात् अन्यथा दंडाद्यसत्वे दंडविशिष्टपुरुषाभावादेरिव दंडविशिष्टपुरुषाभावाद्यभावस्या पि सत्वप्रसंगात् यदिच प्रकृतहे-
तुमद्विशेष्यकसाध्य तदभावान्यतरनिश्चयक्षण एवासाधारण्याभावकालेत्यनेन विवक्षित इत्युच्यते तदाशद्बोनित्यः शद्ब-

(१) टिप्पणी—निश्चय घटितस्य तस्य साध्यादि सामानाधिकरण्य सामान्या भावा विषयकत्वेन तादृश व्याप्ति ग्रहा विरोधित्वा दितिभावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वादित्यादौ कदाचि दपिसाध्यस्य साध्याभावस्य वा निश्चयो नास्ति तदा सव्यभिचारत्वप्रसंगः। तादृशस्य क्षणस्य प्रकृतहेतु मद्वि शेष्यक साध्यादि निश्चयस्याप्यनधिकरणत्वेन तदा तादृश निश्चयक्षणावच्छिन्न साध्यादि व्याप्त्यभावस्य हेतौ सत्वात् तदा साधारण्यघटकसाध्यादि निश्चयासत्वेना साधारण्यस्य च विरहेणेष्टापत्ते रयोगात्। प्रकृतहेतु निष्ठासाधारण्य घटको योयस्तदन्य क्षणस्य विवक्षणे तुयादृशसाध्यकस्थले यादृश साधारणस्य हेतोः कदापि ना साधारण्यं तत्रा व्याप्तिः। प्रकृतहेतुनिष्ठा साधारण्यस्या प्रसिद्धेः। मैवं। तत्तत् कालावच्छिन्नत्व विशिष्ठस्य तत्कालीन साध्यादि निश्चय विषय व्यावृत्तत्वरूपा साधारण्यस्य प्रकृतहेतुनिष्ठाभावा वच्छेदक कालएवा साधारण्याभावकालो हेतुमति साध्यादिनिश्चयदशायां कालान्तरावच्छिन्नस्य कालान्तरघटितासाधारण्यस्याभावकूटो हेतौ सुलभ एव। यादृशसाधारणहेतोः कदापि ना साधारण्यं तत्राप्यंततो गगनादिनिष्ठ प्रकृतसाध्यका साधारण्यस्याभावः प्रसिद्धएवेति न दोषः'अथवा प्रकृतहेतुमद्विशेष्यक साध्यतदभावान्यतरनिश्चयानधिकरणत्व किंचिद्विशेष्यक साध्यतदभावनिश्चयवत्वो 'भयाभाववान् क्षणएवा साधारण्याभावकाले त्यनेन विवक्षितः। शद्वो ऽनित्यः शद्वत्वादित्यादौ कदाचिदपि न साध्यस्य तदभावस्य वा निश्चय स्तत्रक्षणे प्रकृतहेतुमद्विशेष्यक साध्यतदभावान्यतरनिश्चया नधिकरणत्वसत्वेपि साध्यतदभावनिश्चयवत्वाभावेनो भयाभावो क्षत एवेति तदा न सव्यभिचारता प्रसंगः॥ प्रकृतहेतुनिष्ठा साधारण्यघटको योयः क्षणः तदन्य क्षण एव विवक्षणीयः। यत्साध्यकस्थले यस्य साधारणस्य हेतोः कदापि ना साधारण्यं तत्साध्यकस्थलीयलक्षणे ऽसाधारण्याभावकालावच्छिन्नत्वं नोपादेय मेव साध्यसाधनभेदेन लक्षण भेदादित्यपि केचित्। विशेषणाभावात्। असाधारण्याभावकालावच्छिन्नत्व रूपं यद्व्याप्तिद्वयस्य विशेषणंतदभावात् 'संग्रहः' तादृशविशेषणविशिष्ट व्याप्तिद्वयाभाववत्वं' एतन्मतेच पूर्वलक्षणे साध्याभाववद्वृत्तित्वघटिताया उतरत्रच तद्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दन्यावृत्तित्व घटितताया व्याप्ते रनुप्रवेशा ल्लक्षणयोर्भेदः स्वव्यापकसामानाधिकरण्यरूप व्याप्तेरभावो निवेशयितु मशक्यः। स्वत्व घटित तया हेतुभेदेन भेदात्। साधारणहेतुकस्थले तदप्रसिद्ध्याअभावग्रहासंभवात् (१) शिरोमणिव्याख्यायां च तादृशव्याप्ते रप्रसिद्धावपि तद्घटकपदार्थानां परस्परोपश्लेषावगाहिज्ञान (२) विरोधिताया एव निवेशनेनानुपपत्यभावा द्व्यापकसामानाधिकरण्य मिह व्याप्यत्व मित्युक्तत्वात्। एवमेतन्मते दुष्टलक्षणपर एवायंग्रंथः नतु दोषलक्षणपरोपि तादृश व्याप्ति द्वयशून्यत्वस्य व्यभिचार पदार्थत्वाभावा दित्यवधेयं। तच्चिंत्यमिति। चिंताबीजं वा साधारण्यशरीरे तत्तत्पुरुषीय निश्चय निवेशस्यावश्यकतया सामान्यलक्षणे पुरुषविशेष नियंत्रितत्वं नचेष्टापतिः। तथासति साधारणहेतावप्य साधारणहेतुवदमुकं प्रत्ययं व्यभिचारीतिव्यवहारप्रसंगात्। एवं सव्यभिचारपदस्य पारिभाषिकत्व मपि तथेति। इतरभेदानुमाने वैय्यर्थ्य संभवे असाधकत्वानुमाने वैय्यर्थ्य परतया व्यर्थ विशेषणत्वा दिति मूलव्याख्यान मनुचित मित्याशयेन इतरभेदानुमाने वैय्यर्थ्यपरतयैव मूलं व्याचष्टे। व्यर्थेती ति। विरोधादे रित्यादिना अवृत्तित्वपरिग्रहः। साध्याभावेत्यादीति। साध्याभावव्याप्तिग्रहविरोत्वं वृत्तिमत्वग्रहाविरोधित्वं चेत्यर्थः। तस्य। विरोधादेः पार्थक्यं व्यभिचारपदार्थवन्हिर्भूत त्वं। मानाभावादिति। तथाच विरोधादेरपि व्यभिचारपदार्थरूप पक्षेतरभेदसत्वेन तद्व्यावर्तकविशेषणानवच्छिन्नस्यैव इतरभेदानुमापकत्व संभवादितिभावः। हेत्वा भासपदस्यान्यथाव्याख्यानात्दुष्टहेतुत्वरूप हेत्वाभासत्वस्य लक्षणाघटकत्वात् प्रथममित्यादि दूषणस्यासंगतिः एवं गगन मनित्यं शद्बाश्रयत्वादित्यादौ हेतोः साध्याभावव्याप्यत्वेपि साध्याभावव्याप्तिग्रहविरोधि दर्शितधर्मवत्वं तत्राक्षत मेवेति तत्राव्याप्तिदान

(१) टिप्पणी—व्याप्त्यभाव ग्रहा संभवात्।

(२) टिप्पणी—निरूप्य निरूपक भावा पन्न विषयता शालि ज्ञानं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मप्यसंगत मतो यथाश्रुतार्थे तादृशदोषद्वयं संगमयति । प्रथममिति । एकमात्रसपक्ष विपक्षस्थले सर्व सपक्षाद्यप्रसिद्धिरित्या-
शंक्य व्याचष्टे । सपक्षेति । सपक्षवृत्तित्वत्वावच्छिन्नाभावो विपक्षवृत्तित्वत्वावच्छिन्नाभावश्चेत्यर्थः । सर्वतद्व्यावृत्तत्वं । सर्वसप-
क्षविपक्षव्यावृत्तत्वपदार्थः । तावतैव यत्किंचित् सपक्षविपक्षव्यावृत्तयो (१) र्व्याप्यविरुद्धयो र्ना तिव्याप्त्यवकाश इतिभाव: । सपक्ष-
सत्व विपक्षव्यावृत्तयो विरूद्धस्या तिव्याप्तिवारकतया सार्थक्यं संभवत्येवे त्याशंक्य दूषकतानुपयोगित्वरूप वैयर्थ्यपरतां व्यर्थ-
विशेषणत्वादितिमूलस्याह । सपक्षेति । व्याप्यविरूद्धयोरिति । शद्बोऽनित्यः शद्बत्वादित्यादौ व्याप्यस्य हेतोः साध्यवन्मात्र वृत्ति-
त्वेपि पक्षेपिवृत्तेः पक्षातिरिक्त साध्यवन्मात्रवृत्यन्यत्व मक्षतमेव एवं शद्बो नित्यः शद्बत्वादित्यत्र विरूद्धस्य हेतोः साध्याभा-
ववन्मात्रवृत्तित्वेपि पक्षेपि वृत्तेः पक्षातिरिक्त साध्याभाववन्मात्रवृत्यन्यत्व मक्षतमेवेति द्वयोः संग्रह इतिभावः पक्षातिरिक्ते-
त्यत्र पक्षपदस्य तत्तद्धर्मिमात्रपरत्वे पक्षे साध्य साध्याभावान्यतरनिश्चयदशायां शद्बोनित्यः शद्बत्वादित्यादावतिव्याप्तिः ।
सिद्ध्यभावरूप पक्षताविशिष्टपरत्वे पक्षे सिद्धिदशायां तत्र विशिष्टा तिरिक्तत्व सत्वोपगमात् अतिरिक्तांतस्य पक्षताशून्यपरत्वो
पगमा द्वा अतिप्रसंग वारण संभवेपि शद्बोऽनित्यशद्बत्वादित्यादौवाधानिश्चयदशायामतिप्रसंगोदुर्वारः । एवं सिद्धिवाधान्यतरा
भावरूप पक्षताविवक्षणे च गौरवमतः संशयरूप पक्षतापरतया व्याचष्टे । पक्षत्वमिति । संदिग्धसाध्यकत्वं विषयतासंबंधेन
साध्यसंदेहविशिष्टत्वं कालांतरीण संशयविषयेष्वपि संशयरूपविशेषणासत्वदशायांतद्विशिष्टभेदउपगम्यते अतिरिक्तांतंवा पक्ष-
ताशून्यपर मतः साध्यादिनिश्चयदशायां नातिप्रसंगः । यदापक्षेसाध्यतदभावयो र्न निश्चयो नापिसंशय स्तदा शद्बोऽनित्यःश-
द्बत्वादित्यादे र्नासाधारण्यं किंतु यथायथं सद्धेतुत्वंविरुद्धत्वंचेति नाव्याप्तिप्रसंगइतिभावः । पक्षातिरिक्तवृत्तिर्यत्साध्यतदभावव-

(१) टिप्पणी—सपक्ष विपक्ष वृत्तिता प्रतियोगिका भाव वतो रित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मात्रवृत्तितदन्यत्वार्थकत्वे वन्हिमाधूमादित्यादौ नातिव्याप्तिसंभवः भेदप्रतियोगितावच्छेदकघटकदलद्वयस्यैव तन्नसत्वेन विशिष्टभे-
दासत्वादतः पक्षातिरिक्तत्वस्य साध्यादिमद्विशेषणत्वाभिप्रायकतया मूलंसंगमयति। धूमेत्यादीति। यथाश्रुते पक्षातिरिक्तो यः सा-
ध्यादिमां स्तन्मात्रवृत्तिभिन्नत्व मित्यर्थे सप्तमीसमासादित्यर्थेनतुदूषणमितियोजना सप्तमीसमासलभ्येएतादृशार्थेन दूषण मित्यर्थः।
न्हदोधूमवान्वन्हेरित्यादिसाधारणे शद्बोनित्यः शद्बत्वादित्यादा वसाधारणेच यथाश्रुतलक्षणस्या व्याप्तिंव्याचष्टे। पक्षवृत्तीत्यादिनापि-
क्षवृत्तित्वस्य साध्यसमानाधिकरण्यस्यच योग्रहस्तदविरोधीत्यर्थः। अनुमितेरौपयिकस्येति समासेनलिखनंजनकज्ञान विषयेत्यस्य समु-
दायव्याख्यानतायामेव संभवतीत्यतो व्यासेनलिखनं। सपक्षसत्वादेर्न्नानुमितिजनकत्वं अपितु तज्ज्ञानस्यैवेत्यौपयिकपदस्य जनका-
र्थत्वं नसंभवतीत्यतोऽव्याचष्टे जनकज्ञानविषयस्येति। सपक्षसत्वादेरित्यादिना विपक्षासत्वपरिग्रहः तेनद्रव्यंसत्वादित्यादौ सपक्षस-
त्वाभावासत्वेपि विपक्षसत्वादेव लक्षण समन्वयः नन्वत्रासाधारण्ये ऽव्याप्ति स्तस्यसपक्षव्यावृत्तत्वघटिततया साध्यवद्वृत्तित्वान्य-
विरोधित्वादित्यतआह। सपक्षविपक्षव्यावृत्तत्वस्यचेति चस्त्वर्थे सपक्षत्वं निश्चितूसाध्यवत्वं पक्षेपक्षांतर्भावेन तस्य असाधारण्यस्य
ज्ञान विरोधित्वं सामानाधिकरण्यज्ञानविरोधित्वं साध्यवद्वृत्तित्वसामान्याभावज्ञानमेव साध्यसामानाधिकरण्यसामान्यज्ञानाविरोधी
नतु तद्विशेषाभावात्मक सपक्षव्यावृत्तत्वज्ञानमपीतिभावः। अथात्र विरुद्धहेतवो यद्यलक्ष्या स्तदा सपक्षवृत्तित्वाद्यभावादिक मा-
दाय सर्वेषु तेष्वतिव्याप्तिः तेषां लक्ष्यत्वे साध्यसामानाधिकरण्यग्रहाविरोधित्वोपादान मनर्थक मितिचेन्न। दुष्टहेतुलक्षणे विरुद्धा-
लक्ष्या एव उक्तविशेषणोपादानेच दोषलक्षणे विरोधातिव्याप्ति वारणायैवसपक्षविपक्षव्यावृत्तत्वस्या साधारण्यस्येत्यत्र विपक्षपदं
संपातायातमित्यवधेयं। अत्रच यद्रूपविशिष्टविषयकत्वेना नुमिति जनकता तद्रूपावच्छिन्नाभावो ऽवश्यं विवक्षणीयः। अन्यथा
सपक्षसत्वादे र्द्वित्वावच्छिन्नाभाव मादायातिप्रसंगापातात्। एवंच निश्चितसाध्यवद्वृत्तित्वत्वावच्छिन्नाभावा संग्रहः निश्चयांश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानस्या नुमित्यहेतुतया तद्घटित तादृशविशिष्टविषयतावत्त्वेना नुमिति हेतुत्वाभावात् । येनकेनापिरूपेण यद्रूपाश्रयनिरूपितविषयितावत्वेना जनकताविवक्षणेच द्वित्वावच्छिन्नाभाववारण मशक्यमेवेति दूषणमशक्यसमाधान मित्यवधेयं उपदर्शित साधारणासाधारणयोः संग्रहाय मिश्राअन्यथैवैतल्लक्षणं व्याचक्षते तदुपन्यस्यति पक्षवृत्ताविति । पक्षावृत्तित्वंच नपक्षवृत्तौविरोधश्च नविरुद्धभिन्नेवर्तत इति न पर्वतोवन्हिमान्महानसत्वात् न्हदत्वाद्वा इत्यायोः स्वरूपासिद्धविरुद्धयो रतिव्याप्तिः सपक्षविपक्षवृत्तित्वं तद्व्यावृत्तत्वंच पक्षवृतौ विरुद्धभिन्नेच वर्ततइति तदादाय उपदर्शितसाधारणासाधारणयोः संग्रहः। एतत्कल्पेपि पूर्ववद्विरुद्धालक्ष्या एव विरोधस्य व्यभिचारता वारणायैव विरुद्धान्यवृत्तित्वो पादान मेवेत्यवधेयं अत्रच हेतुतावच्छेदक संबंधेन पक्षवृत्तित्वविवक्षण मावश्यक मन्यथा हेतुतावच्छेदकसंबंधेनपक्षावृत्तेरपि येनकेनचित्संबंधेन पक्षवृत्तितया स्वरूपासिद्धेरपि पक्षवृत्तितया तद्वारणसंभवात् । एवंच हेतुतावच्छेदकसंबंधेनपक्षवृत्तित्वं यत्राप्रसिद्धं तादृश व्यभिचारिण्यव्याप्तिः । एवंगगने साध्यनिश्चयदशायां घटः शब्दवान्घटत्वादित्यादौ असाधारण्येऽव्याप्तिः सपक्षव्यावृत्तत्वस्य विरुद्धएव वर्तमानत्वादित्यस्वरसः कश्चिदित्यनेनसूचितः । ननु पूर्वपक्षयथोक्त लक्षणावलंबनेन सिद्धांतप्रणयनमसंगतं तत्तद्दोषाणां जागरूकत्वादित्याशंकांनिराकरोति । पूर्वोक्तेति । यथामतमिति । यद्यन्मतमालंव्ययद्यल्लक्षणमाभिहितं तत्तन्मतेतत्रतत्रनाव्याप्त्यादि संभावनेत्यर्थः । तत्रासाधारण्यस्य साधारण्यस्यच संशायकतामते प्रथमलक्षणं व्याप्तिग्रहादिविरोधितामतेच तादृशविरोधिताघटितलक्षणं तेन विरोधित्व घटितलक्षणेलक्ष्येविरुद्धे संशयप्रयोजकस्य सपक्षवृत्तित्वघटितसाधारण्यस्य विपक्षव्यावृत्तत्वघटितासाधारण्यस्यच विरहेपि प्रथमलक्षणस्यनाव्याप्तिः प्रथमलक्षणालक्ष्ये तत्र विरोधिताघटितलक्षणस्यवा नातिव्याप्तिरितिभावः । तेषां कोटिद्वयोपस्थापकतावच्छेदकत्वादिरूपानुगतधर्मावच्छिन्नानां तादृशरूपाद्यात्मकलक्षणानां हेत्वाभासतावच्छेदकत्वं । अनुमितिप्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बंधकतायां विषयतयाऽवच्छेदकत्वं विभागमात्रेति मात्रपदेनदुष्टत्वव्यवहारव्यवच्छेदः। दुष्टत्वव्यवहारनियामकोऽनुमितिप्रतिबंधकतावच्छेदकधर्मएव विभाजकइतिनियमे मानाभावादितिभावः। नन्वत्रलक्षणे पक्षधर्मतापदानुपादाना न्नित्यत्वादिसाध्यकस्थले कोटिद्वयोपस्थापकसाधारणधर्मवत्ताज्ञानविषयीभूते द्व्यणुकादौ अतिव्याप्तिरित्याशंकां निराचिकीर्षु रभिप्रायंवर्णयति संदेहमित्यादिना एवकारेण कोटद्युपस्थितौतादृशरूपेणहेतुताव्यवच्छेदः तादृशधर्मेति साधारण्यादिविशिष्टधर्मेत्यर्थः। मात्रपदेन धर्मिविषयकत्वस्य कोटिद्वयोपस्थितिजनकतावच्छेदकघटकत्वव्यवच्छेदः तथाच कोटिद्वयोपस्थितिजनकतावच्छेदकीभूता या विषयता तदवच्छेदकधर्मवत्त्वं नोक्तस्थलेद्व्यणुकादौ अणुत्वादिविषयतायाएव तथात्वादिति नातिव्याप्तिरितिभावः। अथैतन्मते संशयंप्रतिसाधारणधर्मवद्धर्मिज्ञानत्वेनहेतुताया आधिक्यात् (१) गौरवमिति चेन्न भवन्मतेपि कोटिद्वयोपस्थितिंप्रति तेनरूपेणहेतुतायाआधिक्यात् संबंधिहस्त्यादिविशेष्यकज्ञाना द्धस्तिपकादिस्मृतेरिव तत्कोटिसहचरितधर्मविशेष्यकज्ञानादपि तत्कोटिस्मृते र्निर्विवादतया साधारणधर्मविषयकज्ञानत्वेन कोटद्युपस्थितिहेतुताया उभयवादिसिद्धत्वात्। तस्मात्कोटद्युपस्थितौ साधारणधर्मवद्धर्मिज्ञानत्वेन संशयंप्रतिच साधारणधर्मवद्धर्मिज्ञानजन्यकोटद्युपस्थितित्वेनहेतुत्वमिति पूर्वपक्षलक्षणोपष्टंभकमतापेक्षया संशयंप्रति साधारणधर्मवद्धर्मिज्ञानत्वेन साधारणधर्मज्ञानजन्यकोटद्युपस्थितित्वेनच हेतुतामतमेवसयुक्तिकं अथास्तुकोटद्युपस्थितौ साधारणधर्मज्ञानत्वेनैव हेतुता तथापि संशयेधर्मिभाननियमाय तत्रसाधारणधर्मवद्धर्मिज्ञानत्वेनहेतुत्वमफलं कोटद्युपस्थितेः संशयहेतुतायां साधारणधर्मज्ञानजन्यत्वनिवेशस्थाने साधारणधर्मवद्धर्मिज्ञानजन्यत्व निवेशनादेव तन्नियमोपपत्तेः। स्वतंत्रकारणताकल्पनापेक्षया क्लृप्तकारणताया मवच्छेदकगौरवस्यैवोचितत्वात् नच धर्मिज्ञानस्य संशयेसाक्षाद्धेतुताया अपिक्लृप्तत्वात्तत्रसाधार-

(१) टिप्पणी—तदति रिक्त कारणत्व कल्पना दित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णधर्मप्रकारकत्वमात्रं निवेश्यत इतिनास्माकमपि स्वतंत्रकारणताकल्पनं' मानसेपि विप्रतिपत्तिवाक्याधीनसंशये कोट्योरिव धर्मिणोपि पदजन्यैवोपस्थिति: कारणमिति पदजन्यत्वेनधर्मिज्ञानस्य विप्रतिपत्तिजन्यसंशये पृथक्कारणतायाआवश्यकत्वा त्तदन्यसंशयकारणतायां साधारणधर्मादिविषयकत्वांतर्भावेवाधकाभावादितिवाच्यं 'संशये साधारणासाधारणधर्मवद्धर्मिज्ञानत्वेन हेतुताद्वयस्य तादृशधर्मज्ञानजन्यकोट्युपस्थितित्वेन हेतुताद्वयस्यच कल्पनापेक्षया तादृशतादृशधर्मविषयकत्वमनंतर्भाव्य धर्मिज्ञानहेतुताया स्तादृशतादृशधर्मवद्धर्मिज्ञानजन्यकोट्युपस्थितित्वेन हेतुताद्वयस्यच कल्पनास्फुटतरलाघवात्' नैवं 'कोट्युपस्थितिकारणतायां तत्तत्कोटिसहचरितधर्मवद्धर्मिविशेषविषयकज्ञानजन्यत्वनिवेशे धर्मभेदेनगुरुधर्मानवच्छिन्नकारणताया आनंत्यापत्ते स्तदपेक्षया धर्मिविशेषमनंतर्भाव्य तत्तत्कोटिसहचरितधर्मज्ञानजन्य कोट्युपस्थितित्वेन धर्मिविशेष मंतर्भाव्य साधारणधर्मवद्धर्मिज्ञानत्वेन लघुशरीरेण हेतुत्वस्यच कल्पयितु युक्तत्वात्' नचोपस्थितिकारणतावच्छेदकशरीरे धर्मिणोऽनंतर्भावेपि कार्य्यतावच्छेदकीभूत संशयत्वस्य धर्मिविषयताघटितत्वात् कोट्युपस्थिते धर्मिभेदेनकारणताभेद आवश्यकइतिवाच्यं' संशयत्वशरीरे धर्मिविशेषविषयताया विशेष्यतात्वेन किंचित्धर्मावच्छिन्नविशेष्यतात्वेनैव वासामान्यतोनिवेशनीयतया धर्मिभेदेनकारणताभेदानावश्यकत्वादितिदिक्। पूर्वलक्षणोक्तातिप्रसंगवारणाय साध्यसंदेहजनकत्वस्य कोट्युपस्थितिविशेषणताया आवश्यकत्वा त्तदुपस्थापकपदानुपादाननिबंधनं तदनिवेशभ्रमं निराकुरुते। साध्यसंदेहेति' सर्वत्रप्रकरणवशा त्सामान्यशब्दस्याविशेषपरतयाप्राप्तं तथाच साध्यसंदेहजनिका या साध्योपस्थिति स्तज्जनकतावच्छेदिकासती तथाविधसाध्याभावोपस्थितिजनकतावच्छेदकीभूता या विषयता तदवच्छेदकतापर्य्याप्त्यधिकरणधर्मवत्वं तत्वमिति पूर्वोक्तदिशा लक्षणार्थोनिष्कर्षयितव्य:' वन्हिसाहचर्य्य वन्ह्यभाववद्व्यावृत्तत्वावच्छिन्न धूमादिविषयतायाः पूर्वोपदर्शितरीत्या तथाविधसाध्यसाव्याभावोपस्थितिजनकतावच्छेदकत्वेपि तामा-

यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दायातिप्रसंगः पूर्ववदेववारणीयः' समवायादिघटितसाधारण्यमादाय संयोगादिना धूमादेर्वन्ह्यादिसाध्यक सव्यभिचारतावार-
णाय प्रकृतहेतुतावच्छेदक संबंधेनयत्साध्यवद्वृत्तित्वं साध्याभाववद्वृत्तित्वंच तद्घटितत्वेन विषयतावच्छेदकधर्मोविवक्षणीयः' असा-
धारण्यशरीरेप्यभावप्रतियोगितया तेनसंबंधेन साध्यादिमद्वृत्तित्वनिवेशा न्नतदसंग्रहः' साधारणधर्मवद्धर्मिज्ञानसत्वे उद्बोधकांत-
राधीनकोटिस्मरणा दनुभवात्मककोट्युपस्थितेश्च संशयोपगमे क्षतिविरहात् विशेषणज्ञानादिमुद्रया कोट्युपस्थितिहेतुतयैवोपपत्तेः
साधारणधर्मज्ञानजन्यकोट्युपस्थितित्वेन स्वतंत्रहेतुताकल्पनमनर्थकमिति व्याख्यातकल्पे साध्यसंदेहजनकत्वरूप कोट्युपस्थि-
तिविशेषणस्याव्यावर्तकतया बिलक्षणजनकतायाश्चासत्वेन निवेशनासंभवा दुक्तातिप्रसंगो (१) दुर्वारएवे त्यभिप्रेत्य तादृशानिष्कृष्टमते
प्रकारांतरेण लक्षणंव्याचष्टे' यथाकथंचिदिति' साधारणधर्मज्ञान जन्यातदजन्यावेत्यर्थः' विशेषणज्ञानादिमुद्रया कृप्तकरणतातएव
निर्वाहो नतु स्वातंत्र्येण तद्धेतुत्वमितिसूचयितुं' स्मृत्यनुभवसाधारण्येति' नन्वेवं साधारण्यादिविशिष्टधर्मवत्ताज्ञानसमकाले कथं-
नसंशय इत्यत आह' नियामकमिति' नियामके तादृशधर्मदर्शनदशायामेव संशयइति नियमनिर्वाहके साधारण्यादीत्यस्य साक्षात्सं-
शयहेतुभूतमित्यादिः' आदिपदादसाधारण्यपरिग्रहः' अनुभवसाधारण्याः कोट्युपस्थितेर्हेतुत्वादेव' धारावाहिसंदेहः' अविरल-
क्रमोत्पन्न संदेहत्रितयादिकं' साधारणधर्मज्ञानजन्य कोट्युपस्थितित्वेन संशयहेतुत्वे स्मरणात्मककोट्युपस्थितेरेव तथात्वात्
साधारणधर्मविषयकज्ञानजन्यकोट्युपस्थित्या संशयद्वयजननसंभवेपि संशयांतरोत्पत्तौ तथाविध स्मृत्यात्मकोपस्थित्यंतरस्या
पेक्षणीयतया अविरलक्रमोत्पन्नसंशयत्रितयादिकं नोपपद्यते' एतन्मतेतु संशयात्मककोट्युपस्थित्यादेरपि संशयान्तरोत्पादकत्वाद-
संभवेनांतरा कोटिस्मरणानपेक्षणा त्साधारणधर्मविषयक द्वितीयादिसंशया त्तदग्रिमक्षणेषु संशयांतरोत्पादे वाधका भावः तथा-

(१) टिप्पणी—अयं नियो ज्ञाना दियादौ ज्ञाने। ॥ इति गंगाधर कृत टिप्पणी समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गादा० ३७

ज १ = त्मककोटिज्ञानस्यापिसाधारणधर्मतया ज्ञानजन्यतयानार ज १

स्मृतेपि संशया निष्ठतादृशज्ञानजन्यतयो रननुगततया स्मृतिनिष्ठजन्यतायाएव निवेशनीयतया ऽवान्तर) कोटिस्मृतिंविनैव संशयांतरोत्पादः संभवतीतिवाच्यं । अवच्छेदकभेदेनभिन्नयोः स्मृति संशयनिष्ठतादृशज्ञानजन्यतयो रननुगतायाः स्मृतिनिष्ठजन्यताया एवमनिवेशनयितया स्मरणापेक्षाया आवश्यकत्वादितिभावः' स्वसामानाधिकरण्यावच्छिन्न स्वाव्यवहितोत्तरत्वसंबंधेन साधारणधर्मज्ञानविशिष्टोपस्थितित्वेन हेतुत्वोपगमेपि संशयादपिसंशयः संभवती तिगौरवमेवोपस्थितेः स्वतंत्रहेतुतायां वाधकमित्यवधेयं । धर्मितावच्छेदकेति । धूमवानूपर्वतो वन्हिमान्नवेतिसंशये धर्मितावच्छेदकप्रकारकज्ञानमुद्रया पर्वतत्वाद्यवच्छिन्नविशेष्यक धूमत्वादिविशिष्टवत्ताज्ञानस्य जनकतया धूमत्वादिमत्वमादाया तिप्रसंगवारणाय धर्मितावच्छेदकविशिष्टेति' धर्मितावच्छेदकपदं फलीभूतसंशयधर्मितावच्छेदकतापर्य्याप्त्यधिकरणधर्मपरं' अन्यथापर्वतत्वादेरपि दर्शित संशयधर्मितावच्छेदकघटकतया उक्तातिप्रसंगवारणासंभवात् । एवंच तद्धर्मपर्य्याप्तधर्मितावच्छेदकताक यत्किंचित् संशयनिरूपितायां जनकताया मवच्छेदकीभूताया तद्धर्मनिष्ठ धर्मितावच्छेदकतानिरूपकप्रकारता तन्निरूपितावच्छेदकता पर्य्याप्त्यधिकरणधर्मवत्वमिति प्राङ्निरूक्तोर्थः पर्य्यवसित:' तेन सत्तावानूजातेरित्यादौ सत्ताभाववत्समवेतत्वा प्रसिद्ध्या यद्रूपपदेन सत्तावत्समवेतत्व मात्रोपादानसंभवे नातिव्याप्तिरितिपरास्तं । वक्तव्यंव्याख्येयं' एवंच मूलस्थमुभयकोट्युपस्थापकपदं संशायकार्थ मित्यभिप्रायः' मूलमुपेक्ष्य निष्कृष्टमते स्वातंत्र्येणैवैतल्लक्षण मितिकेचित्' प्राचीनास्तु साधारण्याद्यवच्छिन्न प्रकारताशालिज्ञानत्वेन नसंशयजनकता' पुरुषत्वतदभावसहचरितत्वेन यदाकदाचित् ज्ञानस्यो र्ध्वत्वादे रूर्ध्वत्वत्वादिमात्रेण ज्ञानादप्ययं पुरुषोनवेति संशयात्' किंत्वनुद्बुद्धसंस्कारान्य साधारण्यादिप्रकारक विशिष्टधर्मिज्ञानत्वेनैव' साधारण्यादिप्रकारकत्वंच संस्कारज्ञानसाधारणं' अत स्तत्प्रकारकज्ञानासत्वेपि तज्जन्य तथाविधसंस्कारविशिष्टोर्ध्वत्वादिज्ञानात् संशयनिर्वाहः' वैशिष्ट्यंच स्वविशेष्यतावच्छेदकावच्छिन्नप्रकारताकत्व ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसामानाधिकरण्योभयसंबंधेन 'अत एकधर्मावच्छिन्नविशेष्यक साधारण्यादिप्रकारकज्ञानादिसहितात् अपरधर्मावच्छिन्नप्रकारकधर्मिज्ञाना न्नसंशयः' ईदृशापत्तिवारणायैव एकविशिष्टापरस्य हेतुतास्वीक्रियते नतूभयोः पृथक्कारणता' एकविशिष्टापरत्वेन हेतुत्वे विशेष्यविशेषणभावे विनिगमनाविरहेणकारणताद्वयमात्रं' पृथक्कारणतामतेतु एकधर्मावच्छिन्नविशेष्यक साधारण्यादि प्रकारकज्ञानादिसहिता दन्यधर्मावच्छिन्नप्रकारक धर्मिज्ञाना त्संशयापत्ते स्तत्तद्धर्मावच्छिन्नविशेष्यक साधारण्यादिप्रकारकत्वेन तत्तद्धर्मावच्छिन्नप्रकारकधर्मिज्ञानत्वेन च हेतुताकल्पनमंतरेण दुर्वारतया तादृशहेतुतास्वीकारे ऊर्द्धत्वत्वादिरूप विषयतावच्छेदकानंत धर्मभेदेन हेतुताया आनंत्यंस्यादितिवदंति' तन्मते यथाव्याख्यातलक्षणे शुद्धधूमत्वाद्यवच्छिन्नप्रकारताया अपि वन्ह्यादिसंदेहजनकतावच्छेदकत्वात् शुद्धधूमत्वादिकमादायातिप्रसंगवारणमशक्यमिति तन्मते कल्पांतरमाह कोटिद्वयेति' ऊर्द्धत्वत्वादिनेत्यस्य केवलेनेत्यादिः' तदानीं' संशयप्राक्काले' यद्रूपेति' यद्रूपप्रकारक विशिष्टत्वेन यत्किंचित्संशयजनकता तद्रूपवत्वमित्यर्थः' यत्किंचित् संशयजनकतावच्छेदकतावच्छेदकत्वनिरूपिताया निरूपकत्वसंसर्गावच्छिन्नावच्छेदकता तदाश्रयविषयता पर्य्याप्त्यधिकरणधर्मवत्वं यत्किंचित्संशयजनकतावच्छेदकतावच्छेदक वैशिष्टयघटक विशेष्यतानिरूपितप्रकारता पर्य्याप्त्यधिकरण धर्मवत्वमिति वा पर्य्यवसितार्थः' तच्चेत्यादिमूलग्रंथः साधारण्यासाधारण्य रूप संशयप्रयोजकरूपमादाय लक्षणसंगमनपरः' तत्र यादृशासाधारण्यस्य संशयप्रयोजकत्वं विचारसहं तत्सद्धेतुसाधारणमिति दोषेण लक्षणान्तरमुत्थापयितुं तादृशग्रंथं धारयति 'तच्चेत्यादीति' असाधारण्यं' संशयप्रयोजकीभूतासाधारण्यपदार्थः' वृत्तिमतइति' तथाच शब्दोनित्यः शब्दत्वादित्यादावसाधारण्योऽव्याप्ति रितिभावः' ननु वृत्तिमतो ना साधारण्य मुपगंतव्यं किंत्ववृत्तेरेवेति नैतद्दोषावकाश इत्यतआह' एककोटीति' व्याप्यस्य' व्याप्यतयागृहीतस्य' व्यावृत्तस्य' तदवृत्तित्वेनगृहीतस्य' एतेन एककोटिमद्व्यावृत्तस्यैक कोटिव्याप्यताया आवश्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कत्वेपि नभेदघटितइवा र्थासंगतिः तद्दवृत्तित्वंच न तदभावव्याप्यत्वं तच्छरीरे तदभावाभावत्वेन तस्यानिवेशा दित्यवधेयं विशेषदर्शनतया विरोधिधर्मदर्शनतया संशयविरोधित्वादिति पुरुषत्वाभावाभाववदवृत्तिशाखादि मानयमित्याकारकनिश्चयदशाया मिव पुरुषावृत्तिशाखादिमा नित्यादिनिश्चयदशायामपि पुरुषत्वादिविशिष्टबुद्ध्यनुत्पादस्य सर्वानुभवसिद्धत्वात्त द्विशिष्टबुद्धौ तद्दवृत्तित्वेन गृहीतधर्मवत्ताज्ञानस्य प्रतिबंधकताया आवश्यकत्वादितिभावः तथाच निरूक्ता साधारण्यविशिष्टधर्मवत्ताज्ञानस्य संशयप्रतिबंधकतया संशयजनकत्वासंभवा त्कथं तादृशासाधारण्यस्य संशयप्रयोजकता नच तादृशज्ञानस्य संशयप्रतिबंधकत्वेपि तज्जन्यकोट्युपस्थितेः संशयजनकत्वं संभवत्येव तन्नाशानंतरं तज्जन्यकोट्युपस्थित्या संशयजननसंभवात् असाधारणधर्मवद्धर्मिज्ञानस्य बाधकत्वा त्साक्षाद्धेतुत्वासंभवेन तज्जन्यकोट्युपस्थितित्वेन हेतुतायां गौरवस्याकिंचित्करत्वादितितादृशकार्यकारणभावघटितलक्षणपरतयैव मूलं व्याख्येयमिति वाच्यं अयेनिर्वाच्यस्या साधारण्यस्यबुद्धेः संशयाविरोधितया तज्ज्ञानस्यैव साक्षात्संशयजनकत्वसंभवेन गौरवा दुक्तरूपेण कोट्युपस्थिते रहेतुत्वात् कोटिस्मृतिजनकताघटितलक्षणस्या संभवा त्संशयजनकताघटितलक्षणकरणे च तादृशासाधारण्यमादाय व्याप्यविरुद्धयो रतिव्याप्तिः ननु सत्प्रतिपक्षसंबलनदशायामिव कोटिद्वयवद्व्यावृत्तधर्मवत्ताज्ञानदशायामपि संशयोत्पत्तिरनुभवसिद्धैवेति तदभाव व्याप्यवत्ताज्ञानप्रतिबंधकतायां तद्व्याप्यवत्ताज्ञानस्येव तत्कोटिमदवृत्तिधर्म्मवत्ताज्ञानप्रतिबंधकताया मपि तदभाववदवृत्तिधर्मवत्ता ज्ञानस्योत्तेजकत्व मगत्या कल्पनीय मिति कोटिद्वयवद्व्यावृत्तधर्मवत्ताज्ञानस्य संशायकत्व मव्याहतमेव येनरूपेणप्रतिबंधकता तेनैवरूपेण जनकत्वानभ्युपगमादित्यतआह। सत्प्रतिपक्षइति । विरोधिकोटिद्वयव्याप्यवत्ताज्ञानसमयइत्यर्थः परामर्शेप्रामाण्यसंशयेति। तथाच तुल्ययुक्त्या प्रकृतेपि तत्तत्कोटिमदवृत्तित्वविशिष्टवत्ताज्ञाने प्रामाण्यसंशयादेव संशयः स्वीक्रियतइति नैककोटिमद्व्यावृत्तधर्मवत्ताज्ञानप्रतिबंधकताया मपरको- ३८

CC-0. In Public Domain. Digitization by eGangotri

टिमद्व्यावृत्तधर्मवत्ताज्ञानस्योत्तेजकत्वं प्रामाणिक मप्रामाण्यज्ञानोत्तेजकतयैवोपपत्ते:' अप्रामाण्यज्ञानानास्कंदितस्यैव ज्ञानस्य जनकतया निरुक्तासाधारण्यस्य बुद्धे र्जनकत्वोपगमे प्रतिबंधकतावच्छेदकरूपेणैव जनकताप्रसंगइतिभाव ! निश्चित्साध्यतदभाव-वद्व्यावृत्तत्वमिति आसाधारण्यमित्यनुषज्यते येनयेनरुपेणेति यद्यद्रूपंधर्मितावच्छेदकीकृत्येत्यर्थ: (१) तेनतेनरूपेण तत्तद्व्यावृत्तत्वं तत्तद्धर्मविशिष्ट तत्तद्धर्मिव्यावृत्तत्वं 'प्रमेयत्वादिसामानाधिकरण्येन घटादौ साध्यादिनिश्चयदशायामपि शब्दोऽनित्य: शब्दत्वादि-त्यादा वसाधारण्यसत्वा द्धर्मिनिवेश: प्रथमपक्षे वक्ष्यमाणाया निर्द्धर्मितावच्छेदकक साध्यनिश्चयविषयवृत्तिहेतो रसाधारण्यानुपप-त्तेर्वारणायघटत्वादिना साध्यादिनिश्चयदशायां रूपांतरावच्छिन्न घटादिव्यावृत्तत्व ज्ञानात्संशयापत्तिवारणाय च धर्मितावच्छेद-कनिवेश: साध्यव्याप्यवत्वेन पक्षातिरिक्तमात्रविषयक निश्चयदशाया मसाधारण्यानुपपत्त्यनवकाशात् पक्षस्यापि निश्चयविषयत्व माविष्कर्तुं सर्वाणीति । सर्वपदेन सर्वत्वावच्छिन्नोद्देश्यताकवोध: केवलान्वयि सर्वत्वाद्यवच्छेदेन विधेयविषयकएव जन्यतइति तथाविधवोधस्यैव सर्वाणि साध्यवंती त्याकारकता तथाच विशिष्यपक्षे साध्यनिश्चयदशायामिव साध्यसंदेहविरोधिन: सर्वाणि-साध्यवंतीति निश्चयस्य सत्वे प्यसाधारण्याभावस्येष्टत्वा त्साध्यव्याप्यवंतीति तथाचै तादृशनिश्चयदशायां विशिष्यपक्षे साध्यसंदे-हस्या निवृत्ते स्तादृश निश्चयस्य ना साधारण्यक्षतिकारकत्व मितिभाव: प्रथमपक्षे धर्मितावच्छेदकानिवेशा त्सामान्यधर्माव-च्छिन्नधर्मिकं विशिष्य संशयानिवर्तकं निर्णयमिव निर्द्धर्मितावच्छेदकतया अप्रसक्तसंशयनिवर्तकताक निश्चयमादायापि दोष-दानं संभवतीतिनिर्द्धर्मितावच्छेदकतया अप्रसक्तसंशयनिवर्तकताक निश्चयमादायापि दोषदानं संभवतीत्य भिप्रेत्याह सर्वाणिवेति

(१) टिप्पणी—धर्मिता निरूपिता वच्छेदकतात्वा वच्छिन्नप्रतियोगिताक पर्य्याप्तनुयोगिता वच्छेदकं यद्यद्रूपं तत्तद्रूपविशिष्ट यद्य द्धर्मिणिसाध्यादि-मत्ता निश्चय स्तत्तद्धर्म्मावच्छिन्न धर्म्मिवृत्त्यसंताभावप्रतियोगिता वच्छेदक धर्म्मवत्व मसाधारण्य मितियावत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्ववत्साध्यवत्वेन पक्षस्यापि निश्चयविषयत्वं स्फुटीकर्तुं सर्वाणीति। साध्यवत्वावच्छिन्ने सर्वत्वविधेयकस्य साध्यवंति सर्वाणी-
त्याकारकज्ञानस्य पक्षाविषयकस्यापि संभवात् सर्वसाध्यवदुद्देश्यक प्रमेयत्वविषयकज्ञानानुसरणंतादृशज्ञानस्य वस्तुत्वव्यापक
सर्वत्वावच्छेदेन साध्यवत्वानवगाहितया तत्सत्वं न पक्षेसाध्यसंदेहनिवर्तक मिति तदानी मसाधारण्य मक्षतमेवेतिभावः आ-
दिपदात् शद्बोनित्यः शद्बत्वादित्यादौ सर्वाणि साध्याभावव्याप्यवंति साध्याभाववंतीत्यादिनिश्चयपरिग्रहः साध्यादीत्यादि पदा
त्साध्याभावपरिग्रहः अतथात्व मसाधारण्याभावः द्वितीयपक्षे तत्तद्व्यक्तित्व रूप धर्मितावच्छेदकविवक्षणे प्रथमदोषस्य द्वितीय-
दोषस्यच यथाश्रुते प्यनवकाशात् तत्रदोषांतरमाह द्वितीयेत्विति विशिष्यधर्मितावच्छेदकप्रकारेण सामान्यतः पक्षे साध्यवत्ता-
निश्चयं विना पक्षमात्रवृत्तिहेतौ साध्यवद्वृत्तित्वघटित व्याप्तिनिश्चयएव नसंभवतीत्यभिप्रेत्य एतदभिहितं अथवा विशिष्याविशेष
धर्मे धर्मितावच्छेदकीकृत्य उक्तविवक्षणे सामान्यधर्मधर्मितावच्छेदकक निश्चयदशाया मप्येतद्दोषस्य संभवात् तादृशस्थलसंग्र-
हाय तादृशधर्मस्य धर्मितावच्छेदकत्वानुसरणं विशेषलक्षणस्य विशेषणादित्यग्रिमेणान्वयः वैशिष्ट्यंच सामानाधिकरण्यप्रत्या-
सत्याबोध्यं तदविशेषितस्यैव तस्य संशयप्रयोजकतया सव्यभिचारसामान्यलक्षणस्यातिव्याप्तिंवारयितुमाह साधारण्येति एतच्च
व्याप्तिग्रहदशायां साधारणसंग्रहाय वैशिष्ट्यं विशेषणताविशेष्यत्वोभयघटितसामानाधिकरण्येन बोध्यं कैंचिदपीति व्याप्तिग्रहशू-
न्यपुरुषंप्रत्यपीत्यर्थः नच तत्पुरुषीयव्याप्तिग्रहाभावः तत्पुरुषीयासाधारण्यादिलक्षणेनिवेशनीय इति नायंदोष इत्यतआह स्यादिति
तदपि सामान्यसव्यभिचारत्वमपि तत्तत्पुरुषघटितामिति तथाचा साधारणवत् साधारणेपि पुरुषविशेषनियंत्रित सव्यभिचारव्य-
वहारापत्ति धूमादौ साध्ये वन्ह्यादि रमुकं प्रति व्यभिचारीति व्यवहाराभावेनेष्टापत्ते रयोगादितिभावः यथाश्रुतैतत्कल्पे प्रथ-
मपक्षीयदोषमप्याह साध्यादीति आदिपदा त्साध्याभावपरिग्रहः ननु तदानीमसाधारण्याभावेपि तद्भ्रमादेवानुमितिप्रतिबंध

७ ३ = शङ्कते नैषदोषइति साध्यव्याप्तिरिति इयंश्चिन्त्यप्रकृतहेतौ प्रकृतसाध्यस्य तथव्याप्तेर्व्यतिरेकव्याप्तिश्च तद्ग्रहाभावेन साध्यव्याप्तिग्रह
स्यविषयताक्षमत्वाच्छिन्नाभावेन. विशेषलक्षणस्य निश्चितसाध्यतदभाववत्त्वरूपासाधारण्यलक्षणस्य विशेषणात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिशंकां निराचिकीर्षु स्तद्भ्रमाभाव मप्युपपादयति नहीति तदानीं पक्षेसाध्यसंदेहदशायां तदानी मत्र तद्व्याप्यवत्तासंशय-
स्या प्यौचित्यातीर्जतत्वात् व्याप्यवद्वृत्तित्वस्यापि हेतौ संशयादितिभाव: एतेन उक्तस्थलेलक्षणाव्याप्तिरतोऽसाधारण्यनिश्चयरू-
पकारणाभावेन संशयानुपपत्तिरपि प्रदर्शिता उक्तविवक्षाया मेतद्दोषानवकाशात् साधारणे पुरुषविशेषनियंत्रित सव्यभिचार-
व्यवहारे कदाचिदिष्टापत्ते: संभवात् दोषांतरमाहा भिहितंचेति पूर्ववृत्तित्वादिना अयं घट एतत्वादित्यादि पूर्वपक्षीय पंक्तिव्या-
ख्यानावसर इतिशेष: न संशयप्रयोजकमिति तथाच तदादायासाधारणे न लक्षणसंगमन संभव इतिभाव: ननु तर्हिकीदृश
मसाधारण्यं संशयप्रयोजक मतआह किंत्विति तत्सहचरितेति साध्यतदभावसहचरितेत्यर्थ: एतादृशासाधारण्यस्यच नहेतु-
दोषतासंभव: सद्धेतुसाधारण्यादेरनुमितिप्रतिबंधकज्ञानाविषयत्वेन दोषसामान्यलक्षणानाक्रांतत्वा च्चेतिभाव: ननु व्याप्यविरु-
द्धसाधारणस्यै तादृशधर्मस्य संशयप्रयोजकत्वे व्याप्यादिदर्शनादपि संशयापत्ति रित्यतआह व्याप्यविरूद्धयोरिति व्याप्त्यादि-
ग्रह: संशयकाले व्याप्त्यादिदर्शनस्य संशयाप्रतिबंधकतयातेनानिश्चितयोरिति व्याप्यत्वादिना अनिश्चितस्य व्याप्यादेर्निरूक्त रूप-
ज्ञाना त्संशय इष्टएवे तिभाव: विरुद्धान्यत्वस्य हेतुविशेषणत्वे असाधारणासंग्रह: विरोधपदार्थ साध्यासामानाधिकरण्यादि
र्वानिवेश्य तदन्यत्वेनानुमितिविरोधिविशेषणेपि साध्याप्रसिद्ध्यादिवारणासंभव इत्यतआह विशिष्टेति साध्यतावच्छेदकादिवि-
शिष्टेत्यर्थ: एतदर्थ: पूर्वपक्षएवविवृत: यथाश्रुतमूलतो धर्मिविशेषणताया एव लाभा दर्थतइति तात्पर्य्यवत्त्वज इत्यर्थ: विरो-
धिविशेषणं अनुमितिविरोधिविशेषणं अवृत्तित्वे परस्परासामानाधिकरण्येऽत्र साध्यसाधनयो रित्यनुषज्यते पक्षतानिवेशे प्रयो-
जनाभावादाह पक्षपदमिति पक्षवृत्तित्वस्य धर्मिविशेषणत्वे स्वरूपासिद्धस्य व्यभिचारिणो ऽसंग्रहप्रसंगो हेतौ पक्षवृत्तित्वग्रहा-
द्विरोधित्वेन विरोधिविशेषणेपि वाधसत्प्रतिपक्षातिप्रसंग वारणाशक्यमेवेति एवंच सपक्षवृत्तित्वेसत्यनुमितिविरोधिसंबंधाव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिरितिदलद्वयेन व्याप्तिग्रहविरोधिधर्मवत्वस्य विवक्षणे च मणिकारमतसिद्धस्य साध्यव्यापकीभूताभावप्रतियोगित्वरूपा साधारण्यस्या संग्रहः विशेषणांतरं प्रक्षिप्य वाधादिवारणेच गौरव मित्याभिप्रेत्यपूर्वपक्षोक्तरीतिं परित्यज्य प्रकारांतरेण वाधादिकं वारयितु मुक्तदलद्वयनिष्कृष्टार्थमाह तथाचेति यद्यद्धर्मेति सधर्मितावच्छेदकक हेतुमत्तानिश्चयकालीन यादृशविशिष्टविषयकनिश्चयसामान्यं स्वसमानकालीन हेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितिसामान्ये प्रतिबंधकं तादृशधर्मवत्वमित्यर्थः समूहालंबनात्मकस्योदासीनपदार्थविषयकनिश्चयस्या प्यनुमितिप्रतिबंधकतया उदासीनपदार्थविषयकनिश्चयसामान्यस्यापि तद्विपरीतविषयकसमूहालंबनात्मकप्रकृतानुमितिप्रतिबंधकतया तत्रातिव्याप्तिवारणाय सामान्यपदद्वयं हेतुमत्ताज्ञानासमानकालीनव्यभिचारनिर्णयस्य व्यभिचारनिर्णयसामान्यांतर्गतस्य स्वसमानकालीनहेतुमत्ताज्ञानाप्रसिद्ध्याऽसंभवः स्यादिति प्रथमं कालीनान्तं निश्चयविशेषणं निर्द्धर्मितावच्छेदकक हेतुमत्तानिश्चयकालीन व्यभिचारनिश्चयकालीन हेतुमत्ताज्ञानधर्मितावच्छेदका प्रसिद्ध्यातद्दोषतादवस्थ्य मतो हेतुमत्ताज्ञाने सधर्मितावच्छेदककत्वविशेषणं अनुमिति सामान्यांतर्गतायां स्वसमानकालीन हेतुमत्ताज्ञानासमानधर्मितावच्छेदकक साध्यानुमितौ हेतुतावच्छेदकावच्छिन्नस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानं न प्रतिबंधकं नित्यत्वव्यापकीभूताभावप्रतियोगिशद्धत्व मित्यादिज्ञानदशाया मयंनित्य इत्यादिज्ञानोत्पत्तावविवादादित्य साधारणाव्याप्ति रतः समानधर्मितावच्छेदककांत मनुमिति विशेषणं तथाच इदंत्वादिधर्मितावच्छेदकक नित्यत्वादिविशिष्टबुद्धौ शब्दत्वादिधर्मिक नित्यत्वादिव्यापकीभूताभावप्रतियोगित्वरूपा नित्यत्वीयव्यतिरेकव्याप्ति निश्चयविशिष्टस्य तद्धर्मितावच्छेदकक शब्दत्वादिमत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञानमुद्रया प्रतिबंधकत्ववद्विशेषणविशेष्यभावे विनिगमनाविरहेण तादृशशब्दत्वादिमत्ताज्ञानविशिष्टस्य तथाविधव्याप्तिनिश्चयस्यापि प्रतिबंधकतया तादृशहेतुमत्ताज्ञानसमानधर्मितावच्छेदककानुमितिसामान्यप्रतिबंधकत्वं तथाविधा- ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधारण्यनिश्चयस्याक्षतमेवेति असाधारण्यसंग्रहः' अनुमितिपदं साध्यव्याप्योहेतुः साध्यवांश्चपक्ष इत्येतादृशसमूहालंबनानुमितिपरं' तेन साधारणज्ञानस्य साध्यवत्ताज्ञानाप्रतिबंधकत्वेपि न तदसंग्रहः' एतेना नुमितिविरोधित्वं यादृशविशिष्टविषयकनिश्चयत्वेनानुमितिप्रतिबंधकं तादृशत्वं तत्रत्वा वच्छेदकत्वं प्रागुक्तयुक्त्याअनतिरिक्तवृत्तित्वरूपमेव विवक्षणीयं' एवंच साध्यव्यापकीभूताभावप्रतियोगिहेतुरितिज्ञानस्य हेतुमत्ताज्ञानासमानकालीनस्य साध्यवत्ताज्ञानाप्रतिबंधकतया तादृशज्ञानविषयस्य निरुक्तलक्षणानाक्रांतत्वेन ना साधारण्यस्वरूपत्वोपपद्यते पक्षवृत्तित्वविशेषितस्यैव तस्य वाधादिवद्धर्मिविशेषघटितमूर्तिकतया नियतपक्षधर्मिका नुमिति विरोधित्वमेव नतु यत्र यत्र हेतुमत्वं ज्ञायते तत्तद्धर्मिका नुमितिसामान्यविरोधित्वमिति न तथात्व संभव इतिपरास्तं' यत्तु हेतुमत्ताज्ञानमनिवेश्य तत्तद्धेतुधर्मिक साध्यव्यापकीभूताभावप्रतियोगित्व निश्चयत्वेनैव प्रतिबंधकता प्रतिबध्यतावच्छेदकंतु धर्मिविशेषविषयकत्वाद्य घटितं तत्तद्धेतुमत्ताज्ञानजन्यानुमितित्व मतः शब्दत्वं नित्यत्वव्यापकीभूताभावप्रतियोगित्वि निश्चयसत्वे समानधर्मितावच्छेदकक शब्दत्ववत्तानिश्चयस्य चा सत्वे नित्यत्वाद्यनुमिते र्नानुपपत्तिः' तदानींहेत्वंतरज्ञानेनैवा नुमितिजनना त्तस्याश्च शब्दत्व धर्मिक तादृशाभावप्रतियोगित्व निश्चयाप्रतिबध्यत्वात्' एवंच पक्षवृत्तित्वा विशेषितंनिरुक्तरूपमेवा साधारण्यं' लक्षणे अनुमितिपदस्य ‡ प्रकृतहेतुकानुमितिपरतया प्रकृतहेतुकानमितिसामान्यविरोधित्वस्या नतिरिक्तवृत्तित्व रूपावच्छेदकत्वघटितस्यापि तत्रसत्वेन तदसंग्रहाप्रसक्तेरिति समाधानं' तन्न शब्दत्वादिधर्मिक तादृशप्रतियोगित्वनिश्चयस्य शब्दत्वादिहेतुमत्ताधीजन्यानुमितित्वावच्छिन्नप्रतिप्रतिबंधकत्वे ‡ तादृशनिश्चयसहकृतशब्दत्वादिप्रकारकनिश्चयदशायां तत्समानधर्मितावच्छेदकक शाब्दबोधाद्यापत्ते रन्यहेतुक तादृशानुमित्यापत्तेश्च दुर्वारितत्वा न वान्यहेतुकापि समानधर्मितावच्छेदकक तद्वत्ताज्ञानकालीनानुमिति स्तद्वत्ताज्ञानजन्यैवेति न तदापत्तिसंभव इतिवाच्यं। व्याप्यत्वानवच्छिन्नहेतुप्रकारताशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गानस्या नुमितिजनकत्वे मानाभावात् 'अन्यालिंगकपरामर्षघटितसामग्र्यां तत्तद्धर्मिक तादृशनिश्चयाभावस्या नंतर्भावेन तद्-लादापत्तेः कथामात्रेण वारयितुमशक्यत्वाच्च 'एतेन समानधर्मितावच्छेदकक तद्वत्ताज्ञानानंतरोत्पतिकत्व निवेशेऽपि न निस्तार इत्यल मत्यावशेन 'एतन्नये। पक्षवृत्तित्वाविशेषित हेतुनिष्ठसाध्याभावीयान्वयव्याप्ति रप्यसाधारण्यमेवेति न तत्रातिव्याप्ति रित्य-वधेयं। तथा निरुक्तानुमितिसामान्यविरोधि धर्मिविशेषितत्वात् धर्मिविशेषघटितत्वात् न तादृशौ न तादृशानुमितिसामान्य-विरोधिनौ नन्वेवमपि सर्वमाकाशवत् प्रमेयत्वादित्यादिस्थलीय वाधप्रतिरोधयो रतिव्याप्तिः सर्वमाकाशाभाववदित्यादिनिश्चये किंचिदप्याकाशाद्यनुमिते रनुदया दनुभवानुरोधेना समानधर्मितावच्छेदकज्ञानेपि तत्प्रतिबंधकत्व कल्पना तयो रनुमिति सामा-न्यविरोधित्वा दित्यतआह सर्वमिति इत्यादिकं इत्याकारकज्ञानविषयवाधादिकं अग्रिमविरोधिपदद्वयस्य प्रतिबंधकपरतया इत्या-दिकमित्यस्य इत्याकारकज्ञानमित्येव वार्थः सामानाधिकरण्यग्रहविरोधि साध्यसामानाधिकरण्यस्य साध्यवत्वघटितत्वा दितिशे-षः तथाच अविरोध्यं तेनैव तद्वारणमिति भाव : निर्द्धर्मितावच्छेदकज्ञानस्य वाधाद्यप्रतिबध्यत्वे साध्यसामानाधिकरण्य ज्ञानस्य साध्यांशे निर्द्धर्मितावच्छेदककतया तदविरोधित्व मुक्तवाधादेरक्षत मेवेत्याशयेनाह नुमितीति। व्यभिचारस्यापि प्रकृतसाध्यहेतु-कानुमितिविरोधित्वा त्सामान्येति तथाच तस्यान्यहेतुकानुमित्यविरोधित्वा न्न तदसंग्रहः उक्तवाधादेश्च सर्वहेतुकानुमितिविरोधि-त्वा त्तद्वारणमितिभावः। इदंत्ववधेयं सर्वमाकाशाभाववदित्यादिज्ञानस्या समानधर्मितावच्छेदककानुमितिविरोधित्वे मानाभावः तादृशज्ञानकालेऽइदमपि सर्वान्तर्गत मित्यादिज्ञानसत्वे एव इदमाकाशवदित्याद्यनुमित्यनुदया त्तत्रच तादृशज्ञानस्यैव ग्राह्याभावाव च्छेदकधर्मदर्शनविधया तादृशानु मित्यभावनिर्वाहकत्वा त्तथाच तादृशवाधबुद्धे र्निरुक्तानुमितिसामान्यविरोधित्वाभावादेव नाति-व्याप्तिशंकेति वस्तुतस्तु त्तद्धर्मितावच्छेदकक बुद्धौ तत्सामानाधिकरण्यमात्रेण ग्राह्याभावावगाहिबुद्धे रप्रतिबंधकतया ग्राह्याभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१) टिप्पणी—अथात्र किंचिद्विवेचयामः यद्रूपावच्छिन्नविषयक निश्चयसामान्ये स्वभिन्न स्वसमानकालीन हेतुमत्तानिश्चयधर्मितावच्छेदकताव्यापक धर्मितावच्छेदकताकानुमितित्व व्यापकप्रतिबध्यतानिरूपित प्रतिबंधकत्वमवश्यं वक्तव्यं। तथाच घटोवन्हिमान्न्हदो वन्हिमांश्चेति समूहालंबनानुमितित्वव्यापक प्रतिबध्यतानिरूपित प्रतिबंधकत्वं तादृशबाध विषयक निश्चयेऽक्षतत्वात् बाधेऽतिव्याप्तिवारणाय स्वसमानकालीन हेतुमत्तानिश्चये स्वभिन्नत्वमवश्यंदेयं। एवंच स्वसमानकालीनहेतुमत्तानिश्चये स्वभिन्नत्वोपादानेजलवद्ह्रदकालीन वन्हिव्यापकीभूताभाव प्रतियोगिजलत्वावच्छिन्न रूपासाधारणेऽव्याप्तिरित्यसंभवः एवंच सधर्मितावच्छेदकक हेतुमत्तानिश्चयेपि स्वभिन्नत्वंदेयं अन्यथान्हद्रो जलवद्ह्रदकालीन वन्हिमान्जलादित्यत्र जलवद्ह्रदकालीन वन्हिव्यापकीभूताभाव प्रतियोगि जलत्वावच्छिन्नविषयकनिश्चयस्य स्वभिन्नहेतुमत्तानिश्चय कालीनस्यापि सधर्मितावच्छेदकक हेतुमत्तानिश्चयकालीना साधारण विषयक निश्चयसामान्यां तर्गततया तत् कालीनस्वभिन्नहेतुमत्तानिश्चयस्या प्रसिद्ध्यातत्राव्याप्तेर्दुष्परिहारा पत्तेः ननु वन्ह्यभाववान् जलवान् इतिनिश्चयकालीन वन्हिव्यापकीभूताभाव प्रतियोगिजलत्वावच्छिन्न विषयकनिश्चयस्यापि तादृश सामान्यांतर्गतत्वात् समानकालीनहेतुमत्ता निश्चयधर्मिता वच्छेदकीभूत वन्ह्यभावा वच्छिन्नधर्म्मिक वन्ह्यनुमितेरेवा प्रसिद्ध्याकालीनांतोपादानेपि असंभवो दुर्न्निवार एव नच साध्यवत्तानुमिति धर्म्मितावच्छेदको य स्तद्धर्म्मधर्म्मितावच्छेदकक हेतुमत्तानिश्चयकालीनत्वं तद्रूपावच्छिन्नविशिष्टविषयकनिश्चये दातव्यं तथाच वन्ह्यभावस्य वन्ह्यनुमिति धर्म्मितावच्छेदकत्वाभावात् वन्ह्यभावधर्म्मितावच्छेदकक जलत्वावच्छिन्न प्रकारक

वांशे तत्तद्धर्मितावच्छेदकव्यापकतावगाहित्वमेव तंत्रं तथाच ग्राह्याभावे तद्धर्मव्यापकतानिश्चयस्य तत्तद्धर्मावच्छिन्नांशे ग्राह्याभावाप्रकारकस्यापि तत्तद्धर्मधर्मितावच्छेदकक ग्रहप्रतिबंधकत्वं तत्तद्धर्मव्यापकताच तत्तद्धर्मसमानाधिकरणाभावाप्रतियोगित्वंतज्ज्ञानस्य प्रतिबंधकत्वे वृत्तिमदत्यंताभावाप्रतियोगित्वज्ञानमपि तथासामान्यघटितविशेषाभावग्रहस्य यत्रप्रतिबंधकत्वं तत्र तत्सामान्याभावस्यापि तथात्वानुभवात्। सर्वमाकाशाभाववदितिबुद्धेश्चा काशाभावे वृत्तिमदत्यंताभावाप्रतियोगित्वं विषयः सएववा वस्तादृशानुमितिसामान्यविरोधीति। (१) मूलस्थेन तनेत्यनेन संशयप्रयोजकयो र्विभाजकीभूतसपक्षवृत्तित्वविपक्षव्यावृत्तत्व घटितसाधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नधर्मितावच्छेदकक हेतुमत्तानिश्चयपदेन धर्तुमशक्यत्वान्न दोषः नच ह्रदो जलवन्मीनवत्कालीन वन्हिमान्जलादित्यत्र जलवन्मीनवत्कालीन वन्हि-
व्यापकीभूताभावप्रतियोगिजले अव्याप्तिः तादृशविशिष्टविषयकनिश्चयस्य किंचिद्धर्मावच्छिन्ना वच्छेदकताक विशेष्यताक हेतुमत्तानिश्चयकालीनान्यत्व विरहा-
दतिवाच्यम् यादृशविशिष्ट विषयकत्वाव्यापकीभूताया किंचिद्धर्मावच्छिन्नावच्छेदकताक विशेष्यताक हेतुप्रकारता तादृशप्रकारताशालि निश्चयकालीनान्यत्व
स्य यादृशविशिष्टविषयकनिश्चये निवेशनीयत्वात् । तथाच जलवन्मीनवत्कालीनवन्हिव्यापकीभूताभाव प्रतियोगिजलत्वावच्छिन्नविषयकत्वा व्यापिका न तादृशा
साधारण्यविषयकज्ञानीय जलवन्मीनवद्विषयता किंतु अन्यदीय विषयतैव इतितादृश विषयताशालि ज्ञानसमानकालीनान्यत्वं तादृशासाधारण्यविषयकज्ञानेअक्षत

रण्यासाधारण्ययोः परामर्शेऽसंगतिः सपक्षवृत्तितायंशज्ञानस्यानुमित्यविरोधितया तद्घटितस्य हेत्वाभासताविरहादिति तस्यानु-
मितिविरोधितया प्रक्रांतविपक्षवृत्तित्वाद्यंश मात्र परामर्षकता माह । तेनेति । विपक्षवृत्तित्वत्वादिना अप्रक्रांतत्वात् प्रक्रांततत्ता-
भाया नुमितिविरोधिनेत्युक्तं । अनुमितिविरोधित्वावच्छिन्नस्या नुमित्यविरोधित्वा त्तत्पदस्य विपक्षवृत्तित्वत्वाद्यवच्छिन्नपरत्व
मावश्यकमिति तल्लाभाय विपक्षवृत्तित्वादिनेति । विपक्षवृत्तित्वत्वाद्यवच्छिन्नेनेत्यर्थः तेनैवेति । एवकारस्य विभाजकधर्मस्या
नुमितिप्रतिबंधकहेतुज्ञानप्रकारत्वव्यवच्छेदपरत्वे ऽसंगतिः तादृशज्ञानप्रकारीभूत विपक्षवृत्तित्वादेरेवानुगतधर्मप्रकारेण विभाज-

मेव नच ह्रदत्वसामानाधिकरण्येन जलवत्तानिश्चयकालीन वन्हिव्यापकीभूताभावप्रतियोगिजलनिश्चयस्य ह्रदत्वसामानाधिकरण्येन वन्ह्यनुमितिं प्रत्यप्रतिबंधक-
त्वात् सधर्मितावच्छेदकक हेतुमत्तानिश्चयकालीनयादृशविशिष्टविषयक निश्चयसामान्यान्तर्गत ह्रदत्वसामानाधिकरण्येन जलवत्तानिश्चयकालीनासाधारण्यविष-
यकनिश्चयस्य स्वसमानकालीनहेतुमत्तानिश्चयधर्मितावच्छेदकावच्छिन्न धर्मिकवन्ह्यनुमिति सामान्यांतर्गत ह्रदत्वसामानाधिकरण्येन वन्ह्यनुमित्यविरोधित्वात्
असाधारण्येऽव्याप्तिर्दुर्निवारै वेति वाच्यम् सधर्मितावच्छेदकक हेतुमत्तानिश्चयपदेन किंचिद्धर्मविशिष्टाया हेतुतावच्छेदकावच्छिन्नप्रकारता तादृशप्रकारताशा-
लिनिश्चयस्य विवक्षितत्वात् किंचिद्धर्मवैशिष्ट्यंच स्वावच्छिन्नविशेष्यतानिरूपितत्व स्वव्यापकहेतु प्रतियोगिकहेतुतावच्छेदकसंबंधावच्छिन्नत्व एतदुभयसंबंधेन ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाच ह्रदत्वसामानाधिकरण्येन जलवत्तानिश्चयीयजलत्वावच्छिन्नप्रकारतायां ह्रदत्वस्य स्वावच्छिन्नविशेष्यतानिरूपितत्व संबंधेन सत्वेपि स्वव्यापकहेतुप्रतियोगिकहेतुतावच्छेदक संबंधावच्छिन्नत्व संबंधेनासत्वात् नमिल्लक्तोभयसंबंधेन किंचिद्धर्मविशिष्टत्व मितिह्रदत्वसामानाधिकरण्येन जलवत्तानिश्चयसमानकालीना साधारण्यविषयक निश्चयमादायनदोषः अत्र द्रव्यत्वादिधर्मितावच्छेदकक ह्रदत्वव्यापक जलप्रतियोगिकसंयोगसंबंधेन जलप्रकारकनिश्चयस्य प्रामाणिकत्वे तादृकत्वात् एवं प्रत्येकमेवेत्येवकारस्यापि विभाजकधर्मस्य हेत्वाभासताव्यवच्छेदपरत्वे नोपपद्यते इति अनुमितिविरोधित्वादिरूपानुगमकविभाजकतावच्छेदकधर्मस्य प्रतिबंधकज्ञान प्रकारतावच्छेदकत्व हेत्वाभासपदप्रतिपाद्यतावच्छेदकत्वव्यवच्छेदपरतया एवकारद्वयं व्याचष्टे एवकारेणेति प्रथमैवकारेणेत्यर्थः व्यवच्छिद्यप्रतिबंधकज्ञानप्रकारतावच्छेदकत्वे व्यवच्छेदपरतया प्रतिपाद्यहेत्वाभासस्येति पूरणीयम् एवंच प्रत्येकमेवेति मूलस्य विपक्षवृत्तित्वादिप्रत्येकमात्रवृत्तिरूपावच्छिन्नस्यैवेत्यर्थः तेना साधारणस्येत्यादिमूलस्या नुमितिविरोधिताघटितलक्षणं परित्यज्य लक्षणांतरकरणेना साधारणस्य साध्यतदभावो पस्थापकतया संशायकतया दूषणं तत्पक्षे नाव्याप्तिरिति सार्थकत्वे ऽसंगतिः। संभवत्संशयप्रयोजक साध्यतदभावसहचारिताभाव प्रतियोगित्वरूपा साधारण्यस्य सद्धेतुसाधारणता प्रयुक्तदोषत्वासंभवदोषोनेवा नुमितिविरोधिताघटितलक्षणस्या वतारितत्वात् तेनेत्यस्य संशायकताघटितलक्षणपरित्यागपूर्वकापरलक्षणद्वयकरणस्या साधारणसंग्रहप्रयोजकतार्थकत्वं न साध्यतदभावोपस्थापकतयेत्यस्य च सत्प्रतिपक्षोपस्थापकतयेत्यर्थकत्वमपिनसाधुः असाधारण्यसत्प्रतिपक्षोपस्थापकतामते साध्यव्यापकीभूताभावप्रतियोगित्वस्यैवा साशनिश्चयकालीना साधारण्यविषयकनिश्चयस्य स्वसमानकालीनं हेतुमत्तानिश्चयधर्मितावच्छेदकक द्रव्यत्वावच्छिन्नधर्मिक वन्ह्यनुमिति सामान्याविरोधित्वाद साधारण्ये अव्याप्तिरतः स्वावच्छिन्नविशेष्यतानिरूपितत्वस्य संबंधघटकतयाप्रवेशः ननुसधर्मितावच्छेदकक हेतुमत्तानिश्चयात्मकयादृशविशिष्टविषयकनिश्चयसामान्यं स्वीयहेतुतावच्छेदकावच्छिन्न प्रकारतानिरूपित विशेष्यतावच्छेदकावच्छिन्नविशेष्यक साध्यानुमिति सामान्यविरोधि इत्येवास्तु व्यर्थं कालीनत्वद्वयोपादानमिति

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यादशविशिष्ट विषयित्वा व्यापकीभूतविशयिता शून्यत्वमवश्यं निवेशनीयं अन्यथा जातिमान्वन्हिव्यापकी भूताभाव प्रतियोगिजातिमान् वा धूमाभाववद्वृत्तिरिति साधारणा साधारणविषयकज्ञानयो रनुमित्यप्रतिबंधकत्वा दसंभवापत्तेः एवं च्चा साधारण्यविषयित्वा व्यापकीभूत विषयिता शून्यत्वस्य सधर्मितावच्छेदकक हेतुप्रकारका साधारण्यविषयक निश्चये विरहादसंभवापत्तेः सधर्मिता वच्छेदकक हेतुप्रकारत्वविशिष्ट यादशविशिष्ट विषयकत्वा व्यापकीभूतविषयता शून्यत्वं निवेश्य सधर्मितावच्छेदकक हेतुमत्ता निश्चयात्मक यादशविशिष्टविषयक निश्चये ऽव्यापकीभूत विषयता शून्यत्व संपादनंतु न समीचीनं

धारण्यतया तस्यव्याप्तिग्रहाविरोधितया विरुद्धादिसंकीर्णासाधारणानुरोधेन व्याप्तिग्रहद्वयविरोधितापरतयाव्याख्येयस्या व्यवहितलक्षणस्य तत्राव्याप्तेरावश्यकत्वा दत स्तत्पदेन मध्यमलक्षणमात्रपरतया व्याचष्टे। तेनेति। असाधारण्यस्य संशायकतापक्षे प्रथमलक्षणस्यैव साधुता नतु मध्यमस्य संशयप्रयोजकस्य निश्चितसाध्यतदभाववद्व्यावृत्तत्वादे रनुमित्यविरोधित्वा दित्युपष्टंभासंगतिभयेन साध्यतदभावोपस्थापकतयै त्यस्य संशायकतयेत्यर्थं परित्यज्यार्थांतरमाह सत्प्रतिपक्षोत्थापकतयेति इतरलक्षणयो स्तन्मते ऽसाधारणाव्याप्तिसत्वएवोपष्टंभसंगते रुपष्टंभकतां स्फुटीकर्तुं तत्पूरयति इतरथापुनरिति इतरलक्षणयोस्त्वित्यर्थः अव्याप्तिरेवेति सत्प्रतिपक्षोपस्थापकतयादूषणत्वपक्ष इत्यनुषज्यते यथाश्रुतं साध्याभावज्ञापकत्वं न बाधसाधारण मतस्तदर्थं

सधर्मितावच्छेदकक हेतुमत्ताविषयत्व विशिष्टयादशविशिष्ट विषयिताया घटोजलवानितिनिश्चयात्मका साधारण्यविषयकज्ञाने न्हदो जलवानिति निश्चयात्मका साधारण्यविषयकज्ञानेपि प्रत्येकंसत्वात् अत्रच प्रत्येकं जलवद्ध्रद विषयताया जलवद्घटविषयतायाश्चा भावसत्वात् चालनी न्यायेन सर्वत्र हेतुमद्धर्मितावच्छेदकावच्छिन्न विषयताविशिष्ट तादशविशिष्ट विषयत्वाव्यापिका सति तच्छून्यत्वस्य कुत्रापि सधर्मितावच्छेदकक हेतुमत्तानिश्चयात्मक यादशविशिष्ट विषयकनिश्चय ऽसत्वादसंभवापत्तेः। हेतुमत्तानिश्चयस्य धर्मितावच्छेदकं यद्यत् प्रत्येकं तत्तद्धर्मावच्छिन्नविशेष्यतानिरूपित हेतुप्रकारित्वा व्यापकासति यादशविशिष्ट विषयित्वा ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यापिका या विषयतातच्छून्यत्वस्य ज्ञाने विशेषणे चातीवगौरवमिति विभावनीयं ॥

व्याचष्टे साध्याभावेति व्यभिचारादिव्यावृत्तस्य कारणीभूताभावप्रतियोगित्वरूप प्रतिबंधकताघटितस्य विरोधित्वस्य विरोधिपदार्थतालाभाय साक्षादिति ॥ सव्यभिचारसामान्यनिरुक्तिः संपूर्णा ॥ श्रीमन् महामहोपाध्याय श्रीगदाधर तर्कालंकार भट्टाचार्य्य विरचितेयम् ॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

इति यथामति कृत दूषणो द्धावना भाव संपादितेयं भवितेति समीहे ॥ गुण दोषौ बुधो गृह्णन्निन्दुक्ष्वेडा विवेश्वर ॥ शिरसाश्लाघते पूर्वं परं कंठे नियच्छति ॥ १ ॥ इत्यादि वाक्यमेवावलम्बा महे इति प्रार्थना ।

महामहोपाध्याय झोपाह्व श्रीसंगमलाल शर्मणः शिष्य गंगाधर शर्म कृता.

॥ संवत् १९४४ फाल्गुन शुक्ल पौर्णिमा चंद्रवासरे मुद्रण समाप्ति मगमत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचना—इसमें जो शिरोमणि अधिक छापा गया है उसका टीका भी अब छप रही है. यह पुस्तक श्रीसरस्वती अखाडा विद्या विभाग पुस्तक कार्यालयमें मिलेगा. श्रीनाथद्वारा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०३३

श्री ५ को सरकार ... संस्कृत महाविद्यालय

जागदीशीपक्षता

श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशकेपासदाऊजीअग्निहोत्रीकेसिद्धविनाय
कयंत्रमेजागदीशीपक्षताछापागया जिसैलेनाहोयउसैढुंढिराजगणेशकेपासदा
ऊजीअग्निहोत्रीकेदुकानपरमिलैगा लि॰रामदास छापनेवालावचनू संवत् १९४७

First Edition 300 Copies
पहिलीवार ३००

Proprietor Ganesha Prasada Vajapeyi. Sidh Binaek press. Benares.
प्रोप्राइटरगणेशप्रसादवाजपेयीसिद्धविनायकप्रेसवनारस ताः२४ जून सन् १८९० 24/6/90

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा.प. ॥श्रीगणेशाय नमः॥ अथ पक्षताशिरोमणिः॥ अनुमितिलक्षणैककार्य्यानुकूलतासङ्गत्या पक्षधर्म्मतां निरूपयितुमाह व्या
१ प्तीति। सन्दिग्धेति। यत्र साध्यस्य यादृशसंबंधावगाहिनिर्णयनिवर्त्यः संशयस्तत्र स तादृशसम्बन्धेन साध्यानुमितौ पक्ष इत्य
र्थः। तेन न पक्षसाध्यविशेष्यकसंशयाननुगमो न वा सम्बन्धान्तरेण सन्देहेऽपि निर्णीतसम्बन्धेन पक्षत्वम् न वा तमःप्रभृतिषु सम
वायेनाकाशादिसाधने न हैकल्यम्। संशययोग्यतां निरस्यति नापीति साधकबाधकमाने सिद्धिबाधौ केवलान्वयिनि च पक्षनिष्ठा
भावप्रतियोगित्वधीरेव सुलभो बाधः। ननु तत्रापि पुनरनुमित्सातनः परामर्शानन्तरं स्मरणात्मकाद्वा परामर्शादनुमितौ इष्टसा
धनताविषयकादनुमित्सानुतोऽनुमितिरिति फलबलात्कल्पनीयमित्यत आह सिषाधयिषेति न चानुमितिजनिकेच्छैव पक्ष
तासा च क्वचित्स्वनिष्ठैव सर्वत्रेश्वरनिष्ठैव सुलभेति वाच्यं तस्या नित्यत्वे न सिद्धौ सत्यामपि पक्षताप्रसंगात् न च तस्यास्तदानीं न
तज्जनकत्वं तद्धि न तद्योग्यता अनपायात् न च तदुपधानम् अनुमितेः पूर्व्वं तदभावात् न च तत्सामग्रीसमवधानं कारणमात्रस्य
पक्षताकुक्षिनिक्षेपप्रसंगाच्छेषवैयर्थ्यात्। तदानीं सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगिनः कारणस्यैव कल्प्यत्वापाताच्च। सि
षाधयिषेति यत्रानुमित्सानन्तरं साध्यतद्व्याप्यवत्त्वविशिष्टपक्षस्मरणम् अनुमितौ इष्टसाधनताविषयकतादृशस्मरणाद्वा अनुमित्सा
अनुमित्सापूर्वकालोत्पन्नत्वविशेषणस्मरणाद्वा अनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहितात्साध्यतद्व्याप्यविशिष्टपक्षप्रत्यक्षान
दनन्तरं त्वानुमितिस्तत्र पक्षतासम्पत्तये सहकृतान्तं साधकमानविशेषणं। सिषाधयिषा च तत्साध्यविशिष्टतत्पक्षविषयत्वप्रका
रिका अनुमितिविषयिणीच्छा यत्किंचिज्ज्ञो वरं ज्ञानं जायतामितीच्छायामपि सिद्धसत्त्वेऽनुमित्यनुत्पादात् अनुमितित्वाप्रकारिका रा.म:
यामपि प्रत्यक्षाद्यतिरिक्तं पर्व्वते वह्निज्ञानं जायतामितीच्छायां प्रत्यक्षाद्यनन्तरमनुमित्युत्पादाच्च यादृशयादृशेच्छासत्त्वे सिद्धौ स १

त्यामनुमितिस्तनदिच्छाभावसमुदायस्यविशेषणत्वादिच्छाया अननुगमेऽपिनक्षतिः धूमेनानुमिनुयामितीच्छायामालोकपरा
मर्शोदसत्यामपिसिद्धौयदिनानुमितिस्तदान्यमात्रलिंगकानुमितीच्छाकामिनीजिज्ञासा इवतत्पृथक्प्रतिबन्धिकायदिचतत्रा
नुमितिस्तदासिद्धिसत्त्वे तत्रानुमितेर्वारणायतल्लिंगिकानुमितीच्छातदन्यमात्रलिंगिकानुमितीच्छातिरिक्तानुमितीच्छावावाच्य
लिंगविशेषेणापिचनियन्त्रितपक्षत्वंतल्लिंगकानुमितौसिद्धिकालीनातल्लिंगिकानुमितीच्छाविरहविशिष्टान्यलिंगकानुमितीच्छैव
वाप्रतिबंधिकासाधकमानंसाध्यवत्त्वनिश्चयः पाषाणमयत्वादिनापर्वतेतेजस्त्वादिनाचवन्हेः सिद्धावपिपर्वतत्वेनतत्रवन्हित्वे
नचतस्यानुमितेर्द्धर्मित्वसाध्यत्वयोरवच्छेदकावनुप्रवेशनीयौयदिचपर्वतत्वसामानाधिकरण्येनैकत्रसाध्यसिद्धावपिविना
नुमित्सामन्यत्रतादृशानुमितिरानुभविकीनदाधर्मिविशेषोऽपिनिवेश्योनान्यथापक्षतावच्छेदकस्यसामानाधिकरण्येनसाध्यसि
द्धावपितदवच्छेदेनानुमितिदर्शनात्पक्षतावच्छेदकावच्छेदेनानुमितिंप्रतितदवच्छेदेनसिद्धेस्तत्सामानाधिकरण्यमात्रेणानु
मितिंप्रतितुसिद्धिमात्रस्यविरोधित्वम् इत्यन्यत्रलिंगभेदन्यायोऽनुसरणीयः साध्यविशेष्यकसिद्ध्यनन्तरंपक्षविशेष्यकानुमितेःप्रा
माणिकत्वेतांप्रतिपक्षविशेष्यिकैवसिद्धिर्विरोधिनी एवमन्यपक्षविशेष्यकसिद्ध्यनन्तरमपिसाध्यविशेष्यिकानुमितिर्जायतेतुल्य
न्यायात् समानाकारायाःसिद्धेःप्रतिबन्धकत्वेपर्यवसानात् तादृशानुमितिंप्रतिसिद्धिमात्रविरोधिसाध्यप्रसिद्धिरेववा अतएवप्र
सिद्धसाध्यकस्थलेपक्षविशेष्यिकैवानुमितिरनुभूयत इति अत्रचव्याप्तिस्मरणादिनापूर्वानुमित्सानाशेपरामर्शकालेचसिद्धिसत्त्वेऽ
नुमित्सान्तरोत्पत्त्यैवानुमितिस्तथैवकारणीभूतस्यविशिष्टाभावस्यसंपत्तिरित्युपाध्यायाः। अन्येतु द्वित्रिक्षणान्तरितायामप्यनुमित्सा
यामनुमितिदर्शनात् अनुमित्सायोग्यतावाच्यासाचनस्वोत्पत्त्यनन्तरंस्वविषयसिद्ध्यनुत्पादः अनुमित्सानन्तरमन्तरानुमित्यनुत्पादेदि

जा.प. वसादिविलम्बेनेन्द्रियादिना निर्णीतेऽपि साध्ये लिंगपरामर्शादनुमितिप्रसंगात् किंत्वनुमित्यानन्तरं लिंगदर्शनादिक्रमेण यावता
२ कालेनोत्सर्गतः परामर्शो जायते तावानेव कालः फलबलेन तथा कल्पनात् अथवानुमित्योत्पत्त्यनन्तरमनुमित्यनाशेऽपि सिद्धौ स
त्यां यावत्कालमध्येऽनुमितिर्जायते तावानेव कालोऽनुमित्ययोपलक्षितः यदि च सिद्ध्यनन्तरं तन्नाशेऽपि द्वित्रिक्षणमध्ये विनानुमि
त्यामनुमित्यनुत्पादोऽनुभवसिद्धस्तदा सिद्ध्यापि तावानेव समय उपलक्षणीयः विशिष्यलक्षणनियमस्त्ववहितैः करणीय इति वद
न्ति। अत्र च यत्र साध्यनिर्णयेच्छानन्तरं पूर्वोक्तन्यायेन साध्यतद्व्याप्यविशिष्टपक्षस्य प्रत्यक्षं स्मरणं वा यत्र वा साध्यतद्व्याप्यधर्मता
दृशव्याप्यधर्मान्तरविशिष्टपक्षस्य तत्पक्षकसाध्यतद्व्याप्यवत्त्वानुमित्योरिष्टसाधनतायाश्चैकं स्मरणं ततस्तयोरनुमित्या ततः साध्य
तद्व्याप्यवत्त्वानुमितिस्तत्र तदनन्तरमनुमितिप्रसंगः योग्यताविवक्षणे तु सुतरामेवेति न दिच्छाविषयसिद्ध्यनुपहितत्वं तद्विशेषणं
पक्षसाध्यभेदेन च पक्षताया भेदात् पृथक्पृथगेव कार्य्यकारणभावः तथा च यत्र सिद्ध्यनन्तरं कदाप्यनुमितिर्न जाता तत्र सिद्ध्यभाव
मात्रं कारणं ननु तत्रेच्छानिवेशोऽपि गौरवात् प्रयोजनाभावाच्च तेन यत्पक्षकयत्साध्यकानुमितौ कस्यापीच्छा न जाता तत्रोक्तिसाधार
ण्यमात्रसंपादनाय स्वरेच्छानिवेशनायासो नोपादेयः। यत्तु सिषाधयिषाविरहविशिष्टलक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमिति
कभिन्नायाः सिद्धिः सिषाधयिषाविरहविशिष्टायास्तस्या अभावः पक्षता अथ तृतीयक्षणाव्यवधायकद्वितीयक्षण एवाव्यवहित
त्वपर्य्यवसानाद्यत्राविरलक्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पक्षतासम्पत्तये द्वितीयः सिषाधयिषाविरहो विशेष
णमस्तु सिद्धेः प्राथमिकस्तु लक्षणस्य किमर्थमिति चेत् यत्र क्रमेण सिषाधयिषाप्रात्यक्षिकसिद्धिपरामर्शानुमितयस्तत्र तृतीयक्ष रामः
णे पक्षतासम्पत्त्यर्थमिति तन्न यत्रानुमित्यनाशकाले प्रात्यक्षिकी सिद्धिरथ च परामर्शानुमिती तत्र पक्षताविरहप्रसंगात् अथ प्रथ २

विरहपेक्ष्य द्वितीयक्षे वा द्वितीयमपेक्ष्य तृतीयस्याव्यवहितोत्तरत्वं स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिक
रणकालध्वंसाधिकरणत्वं वा तादृशाव्यवहितोत्तरत्वं वाच्यं तथा च यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र प्रथमक्षणे पक्षता
वारणाय उत्तरक्षणस्य विशेषणं प्रथमं विशिष्टान्तं द्वितीयन्तु सिद्धेस्तत्रैव द्वितीयक्षणे पक्षतासम्पत्तये यदि पुनरिच्छाजनिकासा
मग्री प्रतिबन्धात्यनुमितिं न तदानुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्ध्यभावमात्रं पक्षतेति चेत्तादृशसिद्धीनां तत्तद्व्यक्तित्वेनाभा
वः कारणं निरुक्तरूपविशिष्टत्वेन वानाद्यः अनन्तकार्यकारणभावप्रसंगात् नादृशसकलसिद्धौ अनुमित्साविरहविशेषणदान
स्यवैयर्थ्यात् तत्तत्समयसम्बन्धव्यक्तीनां तत्तत्समयावच्छिन्नतत्तन्मनोयोगादीनां वा प्रतिबन्धकत्वप्रसंगाच्च नोन्त्यः सत्यपि प
रामर्शे दैकस्याश्चित्सिद्धेरनन्तरमनुमितिः कस्याश्चिन्नेत्यत्र नियामकाभावात् न वा कारणतावच्छेदकावच्छिन्नसमाजाधीनका
र्योत्पादादिकं कारणतावच्छेदककोटौ निविशते तथा सति उत्पत्तिकालावच्छिन्नत्वविशेषितेन स्वक्षणाव्यवहितोत्तरक्षणोत्प
त्तिकस्वसमानाधिकरणानुमितिकसविषयत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणोत्पन्नसविषयत्वेन स्वक्षणाव्यव
हितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकभिन्नसविषयत्वेन वा किं वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षण
वर्त्तित्वविशिष्टज्ञानत्वादिना कारणत्वं स्यात् अव्यवहितोत्तरस्य द्वितीयएव क्षणवृत्तिनातिप्रसंगः न चादिमेषु परामर्शस्थितिक्षणेय
त्रविरोधिसिद्ध्यादिविनाशस्तत्रोत्तरक्षणेऽनुमितिर्न स्यात् परामर्शस्यानथ्यात्वादिति वाच्यम् अनुमितिसामग्र्यविरोधिन्याविरहेण त
दानीमुत्पन्नात्यनुव्यवसायादेरन्ततः संस्काराद्वा तत्सम्भवात् संस्कारजन्यत्वेन स्मृतित्वस्य प्रागेव निरासात् स्याद्वा स्वसमानाधिकर
णानुमित्यव्यवहितपूर्वक्षणवृत्तिभिन्नत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्वत्वानधिकरणक्षणवृत्तित्वविशिष्टत्वेन वा स्वस

मानाधिकरणानुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्व्वक्षणवृत्तित्वविशिष्टत्वेन वा प्रतिबंधकत्वं तदव्यवहितपूर्व्वत्वञ्च
तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वं न चात्र प्रथमे यत्र सिद्ध्यात्मकपरामर्शानन्तरं सिषाधयिषा याउत्पत्तिकाले तत्पुरुषीय
स्यैकस्यापि धर्म्मस्य न विनाशः ऽनन्तरं पुनरनुमितिः तत्र तदुत्पत्तिसमये ऽपि सा स्यात् तत्पूर्व्वकालीनानां सर्व्वेषां तादृशपूर्ववर्
त्तित्वेनाविरोधित्वादिति वाच्यम् अनवरतपरिस्पन्दमानापरिमितपवनादिपरमाणुचेतनसंयोगसन्तानान्तःपातिव्यक्तीनामविरत
मेवोपरमात् फलानुत्पादवलेनापि तादृशकल्पनासम्भवात् कारणान्तरकल्पने गौरवाच्च अन्वयव्यभिचारसन्देहस्य च कारणत्वग्र
हाविरोधित्वात् उपादीयन्तां वा नन्तदात्मसमयविशेषसम्बन्धा एव तादृशपूर्ववर्त्तिभिन्नाः भवेद्वा तत्तत्पुरुषीयानुमितिं प्रति तत्तद्दी
यानुमित्यव्यवहितपूर्वक्षणत्वादिना तादृशक्षणवर्त्तित्वविशिष्टत्वादिना वा कारणत्वं तथा चोपमानादेः प्रमाणान्तरत्वभङ्ग्यतः सर्वे
त्रानुमितिसामग्रीसंभवात् विलीयते च परामर्शत्वादिना कारणत्वं बाधकत्वादिना च प्रतिबन्धकत्वं अनयैव रीत्या कार्य्यान्तरेष्व
पि क्लृप्तानां कारणानां प्रतिबंधकानां ज्ञानतथात्वमक्लृप्तानाञ्च तथात्वं प्रसज्येत अत एव न द्वितीयोपि प्रकारः वैयर्थ्याच्च सिद्धेः सि
षाधयिषाविरहविशिष्टस्य सिद्ध्यनुमानातिरिक्तसाधकमानयोरन्यतरस्याभावः कारणमिति तु केचित् तन्न साधकमानं हि सिद्धिस्वरूप
योग्यं तदुपहितं तत्सामग्री वा नाद्यः चक्षुरादिसत्वे विनानुमितीच्छामनुमित्यभावप्रसंगात् न द्वितीयः सिद्धेः पूर्वं तदुपहितत्वाभावे
न प्रत्यक्षसामग्रीसत्वेप्यनुमित्यापत्तेः अनुमानातिरिक्तेत्यस्य वैयर्थ्याच्च न तृतीयः अनुमितिसामग्र्यभाववत्वेन प्रत्यक्षकारणत्वम् अनुमि
त्साविरहविशिष्टप्रत्यक्षसामग्र्यभाववत्वेन चानुमितिकारणत्वमित्यन्योन्याश्रयात् स्थाणुत्वाभावव्याप्यदर्शनक्षणे प्रतियोग्यारोपविर
हेणाभावप्रत्यक्षसामग्रीविरहात् पक्षतासत्वे स्थाणुत्वारोपक्षणे तदभावानुमित्यापत्तेरित्यपि कश्चित् वस्तुतस्तु स्वतन्त्रान्वयव्यति
णप

ध्यालित्वान्नियमेन प्रथममुपस्थितत्वाल्लाघवाच्च प्रत्येकमेव तथात्वमन्यथा बाधादेरप्यत्रैवान्तर्भावप्रसंगात् न चानुमित्सा
विरहस्य प्रत्येकं विशेषणत्वे गौरवं शाब्दसिद्धौ सत्यामशाब्दं ज्ञानं जायतामितीच्छायामनुमितेरुत्पादात् सिद्धावनुमितिविषये
च्छाविरहस्य प्रत्यक्षसामग्रीसत्त्वे च तादृशेच्छायामनुमित्यनुत्पादात् साधकमाने अनुमितित्वादिप्रकारकेच्छाविरहस्य पृथ
गेव विशेषणतायास्त्वयापि वाच्यत्वात् स्वनिवर्तकप्रत्यक्षादिसामग्रीसमवहितान्यत्वादिना च तादृशेच्छयोरनुगमेऽनौव गौर
वम् अन्यतरत्वघटकयोरन्योन्याभावयोर्मिथो विशेषणविशेष्यभावे विनिगमकाभावश्च आत्मनिष्ठश्च समवायेन सिद्धेरभावः भि
न्नाभिन्नेन च सम्बन्धेन तत्तत्साधारणकारणरूपायास्तत्सामग्र्याः मणिविशिष्टस्य वन्हेरिवेतरेतरविशिष्टस्य मनोयोगादेः प्रतिब
न्धकत्वायोगात् तथा च कथमनुगतरूपेण तयोरभावः कारणं एवं सिद्धेः सिषाधयिषाविरहेण वैशिष्ट्यमेककालावच्छेदेनैकात्म
वृत्तित्वं प्रत्यक्षादिकारणचक्षुःसंयोगादेस्त्वन्यादृशमिति सामग्रीविशेषाभावस्य हेतुत्वेपि लाघवात्सिद्ध्यभाव एव पक्षव्यवहारनि
मित्तं एतदेवाभिसन्धाय प्रवृत्तिनिमित्तमुक्तमिति वक्ष्यति फलानुपहितसिद्धौ इच्छाविरहविशिष्टसिद्ध्यभावापेक्षया बाधाभावस्य
लघुत्वेपि सिद्धसाधनस्य लपक्षव्यवहारविरहेण तादृशसिद्ध्यभावस्यावश्यकत्वे बाधाभावो न निविशते गौरवात् विशिष्टसिद्ध्य
भावस्य चात्मनिष्ठस्यैवानुमितिहेतुत्वेपि तस्य परम्परासम्बन्धादेव पक्षतादौ पक्षव्यवहार इति ध्येयम् एकस्य पुंसोऽनुमित्सास
त्वेपि अन्यस्य तद्विरहिणः प्रत्यक्षादिसामग्रीसत्त्वेऽनुमित्यनुत्पादात् तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषीयानुमित्साविरहकालीन
तत्तत्पुरुषीयसिद्धिसामग्रीविशेषविरहोऽनन्यगतिकत्वेन हेतुरुपेनव्य इति वदन्ति। अथ सिद्ध्युत्तरानुमितौ सिषाधयिषा हेतुरस्तु
न चैवं मण्यादिस्थलीयदाहं प्रत्युत्तेजकस्य हेतुत्वापत्तिः उत्तेजकानामननुगतत्वात् तावदभावविशिष्टमण्याद्यभावस्य चानुगततया

जा॰प॰ रिति चेदिहापि दर्शितोऽननुगमः सिषाधयिषायाः सिद्ध्युत्तरानुमितित्वज्ञानानुगतानतिप्रसक्तं दुर्व्वचं सिद्धिस्थितिकालीनां स्वेतरसि
४ द्धिकालीनां वानुमितिं प्रति हेतुत्वकल्पने च विनापि सिषाधयिषां सिद्धिनाशकालेऽनुमित्युत्पादो दुर्व्वारः एकस्य च पुंसः सिद्धिसत्त्वेऽन्य
स्य सिषाधयिषाशून्यस्यानुमित्यनुत्पादप्रसंगः तत्तत्पुरुषीयतादृशानुमितिप्रति सिषाधयिषाया हेतुत्वेऽनन्तकार्य्यकारणभावप्रसंगः अपि
च सिद्धौ सत्यां विनापि सिषाधयिषां सामान्यसामग्रीतोऽनुमितिसामान्योत्पत्तिप्रसङ्गात् नहीदृशविशेषसामग्रीं विना सामान्यसामग्र्या
अनुमितिजनकत्वं नास्ति न चान्यत्रापि तद्विशेषसामग्र्यन्तरमस्तीति तत्कल्पने चातिगौरवं इह जायमाना सा सिद्ध्युत्तरैव स्यात् सा
च न जायते कारणाभावादिति चेन् समाजनिष्ठानुमितिसामान्यन्तु सादेवकार्य्योत्पादविरहस्य विना कारणाभावमसंभवात् करण
व्यापारत्वेनावश्यकः कारणभावस्य परामर्शस्य कारणतावच्छेदिकापक्षतानकारणमिति तु भ्रमः प्रतिबन्धकान्तराभाववदन्वय
व्यतिरेकशालित्वेन हेतुत्वात् अन्यथा यथासंभवनिमित्तकारणस्य समवायिकारणत्वाद्यवच्छेदकत्वप्रसंगात् अथानुमिति
साधारणसिद्धेः प्रतिबन्धकत्वे तदभावस्य मण्याद्यभाववत् प्रतिबन्धकाभावत्वेन कार्य्यकालवृत्तेरेव हेतुत्वात् अनुमितिकाले
च तदसंभवात् सा नोत्पद्येतेति चेन्न यस्य मण्याद्यभावादेः कार्य्यसमकालतयान्वयव्यतिरेकित्वं तस्यैव तथात्वेन हेतुत्वं न तु स
र्व्वस्य गौरवात् अन्यथा समवायिकारणस्य कार्य्यसहभूतस्यैव हेतुत्वात् कारणमात्रस्य तथात्वप्रसक्तौ प्राभाकरा एवं विजयेर
न्निति। प्राभाकरास्तु विनाप्यनुमित्सां क्वचित् परामर्शानुमितिप्रवाहस्याविरललग्नस्यानुभविकत्वात् कालभेदकल्पनायाञ्च मा
नाभावात् मानाभावाच्च पक्षता नानुमितिहेतुः परार्थानुमाने तु सिद्धसाधनमर्थान्तरविधया दूषणमित्याहुः॥ ॐ॥ अथ जागदी रामः
शीपक्षता॥ अनुमितिलक्षणेति। अनुमितिस्वरूपेत्यर्थः। व्याप्तिज्ञानजन्या या अनुमितेः किमन्यत्कारणमिति जिज्ञासयैव पक्ष ४

गादिति भावः अत्रानुकूलत्वं जनकतावच्छेदकसाधारणप्रयोजकत्वमात्रं तेन व्याप्तेरनुमित्यहेतुत्वेऽपि न क्षतिः यत्तु ज
नकतावच्छेदकत्वमेवात्रानुकूलत्वं व्याप्तिवत्पक्षताया अपि करणव्यापारतया सिद्धहेतुभावस्य परामर्शस्य जनकतायाम
वच्छेदकत्वादिति मतं तत्तुच्छं पक्षतायाः कारणमिति तु भ्रमः इत्याद्युत्तरग्रन्थविरोधापत्तेः पक्षधर्मतामिति। पक्षे धर्मस्तत्त्वं पक्षस्याइति
व्युत्पत्त्या पक्षतामित्यर्थः पक्षस्य धर्मस्तत्त्वं धर्मविशेषः पक्षत्वमिति वा देवतादिशब्द इव तलः स्वार्थिकत्वात् व्याप्तेतीति। न च प्र
कृतग्रन्थस्वरसवलितस्यैव पाठस्य धर्तुमुचितत्वाद्व्याप्येत्येवधारणायुक्तमिति वाच्यम् प्रयोजकत्वात् व्याप्तिनिरूपणानन्तरमि
त्येवं मूलपाठमनुसृत्य तत्तयोपन्यासादिति भावः। ननु संदिग्धसाध्यधर्मत्वमिति मूलस्य परिसंदेहविषयीभूतसाध्यवत्त्वमर्थस्तदा
विनष्टवन्ह्यादेर्जलादावनुमितिर्न स्यात् तत्र तादृशसाध्याभावेन पक्षताविरहादतः साध्यसंशयस्यैव पक्षतात्वमाह यत्रेत्यादिना य
द्धर्मिकयत्सम्बन्धावच्छिन्नयत्प्रकारकनिश्चयत्वेन यत्संशयं प्रति निवर्त्तकत्वं तत्संदेहस्तत्पक्षकतद्विधेयकानुमितौ हेतुभूता पक्ष
तेत्यर्थः तेन वह्निधर्मिकघटादिनिर्णयात्मकस्य पर्वतधर्मिकवन्हिमत्त्वनिश्चयस्य निवर्त्तनीयोऽपि वन्हौ घटादिसंदेहो न पर्वत
पक्षकवन्ह्यनुमितौ पक्षता न त्र वन्हिमत्त्वनिश्चयत्वेनाप्रतिबन्धकत्वादिति भावः अत्र निश्चयत्वावच्छिन्नत्वञ्च निश्चयत्वव्याप
कत्वेन तत्स्वरूपसम्बन्धरूपं तेन प्रमेयवन्हिसाध्यके प्रमेयवन्हिमान् वन्ह्यभाववान्वा इत्यादिसंग्रहः। अत्र पक्षधर्मिकसाध्य
वत्तानिश्चयनिवर्त्तनीयत्वमात्रं बाधनिश्चयेऽतिव्याप्तमतः संशयपदं न च बाधनिश्चयस्य पक्षतात्वेन क्षतिः विशिष्टबुद्धिसामान्यं प्र
त्येव बाधनिश्चयस्य विरोधित्वादेव तत्रानुमित्यसंभवादिति वाच्यम् संदिग्धाप्रामाण्यकबाधनिश्चयसत्त्वे सिद्ध्यात्मकादपि पराम
र्शादनुमित्यापत्तेः तादृशबाधनिश्चयस्य विशिष्टबुद्ध्यप्रतिबन्धकत्वात् यद्यपि निर्वन्हिः पर्वतो रूपवान्वेत्यादिसंदेहात्मकस्य

जा·५· बाधनिश्चयस्य पर्वतत्वधर्मिकवह्निमत्तानिश्चयनिवर्त्यत्वं संशयत्वं वास्तीति वह्निसाध्यकपक्षतालक्षणस्य तत्रातिव्याप्तिः
दृश्ये साध्यसंशयत्वोक्तौ चानानुगमे वार्त्तापि तथापि संशयत्वमत्र तादृशनिश्चयाप्रतिबंधकत्वं तथा च पक्षधर्मिकसाध्यवत्ता
५ निश्चयनिवर्त्यत्वे सति तादृशनिश्चयप्रतिबंधकतावच्छेदकविषयितान्यूनस्य ज्ञानत्वं फलितार्थः तेन गृहीताप्रामाण्यकबाध
निश्चयस्य पक्षधर्मिकसाध्यवत्त्वज्ञाननिवर्तकत्वाभावेपि तन्निवर्तकतावच्छेदकविषयिताकत्वादेव व्युदासः यद्यपि चैवम
पि वह्निव्याप्यसाध्यकानुमितौ वह्निमान्नवेति संशयः पक्षतास्यात् तस्यापि पक्षधर्मिकवह्निव्याप्यवत्त्वरूपसाध्यनिर्णयनिव
र्त्यत्वात् तादृशनिश्चयाप्रतिबन्धकत्वाच्च न चेष्टापत्तिः पर्वतो वह्निमान्नवेति संशयोत्तरं पर्वतो वह्निव्याप्यवानित्येवं साध्यनिर्णये
पि वह्निव्याप्यसाध्यकानुमित्यापत्तेः तथापि प्रकृतपक्षविषयितावह्निर्भूतसाध्यविषयिताघटितधर्मावच्छिन्नं यत्प्रकृतपक्ष
धर्मिकप्रकृतसाध्यवत्तानिश्चयनिवर्त्यत्वं तन्निवेशितमित्यदोषः पर्वतो वह्निमान्नवेति संशयस्य च वह्निव्याप्यवत्तानिश्चयनि
वर्त्यत्वेपि तादृशनिवर्त्यतायाः पर्वतत्वधर्मिकवह्न्यभावप्रकारत्वेनैवावच्छेद्यतया वह्निव्याप्यवत्त्वरूपसाध्यवत्त्वविषयितान
मू वच्छेद्यत्वात् न च तथापि वहिर्भूतान्तदलंव्यर्थमिति वाच्यं वह्निव्याप्यवत्त्वधर्मा पर्वतो वह्निमान्नवेति संशयस्य तादृशपर्वत
त्वावच्छिन्नपक्षकवह्निव्याप्यसाध्यकानुमितौ पक्षतात्वव्युदासकत्वात् वस्तुतस्तु पक्षविषयितावहिर्भूतेत्याद्युपादाय साध्या श्री
भावत्वावच्छिन्नप्रकारितासाध्यविशेष्यकत्वान्यतरावच्छिन्नमेव साध्यनिश्चयनिवर्त्यत्वं वाच्यं तेन वह्नौ पक्षे वह्नेः साध्यतायां
वह्निर्वह्निमान्नवेति संशयस्य पक्षविषयितावहिर्भावेण साध्यविषयिताप्रसिद्धावपि न तत्राव्याप्तिः न चैवं ह्रदादौ वह्न्यभावस्या राम:
।।शापत्ते ह्रदो वह्निमान्नवेति संशयः। पक्षता न स्यात् तन्निष्ठायास्साध्यवत्तानिश्चयप्रतिबध्यताया वह्निमत्ताविषयकत्वेनैवाव ।। ५

नुमानै

CC-0. In Public Domain. Digitization by eGangotri

॥श्री॥ धेन यासाध्याभाववत्त्वावच्छिन्नप्रकारित्वान्नवच्छेद्यत्वमिति वाच्यमिष्टत्वात् ह्रदो वन्ह्यभाववान्नवेत्याकारकसंशयस्यैव प
क्षतात्वात् साध्यपक्षभेदेन पक्षतायानानात्वाद्व्याप्यवत्तासाध्यपक्षतालक्षण एव साध्यविषयित्वघटितधर्मावच्छिन्नप्रतिबध्य
तोयाः प्रवेश्यत्वादिति वदन्ति वन्हिव्याप्येवन्हिव्याप्यस्य साध्यता यो वन्हिव्याप्यो वन्हिव्याप्यवान्नवेति संशयस्य पक्षतात्वाहान्याप
त्तेः तादृशनिष्ठायास्तादृशपक्षधर्मिकतादृशसाध्यवत्तानिश्चयनिवर्त्यतायाः पक्षीभूतसाध्यविशेष्यकत्वावच्छेद्यत्वादिति ध्येयम् केचि
त्तु संशयत्वमत्र प्रकृतपक्षविषयितानिरूपितप्रकृतसाध्यनिष्ठविषयिताकत्वमतो वन्हिव्याप्यसाध्यकानुमितौ वन्हिमत्वसंशय
स्य निर्वन्हित्वसाध्यकानुमितौ महानसीयवन्हिमत्वसंशयस्य न पक्षतात्वं तस्य तादृशसाध्यपक्षोभयवैशिष्ट्यावगाहित्वाभावात् ए
वं च पक्षधर्मिकसाध्यवत्तानिश्चयस्यापि तादृशत्वात् तद्वारणाय निवर्त्यान्तमित्याहुः तन्न साध्यपक्षवृत्तित्वे न वा साध्यपक्षनिष्ठाभाव
प्रतियोगित्वेन वेत्यादिसंदेहस्यापि लक्ष्यतया तत्राव्याप्तत्वात् तेषां पक्षसाध्योभयवैशिष्ट्यानवगाहित्वात् पर्वतो वन्हिव्याप्यवान्नि
त्येवं साध्यनिश्चयनिवर्त्तनीयस्य पर्वतो निर्वन्हिर्वन्हिव्याप्यस्तु पर्वतवान्नवेति समूहालंबनस्य वन्हिव्याप्यसाध्यकानुमितौ पक्षता
त्वप्रसंगाच्च तस्यापि वन्हिव्याप्यात्मकसाध्यपक्षोभयवैशिष्ट्यावगाहित्वात् आधेयत्वसंबंधावच्छिन्नसाध्यविषयितायाः प्रवेशे
तु पक्षस्साध्यवान्नवेत्यादिसंशयस्यासंग्रहापत्तेरिति दिक् यत्तु साध्यवत्तानिश्चयनिवर्त्यसंशयत्वमित्यत्र संशयत्वं साध्याभाववन्नि
श्चयनिवर्त्यत्वरूपं सर्वत्र ग्राह्यमतो नोक्तदोषाणामवकाश इति तन्न तुच्छं पर्वतत्वावच्छेदेन वन्हेः साध्यवत्तास्थले वन्ह्यभाववत्त्वे
न सधर्मावन्हिमत्पर्वतो द्रव्यं नवेति संशयस्य पक्षतात्वापत्तेः तादृशसंशयस्य पर्वतत्वावच्छेदेन वन्हिनिश्चयस्य न ह्रदत्वावच्छेदेन
वन्ह्यभावनिश्चयस्यापि प्रतिबध्यत्वादिति दिक् इदं तु चिन्त्यते अन्यत्रास्तु यथा तथापि वन्हिव्याप्यवन्हेः साध्यतास्थले तद्धर्मिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰प॰ ६ तादृशनिश्चयप्रतिबध्यस्य संशयस्याप्रसिद्ध्या कुत्र लक्षणं नेयं वह्निव्याप्यवान्वह्निमान्नवेत्यादिसंशयस्याहार्यत्वेनाप्रतिबध्यत्वा
दिति ननु पक्षधर्मिकसाध्यसंशयत्वं साध्यधर्मिकपक्षवृत्तित्वसंशयत्वादिकं वा लघुलक्षणं कुतः परित्यक्तमत आह तेनेति या
दृशसंबंधावगाहित्वस्य फलमाह न वेति मूलस्य स्वसाध्यधर्मवत्त्वमित्यस्य परित्यागे बीजमाह न वा तम इत्यादि संदिग्धसाध्य
धर्मवत्त्वमिति मूलस्य संदिग्धं साध्ये धर्मत्वं यस्येति व्युत्पत्त्या यद्वृत्तित्वं साध्ये संदिग्धमिति यावत् किं वा संदिग्धः साध्यधर्मो यत्रेति
व्युत्पत्त्या यथाश्रुतार्थः तत्र प्रथमे पक्षीभूततमःसमवेतस्य द्वितीये च धर्मात्मकगगनसाध्यस्याप्रसिद्ध्या इदमपि लक्षणं
दुष्टमित्याशयेन तमसः पक्षतया गगनस्य साध्यतयोल्लेखः अत्र च मते पक्षसाध्यवत्तासंशयोत्तरं सिद्ध्यात्मकपरामर्शादप्यनुमितिर्भव
त्येवेति बोध्यम् न चोक्तलक्षणस्य साध्यसंशयमात्रपरत्वेऽग्रिममूले तस्य विशेषणत्वादिविकल्पस्यासंगतिः तत्र विशेषणोपलक्षण
पदयोः साक्षात्परंपराकारणपरत्वात् न संदिग्धं साध्यं यत्र तद्धर्मत्वं न तत्संबन्धित्वमिति व्युत्पत्त्या लब्धं स्वविशेष्यकसाध्यसंशयसंबं
धित्वरूपं यथाश्रुतार्थमादाय वैविशेषणत्वोपलक्षणत्वयोरग्रे विकल्प इत्यप्याहुः तद्वैकल्यम् पक्षतावैकल्यम् ननु योग्यताया
श्चानिरूपणादिति ग्रन्थेनाऽग्रेऽनुमित्साया इव संशयस्यापि योग्यताया निरस्यपि तु सूचितत्वात् तदनिरसनान्मूलस्य न्यूनत्वमत आ
ह संशयेति सिद्धिबाधयोर्जनकस्य व्याप्तिज्ञानमनोयोगादेः सर्वत्रैवानुमितेः पूर्वं सत्त्वाद्वा चेष्टसाधकेत्यादि तथा च साधकेन बा
धकेन जनितं यज्ज्ञानमिति मूलेऽन्वयः ननु पक्षधर्मिकसाध्याभाववन्निश्चयात्मना बाधस्य केवलान्वयिन्यप्रसिद्धिरत आह केवला
न्वयिनि चेति पर्वतो न वाच्यत्ववानित्याकारकः पटाद्यभावे प्रतियोगितासंबंधेन वाच्यत्वाद्यवगाह्यपि बाधः खंडशः प्रसिद्ध्या तत्र रामः
संभवतीत्यावेदयितुं सुलभ इत्युक्तं न चैवं नानाविधानां बाधबुद्धीनामनुगमासंभवः प्रातिस्विकरूपेण तेषां निवेशे तु नाप्यभावद्वय ६
शाप

CC-0. In Public Domain. Digitization by eGangotri

श्रीतेमूलासंगतिर्बाधाभावस्यानेकत्वादिति वाच्यं पक्षधर्मिकसाध्यवत्ताज्ञानविरोधिनिर्णयत्वेन तासामनुगमादिति भावः मू
लेप्रत्यक्षपरिकलितमिति प्रत्यक्षपरिकलितत्वविशिष्टविषयकोऽनुमानजन्यो बोधस्तदिच्छाधीन इत्यर्थः तेनोपजातप्रत्यक्ष
विषयत्वदशायामेवानुमितिविषयत्वलाभान्नवचनयोर्विरोधस्यासंगतिरिति ध्येयं तत्रापीति अनुमित्सानाशस्थलेपि पुनरि
ति उत्पन्नपरामर्शानन्तरमित्यर्थः ननु पुनरनुमित्सार्थमनुमितीष्टसाधनताज्ञानस्य पूर्वमपेक्षणात्तेनैव प्राक्तनपरामर्शनाशा
त्कुतस्तत्रानुमितिः स्यादत आह ततः परामर्शान्तरमिति ततोऽनुमितिरित्यग्रेऽन्वयः इष्टसाधनताज्ञानपरामर्शयोः पृथक्कल्पने गौ
रवादाह स्मरणात्मकेति विशिष्टानुभवं प्रत्येव विशेषणज्ञानस्य साक्षाद्धेतुतया तादृशविशिष्टपरामर्शार्थं विशेषणज्ञानकल्पने गौ
रवमपि नास्तीत्यावेदयितुं स्मरणात्मकादित्युक्तं न चोक्तपरामर्शानंतरमनुमित्सादशायामनुमितिप्रसंगः सामग्रीसत्त्वादिति वाच्यं
सिषाधयिषारूपायाः पक्षतायाः प्रागसत्त्वादिच्छासामग्र्या एव प्रतिबंधकत्वाच्चेति भावः कल्पनीयमिति न चैतावतापि प्रत्यक्षा
दिभिन्नं वन्हिज्ञानं जायतां वन्ह्यनुमितिर्जायतामित्यादिरूपाणामनुमित्साव्यक्तीनामननुगतरूपविरहात्कारणत्वासंभव इति वा
च्यं यद्यनुमित्सासत्त्व एव यत्पक्षकयत्साध्यकानुमितिस्तदनुमित्साविरहकूटत्वावच्छिन्नाभावत्वेनैव तत्पक्षकतत्साध्यकानु
मितावनुमित्साया हेतुत्वसंभवादिति भावः यत्तु यत्पक्षकयत्साध्यकानुमितिनिवर्त्याऽनुमित्सात्वेनैव तत्पक्षकतत्साध्यकानु
मितौ हेतुत्वमिति तन्न तादृशानुमितित्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यत्वस्योक्तावशाब्दज्ञानं जायतामित्याकारा
नुमित्साया असंग्रहापत्तेः तस्याः शाब्दज्ञानत्वेन प्रतिबंधकत्वात्प्रकृतपक्षसाध्यकानुमितिनिष्ठप्रतिबंधकतामात्रस्योक्तौ च स
मूहालंबनतादृशानुमितिप्रतिबध्यतामादाय घटाद्यनुमित्साया अतिव्याप्त्यापत्तेरिति ध्येयं मिश्रमतमाशंक्य निषेधयति न चेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰प॰ वाच्यमित्यन्वयः अनुमितिजनकेति तत्पुरुषीयतत्पक्षकतत्साध्यकानुमितौ तादृशानुमितिजनके च्छेव पक्षतेत्यर्थः विषयित
७ याधात्वर्थान्वयिन एव सतः समानकर्तृत्वस्य तं त्रत्वादितिभावः सुलभेति तथा च घनगर्जितादनुमितौ न व्यभिचार इतिभावः त
स्याइ स्वरेच्छायाः तदानीं सिद्धिदशायां नतु ज्ञानकत्वं न तादृशानुमितिजनकत्वं तद्धितादृशानुमितिजनकत्वं ह्यनपायात् स्वरू
पतः सत्वात् न च तत्पुरुषीयतादृशानुमितिं प्रति तत्पुरुषीयतादृशानुमित्यव्यवहितप्राक्क्षणवृत्तित्वविशिष्टेच्छात्वेन हेतु
त्वात् तदानीं स्वरूपयोग्यत्वमेव नास्तीति वाच्यं कार्याव्यवहितपूर्ववर्तित्वादिना हेतुत्वस्याग्रे सार्वभौमनिरुक्तौ निरस्तत्वादितिभा
वः तदुपधानं तादृशानुमितिविशिष्टत्वं तदभावादिति तथा चासत्यामपि सिद्धावनुमितिर्न स्यात् प्रत्युत कानुमित्यनन्तरमेवानुमि
त्यनन्तरं स्यादितिभावः तत्सामग्रीति तत्पुरुषीयतत्पक्षकतत्साध्यकानुमितिसामग्रीविशिष्टत्वमेव तादृशानुमितिजनकत्वमित्यर्थः
प्रसंगादिति तथा च परामर्शादिकं हेतुर्न स्यात् अवच्छेदकत्वादितिभावः इष्टापत्तौ बाधकमाह शेषेति तादृशानुमितिसामग्रीवि
शिष्टत्वेनैव हेतुत्वसंभवादिच्छाभागस्य वैयर्थ्यादित्यर्थः न चात्र सामग्रीपदेन छेतत्कारणस्तोम एव धर्तव्यस्तथा च सिद्धिकालीन
परामर्शस्यापि तादृशस्तोमविशिष्टत्वादिति ततोऽनुमितिवारणार्थमेवेच्छाभागः प्रवेशनीयः इति वाच्यं सिद्धिदशायामिच्छान्य
स्यानुमितिकारणस्तोमस्यासत्वात् अन्यथा तादृशस्तोमविशिष्टायाभगवदिच्छास्तदानीमपि सत्वादिच्छानिवेशेऽपि तत्रानुमितेर्दु
वारतापत्तेः घनगर्जितादनुरोधेन तादृशेच्छायाः सामानाधिकरण्यप्रत्त्याहेतुत्वासंभवादितिभावः तन्वीच्छाभागो न देयस्तादृशानु
मितिसामग्रीविशिष्टत्वेनैव हेतुत्ववाच्यं तथैवानुमित्सायाः सर्वत्र हेतुत्वसंभवादित्यत आह तदानीमिति सिद्धिदशायां पत्कारणा राम: ७
शा[illegible]वप्रयुक्तः सामग्रीविरहः तत्कारणस्येत्यर्थः। वक्तव्यतापातादिति तथा चावश्यकत्वात्सैव पक्षतेति भावः ननु क्रमोत्पन्नानां सि

CC-0. In Public Domain. Digitization by eGangotri

ष्टेच्छापरामर्शानां युगपदसत्त्वात्सहकृतानां तदलं व्यर्थमत आह यत्रेति पक्षस्मरणमिति तदनन्तरं चानुमितिरित्यग्रेऽन्वयः विशिष्टा
नुभवं प्रत्येव विशेषणज्ञानस्य हेतुत्वात्तदपेक्ष्य गौरवं नास्तीत्याशयेन स्मरणपर्यन्तानुधावनं अत्रानुमित्सार्थमनुमितौ इष्टसाधन
ताज्ञानान्तरं कल्प्यमतो लाघवादाह अनुमितीत्यादिना दृशस्मरणादिति साध्यतद्व्याप्यविशिष्टपक्षस्मरणादित्यर्थः। अनुमित्से
ति तदनन्तरं चानुमितिरित्यग्रेणान्वयः स्मृत्यात्मकसिद्धौ सहकृतान्तविशेषणस्य प्रयोजनमुक्त्वाऽनुभवात्मकसिद्धौ तदाह पूर्वका
लेत्यादिना ज्ञानेच्छयोरयौगपद्यादनुमित्साजन्मक्षणे विशेषणस्मरणस्यासंभवादुत्तरक्षणे तत्स्मरणे तु परामर्शदशायामनुमि
त्सानाशात्तत्र पक्षतैव नोपेयत इत्यत उक्तं पूर्वकालीनेत्यन्तेति अनुमित्सापूर्वकालोत्पन्नेत्यर्थः अनुमित्सायाः पूर्वं पक्षसन्निकर्षेऽ
नुमित्सामवधूय वन्ह्यादिसाध्यकतद्व्याप्यवत्त्वेन पर्वतादेः प्रत्यक्षमेव स्यादृहिरर्थलौकिकप्रत्यक्षसामग्र्याः सर्वतो बलवत्त्वादनु
मित्सानन्तरं सन्निकर्षे च परामर्शदशायां नानुमित्सायाः सत्त्वमत उक्तमनुमित्साकालेति इदमुपलक्षणं यत्रानुमितौ इष्टसाधनता
विषयकस्य साध्यतद्व्याप्यविशिष्टस्य प्रत्यक्षानन्तरमनुमित्सा तत्रापि पक्षतासंपत्त्यर्थं सहकृतान्तं बोध्यं पक्षतासंपत्तय इति न
चानुमित्सादशायामपि घटाद्यवच्छेदेन तदभावस्यात्मनि सत्त्वात्पक्षताभंगप्रसंगः देशानवच्छिन्नविशेषणतयैव सामानाधिक
रण्यरूपस्यानुमित्साविरहवैशिष्ट्यस्योक्तत्वादिति नन्वनुमितिगोचरेच्छामात्रस्य सिषाधयिषात्वे द्रव्यत्वेन द्रव्यज्ञानं जायतामि
तीच्छायामपि सिद्ध्यात्मकपरामर्शादनुमितिः स्यादत आह सिषाधयिषेति तत्साध्येति प्रकृतसाध्यविधेयतानिरूपितप्रकृ
तपक्षविषयताकत्वप्रकारिकेत्यर्थः तेन वन्हिविशिष्टह्रदाद्यप्रसिद्धावपि ह्रदो वन्हिमानित्याद्यनुमितौ न पक्षताहानिः नवा पा
षाणमयत्वेन पर्वते तेजस्त्वेन वन्ह्यनुमितिर्जायतामितीच्छायामपि सिद्धिदशायां पर्वतो वन्हिमानित्यनुमितिस्तदिच्छायाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰प
८

पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्हित्वावच्छिन्नाधेयताद्यनवगाहित्वादिति भावः वन्हिमत्त्वेन पर्वतस्य प्रत्यक्षं जायता
मितीच्छावारणार्थमाह अनुमितिविषयिणीति यत्किंचिदिति दृश्यत्वेन दृश्यगोचरज्ञानं जायतामितीच्छायामपि वन्हेः सिद्ध्यात्म
कपरामर्शादनुमित्यनुत्पादादित्यर्थः तेन ज्ञानं जायतामितीच्छोत्तरं सिद्ध्युत्पादे वक्ष्यमाणस्वविषयसिद्ध्यनुपहितत्वविशेषणादेव त
दिच्छावारणं सिद्ध्युत्तरं च तादृशेच्छा न भवत्येव ज्ञानमात्रस्यैव ज्ञानत्वप्रकारिकेच्छाविरोधित्वादिति प्रयुक्तं न त्वनुमितिविषयत्वे
नानुमित्याद्युक्तौ नाप्रवेशे गौरवात् अनुमितित्वप्रकारिकेच्छैव प्रवेश्यतामत आह अनुमितित्वेनेति सिद्ध्यात्मकपरामर्शोत्तरं पर्वते वन्हि
ज्ञानं जायतामितीच्छैव नोत्पद्यते सिद्धिविरोधित्वात् सिद्ध्यात्मकपरामर्शपूर्वकालोत्पन्नायास्तादृशेच्छाया नानुमितावुपयोगः स्ववि
षयसिद्ध्यनुपहितत्वाभावात् अतः प्रत्यक्षाद्यतिरिक्तमित्युक्तं अनुमित्युत्पादाच्चेति तथा च व्यभिचारात् लाघवमकिंचित्करमिति भावः न
नु यत्र वन्हिमत्त्वेन पर्वतस्य प्रत्यक्षं जायतामितीच्छैव प्रत्यक्षत्वेनानुमितिमवगाह्य ज्ञानं तत्रापि सिद्धौ सत्यामनुमित्यापत्तिः किं च प्र
कृतसाध्यविधेयतानिरूपितप्रकृतपक्षविषयताकत्वप्रकारकेच्छाया एवोत्तेजकत्वे वन्हिभिन्नान्यविधेयकानुमितिर्जायतां प्र
त्यक्षादिभिन्नं वन्हिविधेयकं ज्ञानं जायतामितीच्छायामपि सिद्ध्यात्मकपरामर्शादनुमितिर्न स्यात् तथा च नादृशनादृशेच्छानाम
प्युत्तेजकत्वं वाच्यमित्यननुगम इत्यत आह यादृशेति। सिद्धिसमानकालीनानामनुमितिप्राक्क्षणावस्थायिसिषाधयि
षाणामुत्तेजकविधया पक्षतायां प्रवेशे व्यर्थः कारणतावच्छेदकगौरवापादकश्च स्यादतः सिद्धौ सत्यामित्युक्तम् अत्रैककालानुमि
त्याद्युक्तौ नामनुगतरूपेणोत्तेजकत्वलाभार्थं यादृशयादृशेत्युक्तमिति प्राञ्चः वस्तुतो यद्यदिच्छाव्यक्तौ सत्त्व इत्येव वक्तव्यं अन्य
था यत्र सिद्ध्यात्मको वन्हिमात्रपरामर्शस्तत्रानुमितिर्जायतामितीच्छायामपि वन्ह्यनुमित्युत्पादादनुमितित्वप्रकारकेच्छात्वे

राम:
८

नाप्युत्तेजकतया यत्र सिद्ध्यात्मको वन्हिपरामर्शः एवं सिद्धनात्मक द्रव्यत्वादिसाध्यकः परामर्शस्तत्रानुमितिर्जायतामितीच्छादशा
यां वन्ह्यनुमित्यापत्तेः एवं पर्वतमात्रपक्षकासिद्ध्यात्मकपरामर्शो वन्ह्यनुमितीच्छायां पर्वते वन्ह्यनुमितिस्तत्र वन्ह्यनुमितित्वप्र
कारकेच्छात्वेनोत्तेजकत्वे यत्र पर्वते महानसे च वन्हिव्याप्यवत्वपरामर्श एव पर्वते सिध्यात्मकः तत्रापि वन्ह्यनुमितिर्जायतामि
त्याकारकेच्छायां पर्वते वन्ह्यनुमित्यापत्तेः न चेष्टापत्तिरनुभवविरोधात् प्रकारांतरेण विषयपर्य्यवसानसंभवेनानुमित्याना
मवगतार्थगोचरज्ञानानर्जकत्वात्स्याकंतु समूहालंबनस्थलीयतत्तद्व्यक्तीनामुत्तेजककोटावप्रविष्टत्वान्न दोष इति परंतु त
त्पक्षकतल्लिंगकानुमितित्वावच्छिन्नं प्रत्येव पक्षतायाः कारणत्वमिति कल्पते तल्लिंगकतत्पक्षकतत्साध्यकानुमितिप्रकारिकेच्छा
त्वाद्यवच्छिन्नाभावोऽनुगतरूपेणैव पक्षतायां लाघवान्निवेशनीयो न तु तत्तदिच्छाव्यक्तीनामभावसमुदाय इत्याशयेनैव या
दृशेच्छेत्युक्तमिति ध्येयं इच्छाभावसमुदायस्येति इदमुपलक्षणं सिद्धिधर्मिकयद्यदप्रामाण्यज्ञानसत्वे सिद्धिदशायामनुमितिस्त
त्तदप्रामाण्यज्ञानाभावसमुदायस्यापि सिद्धौ विशेषणत्वं बोध्यमेतेन एवं मिश्रैरनुमितिग्रंथेऽप्रामाण्यज्ञानास्कंदितापासिद्धेरप्रति
बंधकत्वमुक्तं न सत्तिरिति यद्यपि एवमपि तत्तदिच्छाविरहव्यक्तीनां विशेष्यविशेषणभावे विनिगमनाविरहेणानंतकार्यकारण
भावः न चैकेच्छाविरहविशिष्टापरेच्छाविरहस्तद्विशिष्टसिद्धित्वेन प्रतिबंधकत्वे सामानाधिकरण्यात्मकवैशिष्ट्यस्य द्विधा प्र
वेशे गौरवमतस्तावतीनामिच्छाविरहव्यक्तीनामेकत्र हृदयमितिरीत्या युगपदेव सिद्धिविशेषणत्वं लाघवादिति वाच्यं सिद्धौ तावदि
च्छाविरहवैशिष्ट्येपि सिद्ध्यंशे प्रत्येकं तत्तदभावसामानाधिकरण्यस्य वैशिष्ट्यविधया प्रवेशात्सिद्धौ तावदभाववैशिष्ट्यस्यैव तत्त
देकाभावेऽपराभाववैशिष्ट्यप्रवेशे गौरवानवकाशाच्च । तथापि सिद्धौ तत्तदभावानां युगपद्विशेषणत्वे वैशिष्ट्यरूपसामानाधिक

जा॰ प॰ रण्येवृत्तित्वांशस्यासकृदेव प्रवेशाल्लाघवं प्रत्येकाभावेऽभावान्तरवैशिष्ट्यस्य संबंधत्वे तु वैशिष्ट्यघटकवृत्तित्वस्य बहुशः प्रवेशे
९ गौरवमतो युगपदेव तावतीनामभावव्यक्तीनां सिद्धिर्विशेषणत्वमुक्तम्। किं च सिद्धौ तावदभावस्य युगपद्विशेषणत्वे विशेषणता
संबंधावच्छिन्नाधिकरणसमवेतत्वमेवानुगतसंबंधत्वे काभावेऽपराभाववैशिष्ट्यं विशेषणताविशेषावच्छिन्नाधिकरणे
विशेषणतयावृत्तित्वं सिद्धावभावान्तवैशिष्ट्यं तु विशेषणताविशेषावच्छिन्नाधिकरणे समवेतत्वमित्यनुगतवैशिष्ट्यासंभवान्न ए
वैकाभावविशिष्टापराभावविशिष्टसिद्धित्वेन प्रतिबंधकत्वं किन्तु तादृशाभावविशिष्टसिद्धित्वेनैवेति दिक्। स्वतन्त्रास्तु तत्तदिच्छावि
रहकूटविशिष्टसिद्धित्वावच्छिन्नाभावस्याखंडस्य तत्तद्व्यक्तित्वेनैव हेतुत्वं तत्तद्व्यक्तित्वं च तादात्म्येन स्वैव व्यक्तिरित्यदोषः चिन्ता
मणिकृन्मते विशिष्टाभावस्यातिरिक्तत्वात्। न च कारणतामात्रस्य धर्मावच्छेद्यत्वे मानाभावादेवावच्छेदकं विनैव तादृशसिद्ध्यभावस्या
नुमितिकारणत्वमिति प्रलापो ग्राह्यः व्यापकतागर्भायाः कारणताया अवच्छेदकस्य नानाव्यक्तिस्थले इवैकव्यक्तिस्थलेपि संभवेन
वारयितुमशक्यत्वात्। पदार्थान्तररूपायास्तु कारणताया अवच्छेदकस्य नानाधिकरणेष्वपि परित्यागप्रसंगादित्याहुस्तच्चिन्त्यम्
। केचित्तु पक्षधर्मिकसाध्यविधेयकानुमितित्वप्रकारिकेच्छात्वेनैवानुगतरूपेणोत्तेजकतालाघवान् इच्छान्तरस्थले च तादृशेच्छो
त्पत्त्यैवानुमितिस्तत्रैव कारणीभूतस्य विशिष्टाभावस्य सम्पन्नेरिति प्राहुः। आलोकपरामर्शादिति। आलोकमात्रपरामर्शादित्यर्थः
तदन्येति धूमेनालोकेन च पर्वते वह्न्यनुमितिर्जायतामितीच्छायामपि धूमलिंगकानुमित्यर्थं मात्रपदं। तथा च धूमलिंगकानुमित्सा
विरहविशिष्टे वालोकलिंगकानुमित्सा धूमलिंगकानुमितौ प्रतिबंधकेत्यर्थः अत्र यद्यपि धूमलिंगकानुमितित्वप्रकारिकेच्छात्वेनै रामः
वोत्तेजकत्वे धूमेन तद्व्याप्यत्वस्यालोकेन च वह्नेः पर्वते नुमितिर्जायतामितीच्छायामपि वह्निव्याप्यधूममात्रपरामर्शाद्धूमलिंगकानुमि ९

CC-0. In Public Domain. Digitization by eGangotri

त्यापत्तेः धूमलिंगकवन्ह्यनुमितित्वप्रकारीच्छात्वेन तथात्वेतु धूमेन महानसादावलोकेन च पर्वते वन्ह्यनुमितिर्जायतामिती
च्छायामपि धूममात्रपरामर्शात्पर्वते वन्ह्यनुमित्यापत्तेः न च पर्वतपक्षकधूमलिंगकवन्ह्यनुमितौ नादृशानुमितित्व
प्रकारिकेच्छाविरहविशिष्टालोकलिंगकेच्छात्वेनैव प्रतिबंधकत्वं धूमेनालोकेन चानुमितिर्जायतामितीच्छायामपि धूममात्र
स्य परामर्शाद्धूमलिंगकानुमित्यभावापत्तेस्तदिच्छायाः पर्वतपक्षकवन्ह्यनुमितित्वप्रकारकत्वाभावात् तथापि यद्यदिच्छाव्यक्ति
दृशायामालोकेलिंगकानुमितीच्छाव्यक्तिसत्वेपि पर्वतधर्मिकधूमलिंगकवन्ह्यनुमितिप्रामाणिकी तत्तदिच्छाविरहकूटविशि
ष्टालोकलिंगकानुमितित्वप्रकारिकेच्छात्वेनैव तादृशधूमलिंगकानुमितिप्रतिबंधकत्वं वाच्यमत एवालोकलिंगकासतीया धूमलि
गका पर्वते वन्ह्यनुमितिः साजायतामितीच्छासत्वे पर्वतधर्मिकधूममात्रपरामर्शान्नवन्ह्यनुमितिस्तदिच्छाव्यक्तेरुत्तेजकानंतर्ग
तत्वात् न च यत्र धूममात्रपरामर्शोत्तरं धूमालोकोभयलिंगकानुमितिर्जायतामितीच्छा ततस्तदुभयलिंगकपरामर्शोत्पत्त्यानुमिति
स्तत्र तदुभयलिंगकपरामर्शोत्पत्तिक्षणे धूमलिंगकानुमितिः स्यादग्रिमानुमित्यनुरोधेन तदिच्छाव्यक्तेरुत्तेजकत्वादिति वाच्यं तत्र
समूहालंबनपरामर्शव्यक्तिविशिष्टतत्तदिच्छाव्यक्तित्वेनैवोत्तेजककोटौ निवेश्यत्वात् इत्थं चालोकेन महानसे वन्ह्यनुमितिर्जायता
मितीच्छासत्वेपि धूमपरामर्शात्पर्वते वन्ह्यनुमितिरप्रत्यूहैव तदिच्छाव्यक्तेरपि स्वस्मिन्नुत्तेजकत्वात् अत एवालोकेन वन्ह्यनुमि
तिर्जायतामितीच्छोत्तरं धूमालोकयोः समूहालंबनपरामर्शात्पर्वते वन्ह्यनुमितिर्न स्यात्तस्यापि धूमपरामर्शाव्यवहितोत्तरत्वेन धू
मलिंगकानुमितित्वात्तादृशानुमितिविरोध्यालोकलिंगकानुमित्सायाः सत्वादिति परास्तम् तदिच्छाव्यक्तेरप्युत्तेजकत्वात्तत्र धूम
लिङ्गकत्वप्रकारिकेच्छात्वेनोत्तेजकत्वासंभवस्यानुपदमुक्तत्वात् यत्तु पर्वतधर्मिकवन्ह्यनुमितिसामान्यं प्रत्यालोकादिलिंगक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰प॰ परामर्शाभावविशिष्टालोकादिमात्रलिंगकानुमित्सात्वेन प्रतिबंधकत्वं वाच्यं न तु धूमादितत्तल्लिंगकानुमितित्वावच्छिन्नं प्रतिनि
१० दन्यलिंगकानुमित्सात्वेन प्रतिबंधकत्वं कार्यतावच्छेदकगौरवापत्तेः तथा चोक्तस्थले आलोकलिंगकपरामर्शसत्वेन तल्लिंग
कानुमित्सानानुमितिप्रतिबंधिका न च मात्रपदवैयर्थ्यं धूमपरामर्शोत्तरमालोकेन धूमेन वा वन्ह्यनुमितिर्जायतामितीच्छादशाया
मनुमित्यर्थं तदुपादानादिति चेन्न धूमपरामर्शदशायामालोकेन भस्मना च वन्ह्यनुमितिर्जायतामितीच्छासत्वेप्यनुमितिप्रसंगात्
आलोकपरामर्शाभावविशिष्टाया अपि तादृशेच्छाया आलोकलिंगकत्वमात्रप्रकारकत्वात् न चालोकलिंगकपरामर्शाभावविशि
ष्टेन धूमलिंगकत्वाप्रकारकालोकलिंगकानुमित्सात्वेन पर्वतेन धर्मिकवन्ह्यनुमितिसामान्यं प्रतिविरोधित्वान्नैष दोष इति वाच्यं भस्म
लिंगकपरामर्शोत्तरमप्यालोकेन धूमेन च वन्ह्यनुमितिर्जायतामितीच्छासत्वे वन्ह्यनुमितिप्रसंगात्तादृशेच्छाया धूमलिंगकत्वप्र
कारकत्वेनाविरोधित्वात् तस्मात्तल्लिंगकानुमितित्वावच्छिन्नं प्रतिप्रागुक्तक्रमेण तत्तदन्यमात्रलिंगकानुमित्सात्वेन प्रतिबंधकत्व
मेव सम्यगिति दिक्। यदि च तत्रेति। अन्यसाध्यकानुमित्साया इवान्यलिंगकानुमित्साया अपि स्वतः प्रतिबंधकत्वे मानाभावादिति
भावः तत्रेति सिद्ध्यात्मकालोकपरामर्शोत्तरं धूमेनानुमिनुयामितीच्छादशायामनुमितिवारणायेत्यर्थः न च तत्तदनुमित्साव्यक्ती
नामुत्तेजककोटौ प्रवेशादेव न तत्रानुमितिरिति वाच्यं यत्र सिद्ध्यात्मकालोकपरामर्शोत्तरं धूमलिंगकानुमित्सा ततः क्रमेण सिद्ध्या
त्मकधूमपरामर्शाद्वन्ह्यनुमितिस्तत्र धूमपरामर्शोत्पत्तिक्षणे वन्ह्यनुमित्यापत्तेः पर्वतपक्षकवन्ह्यनुमितौ तदिच्छाव्यक्तेरुत्तेज
कत्वात् अन्यथा तत्रैव सिद्ध्यात्मकधूमपरामर्शाद्वन्ह्यनुमितिर्न स्यादिति भावः। यद्यपि वक्ष्यमाणस्वविषयसिद्ध्यनुपहितत्वविशेष रामः
णेनैव धूमादिलिंगकतत्तत्परामर्शविशिष्टायास्तत्तदिच्छाव्यक्तेरुत्तेजकतायां न कोपि दोषः प्रागुक्तस्थले धूमपरामर्शविशिष्टानुमित्सा १०

च धूमपरामर्श/

व्यक्तिविरहसहकृतसिद्धिसत्त्वादेव धूमपरामर्शोत्पत्तिदशायामपि अनुमित्यापत्तेरसंभवात् तथापि मिश्राद्विसंमतमेकावच्छेदे
न पक्षतापरामर्शोभयजन्यत्वमनुमितेस्संपादयितुमनुमित्सामेवान्यथा निर्वक्ति तल्लिंगकानुमित्सेति वाच्येति परेणान्वयः ननु
तल्लिंगकानुमितित्वप्रकारिकेच्छाव्यक्तीनामननुगमेन जनकत्वे वह्न्यनुमितिर्जायतामितीच्छायां सिद्ध्यात्मकालोकपरामर्शादालोक
लिंगकानुमितिर्न स्यात् तदिच्छाव्यक्तेरालोकलिंगकत्वाप्रकारकत्वादत आह तदन्यमात्रेति धूमालोकाभ्यां वह्न्यनुमितिर्जायतामि
तीच्छादशायां सिद्ध्यात्मकालोकपरामर्शादनुमित्यर्थं मात्रपदं तथा च तल्लिंगकानुमितित्वाप्रकारकत्वे सति यत्किंचिल्लिंगकानु
मितित्वप्रकारिकेच्छा तदतिरिक्तानुमित्सासिषाधयिषापदेन वाच्येत्यर्थः तेन प्रमेयलिंगकानुमितिस्थले तदन्यलिंगाप्रसिद्धावपि न
क्षतिः अत्र तदन्यमात्रलिङ्गकानुमित्सातिरिक्तत्वविशेषणं किंतु तेजकीभूतं न तदिच्छाव्यक्तीनां परिचायकमिति मन्तव्यम् ननु त
ल्लिंगकानुमित्साविरहविशिष्टसिद्धिसत्त्वेऽप्यन्यलिंगकानुमित्सान्यलिंगकपरामर्शोत्तरं प्रकृतपक्षसाध्यानुमितेरुत्पादेन व्यभिचारा
त्कुतः पक्षताया अनुमितिहेतुत्वमित्यत आह लिंगेति लिंगविशेषनियंत्रितलिंगविशेषावच्छिन्नकार्यतानाकम् तथा च यद्यदनुमित्साव्य
क्तितत्त्वे सिद्धिदशायां तल्लिंगकतत्पक्षकतत्साध्यकानुमितिर्जायतेति तदिच्छाव्यक्तिविरहविशिष्टसिद्ध्यभाववत्त्वल्लिङ्गकतत्साध्यको
नुमितित्वावच्छिन्नं प्रत्येव हेतुरतो न व्यभिचार इति भावः अन्यलिंगकानुमित्सायास्तल्लिंगकानुमितौ स्वातंत्र्येणाविरोधित्वे पक्षता
यालिंगविशेषानियंत्रितत्वेपि न क्षतिरित्याह तल्लिंगकानुमिताविति सिद्ध्यभावदशायामन्यलिंगकेच्छासत्त्वेपि तल्लिंगकानुमित्युत्प
त्तेराह सिद्धिकालीनेति सिद्धिविशिष्टेत्यर्थः तल्लिंगकानुमित्सासत्त्वेऽन्यलिंगकानुमित्सायास्तल्लिंगकानुमित्यप्रतिबंधकत्वादाह त
ल्लिंगकानुमितीच्छाविशेषविरहकूटविशिष्टेति तल्लिंगकानुमितित्वं तल्लिंगकपरामर्शाव्यवहितोत्तरानुमितित्वं तथा चालोकलिंग

जा·प·
११

कानुमित्सादशायां धूमालोकरूपोसिद्ध्यात्मकपरामर्शोनंतरं पर्वते वन्ह्यनुमितिर्नस्यात्तस्यापि निरुक्तधूमलिंगकत्वेनालोकलिंगका-
नुमित्साप्रतिबध्यत्वादतो विशेषपदम् तेन वस्तुगत्या तल्लिंगकानुमितिगोचरयद्यदिच्छाव्यक्तिसत्वेन्यलिंगकानुमित्साकालेन तल्लिं-
गकानुमितिर्जायते तेन तदिच्छाविरहकूटविशिष्टान्यलिंगकानुमित्सात्वेनैव तल्लिंगकानुमितौ प्रतिबंधकत्वमुक्तस्थले चालोकलिं-
गकानुमित्साव्यक्तेरपि वस्तुगत्या धूमलिंगकानुमितित्वगोचरतया तदिच्छाव्यक्तेरुत्तेजककोटौ निविष्टत्वान्न दोषः विशेषपदास-
त्वपक्षेपि तल्लिंगकानुमित्साविरहविशिष्टत्वस्योक्त एवार्थो ग्राह्यः अत्रापि वैशिष्ट्यमेकसमयावच्छेदेनैकात्मवृत्तित्वम् तेन पुरुषान्त-
रीयतल्लिंगकानुमितीच्छामादायान्यलिंगकानुमित्सादशायां नानुमितेरुत्पादः न च तल्लिंगकानुमित्साभिन्नतदन्यलिंगकानुमित्सैव
प्रतिबंधिकास्तु तल्लिंगकानुमित्साविरहविशिष्टत्वप्रवेशो गौरवादिति वाच्यं यत्र सिद्ध्यात्मकापेक्षाबुद्ध्यात्मकधूमपरामर्शोत्तरं क्रमेणा-
लोकलिंगकानुमितित्वप्रकारेण धूमलिंगकानुमितित्वप्रकारेणेच्छाद्वयं तत्र चतुर्थक्षणे धूमलिंगकानुमित्यनुत्पादापत्तेः धूम-
लिंगकानुमित्साभिन्नाया एवालोकलिंगकानुमित्सायाः सत्वादिति भावः अन्यलिंगकानुमित्सैवेति वाकारो नस्यायाम् पूर्वकल्पो-
कस्य तल्लिंगकानुमित्साविरहविशिष्टसिद्ध्यभावत्वेन तल्लिंगकानुमितिहेतुत्वस्य लाघवेन तदपेक्षया एतत्कल्पस्य गुरुत्वात् नन्वपक्ष-
साध्यकानुमितौ सामान्यतः सिषाधयिषाविरहविशिष्टसिद्ध्यभावत्वेन कारणान्तरस्याप्यत्रैकस्यैव वक्तव्यत्वादन्यथा सिद्ध्यात्मकप-
रामर्शमात्रादनुमित्यापत्तेस्तादवस्थ्यादिति ध्येयं ननु साधमानं सिद्धिजनकमानं तथा च परामर्शमात्रादप्यनुमितिर्न स्यात्तस्यैव
तादृशसाधकमानत्वादतो व्याचष्टे साध्यवत्त्वनिश्चय इति साध्यवत्त्वसंशयेप्यनुमित्युत्पादादाह निश्चयप इत्युक्तम् पक्षेपि साध्यवत्त्व-
निश्चयत्वं यदि साध्यसामान्याभावाप्रकारकत्वे सति साध्यप्रकारकत्वं तदा पर्वतः कपिलवन्हिमान्न वेति संदेहदशायां पर्वतो व-

राम: ११

ह्निमानित्यनुमितिर्नस्यात्ताहृशसंदेहस्यापि वह्निसामान्याभावाप्रकारकत्वे सति वह्निप्रकारकत्वात् न च येन रूपेण साध्यता
वच्छिन्नप्रकारकत्वं निश्चयत्वघटकमतः कपिलवह्नित्वावच्छिन्नप्रकारताकसंदेहस्य वह्नित्वमात्रावच्छिन्नप्रका
रताकत्वाभावान्न दोष इति वाच्यं पर्वतः कपिलवह्निमानिति निश्चयदशायामपि पर्वतो वह्निमानित्यनुमित्यापत्तेस्ताहृशनि
श्चयस्य वह्नित्वमात्रावच्छिन्नप्रकारकत्वाभावात् न चेष्टापत्तिरनुभवविरोधात् अत एव गवाश्रितत्वे साध्ये सकलगवाश्रितत्वं
न हेतुरविशिष्टसाध्यवत्त्वानुमितौ विशिष्टसाध्यवत्ताग्रहस्यापि विरोधितया पक्षधर्मताग्रहदशायां सिद्धसाधनादिति सक्तिवादे
मिश्रैरप्युक्तं यदि च साध्यप्रतियोगिकाभावाप्रकारकत्वे सति साध्यप्रकारकत्वमेव साध्यनिश्चयत्वं न दारुणवह्निशून्यः पर्वतो वह्नि
मानित्येवं निश्चयेऽपि पर्वतो वह्निमानित्यनुमित्यापत्तिः उक्तनिश्चयस्य वह्निप्रतियोगिकाभावप्रकारकत्वेनाविरोधित्वात् न तथापि
वह्नित्वावच्छिन्नविधेयकानुमितिं प्रति वह्निसामान्याभावाप्रकारकवह्निमात्रावच्छिन्नप्रकारकत्वेन कपिलवन्ह्यभावाप्रकारक
कपिलवह्नित्वावच्छिन्नप्रकारकत्वादिना च प्रत्येकं धर्मेणैव प्रतिबंधकत्वात् तत्तत्सिद्ध्यभावकूटस्यैव पक्षतात्वं विरोधिसाध्यनिश्च
यानामनुगतैकधर्माभावात् वस्तुतस्तु साध्यतावच्छेदकावच्छिन्नप्रकारतान्यप्रकारतानिरूपितप्रकृतपक्षनिष्ठविशेष्यताज्ञान
त्वमेव साध्यनिश्चयत्वं वाच्यं पर्वतः कपिलवह्निमान्न वेत्यादिसंशयेऽनुपर्वतनिष्ठविशेष्यत्वं वह्नित्वावच्छिन्नप्रकारत्वभिन्नेन
कपिलवन्ह्यभावत्वावच्छिन्नप्रकारकत्वेन निरूपितमतस्तद्व्युदासः संशयविशेष्यतामात्रस्यैव प्रकारताद्वयनिरूपितत्वादेवं
च निर्वह्निर्वह्निमांश्च पर्वत इत्यादिसमुच्चयस्यापि साध्यनिश्चयत्वं संभवात्तत्स्थलेऽपि न वन्ह्यनुमितिः समुच्चयस्थले प्रकारताद्वयनि
रूपितविशेष्यताद्वयोपगमात् भूतले घटवत्पटवच्चेत्यादिस्थले भूतलस्य द्विधाभानवत्तत्रापि पर्वतस्य प्रकारताद्वयांशे द्विधाभा

नादित्यन्यत्र विस्तरः तत्र पर्वतेतनस्य वन्हेः धर्मित्वेति तन्नैवं वन्हिमान् वन्हिमानित्येवमप्यनुमितिस्तस्माद्धर्मितावच्छेदकमनन्त
र्भाव्य वन्हिमत्तानिश्चयस्याविरोधित्वादिति वाच्यम् इष्टत्वात् वन्हिमत्पक्षकवन्हिसाध्यकानुमितिनिमन्तर्भाव्य पक्षतायां हेतुत्वा
कल्पनेन तदापत्त्यसंभवाच्च अत्र धर्मितेत्युपलक्षणम् एकसंबंधेन साध्यवत्त्वनिश्चयेपि संबंधान्तरेण साध्यानुमितेरुत्पादात्सं
बंधविशेषोप्यनुसरणीयः पर्वतत्वस्यावच्छेदकत्वं विषयीकृत्येकत्र पर्वते साध्यसिद्धावप्यन्यत्र पर्वते तस्य सर्वदैवानुत्पत्तेः पर्व
तत्वसामानाधिकरण्येन तु क्रममवच्छेदकत्वमविषयीकृत्य पर्वतत्वप्रकारेणेति तदर्थः। तादृशानुमितिः पर्वतत्वसामानाधि
करण्येन साध्यानुमितिः। धर्मविशेषोपीति तथा च पर्वतत्वप्रकारेण तत्पर्वतधर्मिकवन्ह्याद्यनुमितौ पर्वतत्वप्रकारेण तत्पर्वतध
र्मिकवन्ह्यादिनिश्चयत्वेनैव प्रतिबंधकत्वं वाच्यमिति भावः इदमुपलक्षणम् साध्यतावच्छेदकरूपेणैकसाध्यव्यक्तेः सिद्धाव
पि विनानुमित्सामन्यसाध्यव्यक्तेरनुमितेरानुभाविकत्वे साध्यविशेषोपीत्यपि द्रष्टव्यम् अन्यथेति धर्मान्तरेऽनुमित्यनुत्पादेऽनुध
र्मिविशेषोपि न निवेश्य इत्यर्थः अथ तत्पुरुषीयवन्ह्यादिविधेयकानुमितिं प्रति तदीयानुमित्साविरहविशिष्टतदीयवन्ह्यादि
मत्तानिश्चयत्वेनैव समानविशेष्यताप्रत्यासत्त्या प्रतिबंधकत्वं न तु सामानाधिकरण्यप्रत्यासत्त्या तथात्वे तथा सति पर्वतत्वा
दिविशिष्टविशेष्यकवन्ह्यादिप्रकारकानुमितौ पर्वतत्वादिति विशिष्टविशेष्यकवन्ह्यादिमत्तानिश्चयत्वेन विरोधित्वे धर्मिता
वच्छेदकविधया पर्वतत्वमहानसत्वाद्यनेकधर्मान्तर्भावेणानेन कार्यकारणभावकल्पनापत्तेः। न च तत्रापि पुरुषभेदेना
नेन कार्यकारणभावः तत्पुरुषस्यापि क्वचित्सत्तया तद्भेदेन कारणभावनानात्वस्य न्यायप्यंगीकर्तव्यत्वात् तथा चाद्यैवशासंप
न्न एवावश्यं धर्मिविशेषस्य निवेश इति चेन्न पाषाणमयत्वेन पर्वतेन वन्हिनिश्चयेपि पर्वतत्वेन तत्र वन्ह्यनुमित्युत्पत्तेः समान

विशेष्यतया प्रतिबंधकत्वासंभवात् न चैकधर्मावच्छिन्नविशेष्यत्वमेव प्रत्यासत्तिरित्यदोषः पाषाणमयत्वस्याप्येकधर्म्मेन
यानद्वच्छिन्नविशेष्यत्वस्याप्यव्यावर्त्तकत्वात् न तद्धर्मावच्छिन्नविशेष्यतात्वेन प्रत्यासत्तिता पांशुतद्धर्म्मघटितसंबंधभेदेन
कार्यकारणभावानंत्यमत्रापि तत्पुरुषस्यावच्छेदकधर्मविधया प्रवेशे गौरवं पुनरधिकं विनिगमनाविरहेण प्रकारताप्रत्यास
त्त्या प्रतिबध्यप्रतिबंधकभावकल्पा प्रतिक्षवस्तुतः समानविशेष्यतया विरोधित्वपक्षे पर्वतत्वत्वरयोरेव साध्यवत्तानिश्चया
त्मकः साध्यव्याप्यवत्तापरामर्शस्तदनंतरं च पर्वतांशे साध्यवत्तानिश्चयस्य प्रमात्वज्ञानं पर्वतधर्मिकानुमितिर्जायतामितीच्छा
वानन्तरोत्तरकाले पर्वत इव चत्वरेपि साध्यानुमितिस्स्यात् प्रामाण्यज्ञानाभावविशिष्टस्यानुमित्साविरहविशिष्टस्य च साध्यनिश्च
यस्य चत्वरे विरहात् तादृशाप्रामाण्यज्ञानव्यक्तेरनुमित्साव्यक्तेर्वानुत्तेजकत्वे पर्वतेऽनुमित्यनुत्पत्तेरिति दिक् पक्षतेत्यादि प
क्षतावच्छेदकीभूतपर्वतत्वादिधर्मावच्छेद्यत्वमविषयीकृत्य साध्यसिद्ध्यभावमित्यर्थः। तदवच्छेदेनेति पक्षतावच्छेदकीभूत
पर्वतत्वावच्छेद्यत्वं विषयीकृत्यानुमितिदर्शनादित्यर्थः। तदवच्छेदेन सिद्धेरिति पर्वतत्वावच्छेद्यत्वावगाहिसिद्धेरित्यर्थः वि
रोधित्वमग्रेन्वयः तथा च पर्वतत्वावच्छेद्यत्वावगाहि पर्वतधर्मिकवन्हिविधेयकानुमितिं प्रति पर्वतत्वावच्छेद्यत्वावगाहिप
र्वतधर्मिकवन्हिमत्तानिश्चयत्वेन प्रतिबंधकत्वं तत्र च पर्वतविशेष्यकत्वं पर्वतत्वविशिष्टविशेष्यकत्वमात्रं तेन पर्वतत्वावच्छेदेन
वन्हिनिश्चयेपि पर्वतो वन्हिमानित्याकारिकायाः इव नीलपर्वतो वन्हिमानित्याकारिकाया अप्यनुमितेर्नोत्पत्तिः पर्वतत्वावच्छेद्यत्वं
न स्वरूपसम्बन्धविशेषो मानाभावात् किंतु पर्वतत्वव्यापकसाध्यप्रतियोगिकत्वं तदपि संसर्गमर्यादया भासते पर्वतो वन्हिमानि
त्याकारकानुमितौ पर्वतत्वव्यापकवन्हिसंयोगत्वेनैव संयोगस्य संबंधविधया भानस्वीकारात् न च स्वसत्तावच्छेदकव्यापकत्व

CC-0. In Public Domain. Digitization by eGangotri

 मेवतदवच्छेद्यत्वमस्तु साध्यप्रवेशो व्यर्थ इति वाच्यं पर्वतत्वावच्छेदेन तद्रूपवत्त्वानुमितेः प्रमात्वापत्तेः समवायस्यैकत्वात् प
 र्वतत्वव्यापकसमवायेन पर्वतस्य तद्रूपव्यक्तिमत्त्वात् न च पर्वतत्वव्यापकवन्हिसंयोगेन वन्हेः साधनव्यापकत्वाग्रहात् तादृश
सम्बन्धेन वन्ह्यनुमित्यसंभव इति वाच्यमेकविशेषबाधसहकाराद्व्यापकतानवच्छेदकप्रकारेणैव निरुक्तसिद्ध्यभावरूपपक्ष
तासहकाराद्व्यापकतानवच्छेदकसंबंधेनापि साध्यानुमितेः सामान्यपरामर्शादेव संभवात् न च पर्वतधर्मिकवन्ह्यनुमिति
मात्रं प्रत्येव पर्वतत्वावच्छेद्यत्वावगाहिनिश्चयस्य विरोधित्वात् प्रतिबध्यकोटौ पर्वतत्वावच्छेद्यत्वप्रवेशो व्यर्थ इति वाच्यं पर्व
तत्वावच्छेदेन सिद्ध्युत्तरं तदवच्छेदेनानुमित्या पर्वतत्वावच्छेदेनैव तत्सामानाधिकरण्येनाप्यनुमित्यापत्तेः यत्तु पर्वतत्वावच्छे
द्यत्वमवच्छेद्यतासम्बन्धेन पर्वतत्वादिकं वा साध्यांशे प्रकारस्तथैवानुमितौ भासते तथा च पर्वतः पर्वतत्वावच्छेद्यवन्हिमानित्ये
व पर्वतत्ववद्वन्हिमानित्येवानुमितिरिति प्राचीनास्तच्चिन्त्यं शिखरावच्छेदेन पर्वतो वन्हिमानित्यनुमितौ पक्षतावच्छेदकीभूत
शिखरावच्छिन्नत्वं स्वरूपसम्बन्धरूपमेव भासते न तु व्यापकत्वलक्षणमननुभवात् एवं च तत्र शिखरावच्छेद्यवन्हिसंयोगेन व
न्ह्यनुमितौ शिखरावच्छेद्यवन्हिसंयोगे नैव वन्हिनिष्ठयो विरोधी न तु संयोगमात्रेणान्यवधेयसामानाधिकरण्यमात्रेणेति। पक्ष
तावच्छेदकरूपेण पक्षे साध्यानुमितित्वमेव तत्सामानाधिकरण्येनानुमितित्वं तच्च पक्षतावच्छेदकावच्छेदेनानुमितावप्यस्तीत्यतो
मात्रपदं सिद्धिमात्रस्येति तत्र पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितित्वं न तदवच्छेद्यत्वानवगाह्यनुमितित्वं पर्वतत्वाव
च्छेदेन तत्सामानाधिकरण्येन च परामर्शद्वयात्पर्वतत्वावच्छेद्यत्वावगाहितदनवगाह्यनुमित्योर्युगपदुत्पादप्रसंगात् सामग्रीस
त्वात् किं तु यद्रूपेण साध्यतावच्छेदकसंबंधत्वं तादृशधर्ममात्रावच्छिन्नसंसर्गताकपक्षधर्मिकसाध्यानुमितित्वं निरुक्तस्थले च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संयोगनिष्ठद्विविधसंसर्गताताकसमूहालंबनानुमितिस्वीकारात् तथाचसंयोगत्वमात्रावच्छिन्नसंसर्गताकपर्वतधर्मिक
वन्हिविधेयकानुमितिप्रतिसंयोगत्वविशिष्टसंसर्गताकपर्वतधर्मिकवन्हिमत्तानिश्चयत्वेनैकरूपेणसिद्धिद्वयंप्रतिबंधकं
पर्वतत्वावच्छेदेनानुमितौतुसंयोगनिष्ठसंसर्गतानसंयोगत्वमात्रावच्छिन्नाकिंतुपर्वतत्वावच्छेद्यवन्हिसंयोगत्वावच्छिन्नै
वेतिपर्वतत्वसामानाधिकरण्येनसिद्धिसत्त्वेपिनतदुत्पत्तिः नचैवंसंयोगमात्रेणवन्हिनिश्चयेपिपर्वतीयसंयोगेनवन्ह्यनुमिति
स्स्यान्नस्याच्चपर्वतीयत्वविशिष्टसंयोगेनवन्हिनिश्चयेपिसंयोगमात्रेणपर्वतेवन्ह्यनुमितिरितिवाच्यंमिष्टत्वात् सामान्यघटि
तविशेषप्रकारेणतादृशसंबन्धेनापिसिद्धिः सामान्यानुमितिविरोधित्वात् एवमनयैवदिशा अन्यत्रापिप्रतिबंधकमूह्यमिति
संक्षेपः इत्थंचेतिपक्षतावच्छेदकावच्छेदेनसिद्ध्युत्तरंतत्सामानाधिकरण्यमात्रेणानुमित्सायामपितदवच्छेदेनानुमित्यनुत्पत्तेः
तादृशानुमितौपक्षतावच्छेदकावच्छेदेनानुमित्सैवोत्तेजिकावाच्या एवंपक्षतावच्छेदकसामानाधिकरण्येनसिद्ध्युत्तरंतदवच्छे
देनानुमित्सायामपितत्सामानाधिकरण्येनानुमित्यनुत्पत्तेस्तादृशानुमितौपक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमित्सैवो
त्तेजिकावाच्येतिलिंगविशेषनियंत्रितमेवानुमितिविशेषणापिनियंत्रितंपक्षत्वं यद्वातत्पक्षकतत्साध्यकानुमितिंप्रत्येवसामा
न्यतः पक्षताहेतुः पक्षतावच्छेदकावच्छेदेनानुमितौतदवच्छिन्नसिद्धिकालीनातत्सामानाधिकरण्यमात्रेणानुमित्सापृथक्प्र
तिबंधिकापक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितावपिसामानाधिकरण्येनसिद्धिकालीनातदवच्छेदेनानुमित्सापृथ
क्प्रतिबंधिकावाच्यायदिचासत्यामपिसमानाकारकसिद्धौपक्षतावच्छेदकावच्छेद्यत्वावगाह्यनुमित्सायांसत्यांतत्सामानाधि
करण्यावगाह्यनुमितेर्नोत्पादस्तदासिद्धिकालीनत्वंप्रतिबंधकत्वेनप्रवेश्यमितिभावः साध्यविशेष्यकेतिविनानुमित्सामित्यादिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तांप्रतीतिपक्षविशेष्यकानुमितिंप्रतीत्यर्थः समानाकारेति तथा च संयोगसंबन्धावच्छिन्नाधेयतासंबन्धेन पर्वतनिष्ठप्रकारतानि
रूपितवन्हित्वावच्छिन्नविधेयकताकानुमितिं प्रति तादृशसंबन्धावच्छिन्नपर्वतनिष्ठप्रकारतानिरूपितवन्हित्वावच्छिन्नविशे
ष्यताकनिश्चयत्वेन विरोधित्वं विधेयत्वं तु न प्रकारतानियतं किंतु पर्वते वन्हिः। पर्वतो वन्हिमानित्याद्यनुमितौ पर्वते वह्निमनुमिनो
मि न तु वन्हौ पर्वतमित्यनुभवसाक्षिको विषयताविशेषः क्वचिद्विशेष्यवृत्तिरपीति नासिद्धिः अत एव गुणानां गुणत्वमित्यत्र विशेष्यी
भूतस्यापि गुणत्वस्य विधेयत्वमुक्तमुपाध्यायैरिति ध्येयम ननु पक्षविशेष्यकसिद्ध्युत्तरं साध्यविशेष्यकानुमितिर्न क्वाप्यनुभव
सिद्धेत्यत आह मादृशेति पक्षनिष्ठप्रकारतानिरूपितसाध्यविशेष्यकानुमितिं प्रतीत्यर्थः सिद्धिमात्रमिति साध्यविशेष्यका पक्षवि
शेष्यिका च सिद्धिर्विरोधीनीत्यर्थः पर्वतो वन्हिमानिति निश्चयोत्तरं वन्हौ पर्वतव्याप्यवत्तापरामर्शाद्वन्हिः पर्वते इत्यनुमितौ च वन्हे
र्विधेयत्वं किंतु पर्वतस्यैव तथात्वं यद्व्याप्यवत्ताज्ञानजन्यत्वमनुमितौ तादृश एव विधेयताख्यविषयतास्वीकारादिति भावः न
न्वेवं प्रसिद्धसाध्यकपरामर्शात्सर्वत्रैव पक्षसाध्योभयविशेष्यकानुमितिः स्यात्पक्षताद्वयसत्त्वेनोभयधर्मावच्छिन्नसामग्रीसत्त्वा
दित्यस्वरसाल्लाघवाच्च साध्यज्ञानत्वेनैव साध्यविशेष्यकानुमितिं प्रति विरोधित्वमाह साध्यप्रसिद्धिरेवेति एवकारेणानुमित्साया
उत्तेजकत्वस्यापि प्रतिक्षेपः सूचितः साध्यज्ञानमात्रस्य विरोधितायामनुभवमपि प्रमाणमाह अत एवेति साध्यविशेष्यकानु
मितौ न ज्ञानमात्रस्य विरोधित्वादेवेत्यर्थः इत्थं च धूमव्यापकवन्ह्यभाववान्ह्रद इत्यादिव्यतिरेकपरामर्शजन्याया ह्रदे धूमाभाववद्
न्याद्यभावसाध्यकानुमितेरेव साध्यविशेष्यकत्वात्तत्रैव साध्यज्ञानं विरोधीति मन्तव्यं वन्ह्याद्यभावसाध्यकस्थले तु विशेष्यविधया रामः
वन्ह्यादिविधेयकानुमितेरलीकतया तां प्रति साध्यज्ञानत्वेन विरोधित्वासंभवादिति ध्येयं विशेष्यत्वाख्यविधेयतावच्छेदकत्वस १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वंधेनानुमितिसामान्यं प्रत्येव वा प्रकारतासंसर्गेण ज्ञानमात्रस्य प्रतिबंधकत्वं वाच्यं न चैवमपि गोत्वाभावो गोत्वव्यापकसास्नाप्र-
त्य इत्याकारकपरामर्शाद्गोत्वाभाववे गोत्वं नित्येवं पक्षनिष्ठप्रकारतानिरूपितसाध्यविधेयकानुमितिर्न स्यात्परामर्शस्यैव साध्य
ज्ञानत्वेन विरोधित्वादिति वाच्यमिष्टत्वात् गोत्वाभाववान्न गोत्ववान्नित्येवं पक्षनिष्ठविशेष्यतानिरूपितसाध्यविधेयताकानुमिते
रेव तत्रोत्पादात्साध्यतावच्छेदकधर्मावच्छिन्नपक्षनिष्ठप्रकारतानिरूपितसाध्यविधेयकानुमितित्वेनैव वा प्रतिबध्यत्वं वाच्यमि
त्यपि कश्चित् वस्तुतस्तु अप्रसिद्धसाध्यकपरामर्शस्य विशेष्यविधया साध्यविधेयकानुमितित्वावच्छिन्नं प्रत्येव हेतुत्वमन्यथा गोत्वा
भावव्याप्यवत्त्वप्रकारकपरामर्शजन्यायां विशेषणस्य विशेष्यविधया गोत्वाभावविधेयकानुमितौ व्यभिचारापत्तिः तथा चोक्तस्थले
गोत्वाभाववान्न गोत्ववान्नित्यपि नानुमितिर्विशेषणविधया गोत्वाभावविधेयकानुमितौ गोत्वव्यापकाभाववत्तापरामर्शस्याहेतुत्वात् तत्त
थाविधगोत्वाभावानुमितिहेतोर्गोत्वाभावव्याप्यवत्तापरामर्शस्य विरहेण कारणबाधाच्च प्रसिद्धाप्रसिद्धसाध्यकोभयपरामर्शयोः प्रसि
द्धाप्रसिद्धसाध्यकोभयानुमित्यनुगतधर्मावच्छिन्नं प्रत्यनुगतरूपेण हेतुत्वस्य दुर्वचत्वादित्यन्यत्र विस्तरः व्याप्तिस्मरणादिनेति प
त्रानुमित्सोत्तरं व्याप्तिस्मरणं ततः सिद्ध्यात्मकपरामर्शस्तत्रेत्यर्थः तथैव तथा सत्येव विशिष्टाभावस्येति अनुमित्साविरहविशिष्टसिद्ध्य
भावस्येत्यर्थः मिश्रमतमाह अन्ये त्विति अनुमित्सायामिति सिद्धिदशायामिति शेषः वाच्येति। सिषाधयिषापदेनेत्यादिस्वोत्पत्तिर
त्यादिस्वपदं तत्तदनुमित्सापरं तथा च तत्तदनुमित्सोत्पत्त्यनंतरत्वविशिष्टतत्तदनुमित्साविषयसिद्धिप्रागभावो योग्यतेत्यर्थः सिद्धि
कालीनयदनुमित्साव्यक्तिदशायामुत्तरकालमनुमितिर्भविता तत्तदनुमित्साव्यक्तिविषयीभूतसिद्धिप्रागभावस्य वर्तमानासिद्ध्यनन्त
रदशायामपि सत्वात्तदानीमनुमितेर्वारणाय विशिष्टांतं तत्तदनुमित्सोत्पत्त्यनंतरत्वं तु अत तत्तदनुमित्सोत्पत्तिध्वंसविशिष्टत्वं तया

(मूं तत्तदनुमित्सोत्तरत्वाविशिष्टत्वविवक्षणे तत्तदनुमित्सासमकालेऽनुमितिर्न स्यादत उक्तं तदुत्पत्तीति।

सत्यनुमित्सोत्पत्त्यनन्तरक्षणेऽनुमित्यपलापापत्तेः सिषाधयिषोत्पत्तिक्षणेऽनुमित्सोत्पत्तिध्वंसविशिष्टस्य तत्तद्विषयसिद्धिप्राग
भावस्यासत्त्वात् किन्तु तत्तदनुमित्साप्रागभावविरहविशिष्टत्वं वैशिष्ट्यं चैककालावच्छेदेनैकात्मवृत्तित्वमिति नातिप्रसंगः तत्तद
नुमित्साप्रागभावविरहविशिष्टत्वमात्रोक्तावनुमित्सोत्तरमनुमित्युत्पादे पुनरनुमित्यापत्तिरतस्तदनुमित्साविषयसिद्धिप्रागभा
वपर्यन्तानुधावनेन च सिद्धिकालीनानुमित्सया स्वविषयीभूते क्वानुमित्युत्पाददशायामपि दिनान्तरभाविस्वविषयीभूताऽनुमित्य
नन्तरप्रागभावसत्त्वादुत्तरकालमनुमित्यन्तरापत्तिरिति वाच्यं तत्तदनुमित्साप्रागभावविरहविशिष्टस्य तत्तदनुमित्साविषयीभू
तसिद्धिप्रागभावकूटस्य विवक्षितत्वात् उक्तस्थले चोत्पन्नानुमितेरेव प्रागभावस्यासत्त्वादिति भावः। इन्द्रियादिनेति। अनुमान
नुत्साध्यनिर्णये तु स्वविषयसिद्ध्यनुत्पाद एव तस्य स्यादिति भावः यद्यपि स्वपदेनानुमित्युपधायकतत्तदनुमित्साव्यक्तीनामुपग्र
हे दिवसान्तरीयानुमित्साव्यक्तेर्योग्यतायामप्रवेशान्नैष दोषः तथापि वन्ह्यनुमितित्वप्रकारेणातीतानुमितिगोचरेच्छया सिद्धि
कालेवन्ह्यनुमितिर्न स्यात् तद्विषयानुमितिप्रागभावकूटस्य तदानीमसत्त्वात् न तत्तदनुमित्साव्यक्तिपूर्वक्षणवृत्तित्वेन तत्तदनुमि
त्साविषयसिद्धीनां तत्तदनुमित्साकालीनत्वेन वा तत्तदनुमित्साविषयसिद्धिप्रागभावानां विवक्षया कथंचिदुपपादनेप्यनुमिति
द्वयं जायतामितीच्छायामनुमितिद्वयं न स्यात्तदनुमित्साविषयीभूतानुमितिप्रागभावकूटस्य प्रथमानुमित्युत्पत्तिदशायामस
त्त्वात् तादृशानुमित्साया अपि मिश्रस्तत्तेजकत्वोपगमादित्यादिदूषणं द्रष्टव्यम् अतः बाधकं विनानेनानुमित्सोत्तरं यत्र परामर्शो
विरोधित्वानापसरणक्रमेण चिरकालोत्तरं परामर्शोत्पादस्तत्र सिद्धिदशायां न योग्यता अत एव वक्ष्यति फलबलेनेति तावानेव का
लइति सैत्यनुषज्यते नन्वेतादृशकालस्योत्तेजकत्वे किं मानमत आह फलेनेति ननु यत्रानुमित्सोत्तरं परामर्शस्तत्र स्वल्पकालानामुपा

CC-0. In Public Domain. Digitization by eGangotri

दानेयत्रसिद्ध्यात्मकपरामर्शोत्तरमनुमित्सा तत्रानुमितिर्नस्यात्त त्रत्यतत्कालानामनुत्तेजकत्वादत आह अथवेति उपलक्षितइति
तथाचानुमित्सानाशाधिकरणतत्तत्कालोऽनुमित्साचद्वयमप्युत्तेजकमित्याशयः तावानेवेति सिद्धिनाशोत्तरमपि यावत्काल
मध्येऽनुमितिर्नोत्पद्यते तावान्कालइत्यर्थः। ननुक्रियात्मकानां यावत्समयानामभावस्यसर्वदैवात्मनि सत्त्वात्लोकयोग्यता
विवक्षयाप्यनुमित्सानाशोत्तरमनुमितेः संभवइत्यत आह विशेष्येति तथाचजन्यमात्रस्यकालोपाधितया आत्मसमवेततत्तज्ज्ञाना
दिकमेवतादृशसमयोवाच्यइत्यदोषः अवहितेरितिभावेक्तः तेनावधानेरित्यर्थः स[illegible]कर्मकस्यावपूर्वस्यधाधातोः पचत्यादेरि
वंकर्तरिक्तस्याव्युत्पन्नत्वादितिध्येयम् अनुमित्साव्यक्तीनामिवतत्तन्नाशाधिकरणक्षणानामप्युत्तेजकविधयापक्षतायांनिवेशे
गौरवंविनाऽनुमित्सामनुमित्युत्पादस्यसंदिग्धत्वादित्यस्वरसोवर्तनीत्युक्त्यासूचितः उत्तानास्तु दृष्टद्रव्ये इत्यादिलौकिकप्रत्यक्षान्य
थानुपपत्त्याऽपेक्षाबुद्धीनामिवानुमित्सानाशोत्तरसिद्धिदशोत्पन्नतत्तदनुमित्यन्यथानुपपत्त्याप्रागुत्पन्नसिषाधयिषाव्य
क्तीनामेवत्रिचतुःक्षणावस्थायित्वंकल्पयितुमुचितंविशेषगुणानांनाश्यनाशकभावस्यविशेषत्वेएवंविश्रामात् द्वितीयक्षणे
नाशसामग्र्यनावश्यकत्वादितिप्राहुः साध्यनिर्णयेति साध्यनिर्णयत्वप्रकारकेच्छानंतरमित्यर्थः। पूर्वोक्तन्यायेनानुमित्साप्रागु
त्पन्नविशेषणज्ञानादिक्रमेणप्रत्यक्षमिति तत्रतदनंतरमनुमितिप्रसंगइतिपरेणान्वयः तथाविधप्रत्यक्षस्यविशिष्टानुभव
तयातज्जनकविशेषणज्ञानादिकल्पनेगौरवादाह स्मरणंवेति ननुयद्यदिच्छासत्त्वेसिद्धिदशायामनुमितिर्जायतेतत्तदिच्छा
व्यक्तीनामेवोत्तेजकतयापक्षतायामंतर्भावात्साध्यनिश्चयत्वप्रकारकेच्छायाः क्वापिपक्षतायामनिवेशात्नातिप्रसंगइत्यतआ
ह यत्रवेति यत्रसाध्यवान्साध्यव्याप्यवान्साध्यव्याप्यधर्मव्याप्यवांश्चपक्षः पक्षेसाध्यानुमितिस्तत्रव्याप्यवत्तानुमितिश्चे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰प॰ १६ ष्टसाधनमित्यंकं स्मरणमित्यर्थः। अत्रानुमित्सादशायामनुमितेर्वारणार्थं साध्यवत्त्वं निवेशितं मानसत्वावच्छिन्नं प्रत्येवेच्छासाम
ग्र्याः प्रतिबंधकत्वमते तथानुमितेर्वारणासंभवात् साध्यव्याप्यवत्त्वस्य तद्व्याप्यधर्मांतरवत्त्वस्य च निवेशोनुमित्सोत्तरं साध्यतद्व्या
प्यवत्वयोरनुमित्यर्थमन्यथा परामर्शविरहेणोत्तरकालं साध्यानुमित्यनुत्पत्त्यसंभवात् इष्टसाधनत्वं पुनरनुमित्सायाः सामग्रीसंप
न्न्यर्थं निवेशितमिति द्रष्टव्यं तयोरिति। साध्यतद्व्याप्ययोरित्यर्थः। अनुमितिप्रसंगः साध्यानुमितिप्रसंगः तत्तदिच्छाव्यक्तिसत्वे सिद्धिद
शायामनुमित्युत्पादेन तस्या अप्युत्तेजकत्वादिति भावः। मिश्रमतेप्याह योग्यतेति सुतरामिति। न त्वानुमितिप्रसंग इत्यन्वयः। अनुमि
त्सानारोप्यनुमितिमंगीकर्तुरनुमित्सासंभवेप्युत्तरां तदापत्तिसंभवादिति भावः। तदिच्छेति यद्यदिच्छाव्यक्तिरुत्तेजिका स्वविषयसि
द्ध्यभाववैशिष्ट्यं तद्विशेषणमित्यर्थः। यद्यप्येवमपि यत्रोक्तस्थल एव साध्यानुमितिद्वयेष्टसाधनतागोचरस्मरणात्साध्यानुमि
तिद्वयप्रकारानुमित्सा तत्रैकानुमित्यनंतरं साध्यानुमित्यंतरं न स्यात् प्रथमानुमित्युत्पादेनानुमित्सायाः स्वविषयसिद्ध्युपहितत्वा
त् तादृशेच्छायामुक्तविशेषणाप्रक्षेपेपि यत्र प्रात्यक्षिकसिद्ध्युत्तरं वन्ह्यनुमितित्वप्रकारेणैव वन्हिप्रत्यक्षगोचराविसंवादिनीच्छा
तत्र वन्ह्यनुमितिर्न स्यात् अनुमित्सायाः स्वविषयीभूतप्रात्यक्षिकसिद्ध्युपहितत्वेन तदनुपहितत्वविशिष्टानुमित्सायाः विरहसहकृ
तायाः सिद्धेः सत्त्वात् न च येन रूपेण सिद्धेस्तादृशेच्छाविषयत्वं तद्रूपावच्छिन्नसिद्ध्यभाववैशिष्ट्यं विवक्षितं तथा च वन्ह्यनुमि
तित्वावच्छिन्नाभाववैशिष्ट्यस्य तदिच्छाव्यक्तौ सत्त्वान्न दोष इति वाच्यं यत्र पक्षे पक्षस्य साध्यस्य प्रत्यक्षं कदाचिदपि न जातं तत्प्रत्यक्ष
कतत्साध्यकप्रत्यक्षव्यतिरिक्तं ज्ञानं जायतामितीच्छायां अनुत्तेजकत्वापत्तेः येन रूपेण यत्रेच्छाविषयत्वं तादृशस्य तत्प्रत्यक्षकतत्सा रामः
ध्यवत्ताप्रत्यक्षभिन्नज्ञानत्वस्याखंडस्याप्रसिद्धेः तथाप्युत्तेजकीभूतयद्यदिच्छाव्यक्तौ यादृशयादृशसिद्धिः प्रतिबंधिका तादृशता १६

CC-0. In Public Domain. Digitization by eGangotri

दृशसिद्ध्यनुपहितत्वं न तदिच्छाविशेषणं तेन यत्पक्षकयत्साध्यकप्रत्यक्षमप्रसिद्धं तत्रापि तादृशप्रत्यक्षभिन्नज्ञानत्वप्रका
रिकेच्छायां तत्पक्षसाध्यकानुमितिरेव प्रतिबंधिकास्तीति तदनुपहितत्वमेव तदिच्छायां विशेषणमित्यदोषः ननु यत्पक्ष
साध्यकानुमित्साकस्यापि नोत्पन्ना तत्र सिद्ध्यभाववत्त्वमपेक्ष्य निरुक्तसिद्ध्यभाववत्त्वे न हेतुत्वं गौरवग्रस्तमत आह पक्षसाध्येत्यादि
यत्रेति ययोः पक्षसाध्ययोरित्यर्थः सिद्ध्यभावमात्रमिति गौरवस्य प्रामाणिकत्वमपाकरोति प्रयोजनेति इदमुपलक्षणं यत्र पक्षे
साध्यवत्ताज्ञानोत्तरं कदाप्यनुमितिर्नोत्पन्ना तत्र साध्यवत्ताज्ञानाभावमात्रं कारणं निश्चयत्वमपि न निवेशनीयं एवं यत्रैकविधा
नुमित्सायां उत्तरमनुमितिस्तत्र तादृशानुमित्सैव पक्षता तथा यत्पक्षसाध्यकपरामर्शकालीनसिद्धिदशायामवश्यमनुमित्सा त
त्र पक्षतानानुमितिहेतुरिति द्रष्टव्यं यत्तु यत्पक्षसाध्यकानुमितिस्थले परामर्शदशायां नियमतः सिद्ध्यभावस्तत्र सिद्ध्यभावोपि न
हेतुरिति तन्न मंदं तादृशस्थले मानाभावात् योगिनामेव परामर्शदशायामवश्यं सिद्धिसंभवेन तदभावस्याहेतुत्वे तेषामेव सर्व
दानुमितिप्रसंगादिति ध्येयम् मिश्रमतमाक्षिपन्नाह तेनेति सर्वत्र पक्षतायामनुमित्सानिवेशस्य निष्प्रयोजकत्वेनेत्यर्थः धात्वर्थ
समानकर्तृकेच्छायामेव सनो विधानादनुमितिगोचराया अपीश्वरेच्छाया अनुमातृनिष्ठत्वाभावेन सिषाधयिषाशब्देन बोध
यितुमशक्यत्वादित्याशयः इत्युक्तसिषाधयिषानाशेपि द्वित्रिक्षणात्मकतरसिद्धिसत्त्वेनुमितेः सम्भवादिकं सार्वभौमोक्तप्रकारमुपन्य
स्यति यत्त्विति सिषाधयिषाविरहविशिष्टो यः सलक्षणः तदव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकोयोयस्तद्भिन्नायां सिषा
धयिषाविरहविशिष्टासिद्धिस्तस्याभावः पक्षतेत्यर्थः अत्रानुमित्सानाशकालोत्पन्नसिद्ध्यात्मकपरामर्शादनुमित्युत्पत्त्यर्थं मि
न्तं सिद्धिविशेषणं सिद्धिमात्रस्यैव प्रायशः सलक्षणोत्तरयत्किंचित्क्षणोत्पत्तिकानुमितिकतया तद्भिन्नायाश्चरमसिद्धेरभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰ प॰ १७

स्येदानीं सिद्ध्यात्मकपरामर्शे स्थूलेपि सत्वादनुमित्यापत्तिरत उक्तं मव्यवहितेति सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितो
त्तरत्वं च सिषाधयिषाविरहविशिष्टस्वक्षणध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति तादृशसमयध्वंसाधिकरणत्वं तत्र क्षण
पदं विहाय स्वसमयध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति तादृशसमयध्वंसाधिकरणत्वमित्युक्तौ यत्र क्रमेणानुमित्सा
सिद्धिपरामर्शानुमितयस्तत्र सिद्ध्युत्पत्तिकालपर्यंतस्थायिनमनुमित्सापूर्वकालोत्पन्नस्थूलकालोपाधिमादाय परामर्शक्षणे
पि पक्षताविरहप्रसंगः सिद्ध्यधिकरणतादृशोपाधेरनुमित्सापूर्वकालाद्यवच्छेदेन सिषाधयिषाविरहविशिष्टतयानुमित्साविर
हविशिष्टनिरुक्तस्वसमयाव्यवहितोत्तरत्वस्य परामर्शक्षण एव पर्यवसानात्तदानीं चानुमित्युत्पत्त्यात्तत्सिद्धेरपि निरुक्तानुमि
तिकभिन्नतया अनुमितेः प्रतिबंधकत्वादतः प्रथमक्षणपदं न या च तत्र सिषाधयिषाविरहविशिष्टः स्वक्षणः परामर्शोत्पत्तिक्षण
एवेति तदव्यवहितोत्तरोत्पत्तिकानुमितिकत्वान्नात्सिद्धिविरोधिनोत्यदोषः सत्यंतमात्रोक्तौ च सिद्धिमात्रस्यैव प्रायशः स्वक्षणध्वं
साधिकरणकालध्वंसानधिकरणीभूतस्व पूर्वकालोत्पत्तिकानुमितिकतया न तद्भिन्नसिद्धेरप्रसिद्धिः स्यादतः स्वसमयध्वंसाधिक
रणत्वदलं यत्र क्रमेण सिद्धिपरामर्शौ तत्रानुमितिप्रसंगः परामर्शपर्यंतस्थायिनः प्रहरादिरूपस्थूलकालोपाधेर्निरुक्तस्वक्षणा
व्यवहितोत्तरतया सिद्धिपूर्वदंडाद्यवच्छेदेनानुमित्युत्पत्तिमत्तया च सिद्धेः स्वक्षणाव्यवहितोत्तरकालोत्पत्तिकानुमितिकत्वेनाविरो
धित्वादतो द्वितीयक्षणपदं न च स्थूलकालोपाधेरेव स्वद्वृत्ति यावद्ध्वंसविशिष्टतादृशयोः क्षणत्वात् उक्तदोषतादवस्थ्यं यदुपाध्यव
च्छिन्नस्याव्यवहितोत्तरक्षणत्वं तदवच्छेदेनानुमित्युत्पत्तिमत्त्वस्य विवक्षितत्वात् क्षणिकान्यशब्दानामतिरिक्तपदार्थस्य वा
क्षणत्वमते यथाश्रुतार्थस्यैव सम्यक्त्वाच्च उत्पत्तिपदानुक्तौ एकानुमित्युत्पत्त्यनन्तरमनुमित्यन्तरापत्तिः स्व स्वक्षणाव्यवहितोत्त

पूर्वानुमितेः

रामः १७

CC-0. In Public Domain. Digitization by eGangotri

रक्षणवृत्तित्वात्मकानुमितिकत्वेन न तद्व्यसिद्धेरभावात् तस्तदुपात्तं नेत्थं स्वक्षणाव्यवहितोत्तरक्षणवृत्तित्वेतरानुमितिकत्वमेव
प्रवेश्यतामनुपपत्तेः स्वेतरत्वपक्षयागुरुत्वादिति वाच्यं यत्र साध्यस्यानुमितिद्वयं जायतामितीच्छया प्रथमं साध्यतद्व्याप्ययोरपे
क्षाबुध्यात्मिका एकानुमितिः ततः साध्यानुमित्यन्तरं तत्र साध्यानुमित्यन्तरप्रसंगात्॥ अनुमितिस्तु स्वसमानाधिकरणप्रकृतपक्ष
साध्यविषयिणी ग्राह्या ज्ञानान्तरः पुरुषान्तरीयानुमित्यादिकमादायातिप्रसंगः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभि
न्नस्य प्राग् त्पन्नस्य व्याप्तिस्मरणादेः परामर्शमात्रस्थले सत्त्वात् तत्र पक्षतासंपत्त्यर्थं सिद्धिपदमिति भावः ग्रंथलाघवार्थं मन्तिम
स्य सिषाधयिषाविरहपदस्य व्यावृत्तिमभिधान एवं प्रथमस्य प्रयोजनमिच्छति अथेति तृतीयक्षणेति तृतीयक्षणस्याव्यवधाय
केत्यर्थः सिद्धीति परामर्शात्मकसिद्धीत्यर्थः संपत्तयेति अन्यथा स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिद्धेः सत्त्वा
त्तत्र पक्षतानस्यादिति भावः द्वितीयो द्वितीयसिषाधयिषापदेन प्रत्यासत्त्यः सिषाधयिषाविरहस्यैकत्वेन द्वितीयत्वायोगादेवमग्रे
पि प्राथमिकस्त्वेनि सिषाधयिषाविरहेत्यनुषज्यते स्वक्षणस्येति विशेषणमित्यनुषज्यते यद्यपि सिषाधयिषाविरहविशिष्टं यत्स्व
तदधिकरणक्षणाव्यवहितोत्तरेत्यादिक्रमेण स्वस्यापि विशेषणत्वमनुमित्याविरहस्य संभवति तथापि स्वस्मिन्सिषाधयिषावि
रहवैशिष्ट्यस्य सामानाधिकरण्यरूपस्य प्रवेशे गौरवात् इत्याशयेन स्वक्षणस्येत्युक्तं यत्रेत्यादि सिषाधयिषासिद्ध्योर्व्युत्क्रमेणानु
मितिप्राक्काले सिद्धिसामान्याभाव एवं संभवत्यतः क्रमेणेत्युक्तं सिद्धेरनुमित्यात्मकत्वेऽनुमित्यायाः स्वविषयसिद्ध्युत्पादने चरितार्थ
तयोत्तरकालमनुमितिर्नैकस्यापि संमतादिति व्यर्थं तत्र पक्षतासंपादनमतः प्रात्यक्षिकपदं पक्षतासंपत्त्यर्थमिति अन्यथा तत्र स्व
क्षणाव्यवहितोत्तरक्षणोत्पत्तिकभिन्नायाः सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वादनुमितिर्न स्यादिति त्यं च तत्र सिद्धेः सिषाधयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰प॰ षाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वात्तदन्यसिद्ध्यभावस्य सत्वान्न पक्षताहानिः न च सिषाधयिषावि
१८ शिष्टस्यापि सिद्धिक्षणस्य घटाद्यवच्छेदेन सिषाधयिषाविरहवत्वात् उक्तदोषतादवस्थ्यं अवच्छेदकशरीरावच्छेदेन सिषाधयिषाविरहवि
शिष्टस्य विवक्षितत्वादिति भावः अत्र यत्र सिषाधयिषा घटादीच्छासिद्ध्यात्मकपरामर्शानुमितयः क्रमेण जाताः तत्रेच्छाविर
हविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नायां सिषाधयिषाविशिष्टायाः सिद्धेः सत्वात् अनुमितिर्न स्यादतः
इच्छामपहाय सिषाधयिषापर्यन्तमनुसृतं एवं घटेच्छासिद्ध्यात्मकपरामर्शानुमितिवारणाय द्वितीयसिषाधयिषायाः प्रवेश इ
ति भावः प्रसंगादिति द्वित्रिक्षणाद्यन्तरितानुमितेरसाध्यत्वेप्यनुमितिस्वीकारेण इष्टापत्त्यसंभवादिति भावः उक्तदोषं निरसितुमाशंकते
अथेति प्रथममित्यादि तथा च स्वसमयध्वंसाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वे सति स्वसमयध्वंसाधि
करणत्वमेवाव्यवहितोत्तरत्वं वाच्यं न च तृतीयक्षणेऽनुमित्युत्पादेप्यसत्तोतीति न पक्षताहानिः स्वक्षणेत्यत्र क्षणपदं समयमात्र
परं क्षणत्वपर्यन्तस्य निष्फलत्वादिति भावः लाघवादाह स्वध्वंसेत्यादि स्वोत्तरप्रहाराद्युत्पन्नानुमितिकसिद्धिदशायां पक्षतावार
णाय सत्यन्तदलं सिद्धिद्वितीयक्षणस्यापि विषयितासंबंधेन सिद्धिध्वंसाधिकरणीभूतातीतज्ञानादेर्ध्वंसाधिकरणत्वात् कालपदं
स्वपूर्वप्रहाराद्युत्पन्नानुमितिकसिद्धिदशायां नद्वारणाय स्वाधिकरणेत्यादिविशेष्यदलमुं कालपदोपादानात्कालिकसम्बन्धेना
करणत्वलाभेस्तु न सिद्धेः पूर्वप्रहारादेर्विषयितया सिद्ध्यधिकरणीभूतस्यातीतज्ञानादेर्ध्वंसाधिकरणत्वेपि नोक्तदोषः स्वाधिक
रणत्वमात्रोक्तौ सिद्धिप्राक्कालवारणसंभवेप्यनुमित्युत्तरमनुमितेर्वारणार्थं स्वाधिकरणकालध्वंसाधिकरणत्वपर्यन्तोपन्यासोऽन्य राम॰
थाऽनुमित्यात्मकसिद्धेः स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणीभूतो यः स्वोत्पादक्षणस्तदुत्पत्तिकानुमि १८

CC-0. In Public Domain. Digitization by eGangotri

त्तिकत्वेन तद्भिन्नसिद्ध्यभावस्य सत्त्वादनुमित्यन्तरापत्तिः एवं स्वाधिकरणत्वमात्रस्य विशेष्यत्वे यत्रानुमित्सानाशक्षणे इत्याद्युक्त
दोषनिरासोऽपि न स्यादिति ध्येयं नन्वेवं प्रागुक्तसिद्धिद्वयस्य द्वित्रिक्षणसाधारणनिरुक्तस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमिति
कतया तदन्यसिद्ध्यभावस्वरूपायाः पक्षतायाः सहजत एव सत्त्वात् सिषाधयिषाविरहद्वयोपादानं व्यर्थमत आह तथा चेति वारण
येति तत्रत्यसिद्धेः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेऽपि सिषाधयिषाविरहविशिष्टो यः स्वक्षणाव्यवहितोत्तरक्षण
स्तदुत्पत्तिकानुमितिकसिद्ध्यन्तरभिन्नतया विरोधित्वादिति भावः स्वक्षणस्य विशेषणत्वेन दोषनादवस्थ्यादाह उत्तरक्षणस्येति अ
नुमित्युत्तरक्षणपर्यन्तस्यापि स्थूलकालोपाधेरपि निरुक्तस्वाव्यवहितोत्तरकालत्वादेकानुमित्यनन्तरमन्यानुमितेर्वारणार्थं द्विती
मू॰ यक्षणपदस्यावश्यकत्वादुत्तरकालस्येति नोक्तं द्वितीयत्वनिविशिष्टानुमित्यनुषज्यते सिद्धेरिति विशेषणमित्यनुषज्यते सपन्नपे
इति अन्यथानुमित्साशून्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिद्धेः सत्त्वात्तृतीयक्षणेऽनुमितिर्न स्यादिति भावः नन्वेवं प
त्रपरामर्शात्मकसिद्धेरव्यवहितक्षणे तद्धर्मिकसाध्यवत्त्वांशेऽप्रामाण्यग्रहानन्तरं चानुमितिः तत्र तादृशाप्रामाण्यग्रहोत्पत्तिक्षणेऽ
नुमित्यापत्तेः तत्र सिद्धिव्यक्तेः सिषाधयिषाविरहविशिष्टो यः स्वक्षणाव्यवहितोत्तरक्षणः तदुत्पत्तित्वेन तदन्यसिद्धेः प्रागसत्त्वादि
ति वाच्यं अप्रामाण्यग्रहाभावविशिष्टत्वेन तत्सिद्धिव्यक्तित्वेनापि पक्षताबहिर्भावेणानुमितिविरोधित्वेनोत्तरस्य वक्तव्यत्वादिति भा
वः यद्यपि तृतीयक्षणसाधारणाव्यवहितोत्तरत्वकल्पे स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नाभावस्यैव सम्यक्त्वात् सिद्धिप
दव्यर्थं परामर्शहेतुभूतस्य व्याप्तिस्मरणादेर्निरुक्ताव्यवहितोत्तरक्षणोत्पत्तिकानुमितिनयैवाप्रतिबन्धकत्वात् एवं च सिषाधयिषा
विरहद्वयोपादानमप्यफलं यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्रानुमित्साजनकस्य फलेच्छादेरेव स्वाव्यवहितोत्तरक्षणोत्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰ प॰ निकानुमितिकभिन्नस्य सत्त्वादनुमित्सोत्पत्तिक्षणेऽनुमित्यसंभवात् नच जातिध्वंसाद्यप्रसिद्ध्या निरुक्तस्याव्यवहितोत्तरक्षणोत्पत्ति
मि। १९ कानुमितिकभिन्नस्याप्रसत्त्वादेः सत्त्वात्परामर्शमात्रादप्यनुमितिर्न स्यादतः सिद्धिपदमिति वाच्यम् एतावतापि तादृशानुमितिकभि मू॰ ह/
न्नसविषयकाभावस्यैव सम्यक्त्वे साध्यवत्त्वनिश्चयात्मिकायाः सिद्धेः प्रवेशानौचित्यात्तथापि स्वत्वस्याननुगतत्वात्तादृशानुमिति त।
कव्यक्तीनां तत्तद्व्यक्तित्वेन भेदानिवेश्यात्तत्र स्वपदेन सिद्धिव्यक्तय एव धर्तव्या न त्वनुव्यक्त्यन्तराणि तावद्भेदप्रवेशे गौरवात् तथा
च स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नस्य परामर्शादेः सत्त्वेऽप्यनुमितिर्न स्यादतः सिद्धिपदं न चैवं कार्योत्पादकस मू॰
कारणतावच्छेदकाघटकत्वेन वा कार्योत्पादादिकं कारणतावच्छेदककोटौ निविशिते इत्यग्रिमग्रन्थस्यासंगतत्वापत्तिः त
त्रत्यादिपदेन स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतत्तद्व्यक्तिप्रतियोगिकभेदकूटस्याप्युपग्रहात् तथा चक्रमिकसिद्धिसि
षाधयिषानुमितिस्थले प्रथमक्षणे पक्षतावारणार्थं विशिष्टान्तस्योत्तरक्षणविशेषणत्वध्रौव्ये द्वितीयमपि विशिष्टान्तं तत्रैव द्विती
यक्षणे पक्षतार्थमावश्यकमित्यस्मद्गुरुचरणाः यत्तु स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसविषयकाभावस्य प
क्षतात्वे परामर्शादेरनुमितिहेतुता न स्यादित्येककारणपरिशेषापत्तिभिया सिद्धिपदमिति तन्मन्दं पत्रे जागरणाद्यक्षणे स्मरणात्म
कपरामर्शादनुमितिस्तत्र परामर्शोत्पत्तिदशायामेव तदापत्तिप्रसंगेन परामर्शादेरनुमितिहेतुत्वस्यावश्यकत्वात् तत्रत्यपरा
मर्शपूर्ववर्तिनां निखिलसविषयकानां स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेनाविरोधित्वादिति केचित् अपेक्षाबुद्ध्यात्मकप
रामर्शे चतुर्थक्षणेऽनुमित्यर्थं सिद्धिपदमन्यथा तादृशपरामर्शस्यैव निरुक्तानुमितिकभिन्नसविषयकत्वेन प्रतिबंधकत्वापत्तिरि रामः
त्याहुः तन्मन्दं चतुर्थक्षणे द्वित्वादिप्रत्यक्षस्यानुत्पादेन तादृशपरामर्शस्यापेक्षाबुद्धित्वे मानाभावात् अन्यथानुमित्सोत्तरं सिद्ध्यात्म १९

मू॰

CC-0. In Public Domain. Digitization by eGangotri

कस्यैवापेक्षानुद्बोधात्मकस्य चतुर्थक्षणे सिद्धिनिवेशेप्यनुमित्यभावप्रसंगात्। ननु यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र
प्रथमक्षणे पक्षतासत्त्वेपीच्छासामग्र्याः प्रतिबंधकत्वादेवानुत्पत्तिसंभवात्प्रथमविशिष्टान्तदलं व्यर्थमत एव द्वितीयमपि शेष्यत आ
ह यदि पुनरिति सर्वत्रेच्छाजनकीभूतज्ञानस्येच्छोत्पत्तिदशायां साक्षात्कारप्रसंगे नमानसत्वावच्छिन्नं प्रत्यक्षसामान्यं वा प्रती
च्छासामग्र्याः प्रतिबंधकत्वेप्यनुमितिं प्रति तस्यास्तथात्वे मानाभावात्। न चेच्छासामग्रीदशायां स्मृतिशाब्दबोधाद्यनुदयाल्लाघ
वेन जन्यज्ञानत्वावच्छिन्नं प्रत्येव तस्याः प्रतिबंधकत्वमतस्तत्त्वेऽनुमित्यसंभव इति वाच्यं सत्यामपीच्छासामग्र्यां पश्येयं स्प
र्शयं शृणुयां शाब्दयामितीच्छादशायां जन्यज्ञानोत्पादेन चाक्षुषत्वस्पार्शत्वश्रावणत्वशाब्दत्वादिप्रकारकेच्छाविरहवि
शिष्टेच्छासामग्रीत्वेन चाक्षुषत्वस्पार्शनत्वशाब्दत्वाऽऽदिप्रत्येकधर्मावच्छिन्नं प्रत्येव प्रतिबंधकतयाऽनुमितिमंतर्भाव्येच्छासाम
ग्र्याः प्रतिबंधकत्वाकल्पनात्। जन्यज्ञानत्वावच्छिन्नं प्रति तत्तदिच्छाविरहकूटविशिष्टेच्छासामग्रीत्वेन विरोधितायामिच्छासाम
ग्रीसत्वेपि पश्येयमितीच्छातश्चाक्षुषस्येव स्पार्शनस्य शाब्दबोधादेर्वा प्रसंगात् जन्यज्ञानस्याविशिष्टत्वात्। तथा चानुमितावि
च्छासामग्र्या इवेच्छायामप्यनुमितिसामग्र्या विरोधित्वं सुवचं विनिगमकाभावेनैकशेषस्य दुष्करत्वादित्याशयेन यदि चेत्युक्तं य
त्तु अनुमितिसामग्र्यपेक्षया इच्छासामग्री लघुरिति सैवानुमितौ प्रतिबंधिका नत्विच्छायामनुमितिसामग्री गुरुत्वादिति तत्तुच्छं तथा
सत्यनुमित्साविरहविशिष्टाया एवेच्छासामग्र्या अनुमितिविरोधित्वं वाच्यमन्यथाऽनुमित्साकालीनायामपीच्छासामग्र्यामन
नुमित्यभवापत्तेः एवं चानुमित्साकालीनानुमितिसामग्रीदशायामिच्छानुत्पत्त्यर्थमिच्छासामान्यं प्रति त्वयानुमित्साकालीनानु
मितिसामग्रीत्वेनावश्यं विरोधित्वं वाच्यमित्यनुमितिसामग्र्या गुरुत्वस्याकिंचित्करत्वादिति ध्येयं। यद्यपि स्वाव्यवहितोत्तरक्षणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आ॰ प॰ न्पत्तिकानुमितिकसिद्धिभिन्नसिद्ध्यभावस्यैव प्रक्रान्तत्वात्तदुपादानमुचितं गौरवस्य वक्ष्यमाणलक्षणेऽपि अविशिष्टत्वात्तथापि का
२० र्योत्पादस्येव कार्याव्यवहितपूर्वत्वस्यापि कारणतावच्छेदकत्वं निरसितुं तदन्तर्भावेन पक्षतां निर्वक्ति अनुमित्यव्यवहितेति। प्र
कृतपक्षसाध्यकस्वसमानाधिकरणतत्तदनुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्ध्यभावः प्रकृतसाध्यकानुमितौ पक्षतेत्यर्थः।
प्रकृतपक्षसाध्यकानुमितिप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वघटितस्य सामान्यतस्तादृशानुमित्यव्यवहितपूर्व
त्वस्याप्रसिद्धत्वात्तत्तदिति। न च प्रकृतपक्षसाध्यकानुमित्युत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वरूपं सामान्यतस्तादृशानुमित्य
व्यवहितपूर्वत्वमनुवचमिति वाच्यं तस्याप्युत्पत्त्यंतर्गतस्वत्व घटितत्वेन विशेषितो विश्रामादित्यं च स्वसमानाधिकरणतत्तदनु
मित्यव्यवहितपूर्ववर्त्तित्वावच्छिन्नभेदकूटस्य घटकतया तत्र स्वपूर्ववर्त्तिसिद्धिकालीनानुमितिव्यक्तीनां निवेशः कार्यो न तु सिद्ध्यस
मानकालीनानुमितिव्यक्त्योपि निवेश्याः प्रयोजनाभावाद्गौरवाच्चेत्यावेदयितुं प्रथमं सिद्धिपदं यत्तु प्रकृतपक्षसाध्यकस्वसमानाधि
करणानुमितिसामान्याव्यवहितपूर्ववर्त्तित्वस्याप्रसिद्ध्या तन्निवेशासंभवात् वस्तुगत्या तादृशानुमित्यव्यवहितपूर्ववर्त्तिघट्यत्वं
तद्भेदकूटस्यैव निवेश्यतया तत्र च सिद्धिभिन्नस्य मनःसंयोगादेः प्रतियोगिविधयाप्रवेशे गौरवादतः सिद्धिपदमिति मतं तन्नुच्छं नया
सतिकार्याव्यवहितपूर्वत्वस्यानिविष्टतयाऽग्रे तत्तत्कारणतावच्छेदककखण्डनस्योन्मत्तप्रलपितत्वापत्तेः द्वितीयं तु सिद्धिपदं तादृशसि
द्धिभिन्नस्य परामर्शमात्रस्य सत्वेप्यनुमितेरुत्पत्त्यर्थमन्यथा तस्यैव प्रतिबंधकत्वापत्तेरिति भावः। प्रथमकल्पं दूषयति तादृशेत्यादि
नत्तद्व्यक्तित्वेनेत्यस्य सिषाधयिषाविरहविशिष्टेत्यादि तथा च सिषाधयिषाविरहविशिष्टतत्सिद्धित्वावच्छिन्नाभावेत्यर्थः। यथाश्रुते यत्रै राम:
क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र सिषाधयिषाविरहविशिष्टो यः स्वक्षणाव्यवहितोत्तरक्षणस्तदुत्पत्तिकानुमितिकभिन्नासि २०

CC-0. In Public Domain. Digitization by eGangotri

द्धेः सिषाधयिषादशायांसत्वादनुमित्यनापत्तेः इत्थं च सकलसिद्धावित्याद्यग्रिमग्रंथोपि संगच्छत इति ध्येयं निरुक्तरूपेति सिषा
धयिषाविरहविशिष्टस्वस्वरूपाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नसिषाधयिषाविरहविशिष्टसिद्धिसत्वेनैवेत्यर्थः अनंतेति
अवच्छेदकभेदेनैव कारणत्वस्य नानात्वादिति भावः न च तत्तत्सिद्ध्यभावकूटत्वेनैकरूपेणैव हेतुत्वसापेक्षाबुद्धिविशेषयत्वरूप
स्य कूटत्वस्यापेक्षाबुद्धिव्यक्तीनां भेदेन नानात्वसंभवादिति भावः ननु प्रामाणिकानंत्यं न दोषायेत्यत आह तादृशेति परामर्शद
शायां यस्यां सिद्धौ नानुमित्सावैशिष्ट्यं तत्तत्सिद्धिव्यक्तावनुमित्साविरहविशेषणं व्यर्थत्वादित्यर्थः परामर्शसमानकालीनसिद्धिव्यक्ती
नामभावस्य हेतुत्वे मानाभावाच्चेत्यपि द्रष्टव्यं ननु सर्वस्या सिद्धौ न देयमेव तद्विशेषणमत आह तत्तत्समयेति सिद्ध्यधिकरणतत्त
त्क्षणेन समं सम्बन्धव्यक्तीनामित्यर्थः ननु तत्तत्समयसंबंधस्य विरोधित्वे सिद्धिमत इव पुरुषांतरस्याप्यनुमितिर्न स्यात्तादृशसंब
धस्याविशिष्टत्वादत आह तत्तत्समयावच्छिन्नेति सिद्धिकालीनतत्तन्मनोयोगव्यक्तीनां स्थिरतया सिद्धिविगमेप्यनुमितिर्न स्यादतो
ऽवच्छिन्नेति सिद्धिमत इव जनांतरस्यापि तत्तत्समयावच्छिन्नमनोयोगसत्वात्तस्याप्यनुमितिर्न स्यादतस्तत्तादिति मनोयोगस्य विशेष
णं मनोविशेषणत्वे तु तत्तत्समयावच्छिन्नतन्मनःप्रतियोगिकसंयोगस्यापि पुरुषांतरेसंभवात् सिद्धिमत इव तस्याप्यनुमित्यनाप
त्तेरिति भावः न च तत्तत्सिद्धित्वेन प्रतिबंधकत्वमपेक्ष्य तत्तत्समयावच्छिन्नतन्मनोयोगत्वेन प्रतिबंधकत्वे गौरवादेव परित्यज्यमि
ति वाच्यं त्वया सकलसिद्ध्यनुमित्साविरहवैशिष्ट्यस्यैवमपि सर्वस्मिन्मनोयोगे तत्तत्समयावच्छिन्नत्वस्यानुपादेयतयोभयत्रापि दू
षणसमाधानयोस्साम्यादिति भावः कस्याश्चिन्नेति सिद्धेरनंतरमनुमित्यनुषज्यते नियामकाभावादिति नियामकालाभादित्य
र्थः विशिष्टाभावस्य विशेष्याद्यभावरूपतया निरुक्ताभावस्य विशेष्यीभूतसिषाधयिषाविरहविशिष्टसिद्धेरभावस्वरूपत्वेतादृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ.प. शसिद्धिसत्त्वे कदाप्यनुमितिर्न स्यात्स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वरूपविशेषणाभावरूपत्वे विवक्षित
२१ विवेकेनानुमित्युत्पादस्येवानुमित्युत्पादप्रयोजकत्वे पर्य्यवसानादात्माश्रयादिति भावः ननु मणिकारमते विशिष्टाभावस्यातिरिक्त
तया तत्स्वसत्त्वासत्त्वमेवानुमितेरुत्पादानुत्पादनियामकं वाच्यमत आह नवेति कारणसमाजाधीनं तत्तद्धर्मावच्छिन्नकार्यस्योत्पा
दादिकं तत्तद्धर्मावच्छिन्नकार्यस्य कारणतावच्छेदककोटौ न निविशिते गुरुधर्मेणेव तादृश्येणापि जनकतायामन्यथासिद्धत्वादि
त्यर्थः तेन ज्ञानोत्पत्त्यादिविशिष्टबुद्धौ ज्ञानोत्पत्त्यादिज्ञानत्वेन हेतुतायां कार्योत्पादस्यावच्छेदकत्वेपि ज्ञानोत्पत्तिविशिष्टबुद्ध्युत्पत्ति
त्वेनाप्रवेशान्न दोषः आदिपदात्कार्याव्यवहितपूर्ववृत्त्यादेः स्वक्षणाव्यवहितोत्तरक्षणानुत्पन्नकार्यकात्स्वत्वस्य च परिग्रहः कार्यो
त्पादादिघटितधर्मेण हेतुत्वे प्रतिबंधिमाह तथा सतीति स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितियस्वतादृश
सविषयकत्वेनेत्यर्थः कारणत्वं स्यादित्यग्रेणान्वयः स्वक्षणाव्यवहितोत्तरत्वादृशानुमितिकस्य परामर्शस्यैव सत्त्वादनुमित्युत्तरमनु
मितेर्वारणाय उत्पत्तिकालावच्छिन्नेति स्वोत्पत्तिक्षणावच्छिन्नेति तदर्थः। उत्पत्त्यवच्छिन्नस्य घटादिज्ञानस्योत्तरमप्यनुमितिः
स्यादतः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकेति स्वक्षणोत्पत्त्यक्षणः समयमात्रं न तु क्षणमात्रं वेत्यर्थ्यान्तु अनुमितेरपि स्वसमया
व्यवहितोत्तरीभूतस्वस्थितिक्षणपर्यन्तस्यापि प्रहाराद्युत्पत्तिकानुमितिकतयातत्तोप्यनुमित्यन्तरापत्तिरतो हितोयं क्षणपदमनुमि
तेरपि स्वक्षणाव्यवहितोत्तरक्षणवृत्तिस्थात्मकानुमितिकत्वात्तदुत्तरमनुमित्यंतरस्य वारणाय उत्पत्तिपदं न च स्वक्षणाव्यवहितो
त्तरक्षणवृत्तिस्वेतरानुमितिकत्वमेव तदर्थ उच्यतामिति वाच्यं यत्र साध्यानुमितिद्वयं जायतामितीच्छया साध्यतद्व्याप्ययोरपेक्षाबुद्ध्या रामः
त्मकानुमित्युत्तरं साध्यमात्रस्यानुमितिस्तत्र साध्यस्यानुमित्यंतरप्रसंगात् पूर्वानुमितेः त्रिक्षणस्थायित्वात्तत्रोत्पत्तिः आद्यक्षणसं २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंधः आद्यक्षणसंबंधुत्वं च स्वाधिकरणसमयध्वंसानधिकरणत्वमात्रं न तु स्वाधिकरणत्वमपि प्रवेश्यं वैयर्थ्यादिति दृष्टव्यं स्व
क्षणाव्यवहितोत्तरक्षणोत्पत्तिपुरुषान्तराऽनुमितिकाद्घटादिज्ञानादनुमितेर्वारणाय स्वसमानाधिकरणेति एकत्र पुंसि नाद
शानुमितिकस्य हि त्वस्य पुरुषान्तरेपि सत्वात्तत्रानुमितेर्वारणाय स्वविषयकेति सिद्ध्यात्मकपरामर्शानुमित्सानुमितीनां क्रमिक
स्थले तादृशज्ञानासंभवात् ज्ञानत्वापेक्षया गुरुत्वेपि सविषयकत्वं निवेशितं न चैतस्य स्वत्वद्वयघटितत्वादुक्तरूपेण हेतुतायां
गौरवमिति वाच्यं स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमिति सामानाधिकरण्ये तात्पर्यादिति भावः कार्योत्पादस्य कारणताव
च्छेदकत्वे प्रतिवंधिमुक्त्वा कार्याव्यवहितपूर्वत्वस्य तथात्वे प्रतिवंधिमाह स्वमानेत्यादि अत्र नादृशानुमित्यव्यवहितपूर्वत्वं
न तादृशानुमितिप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वे सति तादृशानुमितिप्रागभावाधिकरणत्वरूपमप्रसिद्धत्वात्
किं तु तादृशानुमितिक्षणोत्पन्नध्वंसप्रतियोगित्वं तथा च सिद्धिमात्रादनुमित्यापत्तेस्तस्यापि समानाधिकरणानुमित्युत्पत्तिक्षणो
त्पन्नध्वंसप्रतियोगिप्रहरादिकालोत्पन्नत्वादतः क्षणपदं यत्र परामर्शेन स्वनाशक्षणेऽनुमितिर्जन्यते तत्र द्वितीयक्षणेप्यनु
मित्यापत्तिः परामर्शस्यैव स्वसमानाधिकरणानुमित्यव्यवहितप्राक्क्षणावृत्तेरुत्पत्त्यवच्छिन्नस्य सत्वादुक्तमुत्पन्नेति न च स्व
त्वस्याननुगतत्वादुक्तरूपेण हेतुत्वमसंभवीति वाच्यं यत्त्वनत्वादेरिव स्वत्वस्याप्यनुगतत्वमंगीकृत्यैव दूषणोपक्रमात् अ
न्यथा तद्व्यक्तित्वेन स्वपदार्थस्य प्रवेशे कार्योत्पादादेर्गुरुत्वादेव कारणतायामप्रवेशसंभवेनान्यथासिद्धिमुद्भावयतदीयावच्छे
दकत्वखंडनस्योन्मत्तप्रलपितत्वापत्तेरिति भावः आदिपदलभ्यस्य स्वक्षणाव्यवहितोत्तरक्षणानुत्पन्नकार्यकान्यत्वस्य कारण
तावच्छेदकत्वप्रवेशे बाधकमाह स्वक्षणेत्यादि स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिर्येषां तदन्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·प· सविषयकत्वेनेत्यर्थः। अत्राप्युत्पत्त्यवच्छिन्नत्वविशेषणं प्रवेशनीयमिति तेनातिप्रसंगः। केचित्तु प्रागुक्तस्योत्पत्तिघटकस्वत्व घटित
२२ त्वेनाननुगतत्वाभावादुक्तं स्वक्षणेत्यादि। न चैकानुमित्युत्तरमनुमित्यन्तरस्य वारणार्थमस्यापि स्वोत्पत्तिकालावच्छिन्नत्वेन विशे
षणीयत्वादननुगमतादवस्थ्यं स्वोत्पत्तिकालावच्छिन्नत्वेन स्वानुत्पत्तिक्षणावच्छेद्यत्वाभावकूटवत्त्वस्य विवक्षितत्वादित्याहुः
तन्तुच्छं अननुगतस्वत्वमंगीकृत्यैव दोषोपक्रमात्। अन्यथा कार्योत्पत्त्याद्युपलक्षिततादात्म्येनैव कारणतावच्छेदकत्वे कार्योत्पा
दादेरवच्छेदकत्वखंडनस्यासंगतत्वापत्तेः पश्चाद्वक्ष्यमाणस्यापि स्वत्वगर्भत्वेन संदर्भविरोधापत्तेश्चेति दिक्। ननु सविषयमात्र
स्यैव प्रायशः स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणयत्किंचिदनुमितिव्यक्तिकतया तदन्यसविषयकस्य संसा
रिण्यभावात् परामर्शमात्रादप्यनुमितिर्न स्यात् तादृशक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिसामान्यकभिन्नसविषयत्वेन
कारणत्वे महागौरवमत आह किंवेति यन्नूक्तरूपेण हेतुना यामनुमितिसामान्योपधायकत्वं परामर्शस्य न स्याद्धि नश्यदवस्थपरा
मर्शानुमितिस्थले कथितरूपावच्छिन्नस्य तस्यासत्त्वादत आह किंवेत्यादिकमिति तन्न स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्वसमा
नाधिकरणानुमितिकसविषयकत्वेन हेतुत्वोक्त्या पूर्वमेव परामर्शस्यानुमित्युपधायकतानियमस्य स्वीकृतत्वात् तदासंख्याने संदर्भवि
रोधापत्तेः। अत्रानुमितिपूर्ववर्त्तिनो ज्ञानस्यानुमितिदशायामपि सत्त्वादुत्तरकालमनुमितेर्वारणाय तादृशपूर्ववर्त्तित्वविशिष्टत्वमु
क्तं तथा च तदवच्छिन्नस्य प्रागसत्त्वान्न दोषः। ज्ञानत्वादिनेत्यादिना सविषयत्वभावनात्वादेः परिग्रहः ननु प्रथमकल्पे तृतीयक्ष
णसाधारणस्य प्रागुक्ताव्यवहितोत्तरत्वस्य प्रवेशे व्याप्तिज्ञानमात्रादनुमितिः स्यात्तस्यापि परामर्शसंपत्त्या स्वाव्यवहिततृतीयक्षणो रामः
त्पत्तिकानुमितिकत्वादत आह स्वाव्यवहितोत्तरश्चेति। तथा च स्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वगर्भमेवा २२

CC-0. In Public Domain. Digitization by eGangotri

व्यवहितोत्तरत्वं निवेश्यमिति भावः। न चेति वाच्यमित्यन्वयः। पूर्वोत्पन्नस्यैव परामर्शस्य स्थितिक्षणेऽनुमित्यव्यवहितपूर्वत्वविशिष्ट
मू॰ स्यासंभवात् किं वेत्यादिकल्पे दोषासंभवादादिमेषु त्रिषु वित्युक्तं अतथात्वादिति स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वा
भावात् स्वसमानाधिकरणाव्यवहितपूर्वक्षणोत्पन्नत्वाभावात् स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमिति
कभिन्नसविषयकत्वाभावाच्चेत्यर्थः। तदानीं विरोधिसिद्ध्यादेर्नाशदशायाम्। अनुव्यवसायादेरित्यस्य पञ्चम्यन्तस्यासंभवादित्यने
न योजना। अनुव्यवसायादिनानुमितिसंभवादित्यर्थः। आदिना वाङ्मनस्यान्तराद्युपसंग्रहः। ननु यत्र परामर्शविषयिण्या कामिनी
जिज्ञासया परामर्शमात्रमुत्पाद्यते नष्टं तत्र परामर्शोत्तरक्षणे तयाऽप्रतिबन्धात् ज्ञानमात्रस्यैवानुत्पत्त्या पश्चादनुमितिर्न स्यादत आ
ह अन्ततः संस्कारेति। अन्ततो जीवनयोनिकृतेरसत्त्वे न च यत्र सर्वांशे एवोपेक्षात्मक उक्तपरामर्शस्तत्र संस्कारस्यासंभवस्तादृशस्य
ले मानाभावात् अनुमित्यात्मकार्येणानुमितसंस्कारस्यान्यथानुपपत्त्यानुपेक्षात्मकस्यैव तत्र कल्पनात् इतोऽप्यस्वरसमाह किं वेत्या
दिकल्पस्यादृतत्वादिति भावः। ननु तादृशानुमितेः संस्कारजन्यत्वे स्मृतित्वापत्तिरत आह संस्कारजन्येति। जन्यत्वं समवायेन ग्राह्य
नातः संस्कारध्वंसे व्यभिचारः प्रागेव शाब्दः सुतरामर्थे निपातितः निरासादिति प्रत्यभिज्ञायां व्यभिचारादप्रयोजकत्वाच्च संस्कारज
६ न्यत्वे स्मृतित्वानियमादिति भावः। ननूक्तप्रतिबन्धिभयाद्भावनिष्ठकारणताया अवच्छेदकविधया कार्योत्पादादिकमनिवेश्य
तामभावरूपायाः पक्षतायाः कारणतायां तन्निवेशे न किंचिदपि बाधकमतस्तत्रापि प्रबोधिमाह स्यादेतदिति। तथा सतीत्यनुपजय
ने ज्ञानमात्रस्यैव प्रायशो व्यधिकरणानुमित्यव्यवहितपूर्ववृत्तित्वात्तदन्यस्य प्रलयादेरभावः। परामर्शविधुरेऽप्यात्मन्यस्तीति त
त्रानुमितेर्वारणाय स्वसमानाधिकरणान्तं अनुमितिश्च पक्षसाध्यादिविशेषणियन्त्रितो ग्राह्या तेनैकसाध्यानुमितिदशायां सिद्ध्या
मू॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिसत्त्वेपिनान्यसाध्यकानुमितेरुत्पादः तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वलक्षणस्यैवस्वप्रमाणाव्यवहितपूर्वत्वस्यानुमिति
स्थूलकालेपिसत्त्वात्तद्वृत्तिसिद्धिसत्त्वेप्यनुमित्यापत्तेरतः क्षणेति ननु यत्रसामग्रीवशात् साध्यतद्व्याप्ययोरनुमित्यात्मकपराम
र्शः ततः साध्यस्यानुमित्यनंतरं जायतामितीच्छा ततोऽनुमित्यनंतरं तत्रानुमित्साकालेप्यनुमित्यापत्तिः पूर्वोत्पन्नानांसर्वेषामेवतदात्म
गुणानांतादृशानुमित्यव्यवहितपूर्वक्षणवर्त्तित्वेनाविरोधित्वादत आह स्वस्वमानेनेति तथा चोक्तस्थले प्रथमानुमितिक्षणस्यैवता
दृशाव्यवहितपूर्वत्वानधिकरणतयातद्वृत्तित्वविशिष्टस्यपरामर्शादेरेवविरोधिनः सत्त्वान्नदोषइतिभावः अनुमित्युत्पत्तिपर्य्यंत
स्थायिस्थूलकालोपाधेरपितादृशानुमित्यव्यवहितपूर्वत्वानधिकरणतयातद्वृत्तित्वविशिष्टस्यपरामर्शमात्रस्यसत्त्वेप्यनुमितिर्न
स्यादतः क्षणपदं ननु तादृशानुमित्यव्यवहितपूर्वत्वं तादृशानुमित्युत्पत्तिक्षणोत्पत्तिध्वंसप्रतियोगित्वरूपमेवाग्रेवक्ष्यते ननु ताद
शानुमित्युत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वरूपं तथासतिसर्वेषामेवक्षणानांतादृशानुमित्युत्पत्त्यधिकरणीभूतस्थूलकालोत्प
न्नध्वंसप्रतियोगितयानिरुक्ताव्यवहितपूर्वत्वानधिकरणत्वस्यैवदुर्लभत्वापत्तेरेवं च तादृशानुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियो
गित्वानधिकरणक्षणवृत्तित्वविशिष्टत्वेनप्रतिबंधकत्वमपेक्ष्य तादृशानुमित्युत्पत्त्यनधिकरणासमयोत्पत्तिकध्वंसप्रतियोगिक्षणवृ
त्तित्वविशिष्टत्वेनविरोधित्वंयुक्तं क्षणद्वयाप्रवेशेनपूर्वतोलाघवादित्याशयेनाह स्वसमानेति अत्रतादृशसमयाव्यवहितपूर्वत्वंताद
शसमयोत्पत्तिकध्वंसप्रतियोगित्वमात्रं नतु तादृशसमयोत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वमाद्योत्पत्तेर्वैयर्थ्यान्निष्फलत्वाच्चसम
यपदंत्वव्यवहितघटकोत्पत्तेः कालिकसंबंधेनवृत्तित्वलाभार्थमन्यथानुमितिपूर्वक्षणस्यापितादृशानुमित्युत्पत्त्यनधिकरणत्वा
द्यादौविषयित्वादिसंबंधेनवर्तमानोत्पत्तिकोयोध्वंसस्तत्प्रतियोगित्वनतत्क्षणवृत्तित्वविशिष्टस्यपरामर्शादेः प्रतिबंधकतयास्व

CC-0. In Public Domain. Digitization by eGangotri

कालेऽप्यनुमित्यनापत्तेरिति ध्येयं। नन्वनुमित्यव्यवहितपूर्वत्वं तदुत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वं तथा चातिपूर्वक्षणस्यापि अ
नुमित्युत्पत्त्यनधिकरणस्थूलकालोत्पत्तिकध्वंसप्रतियोगित्वात्तद्वृत्तिमत्त्वस्यापि सिद्ध्यादेरप्रतिबंधकत्वापत्तिरत आह तदव्यव
हितेनेति। तादृशानुमित्यव्यवहितपूर्वत्वं चेत्यर्थः। शेषकल्पे निरुक्ताव्यवहितपूर्वत्वस्याप्रविष्टतया सामान्यतोऽव्यवहितपूर्वक्षणनि
रूपणानौचित्यादिति ध्येयम्। न च जन्याभावत्वलक्षणध्वंसत्वस्य प्रवेशे वैयर्थ्यमभावान्तराणामुत्पत्तिविरहेणैव निरासादिति वा
च्यं ध्वंसत्वनिरूपकप्रतियोगित्वलाभार्थं तदुपादानात्। अन्यथा सर्वेषामेव क्षणानामनुमित्युत्पत्तिकालोत्पत्तिकस्वभेदात्मकध्वं
सांतरप्रतियोगितयातिप्रसंगापत्तेः। ध्वंसत्वस्याखंडत्वमते तु वैयर्थ्याशंकानुत्थानादेवेति भावः। न चेति वाच्यमित्यन्वयः। अत्र उक्तेषु म
ध्ये प्रथम इति। अन्त्ययोस्तु कल्पयोस्तादृशानुमित्यव्यवहितपूर्वत्वानधिकरणवृत्तित्वविशिष्टेन स्वसमानाधिकरणानुमित्युत्पत्त्य
नधिकरणसमयाव्यवहितपूर्वक्षणवृत्तित्वविशिष्टेन च परामर्शेनैव प्रतिबंधादनुमित्सोत्पादकालेऽनुमितेर्न संभव इति भावः॥
सिद्धेरसत्वेऽनुमित्सामवधूयानुमितिरेवोत्पद्यते परामर्शपूर्वं सिद्धिसत्त्वे च सैव तादृशाव्यवहितपूर्ववर्त्तिभिन्नाविरोधिनी भविताऽ
न्यतः सिद्धान्तमके त्वनुक्तं प्रतिक्षणमवश्यं कस्यचिद्विनाशोपगमान्नन्वसुरुषीयस्येत्युक्तं तदुत्पादसमयेऽनुमित्सोत्पादसमये सा
ऽनुमितिः। तादृशपूर्ववर्त्तित्वेन समानाधिकरणानुमित्यव्यवहितपूर्वक्षणवर्त्तित्वेन यद्यप्यनुमित्साया अप्युपायेच्छात्वात्तत्का
रणीभूतफलेच्छाया एवानुमितिप्राग्वृत्तिभिन्नायास्सत्त्वादनुमित्सोत्पत्तिकालेऽनुमितेरसंभवः। तथापि सुखात्मिकानुमितिर्जायत
मित्याकारिकैवात्र सिषाधयिषा बोध्या सा च फलेच्छात्वादेव न फलेच्छान्तरमपेक्ष्यत इत्यदोषः। परामर्शोऽप्यत्र स्मरणात्मको ग्रा
ह्यः। अन्यथा विशिष्टानुभवत्वेन तदर्थमपेक्षणीयस्य विशेषणज्ञानादेस्तादृशपूर्ववर्त्तिभिन्नत्वेन विरोधित्वसंभवात्। न च स्मरणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्मकपरामर्शहेतोः संस्कारस्यैव फलनाश्यस्य तादृशपूर्ववर्त्तिभिन्नत्वसंभवः समूहालंबनसंस्कारजन्यपरामर्शस्य चरमफलत्वा
भावेन संस्कारनाशकत्वादिति वदंति यत्तु सिद्ध्यात्मकपरामर्शोऽत्रानुमितिरूप एव ग्राह्यस्तथा च फलेच्छादेरपि स्वसमानाधिकर
णानुमित्यव्यवहितपूर्ववर्त्तित्वादेव प्रतिबंधकत्वासंभवादत एव च पुनरनुमितिरित्यत्र पुनःपदेन सिद्ध्यात्मकपरामर्शस्यानुमि
तित्वं ग्रंथकृतैव व्यंजितं न च सिद्ध्यात्मकानुमितिसत्वेऽनुमित्सैव दुर्घटानुमित्यन्तरत्वप्रकारेण तत्संभवादिति मतं तत्तुच्छं अनव
रतेत्युत्तरग्रंथस्यासंगतेः क्षणिकपदार्थानभ्युपगमेन संयोगादीनामपि तादृशपूर्ववृत्तित्वेन प्रतिबंधकत्वायोगादिति । यद्यपि स्वा
वच्छिन्नसमानाधिकरणानुमित्यव्यवहितपूर्ववर्त्तितानवच्छेदकधर्मविशिष्टत्वेन प्रतिबंधकत्वविवक्षयाप्युक्तसिषाधयिषोत्प
त्तिकालेनुमितेर्वारणं संभवतीति स्वोत्पत्तिक्षणावच्छिन्नतत्तत्सिद्धिव्यक्तित्वस्यैव तादृशपूर्ववर्त्तितानवच्छेदकतया तद्विशिष्टाया
सिद्धेः अनुमित्सापूर्वं सत्वात् तथापि यथाश्रुतमेव समाधित्सौकर्यादाह अनवरतेति । अनवरतम् अनुक्षणम् । परिस्पंदमानायेऽ
परिमिताः पवनादिपरमाणवस्तैः सार्द्धं यश्चेतनसंयोगसन्तानस्तदन्तर्गतसंयोगव्यक्तीनामनुक्षणमेव नाशादित्यर्थः । तथा च परा
मर्शपर्यन्तस्थायिन्यः परमाणुतत्तत्संयोगव्यक्तय एव तत्रानुमितिप्रतिबंधिका इति भावः । ननु तत्र कारणाभावप्रयुक्तः फलानुत्पा
दः कारणान्तरमेवाक्षिपेदित्यत आह करणांतरेति ननूक्तक्रमेण कारणतानिश्चये सति तादृशसंयोगोपरमः कल्पनीयः कारणता
निश्चय एव तत्प्राक्वर्त्तिनां न संभवत्यन्वयव्यभिचारसंदेहेन प्रतिबंधादत आह अन्वयेति । संदेहस्येति प्रकृताभिप्रायेण । विरोधित्वा
दिति ग्राह्याभावानवगाहित्वादिति भावः ननु यत्र पक्षः साध्यवान् साध्यव्याप्यवान् साध्यानुमित्यनंतरं चेष्टसाधनमित्याकारकानुमि
तेः पश्चात्साध्यानुमित्सा ततः साध्यानुमित्यनंतरं तत्रानुमित्साकालेनुत्पादेनान्वयव्यभिचारनिश्चयात्कारणान्तरमवश्यं कल्पनीयं

क्षणिकपदार्थानभ्युपगमादनुमितेः पूर्ववर्तिनां सर्वेषामेव समानाधिकरणप्रथमानुमित्यव्यवहितप्राक्क्षणवृत्तित्वेन तद्भिन्न
त्वाभावादित्यस्वरसादाह उपादीयं तामिति प्रतिबंधकतयेति शेषः तथा च प्रथमानुमित्युत्पत्तिक्षणसंबंधा एव अनुमित्यव्यवहि
तपूर्वक्षणवर्तिभिन्नत्वेनानुमितिप्रतिबंधका इति भावः तत्तदात्मसमवायसंबंधानामतिरिक्तत्वमते नेदं तनुसा हेत्यादाद्युक्तप्रकार
त्रयमपि स्वत्वगर्भत्वादननुगतमतस्तादृप्येण प्रतिबंधकतायां नेककारणपरिशेषापत्तिरत आह भवेति अत्र च तत्पुरुषीयानु
मित्यव्यवहितपूर्वक्षणत्वं स्वप्रागभाववन्निष्ठकालिकसंबन्धेन तादृशानुमित्याश्रयशब्दत्वं वाच्यमतो नानुगमाद्युक्तावकाशः न
चैतादृशशब्दस्यानुमितिक्षणेपि सत्वात् पुनरनुमित्यापत्तिः कार्यसहभावेनैव तस्य हेतुत्वात्तादृशशब्दविशिष्टत्वं वा वक्तव्यं वै
शिष्ट्यं च स्ववृत्तित्व स्ववृत्तिध्वंसप्रतियोगित्वोभयसंबंधेन ग्राह्यं शब्दस्य चतुःक्षणस्थायित्वमते तमपहाय सुखदुःखादीनां द्वि
क्षणस्थायिगुणतामन्यतमस्यैव निवेशनीयमित्यभिनवः यथाः पूर्वक्षणत्वादिनेत्यादिना तादृशपूर्वत्वानधिकरणक्षणाभावत्वादे
रुपग्रहः परामर्शादेः कारणत्वरक्षामनुसृत्याह तादृशेति अत्र तत्तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषीयानुमित्यव्यवहितपूर्वक्षणवृ
त्तित्वविशिष्टत्वेन हेतुतायां कालिकमेव व्यापकत्वं प्रविष्टमतः पुरुषान्तरे तत्पुरुषीयानुमितिर्नापादनीया विशिष्टत्वादिनेत्या
दिपदेन तादृशपूर्वत्वानधिकरणवृत्तित्वविशिष्टाभावत्वादेः परिग्रहः ननूक्तरूपेण कारणतायामिष्टापत्तौ को दोष इत्यत आह
तथा चेति उपमानादेरित्यादिना शब्दस्य परिग्रहः सर्वत्रेति उक्तक्रमेणेत्यादिः व्याप्त्याद्यप्रतिसंधानदशायामुत्पन्नयोरुपमिति
शाब्दयोः कारणबाधेनानुमितित्वासंभवादेव तत्कारणयोरुपमानशब्दयोः प्रमाणान्तरत्वमिष्यते प्रागुक्तरूपेणानुमितिहेतुत्वे
कारणबाधासंभवात्तयोरप्यनुमान एवान्तर्भावः ननु यत्रोपमित्यादिस्थले नानुमिनोमि किं तूपमिनोमीत्यादिरेवानुव्यवसायस्त

CC-0. In Public Domain. Digitization by eGangotri

त्रैवोपमित्यव्यवहितपूर्वक्षणस्यानुमित्यव्यवहितपूर्वत्वाभावात्कथं सर्वत्रोक्तानुमितिसामग्री अन्यथोपमित्यादिकं प्रत्युपमित्य
व्यवहितपूर्वक्षणत्वादिनाहेतुत्वकल्पनात्सर्वत्रैवोपमितिसामग्रीसंभवादनुमानस्य प्रमाणान्तरत्वं भग्नमित्येवकिंतु रोचयेदि
त्यत आह विलीयेति चेतिपरामर्शत्वादिनेति व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेन व्याप्यवत्पक्षनिश्चयत्वेन वानुमितौ हे
तुत्वं न स्यादित्यर्थः प्रागुक्तसविषयकत्वादिनैव परामर्शस्य तथात्वनिर्वाहादिति भावः बाधत्वादिनेत्यादिपदेन सत्प्रतिपक्षोपसंग्र
हः प्रागुक्ताव्यवहितपूर्ववर्तिभिन्नत्वेनैव बाधादेः प्रतिबंधकत्वसंभवादिति भावः न च बाधादेर्विशिष्टबुद्धिसामान्यं प्रत्येव विरोधि
त्वादनुमितित्वावच्छिन्नं प्रति बाधत्वादिना प्रतिबंधकत्वं प्रसक्तमेव नेति वाच्यं सति बाधे विशिष्टबोधेच्छायां साक्षात्कारिण्य इवा
नुमित्यादिरूपाया अपि विशिष्टबुद्धेरुत्पत्तिभिया नुमितित्वावच्छिन्नं प्रत्येव बाधत्वादिना पृथक् विरोधित्वस्यावश्यकत्वादिति भा
वः कार्यान्तरेषु शाब्दबोधदाहादिषु अतथात्वमकारणत्वमप्रतिबंधकत्वं च प्रसज्य इत्यन्वयः एवं तथात्वमित्यत्रापि तथा च शाब्द
बोधत्वावच्छिन्नं प्रति स्वसमानाधिकरणशाब्दाव्यवहितप्राक्क्षणोत्पन्नविषयकत्वेन हेतुत्वे विनश्यदवस्थस्य पदार्थोपस्थि
त्यादेः शाब्दधीहेतुत्वं न स्यात् प्रत्युत शाब्दधीप्राक्क्षणोत्पन्नसंस्कारादेरपि तत्र हेतुता स्यात् एवं स्वसमानाधिकरणदाहाव्यव
हितप्राक्क्षणवृत्तिभिन्नत्वेनैव मण्यौषधादेर्दाहप्रतिबंधकत्वे कदाचिदुपहितदाहानां मण्यादीनां दाहप्रतिबंधकत्वं न स्यात् प्र
त्युत नादृष्टेर्णोदासीनस्यापि घटादेर्दाहविरोधित्वं स्यादित्यर्थः अत एव कार्याव्यवहितपूर्वत्वादेः कारणतानवच्छेदकत्वादेव
द्वितीयइतिताहशानुमित्यव्यवहितपूर्ववर्तिसिद्धिभिन्नसिद्ध्यभावमात्रं पक्षतेति ग्रंथोक्तकल्प इत्यर्थः द्वितीयप्रकारे दोषान्तरमप्याह
वैयर्थ्याच्चेति स्वसमानाधिकरणतत्तदनुमित्यव्यवहितपूर्ववर्तित्वविशिष्टप्रतियोगिकभेदकूटस्य प्रवेशे गौरवात् स्वप्रागभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वह्निष्ठस्वसामानाधिकरण्यसंबन्धेन प्रकृतसाध्यकानुमितिविशिष्टत्वं लक्षणमेवं तादृशानुमित्यव्यवहितपूर्ववर्त्तित्वं द्वितीय
प्रकारे लाघवान्निवेश्यं तथा च तदवच्छिन्नभिन्नसिद्ध्यभावस्यैवं सम्यक्त्वेन प्रथमं सिद्धिपदं विफलमखंडाभावघटकत्वेपि ता पक्षे।
दृश्येण हेतुतायां गौरवादिति भावः पक्षपानिमतं दर्शयति सिषाधयिषा इत्यादि केवलपरामर्शसत्वेप्यनुमितिर्नस्यात् तस्यैवा
नुमित्याविरहविशिष्टसाधकमानस्य सत्वाद् ततोऽनुमानातिरिक्तपदम् अत्र प्रत्यक्षमानमेव निवेशयितुं युक्तं नत्वनुमितिभिन्न
सिद्धिजनकमानं समानविषये शाब्दादिसामग्रीसंभवेऽनुमितेरेवोत्पादात् तत एवैकपदार्थस्यापरपदार्थसंसर्गव्याप्यधर्मवत्त्वस्य २५
योग्यतात्वे संसर्गस्यानुमितिरेवस्यात् न तु शाब्दधीरिति योग्यताग्रंथे मणिकारैरप्युक्तमिति वदंति अन्यतरस्येति इत्थं च साधकं
सिद्धिमानं च सिद्ध्यात्मकमिति जनकप्रमाणमित्युभयमेव मूलस्य साधकमानशब्दस्यार्थ इति भावः उपहितमिति नया सिद्ध्या उ
पहितं विशिष्टं पक्षतावच्छेदकसामानाधिकरण्येन सिद्धिविशिष्टसत्तादृशसिद्धिजनकमिति यावत् तत्सामग्री अनुमित्यन्यसि
पक्षता/ द्धेः सामग्री चक्षुरादित्यादिना यज्ञादेरुपग्रहः ननु सिद्ध्यनुपधानदशायां सिद्धिजनकस्य प्रत्यक्षसामग्र्यादेः पृथगेवानुमितिवि
रोधित्वं वाच्यं स्वजन्यैकसिद्ध्युपहितप्रत्यक्षसामग्र्यां सिद्ध्यन्तरजननदशायामनुमितेर्वारणार्थमेव निरुक्तसाधकमानस्य पक्षत
यां प्रवेश्यत्वाद् तत्राह अनुमानेति वैयर्थ्यमिति साधकमानस्य परामर्शादेरनुमितेः पूर्वं तद्वैशिष्ट्याभावादेवं विरोधित्वासंभवादि
ति भावः। अनुमितिभिन्नसिद्धिप्राक्क्षणावच्छिन्नत्वमेव तादृशसिद्ध्युपहितत्वमित्युक्तौ नातिप्रसंगः न वा वैयर्थ्यमिति ध्येयम् अ
क्रि। नुमितिसामग्र्यभाववत्त्वेनेत्यादि अन्यथा वह्न्यादेः सन्निकर्षदशायामनुमित्सायामप्यनुमितिर्नस्यादिति भावः। प्रत्यक्षसामग्र्यभाव
त्वेनेति अन्यथा समानविषये सत्यामपि प्रत्यक्षसामग्र्यामनुमित्युत्पादप्रसंगादिति भावः अन्योन्याश्रयादिति अनुमितिसामग्र्य

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा.प्र. भावत्वेन प्रत्यक्षहेतुताग्रहोत्तरमेव प्रत्यक्षसामग्रीमवगत्य तदभावत्वेनानुमितिहेतुत्वं ग्राह्यमनुमितिसामग्रीज्ञानं चानुमिति
२६ प्रतिप्रत्यक्षसामग्र्यभावत्वेन हेतुताग्रहं विनानेत्यन्योन्याश्रयापादकरूपेण कार्यकारणभावग्रहासंभवादित्यर्थः अथानुमिति
सामग्र्यभावातिरिक्तं प्रत्यक्षहेतुस्तोममेव प्रत्यक्षसामग्रीपदेनोपादाय सिद्धितदन्यतरत्वावच्छिन्नाभावस्य पक्षताविधयानु
मितिहेतुत्वमतो नान्योन्याश्रय इत्यत आह स्याणुत्वेति आरोपक्षणेति अनुमितिमात्रस्यैवानुत्पत्तिभियासिद्धिप्रत्यक्षसामग्र्य
न्यतराभावस्यैव कार्यसहवर्तित्वे न हेतुत्वासंभवादिति भावः प्रतियोग्यारोपातिरिक्तस्य प्रत्यक्षकारणस्तोमस्यैव प्रत्यक्षसामग्रीपदे
नाभिधानात्प्रतियोग्यारोपस्याभावप्रत्यक्षं प्रतिहेतुत्वे मानाभावाच्चेदं न युक्तमित्यस्वरसेन कश्चिदित्युक्तं स्वयं दूषणमाह वस्तुत
स्त्विति ननु स्यात्तं श्रमन्यथासिद्धत्वं तच्च प्रत्येकाभावस्यान्वयव्यतिरेकयोर्विवादग्रस्तमत आह नियमेति अन्यतरत्वेन प्रति
योगिज्ञानात्पूर्वं प्रत्येकप्रतियोगिज्ञानध्रौव्येन प्रत्येकाभावस्यैव प्रथमं पस्थितत्वादित्यर्थः। ननु प्रत्येकाभावाग्रहेपि शाब्दादिना
न्यतरत्वावच्छिन्नाभावस्य ग्रहसंभवान्नेदं युक्तमत आह लाघवादिति प्रत्येकाभावत्वेन हेतुतावच्छेदकलाघवादित्यर्थः प्रत्ये
कमनुमित्साविरहविशिष्टसिद्ध्यभावत्वेन तथाविधप्रत्यक्षसामग्र्यभावत्वेन च तत्तथात्वं अनुमितिहेतुत्वमित्यर्थः ननु प्रत्येका
भावत्वेन हेतुद्वयमपेक्ष्यान्यतराभावत्वेन गुरुणाप्येकमेव हेतुत्वं कल्पनार्हमत आह अन्यथेति। अत्र पक्षतायां बाधादेरित्या
दिना सत्प्रतिपक्षसंग्रहः तथा चानुमित्साविशिष्टसिद्धेस्तथाविधप्रत्यक्षसामग्र्या बाधसत्प्रतिपक्षादेश्चान्यतमत्वावच्छिन्नाभाव
त्वेनैवानुमितिहेतुतास्याद्बाधाद्यभावस्य पृथक्कारणत्वे गौरवादित्यर्थः न च विशिष्टबुद्धिसामान्यं प्रत्येव बाधसत्प्रतिपक्षयोर्विरो रामः
धित्वात् पक्षताकुक्षौ तन्निवेशानौचित्यमिति वाच्यं सति बाधादिनिर्णये बुभुत्सादशायां विशिष्टप्रत्यक्षवत्तादृशानुमित्यादिप्रसं २६

गेन विशिष्टत्वानुमितित्वावच्छिन्नं प्रत्यपि बाधादेर्विरोधित्वस्यावश्यकत्वात् वस्तुतोऽत्रान्तर्भावप्रसंगादिति निग्रंथस्यान्यतरत्वेन
प्रतिबंधकतायामन्तर्भावप्रसंगादित्यर्थः तथा च विशिष्टबुद्धिसामान्ये विशिष्टानुमितित्वाद्यवच्छिन्ने वा बाधसत्प्रतिपक्षान्य
तरत्वावच्छिन्नाभावत्वेन हेतुताप्रसंग एव ग्रंथतात्पर्यमन्यथा तद्विधेयकानुमितित्वावच्छिन्नं प्रत्येव सिद्धिप्रत्यक्षसामग्र्योस्त
त्प्रकारकानुमितित्वावच्छिन्नं प्रत्येव बाधसत्प्रतिपक्षयोर्विरोधित्वात्तावदन्यतमत्वावच्छिन्नाभावत्वेन पक्षतायामनुगतानु
मितिहेतुत्वासंभवादिति ध्येयम् यद्वा बाधस्य धीविशिष्टधीसामान्यविरोधितया साध्यविधेयकानुमितिं प्रति पक्षतायां हेतुता
यामन्तर्भावे विपरीतगौरवमाशंक्यैवं दीधितिकृता बाधादेरित्यत्रादिपदमुपात्तं तेन तत्तल्लिंगकपरामर्शाभावकालीनतत्तल्लिं
गकानुमित्याव्यक्तीनां परामर्शधर्मिकतत्तद्प्रामाण्यव्यक्तीनां चोपग्रहः पक्षधर्मिकसाध्यविधेयकानुमितित्वावच्छिन्नं प्रत्येव
सिद्धिप्रत्यक्षसामग्र्यौ निरुक्ततल्लिंगकानुमित्यापरामर्शधर्मिकतत्तद्प्रामाण्यव्यक्तीनामन्यतमाभावत्वेनाप्यनुमितेकरूपेण प
क्षतायाः कारणत्वं स्यादिति फलितार्थः अथवा नानुसिद्धिप्रत्यक्षसामग्र्योरन्यतरत्वावच्छिन्नाभावस्याखंडस्य तद्व्यक्तित्वेनैव सा
ध्यविधेयकानुमितिहेतुत्वं वाच्यमतः प्रत्येकाभावत्वेन हेतुतायां न लाघवावकाश इत्यत आह अन्यथेति। यद्यखं
डाभावस्य तद्व्यक्तित्वेन साध्यविधेयकानुमितित्वावच्छिन्नं प्रति हेतुत्वे बाधकाभावात्प्रतियोग्यविशेषितरूपेणाभावस्य हेतुता
मन्यथासिद्धान्तस्य परित्यागस्तु सिद्धिप्रत्यक्षसामग्र्योरन्यतरत्वावच्छिन्नाभावस्याखंडस्यापि हेतुतायां समान इत्यपि मा दृष्यामपरः
पंथाः अथाभावद्वयस्य हेतुत्वेऽनुमित्साविरहस्य द्विर्निवेशाद्गौरवमन्यतराभावस्य हेतुतायां तु सिद्धिप्रत्यक्षसामग्र्यन्यतरत्वेनानु
मित्साविरहस्य सत्त्वे एव तस्य विशेषणाल्लाघवमित्याशंक्य निषेधति सिद्धिं चेति अन्यतराभावस्य हेतुत्वपक्षेप्यनुमित्साविरहो द्विर्नि

CC-0. In Public Domain. Digitization by eGangotri

जा॰प॰ २७

वेश इत्याह शाब्दसिद्धावित्यादिना शाब्दान्यसिद्धिदशायामशाब्दप्रकारिकेच्छैव नोत्पद्यत इत्यतः शाब्दसिद्धावित्युक्तं विरहस्ये
निष्ठस्य विशेषणतायाग्रेऽन्वयः अनुमित्याद्यादिति अनुषंगवशादनुमितेरनुत्पादादित्यर्थः प्रकारांतरेणासंभवात्त्वसिद्धिका
पा एव सिषाधयिषाया अनुमितिनिर्वाहकत्वादिति भावः अनुमितित्वादीत्यादिपदं प्रत्यक्षातिरिक्तज्ञानत्वादिप्रकारिकेच्छासं
ग्रहार्थं पृथगिति न च यद्यदिच्छासत्त्वे सिद्धिप्रत्यक्षसामग्र्योरन्यतरदशायामनुमितिः तत्तदिच्छाव्यक्त्यभावकूटविशिष्टस्य सि
द्धिप्रत्यक्षसामग्र्योरन्यतरस्याभावः पक्षता तथा च प्रत्यक्षसामग्रीकालीनाऽशाब्दज्ञानं जायतामितीच्छाव्यक्तेरुत्तेजककोटाव
प्रवेशादेव तदानीमनुमित्युत्पादासंभवादनुमित्सायाः सकृदेव विशेषणत्वसंभवतीति वाच्यं सिद्धिप्रत्यक्षसामग्र्यन्यतरस्थली
यतत्तदिच्छाव्यक्तीनामभावसमुदायैकस्यैकत्रनिवेशे तेषां विशेषणविशेष्यभावे विनिगमनाविरहेण महागौरवात्तदपेक्ष
यासिद्धिस्थलीयतत्तदिच्छाविरहविशिष्टसिद्ध्यभाववत्त्वेन प्रत्यक्षसामग्रीस्थलीयतत्तदिच्छाविरहविशिष्टप्रत्यक्षसामग्र्यभा
ववत्त्वेनैव हेतुत्वस्यौचित्यादिति भावः स्वनिवर्तकेनि स्वनिवर्तकं यत्प्रत्यक्षादि तत्सामग्रीसमवहितत्वान्नोत्तेजकत्वमिति स्वनि
वर्तकानुमितिसामग्रीसमवहिताया अनुमित्साया उत्तेजकत्वरक्षार्थं प्रत्यक्षादीत्युक्तं तेन च शाब्दोपमित्यादेः संग्रहः अन्यतला
दिनेत्यादिपदेन सिद्धिप्रत्यक्षसामग्र्यन्यतरदशायां यद्यदिच्छाव्यक्तिसत्त्वे चानुमितिस्तावदन्यतमत्वरूपस्येच्छानुगमकधर्मस्यो
पग्रहः ननु प्रत्येकाभावयोः कारणताद्वयमपेक्ष्यातिगुरुणाप्युक्तान्यतराभावत्वेनैव कारणत्वमुक्तं बाधसत्प्रतिपक्षान्यतराभावत्वे
नैव हेतुतास्वीकारेऽपि क्षतिविरहादत आह अन्यतरत्वघटकयोरिति सिद्धिभेदविशिष्टं यत्प्रत्यक्षसामग्रीभिन्नं तदन्यत्वं प्रत्यक्ष रामः
सामग्रीभेदविशिष्टं यत्सिद्धिभिन्नं तदन्यत्वं वा सिद्धिप्रत्यक्षसामग्र्यन्यतरत्वमित्यत्र विनिगमकाभावस्तथा चानुमित्साविरहवि २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्टतादृशप्रत्येकावच्छिन्नाभावत्वेन हेतुतावच्छेदकभेदेन कारणताद्वयं युक्तमिति भावः ननु प्रतियोगिविनैव सिद्धिप्रत्यक्ष
सामग्र्यन्यतरत्वरूपाखंडभेदव्यक्तिः पक्षतायां निविष्टा तत्र च विशेषणविशेष्यभावव्यत्यासे शंकापि नास्ति न च प्रतियोगिविनाकृ
ताखंडभेदव्यक्तिमुपादाय पक्षतानिर्वचने प्रतियोग्यविशेषितेनापि सिद्धिप्रत्यक्षसामग्रीगगनाद्यन्यतमत्वेन सिद्धिप्रत्यक्षसा
मग्र्यनुमितिपूर्ववृत्तिभिन्नतत्तज्ज्ञानादिघटितान्यतमत्वेन वा वच्छिन्नाभावा अनुमितौ हेतुत्वस्य सुस्थत्वाच्च परामर्शत्वादिना
प्यनुमितौ हेतुत्वं न स्यादित्युक्तप्रायमिति वाच्यं सिद्धिमात्राभावस्य पक्षतात्वेपि तादृशाभावानां हेतुताप्रसंगस्यान्यथासिद्ध्यानि
रसनीयत्वात् तन्मते गुरुधर्मावच्छिन्नाभावत्वेनैव मन्मतेपि गुरुधर्मावच्छिन्नप्रतियोगिताकस्याप्यखण्डाभावस्य तद्व्यक्तित्वेन हे
तुतावामन्यथासिद्धिसंभवादत आह आत्मनिष्ठेति भिन्नभिन्नेन स्वजनकादृष्टवत्त्वादिना कालिकारूपेण वेत्यर्थः कालिकादिप
रितसामग्र्याः प्रतिबंधकत्वे गौरवादाह तत्तदसाधारणेति चक्षुःसंयोगाद्यात्मिकायाः प्रत्यक्षसामग्र्या इत्यर्थः अभावः कारमिति ५८
प्राक्तनेनान्वयः ननु प्रत्यक्षासाधारणकारणसमवहितमनोयोगसिद्ध्यन्यतरयोः समवायासंबंधावच्छिन्नाभाव एव हेतुर्वाच्य
इत्यत आह मणिविशिष्टस्येति मनोयोगादेरित्यादिनात्तानाद्युपग्रहः अयोगादिति एकत्र जनकत्व प्रतिबंधकत्वयोर्विरोधादिति
भावः यद्यप्यात्ममनोयोगत्वेनानुमितिजनकस्यापि निरुक्तान्यतरत्वेन तत्प्रतिबंधकत्वेपि न क्षतिः एकरूपेणैव तयोर्विरोधात्म
णित्वापेक्षया गुरुत्वेनैव मणिविशिष्टवह्नित्वेन दाहप्रतिबंधकत्वाकल्पनात् तथापि विशिष्टाभावस्य विशेषणाद्यभावानतिरि
क्तत्वादखंडतद्व्यक्तित्वेन हेतुत्वासंभवादुक्तान्यतरत्वावच्छिन्नाभावत्वेन च हेतुत्वेऽन्यतरत्वांशे विशेषणविशेष्यभावव्यत्यासे
न गुरुतरकार्यकारणभावद्वयापत्तेः सिद्धिप्रत्यक्षसामग्र्योः प्रत्येकाभावत्वेनैव हेतुत्वमित्येवमूलं युक्तमिति ध्येयं तथा चेति प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰प॰ बंधकतावच्छेदकसंबंधानुगमे चेत्यर्थः तयोः सिद्धिप्रत्यक्षसामग्र्योः प्रतियोगितावच्छेदकसंबंधभेदादिनतदवच्छेदकताघ
२९ टकसंबंधभेदादप्यनुगतरूपेण संभवं दर्शयितुमाह एवमिति एकप्रहराद्यवच्छेदेनैकात्मनि सिषाधयिषाविशिष्टसिद्धेः सत्त्वे
प्यनुमित्सादशायां पक्षतासंपत्त्यर्थमेककालेति कालपदं पक्षपरमिति यद्यपि पूर्वक्षणाद्यवच्छेदेनैवानुमित्साविरहविशिष्टायाः सि
द्धेरनुमित्सादशायामपि सत्त्वात्तदानीं पक्षता न स्यात्तचानुमित्साविरहेणोपलक्षितायाः सिद्धेः सिषाधयिषादशायां सत्त्वेपि न तद्वि
रहवैशिष्ट्यावच्छिन्नसिद्धेः सत्त्वं तदानीं विशेषणाभावादिति वाच्यं तथा सत्येकक्षणावच्छेदेनैव स्यवैयर्थ्यापत्तेः तथापि सामयि
कात्यन्ताभावानां समवायावच्छिन्नमेवाधिकरणत्वं स्वरूपाख्यसम्बन्धो न त्वधिकरणत्वमात्रं तथा सति प्रतियोगिसत्त्वदशायामपि
तदधिकरणे तदभावापत्तेः तदीयसंबंधप्रयुक्तत्वात्तद्वत्त्वस्येत्याशयेनैकक्षणावच्छेदेनेत्युक्तं अत एव रूपवत्तानियामकसंबंधो
न शुद्धसमवायः वाय्वादेरपि रूपवत्तापत्तेः किंतु तत्तद्व्यक्तिनिरूपितसमवाय एवेति सिद्धांतः यदि चाभावस्य स्वयमेव स्वरूपसं
बंधः स च प्रतियोगिसत्त्वदशायामधिकरणे न वर्त्तते प्रतियोगिन एव विरोधित्वान्न वृत्तिमत्तद्वद्वृत्तेरव्याप्यवृत्तित्वात्तु समवायिक
त्वमभावस्य न समवायघटितस्वरूपसंबंधेन वृत्तिमत्त्वं परंतु समयविशेषावच्छेदेन स्वरूपसंबंधेन वृत्तित्वमत्वं गोत्वाद्यभावा
नां तु वृत्तिर्न समयावच्छिन्नाभावात् भावाभावयोरेकधर्मिणि सत्तायामेव विरोधभंजनार्थमवच्छेदकस्वीकारात् इदानीमश्वे गो
त्वं नास्तीत्यादिप्रतीतौ चाधिकरणत्वेनैव समयस्य भानादिति विभाव्यते, तदेकात्मवृत्तित्वलक्षणस्य वैशिष्ट्यस्य समवायित्वप्रद
र्शनार्थमेवैकक्षणावच्छेदेनेत्युक्तं न च वैशिष्ट्यापि तदन्तर्भावे ह्यस्य दुरुच्चरणाः अन्यादृशं स्वाश्रयनिष्ठादृष्टजन्यत्वादिरूपेण राम:
चानुमित्साविरहविशिष्टसिद्धेरनुमित्साविरहाविशिष्टप्रत्यक्षसामग्र्याश्चान्यतरत्वावच्छिन्नाभावत्वेन हेतुत्वे द्विविधस्य वैशिष्ट्य २९

मो९

स्य प्रवेशेऽपि नाननुगम इति वाच्यं प्राक्लक्षणावच्छेदेन सिषाधयिषाविरहविशिष्टायाः सिद्धेः प्रत्यक्षसामग्री वा तस्याः सिषाधयि
षाविरहविशिष्टतादृशायामपि निरुक्तान्यतरत्वेन प्रतिबंधकत्वात् उत्तरलक्षणेऽनुमित्यापत्तेः न च सिषाधयिषाविरहविशि
ष्टतादृशायां सिद्धेः सिषाधयिषाविरहविशिष्टान्यत्वमेव भेदस्याव्याप्यवृत्तित्वात् तथा च तदानीं निरुक्तान्यतरत्वावच्छिन्नाना
स्येवेति वाच्यं तथाप्युक्तान्यतराभावेन हेतुत्वे गुरुतरकार्यकारणभावद्वयापत्तिः तादवस्थ्यात् विशिष्टाभावस्याखण्डस्य प्र
माणाभावेन निरस्तत्वादिति भावः ननु यद्यनुमित्साविरहविशिष्टप्रत्यक्षादिसामग्र्यभावो विशिष्य गानुमितिहेतुस्तदा मूलस्य सा
धकमानपदेनापि सामग्रीविशेषण एवाभिधेये यत्तां पथ्याश्रुतानुरोधान्नतु साध्यवत्तानिश्चय इत्यत आह सामग्रीविशेषेति लाघ
वादिति अनुमानातिरिक्तसिद्धिसामग्रीमध्ये सिद्धेः प्रवेशलाघवादित्यर्थः तथा च प्रत्यक्षपदप्रवृत्तिनिमित्तनिर्वचनानुरोधादेव
साधकमानपदेन साध्यनिश्चयो व्याख्यात इति भावः प्रवृत्तिनिमित्तनिर्वचने मूलस्वरसमाह तदेवेति अन्यथानुमितिकरणमि
दमित्येव ब्रूयात्तावतापि यद्यपि इत्याद्युक्तशंकाया उदासंभवादिति भावः नन्वेवमपि लाघवाद्बाधनिश्चयाभाव एव पक्षपदप्रवृ
त्तिनिमित्तमस्त्वित्यत आह फलानुपहितेति स्वविषयसिद्ध्यनुपहित तदनुमित्साविरहविशिष्टेत्यर्थः विशिष्टबुद्धिसामान्यं प्रत्ये
व बुभुत्साविरहविशिष्टबाधनिश्चयाभावत्वेन हेतुत्वमतेऽपि लाघवमाविष्कर्तुमनुपहितान्तानुसरणं न निविशत इत्यस्य पक्षप
दशक्यतावच्छेदकतायामित्यादिः ननु सिद्ध्यभावस्य पक्षतात्वेऽपि सिद्धिदशायां पर्वतादौ पक्षव्यवहारो दुर्वारः समवायावच्छिन्न
सिद्ध्यभावस्य विशेषणतायाः पर्वते सत्त्वात् न च तदीयसिद्धिविशेष्यत्वाभाव एव तत्प्रतिपक्षव्यवहारनिमित्तं न स्यादनुमित्यहेतु
त्वात् अनुमितिहेतावेव पक्षतायाः प्रवृत्तिनिमित्तत्वात् पक्षतानुमितिहेतुरित्यादिव्यवहारादाह विशिष्टेति अनुमित्साविरह

आ॰प॰ विशिष्टेत्यर्थः परंपरासंबंधादिनितिनया च पदयपञ्पुंसि निरुक्तसिद्ध्यभावस्तत्कालावच्छेदेन तत्पुरुषीयस्वप्रतियोगिविशेष्य
२९ त्वाभावरूपपरंपरासंबंधेन निरुक्तसिद्ध्यभाववत्वं तत्कालावच्छेदेन तत्पुरुषं प्रति पक्षव्यवहारनिमित्तमिति भावः ननु सिषा
धयिषाविरहविशिष्टप्रत्यक्षादिसामग्र्यभावस्य पृथगपि हेतुत्वं दुर्घटं पुमन्तरावच्छेदेनानुमित्साविरहविशिष्टायाः प्रत्यक्षसा
मग्र्याः सत्त्वदशायामनुमित्सासत्त्वेऽनुमित्यपलापापत्तेः न चानुमित्साकालीनान्यत्वमेव सामग्रीविशेषणं तथा सति पुमन्तरेऽनु
मित्सादशायां नहि द्विपुरुषस्यापि पुंसः प्रत्यक्षसामग्रीसत्त्वेप्यनुमित्यापत्तिः अतः पुरुषविशेषान्तर्भावेण सामग्र्यभावहेतुत्वं निर्वक्ति
एकस्य त्वादिनाऽनतिरिक्तरहिणः अनुमित्साविरहिणः तत्पुरुषीयेत्यादि अत्र तत्पुरुषीयत्वं तत्पुरुषावच्छिन्नत्वं तदनुमित्साविरह
स्यैव विशेषणं तेन तत्पुरुषावच्छेदेनानुमित्साविरहकालीनोयस्तत्पुरुषीयप्रत्यक्षसामग्रीविशेषस्तद्विरहः पर्यवस्यति यथा
श्रुतेन तत्पुरुषीयत्वस्यानुमित्साविशेषणत्वे तत्पुरुषीयानुमित्सादशायामपि घटावच्छेदेन तदभावसत्त्वात्तदानींतनप्रत्यक्ष
सामग्र्या अपि तदीयानुमितिं प्रतिबंधकत्वापत्तेः पक्षतायामिवात्राप्यनुमित्साव्यक्तयो विशेष्य निवेश्याः तेन वस्तुतस्तत्स्यापि परा
मर्शदशायामनुमितित्वाप्रकारकेच्छासत्त्वेपि सन्निकृष्टस्य वन्ह्यादेर्नानुमितिर्न वा वन्हेरनुमित्साप्रत्यक्षेच्छयोः सत्त्वदशायामुभ
यसामग्रीसमवधानेऽनुमितिस्तत्रानुमित्साव्यक्तेरुत्तेजककोटावप्रवेशात्प्रत्यक्षबुभुत्साविरहविशिष्टायाएवानुमित्साया उत्तेज
कत्वादिष्टापत्तेः इत्यपि वदंति सिद्धिसामग्रीमात्रस्याप्रतिबंधकत्वादुक्तं विशेषेति तेन प्रत्यक्षात्मकसिद्धिसामग्रीलाभः यद्यपि सिद्ध्या
त्मकप्रत्यक्षस्यापि सामग्रीमात्रं न प्रतिबन्धकं प्रसिद्धसाध्यकस्थले सर्वत्रैव साध्यवत्त्वोपनीतभानसामग्रीसंभवात् नापि लौकि राम:
कप्रत्यक्षसामग्री तथा वंशे सर्पत्वव्याप्यवत्तानिश्चयदशायां मंडूकवशांजनादिबलात्सर्पत्वाद्यलौकिकप्रत्यक्षानुत्पत्तिप्रसं २९

CC-0. In Public Domain. Digitization by eGangotri

गात् तथा साक्षात्कारत्वनिरूपितसाध्यनिष्ठप्रकारताप्रत्यक्षसामग्रीप्रवेश्यतादृशी च प्रकारता लौकिकइव दोषविशेषेजन्ये
पि साध्यस्य प्रत्यक्षे वर्तते एव उभयत्रैव सत्त्वे साक्षात्कारोमीत्यनुभवादित्यन्यत्र विस्तृतं नचैवं साध्यस्य निर्विकल्पसामग्र्याः
प्रतिबंधकत्वं न स्यात् इष्टत्वात् तस्याः पृथक्प्रतिबंधकत्वोपगमेपि क्षत्यभावाच्च अनन्यगतिकतयेति नचैवं तत्प्रत्यक्षसा
ध्यकानुमितिप्रत्यनुमित्साविरहविशिष्टे तेन तद्धर्मिकसाक्षात्कारत्वनिरूपिततत्प्रकारताकत्वेनैव विरोधित्वं तथा च तदभा
वस्य कार्यसहभावेन हेतुत्वादेव न तद्वत्ताप्रत्यक्षोत्पत्तिकालेनादृशानुमित्यन्यथागतिरस्त्येवेति वाच्यं यत्र पर्वतत्वसामाना
धिकरण्येन वन्हिमत्ताप्रत्यक्षोत्पादः तत्रोत्तरकालं पर्वतत्वावच्छेदेनापि वन्ह्यनुमितेरनुत्पादप्रसंगात् नच पर्वतत्वावच्छेदे
न वन्ह्यादिसाक्षात्कारत्वेनैव विरोधित्वमिति वाच्यं तथा सति पर्वतत्वसमानाधिकरण्येन साध्यवत्ताप्रत्यक्षसामग्रीसत्त्वेप्य
नुमित्यापत्तेः वस्तुतो यत्रानुमित्सानंतरं साध्यतद्व्याप्यवत्त्वयोः प्रात्यक्षिकपक्षधर्मिकनिश्चयादनुमितिस्तत्र कार्योत्पत्तिका
ले अनुमित्साविरहविशिष्टसाध्यवत्ताप्रत्यक्षाभावस्यासत्त्वात् तत्कार्यसहभावेन तदभावस्य हेतुत्वं दुर्घटमेवेति ध्येयं अनुगत
त्वादिति मणिमंत्रौषधीनामुत्तेजकत्वस्याभावादिति भावः इहापि अनुमितिस्थलेपि दर्शितइति अनुमित्या प्रत्यक्षादि भिन्नं
ज्ञानं जायतामित्यादिनानाविधेच्छाया उत्तेजकत्वस्य प्रदर्शितत्वादिति भावः ननु यत्पक्षकयत्साध्यकानुमितिस्थले सिद्धिदशाया
मेकविधेवानुमित्सा न स्यात्तादृप्येण हेतुतायामनुगम एव सिद्धिदशायद्यनुमित्सासत्त्वेऽनुमितिस्तदनुमित्साविरहकूटत्वाव
च्छिन्नाभावत्वेनैवानुगतरूपेण वा सिद्ध्युत्तरानुमितिसामान्ये हेतुत्वं वाच्यमत आह सिद्ध्युत्तरेति सिद्धिसामान्याव्यवहितोत्तरत्वम
प्रसिद्धं न तत्सिद्ध्युत्तरानुमितित्वमनुगतं सिद्ध्युत्तरत्वमात्रं चातिप्रसक्तमिति भावः सिद्धिस्थितिकालीनामिति स्ववृत्तिप्रागभावप्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योगित्वकालिकोभयसम्बन्धेन सिद्धिविशिष्टामित्यर्थः प्रागभावासत्त्वमनेप्याह स्वेतरेति वृत्तिभेदप्रतियोगित्वकालिकोभय
संबंधेन सिद्धिविशिष्टामित्यर्थः तेन स्वत्वाननुगमेप्यदोषः विनापीति सिद्धिनाशकालोत्पन्नानुमितीनां सिद्धिस्थितिकालीन
त्वाभावेनानुमित्सायास्तत्राप्रयोजकत्वादिति भावः ननु नदानीमपि कस्यचित्सिद्धिसत्त्वेन सिद्धिनाशकालीनोत्पन्नानुमितेरपि
स्वेतरसिद्धिकालोत्पन्नकत्वमेवानुमित्सां विना तस्याः कथमुत्पादः स्यादत आह एकस्येति अनुमित्यादेति तदनुमितेरप्यन्य
दीयसिद्ध्युत्तरोत्पत्तिकत्वेनानुमित्साप्रयोज्यत्वादिति भावः अनंतेति तत्पुरुषीयस्वेतरसिद्धिकालीनतत्पुरुषीयानुमितिं प्रति तत्पु
रुषीयानुमित्साया इव तत्पुरुषानुमितिसामान्यं प्रत्यपि विनश्यदवस्थिततदीयतत्तत्सिद्ध्यभाववत्त्वरूपेण हेतुत्वस्यावश्यकत
याष्टत्थकपुरुषीयानुमितिस्थल एवानंतहेतुहेतुमद्भावप्रसंग इत्यर्थः तेन सिद्धिनाशेदशायामपि तस्यानुमित्युत्पादस्यानुद्धा
रान्न्यूनत्वमित्यपास्तं ननु सिद्ध्यव्यवहितोत्तरानुमितित्वावच्छिन्नं प्रत्येव सिषाधयिषायाः कारणत्वं वाच्यं तदव्यवहितोत्तरत्वं च
स्ववृत्तिप्रागभावप्रतियोगित्वसामानाधिकरण्योभयसंबंधेन सिद्धिविशिष्टायाः कृतेः सामानाधिकरण्यरूपं ग्राह्यमतो नोक्तदोषा
वकाश इत्यत आह अपि चेति सामान्यसामग्री नह्येति सिद्ध्यभावस्थलीयानुमितौ क्लृप्तहेतुताकपरामर्शव्याप्यात्मककारणस्तोमादित्य
र्थः ननु विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्वात् प्रकृते चानुमित्सापरामर्शमात्रादप्यनुमित्युदयात् तथा
चोक्तनियमाभावात्सिद्ध्यात्मकविशेषसामग्रीविरहात्कुतोऽनुमित्यापत्तिरत आह नहीति इहेति अनुमित्साघटितेत्यर्थः नास्तीति
विनानुमित्सां परामर्शमात्रादप्यनुमित्युदयात् तथा चोक्तनियमाभावात् सिद्ध्यभावस्येव सिद्धिस्थलेपि विशेषसामग्रीं विनैव सामा
न्यसामग्रीमात्रादनुमितिः स्यादेवेति भावः अन्यत्र सिद्ध्युत्तरानुमितावनुमित्साया इव तदुत्तरानुमितावपि सिद्धिसामान्याभावस्य हे

तुत्वं वा स्यं तथा च परामर्शादिसामान्यसामग्रीसत्त्वेपि सिद्धिदशायां निरुक्तविशेषसामग्रीविरहादेव नानुमितिरत आह नहीति
सिद्ध्यनुत्तरानुमितौ सिद्ध्यभावरूपसामग्र्यंतरकल्पनेनेत्यर्थः अतिगौरवमिति विशेषसामग्रीद्वयकल्पनामपेक्ष्यानुमितिनिसामा
न्य एकस्यैव विशिष्टसिद्ध्यभावस्य हेतुत्वे लाघवादिति भावः नच सिद्ध्युत्तरवर्तिततदनुमितिव्यक्तिष्वप्यवश्यं तत्तत्परामर्शादिव्य
क्तेर्विशिष्टहेतुत्वमुपेयं अन्यथा परामर्शादेः सामान्यकारणस्याविशिष्टत्वात्तत्रैकानुमित्युत्पत्तिदशायां भाव्यनुमित्यंतरापत्तेः
तथा च तत्तत्परामर्शाद्यात्मकविशेषसामग्रीविरहादेवासिद्धिदशायामनुमित्यापत्त्यसंभव इति वाच्यं यत्र क्रमेण सिद्धिपरा
मर्शौ सिद्धिनाशानुमितयस्तत्रत्या या एवानुमितिव्यक्तेः सिद्धिनाशोत्पाददशायामापादनीयत्वात्तत्तद्व्यक्तिहेतोः परामर्शस्य प्राग
पि सत्त्वात् नच तथाविधानुमितिव्यक्तिगत तत्सिद्धिनाशक्षणस्य तत्क्षणोत्पन्नज्ञानादेर्वा विशिष्य हेतुत्वकल्पनात्तदभावादेव न
तादृशानुमितिरिति वाच्यं क्षणादीनां विशिष्य हेतुतामन्यथासिद्धत्वात् अन्यथा सर्वत्रैव तत्तत्क्षणसंबंधानां विशिष्य हेतुतयैव सामं
जस्ये विशेषितः कारणांतरस्य क्वापि कल्पनं न स्यात् अनंततत्क्षणव्यक्तीनां तत्रोत्पन्नज्ञानादीनां वा विशेषितो हेतुत्वकल्पनामपेक्ष्य
विशिष्टसिद्ध्यभावस्यैकस्यैकस्यैवानुमितिसामान्यहेतुत्वकल्पनाया एव लाघवेनौचित्यादिति भावः नव्यास्तु तत्तदनुमित्साविर
हविशिष्टसिद्ध्यभावत्वेन हेतुतायां तत्तदनुमित्साविरहाणां विशेष्यविशेषणभावे न गुरुत्वादनंतत्वाच्च तदपेक्षया यादृशयादृशे
च्छासत्त्वे सिद्धिसत्त्वेऽनुमितिस्तादृशनादृशेच्छात्वेनासिद्ध्यनुत्तरानुमितिं प्रति तु सिद्धिसामान्याभावत्वेन कारणत्वकल्पनैव लघीय
सीति प्राहुस्तन्न्वियं सिद्धिस्थल इत्यर्थः सा अनुमितिः तत्कारणस्येत्यस्यानुमित्सात्मकेत्यादिः सासिद्ध्युत्तरत्वावच्छिन्नानुमितिः प्राग
त्यमतं निरस्यति कारणस्येत्यादिना नानुपक्षताविशिष्टस्य परामर्शत्वेन परामर्शविशिष्टपक्षतात्वेऽपि विनिगमकाभावेन हेतुत्वा

२ शङ्कते इहेति।

CC-0. In Public Domain. Digitization by eGangotri

दुर्वनत्वाद १४

जा.प. यत्नाद्द्वयोरेव लाघवात्स्वातंत्र्येण हेतुत्वमत उक्तं कारणेति तथा चानुमितिकारणस्य व्याप्तिधियः सव्यापारत्वनियमाद्व्यापारविध
३१ येव परामर्शस्य हेतुत्वमावश्यकं पक्षतायास्तु व्यापारत्वासंभवात्तदनुरोधेनापि न हेतुत्वमित्येव स्फुटं विनिगमकमिति भावः न च स्व
मते मनस एवानुमितिकारणत्वात्तत्संयोग एव जन्यमात्रे व्यापार इत्यनुमितौ पक्षताविशिष्टपरामर्शस्येव परामर्शविशिष्टनिरुक्त
सिद्ध्यभावेन पक्षताया अपि हेतुतायां विनिगमकाभाव एवेति वाच्यं परामर्शविशिष्टपक्षताया हेतुत्वस्य तत्र हि परामर्शो न सिद्धि
विशेषणं तथा सति परामर्शविशिष्टायां निरुक्तसिद्ध्यभावत्वेन हेतुत्वे परामर्शशून्यस्यापि पुंसोऽनुमित्यापत्तेः तस्यापि परामर्शवि
शिष्टसिद्धेरभावत्वात् न च परामर्शविशिष्टो यो निरुक्तसिद्ध्यभावस्तत्त्वेन हेतुत्वं मिथो वैशिष्ट्यापन्नयोः सिद्धिपरामर्शयोरभावांशे
विशेषणीभूयावच्छेदकत्वाभावाद्व्यासज्यवृत्त्यवच्छेदकत्वानंगीकारात् अन्यथा निरुक्तसिद्ध्यभावत्वपरामर्शयोरेव व्यासज्य
वृत्त्यवच्छेदकत्वेन सामंजस्ये तयोर्विशेष्यविशेषणभावे विनिगमनाविरहोऽज्ञावतस्यान्मत्तप्रलपितत्वापत्तेः पक्षताविशिष्टपरा
मर्शस्य तु वैशिष्ट्यापन्नस्यैवावच्छेदकेन पाताभ्यणादेतत्तायां बाधकाभावादिति ध्येयं प्रतिबंधकांतरबाधनिरस्य यादिननुकार
णतावच्छेदकविशिष्टसत्वस्यैव कार्योत्पत्तिनियामकत्वात् तत्रैवान्वयव्यतिरेकावुपेक्षणीयावत आह अन्यथेति अन्वयादिसत्वे
प्यहेतुत्वे इत्यर्थः ध्वंसाकारणत्वाप्रसिद्ध्या तन्निमित्तकारणस्य तदवच्छेदकत्वासंभवादाह यथासंभवमिति समवायिकारणादित्या
दिनाऽसमवायिकारणत्वस्योपग्रहः तथा च घटादिकार्यस्य प्रतिनियतदेशत्वरक्षायै तत्तत्कपालद्वयसंयोगादेर्घटहेतुत्वमावश्य
कमिति तत्रैव दंडत्वादिकमवच्छेदकं स्यादित्यर्थः कारणत्वे बाधकसत्वात्कारणतावच्छेदकैव पक्षतेत्यभिप्रायेण साध्यसंदेहः सिषा रामः
धयिषैव वा पक्षतेत्याशयेनाशंकते अथेति कार्यकालवृत्तेरेवेति अन्यथा पूर्वकालेमण्यभावसत्वान्मण्युत्पत्तिकालेपिदाहापत्तिरिति ३१

दिकार्यस्य समवायि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावः यद्यपि कार्यसहवर्त्तित्वस्य कारणतावच्छेदकत्वेन तदवच्छिन्नस्य चेत्प्रतिबंधकाभावस्य पूर्वसत्त्वमपेक्षितं तदा सत्यपि म
ण्यभावे दाहादिकार्यं न स्यात् पूर्वकाले दाहाद्युपेहितस्य तस्याभावात् कार्यसहवर्त्तित्वोपलक्षितस्य पूर्वसत्त्वापेक्षणे मण्याद्युत्प
त्तिदशायामपि दाहादिकार्यप्रसंगः कदाचिद्दाहादिदाहादिसहवर्त्तित्व एवमण्याद्यभावस्य मण्याद्युत्पूर्वसत्त्वात् कार्यसहवर्त्तित्व
स्य नैव कारणतावच्छेदकत्वं मण्याद्यभावत्वेनैव हेतुत्वात् प्रतिबंधकाद्यभावविशेषितस्य तु नत्वव्यवहितोत्तरक्षणत्वासंबंधेनैव
सामग्र्याः कार्योत्पत्तिव्याप्यत्वान्न प्रतिबंधकोत्पत्तिकार्योत्पत्तिप्रसंगः समवायिकारणेऽन्यमेव कार्यसहभावेन हेतुत्वविवेचनी
यमिति दिक् तत्तद्देशीयतत्तद्दाहादिकं प्रति तत्तद्दाहाद्युत्पत्तिकालावच्छेदेन तत्तद्देशवर्त्तिमण्याद्यभावत्वेन हेतुत्वे कारणतावच्छे
दकस्य पूर्वसत्त्वानपेक्षणाच्च तत्तद्दाहोत्पत्तेरसत्त्वेपि न क्षतिरित्यनयैव दिशा समवायादिकारणस्यापि हेतुत्वं निरूपणीयमिति भा
वः न तत्संभवादिति निरुक्तसिद्ध्यभावस्यासंभवादित्यर्थः सा अनुमितिः तथात्वेन कार्यकालवृत्त्वेन प्राचां मते नेदं स्वमते तु मण्युत्प
त्तिदशायां मणिसामग्र्याः प्रतिबंधकत्वादेव न दाहः संयोगेन मण्यभावस्य मण्युत्पत्तिदशायामपि सत्त्वात्तस्य कार्यसहभावेन हेतुत्वोप
गमेप्यप्रतीकारादिति ध्येयं न सर्वस्येति तथात्वेन हेतुत्वमित्यन्वयः ननु प्रतिबंधकाभावस्य तादृप्येण हेतुताव्याप्यत्वाद्गौरवं प्रामाणि
कमत आह अन्यथेति सहभूतस्येति अन्यथा घटादेर्नाशोत्पत्तिदशायामन्यदीयकर्मणा तत्र संयोगाद्युत्पत्तौ क्षणिककार्यस्यैका
रापत्तिरिति भावः तथात्वप्रसक्तौ कार्यसहभावे हेतुत्वप्रसक्तौ विजयन्निति प्राभाकरैः कारणमात्रस्यैव कार्यसहभावेन हेतुत्वास्वी
कारात् अन्यथा कालसत्तोपि प्रतियोगिनः पूर्ववर्त्तिमात्रेणैव हेतुत्वसंभवात्तेषामप्यतिरिक्तध्वंसकल्पनापत्तेरिति भावः एक
परामर्शादनुमितिद्वयोत्पादेपि प्रवाहादाहक्वचिदिति तथा च यत्र पूर्वं पूर्वानुमितिदशायां परामर्शान्तरस्य सामग्रीसंभवस्तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कांतभेदेति ॥ ननु यत्र विषये क्रमेणानुमितिप्रवाहो नानुभवसिद्ध तत्र साध्यवत्तानुमितावेव पक्षता हेतुरस्त्वित्यत आह आनुभविकत्वादिति ॥ ननु सिद्धेरनुमित्य-
विरोधित्वे यथार्थानुमानस्यापि वद्दूषणं न स्यानुमानादोषत्वादत आह यथार्थेति ॥ २

ज्ञा॰प॰ ३२

विपरामर्शानुमित्योः प्रवाहासंभवइतिभावः अनुभविकत्वादितिपक्षतानुमितिहेतुरित्यग्रेन्वयः ननूक्तस्यलेक्रमिकोनानुमि
तिप्रवाहः किंत्वेकानुमितिनाशोत्तरमपरानुमित्युत्पत्त्यैवसइत्यत आह वार्थेति अर्थांतरेतितथाचनिश्चितेवस्तुनिजिज्ञासाविरहा
दनाकांक्षितानभिधानेनपुरुषदोषतयैवतेज्ञ्जावनं नतुप्रमाणदोषतयेतिभावः अत्रेदमालोचनीयंसमानविषयकप्रत्यक्षसामग्री
दशायामनुमित्यनुत्पादाद्भ्रांत्यादिप्रत्यक्षजनकतत्तदसाधारणकारणव्यक्तीनामेववन्ह्याद्यनुमितिविरोधित्वंवाच्यंकालादिसा
धारणसामग्र्यास्तथात्वेगौरवात् तथाचवन्हिचक्षुःसंयोगादिव्यक्तीनामिवंवन्ह्याद्यात्मविशेषणाद्यवगाहिवह्निमत्ताप्रत्यक्षहेतू
नांपर्वतोवह्निमानित्यादिसिद्धिव्यक्तीनामपितादृशानुमितिविरोधित्वमावश्यकंविनिगमकाभावात् एवंचतत्रैवपर्वतोवन्हिमा
नित्याकारकनिश्चयत्वेनैवानुगतरूपेणतत्तत्सिद्धिव्यक्तीनांतादृशानुमितिविरोधित्वंकल्प्यतेलाघवात् ननुतत्तत्सिद्धिव्यक्तित्वेन
गौरवात्दवश्यंपक्षतानुमितिहेतुः नचैवमतिलाघवेनसाध्यनिश्चयत्वमपेक्ष्यसाध्यवत्ताज्ञानत्वेनविरोधित्वमस्तुपक्षेसाध्यसंदेहो
त्तरंतत्रसाध्यवत्तानुमितोनुभविकतयानिश्चयत्वप्रवेशस्यप्रामाणिकत्वेनुसिद्धित्वेप्रत्यक्षसामग्रीदशायामनुमित्यनुत्पत्तेरनु
भवसिद्धतयाप्रत्यक्षसामग्र्यंतरेतत्तत्सिद्धिव्यक्तित्वेनैवगुर्वपिप्रतिबंधकत्वंप्रामाणिकमितिवाच्यं साध्यवत्तापक्षज्ञानत्वेनसंशय
साधारणधर्मत्वेनप्रतिबंधकत्वेभ्रमत्वनिश्चयत्वस्योत्तेजकत्वापत्तितिगौरवात्तदपेक्ष्यभ्रमत्वज्ञानानास्कंदितसाध्यवत्तानिश्चयत्वे
नप्रतिबंधकतायामेवविपरीतलाघवात् किंचसिद्धिकालीनेष्टसाध्यव्याप्यवत्तापरामर्शेसहकृतव्याप्यवत्ताद्यंशेभ्रमत्वादिज्ञानद
शायांनसाध्यानुमितिस्तत्रनादृशानुमितिंप्रतिविशेषतस्तत्तद्भ्रमत्वज्ञानत्वेनानंतप्रतिबंधकत्वंगौरवात् पक्षधर्मिकसाध्यवत्ता
निश्चयत्वेनैवानुगतरूपेणतत्तत्सिद्धिव्यक्तीनांविरोधित्वकल्प्यतेलाघवात् भ्रमत्वज्ञानानामनुगतरूपेणविरोधित्वसंभवस्यवह्

रामः ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोन्यत्र प्रतिपादितत्वात् एवं च सत्यामनुमित्सायां सिद्धिसत्त्वेप्यनुमित्युत्पादस्य परेषामप्यानुभाविकत्वादनुमित्सायास्तत्रोत्ते
जकत्वमपीत्यवश्यं पक्षतानुमितिहेतुः न च सिद्ध्यात्मकपरामर्शसहस्रमेव यत्र दंडो रक्त इत्यादिविशेषणतावच्छेदकप्रकारकं
रक्तत्वांशे भ्रमत्वज्ञानास्कंदितं तत्र तत्रोत्तरकालं रक्तत्वादिविशिष्टवैशिष्ट्यस्य प्रत्यक्षादेर्वारणार्थं तत्तद्भ्रमत्वज्ञानव्यक्तीनां तादृश
विशिष्टवैशिष्ट्यावगाहिज्ञानप्रतिबंधकत्वकल्पनायां तत्रापि गौरवमस्माकं तु सिद्धेरविरोधित्वात् तत्र वन्ह्यनुमितेर्वोत्पादेनान्यत्र
क्लृप्तेन भिन्नविषयकानुमितिसामग्र्याः प्रतिबंधकत्वेनैव तत्र रक्तत्वविशिष्टवैशिष्ट्यप्रत्यक्षमिति वाच्यं पक्षसाध्यकसिद्धिपरामर्शद
शायां न वस्त्वंतरेपि कदापि भ्रमत्वाद्यासंजननेन तत्रैवोक्तक्रमेण पक्षताया हेतुत्वव्यवस्थापनादित्याहुः यत्तु पक्षताया अनुमित्य
हेतुत्वे सिद्ध्यात्मकपरामर्शदशायां भिन्नविषयकप्रत्यक्षबुभुत्सासत्त्वेऽनुमितिनिवारणाय तत्तद्बुभुत्सायामनुविरोधित्वकल्पने गौ
रवं स्यादतः पक्षता हेतुरिति तन्न उक्तं पक्षतायाः कारणत्वे तत्तदनुमित्साविरहकूटविशिष्टसिद्धित्वेन प्रतिबंधकतायाः एवं तत्तदनु
मित्साविरहव्यक्तीनां विशेष्यविशेषणभावव्यत्यासेनानंतविरोधित्वकल्पनायां विपरीतगौरवात् अत एव पक्षताया अनुमित्यहे
तुत्वे कथितस्थले एवं भिन्नविषयकप्रत्यक्षादेरुत्पत्तये तत्तद्बुभुत्साविरहविशिष्टानुमितिसामग्रीत्वेनैव तादृशप्रत्यक्षादौ प्रति
बंधकत्वं कल्प्यमिति तत्र बुभुत्साव्यक्तीनामुत्तेजकत्वकल्पने गौरवं स्यादित्यपि प्रत्युक्तं भिन्नविषयकप्रत्यक्षादिकं तत्तद्बुभुत्सा
विरहविशिष्टपरामर्शत्वेन विरोधित्वमपेक्ष्य निरुक्तपक्षताविशिष्टपरामर्शत्वपर्यवसितेनानुमितिसामग्रीत्वेन विरोधित्वकल्प
नायामेव गौरवादित्यास्तां विस्तरः ॥ ॥ इति [illegible] पक्षता समाप्ता ॥ ॥ ॥ ॥ ॥ ॥ ॥

तु । यदा चे लिङ्गेऽनुमेयत्वावरोधिके पर्वते वह्निव्याप्यवानित्यनुमितेः साक्षात्कारे न स्यात् तस्मात् एव भिन्नविषयकानुमितिसामग्रीत्वेन प्रत्यक्षविरोधि [illegible]
[illegible] इति । यदपि [illegible] पर्वतो वह्निमान् वह्निव्याप्यवांश्चेत्याद्यनुमितौ [illegible] ।
इति पक्षताग्रन्थः [illegible] समाप्तः पक्षताग्रन्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰प॰
३३

जागदीशीपक्षता

दाऊजी अग्निहोत्री॰ सिद्धविनायकयन्त्रालय॰ महल्लाढुंढिराजगणेश
वनारस॰

पहिलीवार ३०० प्रोप्राईटर गणेशप्रसाद वाजपेयी सिद्धविनायकप्रेस वनारस ताः ३० जूलाई सन् १८९० राम:
३३

CC-0. In Public Domain. Digitization by eGangotri

४०३४

जागदीशीसिद्धान्तलक्षणं

॥श्रीकाशीविश्वनाथपुरीमेंढुंढिराजगणेशकेपासदाऊजीअग्निहोत्रीकेसिद्धविनायकयंत्र
मेंजागदीशीसिद्धान्तलक्षणंछापागया जिसैलेनाहोयउसैढुंढिराजगणेशकेपासदाऊजी
अग्निहोत्रीकेदुकानपरमिलैगा लि॰ रामदासछापनेवालावचनू संवत् १९४७ ॥ ॐ ।

पहिलीवार ३००　　प्रोप्राईटरगणेशप्रसादवाजपेयीसिद्धविनायकप्रेसबनारसता॰ २० जून सन् १८९०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰ म॰ श्रीगणेशाय नमः॥ अथ सिद्धान्तलक्षणशिरोमणिः॥ प्रतियोग्यसमानाधिकरणेति। प्रतियोग्यसमानाधिकरणयद्रूपविशिष्ट
१ समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यं तद्रूपवि
शिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरित्यर्थः दण्ड्यादौ साध्ये परस्परासम्बद्धदण्डत्वादिकमेव साध्यतावच्छेदकमतो न
व्याप्तिः इत्यत्र इदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ सत्त्वाद्यधिकरणगुणादिनिष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्रव्यत्वा
देः नाव्याप्तिः साधनस्य विशिष्टसत्त्वादेर्गुणादावृत्तेः सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्याधिकरणताव
च्छेदकस्य चैक्याद्व्याप्तेरैक्यं वस्तुतस्तु धूमत्वादिविशिष्टव्यापकवह्निसामानाधिकरण्यस्य रासभादिसाधारणत्वाद्धूमत्वादिमति।
तादृशसामानाधिकरण्यं तद्वृत्तिधूमत्वादिकं वा व्याप्तिः आद्याभिन्ना द्वितीया त्वभिन्नैवेति ध्येयम्। अयं कपिसंयोगी एतद्वृक्षत्वादि
त्यादिसंग्रहाय समानाधिकरणान्तम्। यत्तु इदं संयोगि द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत्तत्संयोगस्य शाखाद्यवच्छेदेन वृत्तेर्वृक्षत्वा
वच्छेदेन तत्सामान्याभाववृत्तावविरोधात् तत्र चातीन्द्रियस्य संयोगस्य सत्त्वात् परितः प्रतियोग्युपलब्धेर्दोषाद्वा वृक्षेन संयोग इत्यादिना
ध्वस्तमिति तन्न द्रव्ये संयोगसामान्याभावे मानाभावात् न च यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानिति व्याप्तेर्यावत्सं
योगाभाव एव मानं यत्तदर्थयोरननुगमात् एकावच्छेदेन यावद्विशेषाभाववत्त्वस्योपाधित्वाच्च एतेन अयं संयोगसामान्याभावाभाव
न् संयोग यावद्विशेषाभाववत्त्वादिति निरस्तं व्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेरुपाधित्वाच्च न च प्रतियोग्यनवच्छेद
कतयैव वृक्षत्वादेरभावावच्छेदकत्वं गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसंगात् यथा च घटपूर्ववर्तित्वस्य प्र रामः
तिदण्डं वह्निसामानाधिकरण्यस्य वा प्रतिधूमं भिन्नत्वेऽपि दण्डत्वं धूमत्वं वा तत्सामान्यस्यावच्छेदकं तथैव संयोगसामान्यस्यावच्छेदकं १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रव्यत्वादिक मित्यस्यापिसुवचत्वाच्चेतिसम्प्रदायविदः। नवीनास्तूत्पत्तिकालावच्छेदेनघटादौगुणस्यप्रलयावच्छेदेनगगना
दौसंयोगस्यसामान्याभावोवर्त्तते तथाधूमवत्यपि विरहोदहनस्यइहपर्व्वतेनितम्बेहुताशनोनशिखरेइतिप्रतीतेःसंयोगेन
द्रव्यस्याप्यव्याप्यवृत्तित्वात् वृत्तेरव्याप्यवृत्तित्वेवृत्तिमतोव्याप्यवृत्तित्वस्यात्यन्तमसम्भावितत्वाच्च एवंप्रतियोगिमतोरपि काल
देशयोर्देशकालभेदादवच्छेदेनतदभावः तथा चतत्तत्साध्यकाव्याप्तिवारणाय तन्नोपादेयञ्चसर्वथैवव्याप्यवृत्तिसाध्यकेसाध्य
साधनभेदेनव्याप्तिभेदादितिवदन्ति। प्रतियोग्यसामानाधिकरण्यञ्चप्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यं तेनन्न
यंगुणकर्मान्यत्वविशिष्टसत्तावान्जातेःमूर्त्तत्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादौनातिव्याप्तिः। नचोभयत्वमेकविशिष्टापरत्वंविशिष्ट
ञ्चकेवलादन्यदितितदभावोमनसिसहजतएवप्रतियोगिव्यधिकरणइतिवाच्यम् उभयत्वंहिनविशिष्टत्वादनतिरिक्तंनवातदव
च्छिन्नाभावस्तदवच्छिन्नाभावात् वैशिष्ट्यविरहे ऽपिघटत्वपटत्वयोरुभयत्वस्योभयत्वेनतदभावस्यचप्रत्यक्षसिद्धत्वात् नच
तत्रव्याप्तिरेवोभयत्वाधिकरणस्यमूर्त्तत्वस्यमनसिसत्त्वादितिवाच्यं तथात्वेऽप्युभयत्वेनरूपेणतत्रासत्त्वात् नात्रोभयमितिप्रतीतेर्दुर्वा
रत्वात्। अत्यन्तपदञ्चात्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरणस्य अत्यन्ताभावत्वनिरूपकप्रतियोगितायाश्चलाभाय
अन्यथासर्वस्यैवाभावस्यस्वसमानाधिकरणाभावान्तरभिन्नत्वात्तद्भेदस्यस्वस्वरूपानतिरिक्ततयाप्रतियोग्यसामानाधिकरण्यस्यै
वदुर्लभत्वापत्तेः सर्व्वेषामेवाभावानांहेतुसमानाधिकरणात्यन्ताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणाभावान्तरात्मकस्यस्व
भेदस्यप्रतियोगित्वादभावसाध्यकाव्याप्तेश्चेतिसम्प्रदायविदः। अथयदागोत्वंतदागौरित्यत्रातिव्याप्तिःप्रलयस्यगोध्वंसवत्वेनग
वात्यन्ताभावानधिकरणत्वात् संसर्गाभावमात्रोक्तावपियदास्पन्दस्तदाद्व्यणुकंयदाऽदृष्टंतदाजन्यज्ञानंदुःखंवायदातस्यादृष्टंत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानदीयं ज्ञानमित्यादावतिव्याप्तिः द्व्यणुकत्वादेर्द्व्यणुकादिशून्यखण्डप्रलयादिनिष्ठध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात्
नहि तयोः सामान्याभावत्ववादिमतेऽपि एकविशेषप्रागभावविशेषान्तरध्वंसवत्यपि समये सामान्यावच्छिन्नध्वंसप्रागभावयोः
संभव इति चेन्न प्रतियोगिमत इव ध्वंसादिमतोऽपि कालस्यात्यन्ताभाववत्वेऽविरोधात् अन्यथात्यन्ताभावस्य कालमात्रावृत्तित्व
प्रसंगात्। इयांस्तु विशेषो यदेकस्य देशभेदावच्छिन्नं तथात्वमपरस्य स्वरूपावच्छिन्नमिति देशे कालस्येव कालेऽपि देशस्यावच्छेद
कत्वात् तच्छून्ये च काले तदभावस्य प्रतियोगिव्यधिकरणत्वात्। न च संसर्गाभावविशेषोऽत्यन्ताभावः संसर्गाभावत्वञ्च संसर्गारोप
जन्यप्रतीतिविषयाभावत्वरूपं जन्यताघटकनियमघटितमिति वाच्यम् तद्वदन्यावृत्तित्वरूपनियमस्य तदघटकत्वात् एवं नि
यमान्तरस्यात्र प्रवेशेऽपि न क्षतिरित्याहुः। वक्ष्यते च नियमाघटितमेव संसर्गाभावादिलक्षणम् अनुपदमेव च विवेचयिष्यते
संसर्गाभावत्वप्रवेशप्रयोजनविरहोऽव्याप्तिश्च। अथ ज्ञानवान् द्रव्यत्वात् विशेषगुणवान् मनोऽन्यद्रव्यत्वात् जातिमान् भाव
त्वादित्यादौ समवायेन ज्ञानादेः साध्यतायामतिव्याप्तिः साध्यशून्यानामपि हेतुमत्तां विषयत्वविशेषणत्वैकार्थसमवायी साध्यव
त्वादिति चेन्नैवम् प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिनो यदधिकरणं सम्बन्धि वा न वृत्तित्वाभावस्योक्तत्वात् भवति चैवम
न्योन्याभावोऽपि प्रतियोग्यसमानाधिकरणः तद्विशिष्टस्य च हेत्वधिकरणावृत्तित्वं वाच्यं तेन नाव्याप्यवृत्तिसाध्यकासंग्रहः तद्वृत्तिभिन्न
त्वन्तु नार्थः अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिप्रसंगात्। अत्र सामानाधिकरण्यवत्तो न तदभाववत्त्वं प्रतीतेरन्यथैवोपपादितत्वा
दित्यस्वरसात् प्रतियोगिवैयधिकरण्येत्यादिविशेषणं वस्तुतस्तु हेत्वधिकरणे बोध्यं प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभा
वेति पुनरभावान्तार्थे निष्कर्षः। ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित्तत्सामान्यस्य प्रतियोगितावच्छेदकयत्किंचिदवच्छि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नस्य वा अनधिकरणमुक्तम् आद्ये अव्याप्यवृत्तिसाध्यकाव्याप्तिः एकप्रतियोग्यधिकरणस्यापि तद्व्यक्त्यन्तरानधिकरणत्वात् द्विती
येसंयोगसामान्याभाववान् वा सत्त्वादित्यादावतिव्याप्तिः साध्याभाववतो द्रव्यस्य तत्प्रतियोगिसंयोगविशेषाभाववत्त्वात् नित्यत्वादि
विशिष्टद्रव्यत्वाभावात्मकतत्प्रतियोगिनोऽधिकरणत्वात्तस्याभावात्मकस्य विशिष्टस्यापि द्रव्यत्वस्य द्रव्यत्वानतिरेकात् तृतीये कपिसं
योगाभाववान् आत्मत्वादित्यादावव्याप्तिः साध्याभावानां कपिसंयोगानां गुणानामधिकरणस्यात्मनस्तत्प्रतियोगितावच्छेदकगुणसामान्य
भावत्वावच्छिन्नानधिकरणत्वात् मैवम् यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतः तदनवच्छेदकत्वस्योक्तत्वात्। अ
त्र च ग्राह्यसामानाधिकरण्ये हेतोर्यादृशः संबन्धः प्रविष्टस्तेन सम्बन्धेन यो हेतुमान् तत्र वर्तमानत्वमभावस्य साध्यस्य च यादृशः सम्ब
न्धः प्रविष्टस्तत्सम्बन्धावच्छिन्नायाश्च प्रतियोगिताया अनवच्छेदकत्वं बोध्यं तेन धूमसमवायिनिष्ठाभावस्य संयोगावच्छिन्नप्रतियो
गिताया धूमसंयोगिनिष्ठाभावस्य च समवायावच्छिन्नप्रतियोगिताया अवच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः। यद्वा साध्यतावच्छेदकस
म्बन्धेन प्रतियोग्यसम्बन्धित्वं हेतुमतो वक्तव्यम्। तथा च सम्बन्धभेदेन प्रतियोगिता न विशेषणीया एवं स्थिते सामानाधिकरण्यादौ सम्ब
न्धित्वं निवेशनीयं न त्वधिकरणत्वं तथा च धर्मिणोऽपि व्याप्यत्वं व्यापकत्वञ्च निर्व्यूहति तथा हि तादात्म्येन सम्बन्धेन धूमवतः सम्ब
न्धिनि महानसे वर्तमानो योऽन्योन्याभावस्तस्य तादात्म्यसम्बन्धावच्छिन्नायाः प्रतियोगितानवच्छेदकं वह्निमत्त्वावच्छिन्नस्य व
ह्निमतस्तादात्म्येन संबन्धिनि महानसे धूमवतस्तादात्म्येन सम्बन्धित्वं एवं धर्मिणो धर्म्मव्याप्यत्वव्यापकत्वे बोध्ये अत एव जलादीनां पृ
थिवीत्वाभावव्याप्यत्वं तत्र तत्रोक्तं संगच्छते। यथा च यादृशेन सम्बन्धेन हेतोर्व्याप्यता गृहीता तादृशेन सम्बन्धेन तस्य पक्षविशिष्टत्व
ज्ञाने यादृशेन सम्बन्धेन च साध्यस्य व्यापकत्वमवगतं तादृशेनैव साध्यपक्षयोर्विशिष्टानुमितिः तेन न धूमावयवे संयोगेन न वा समवायेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शि·म· पर्व्वतेवन्हिधीः तथैवावगतव्यापकताघटकसम्बन्धेनव्यापकस्याभावग्रहे गृहेगृहीतव्याप्यताघटकसम्बन्धेनव्याप्यस्याभावःसिध्यती
३ तिकथमन्यथासमवायेनवन्हिविरहिणिमहानसेसंयोगेनसंयोगेनवावन्हिविरहिणिस्वावयवेधूमःसमवायेननिवर्ततेनिवर्त्तते चसंयो
गेनवन्हिविरहिणिस्वावयवेसंयोगेनेतिनियमउपपद्यते तथाचतादात्म्यसम्बन्धेनजलादीनांव्याप्यत्वग्रहाद्व्यापकनिवृत्त्यातादात्म्येनैव
तेषामभावःसिध्यतिसएवचान्योन्याभावः। इत्थमेवचतादात्म्याद्वृक्षशिंशपयोर्व्याप्तिनिश्चयइतिसंगच्छते अतएवगोत्वत्वाद्यग्रहदशायां
पत्रसास्नादिःसागौरितितादात्म्येनगोर्व्यापकत्वग्रहेसास्नादिना तादात्म्येनगोः तादात्म्येनगोर्व्यतिरेकाच्च सास्नादिव्यतिरेकःसिध्यतिए
वंचसंयोगेनगगनादेरपिद्रव्यत्वव्याप्यत्वंवृत्त्यनियामकसंयोगमात्रस्याभावप्रतियोगितावच्छेदकसम्बन्धरूपत्वेसाध्यतावच्छेदक
सम्बन्धेनप्रतियोग्यसम्बन्धित्वाभिधानेवापृथिवीत्वादिव्यापकत्वमपितदभाववतोऽपिपृथिव्यादेःसंयोगेनतत्सम्बन्धित्वात् सिद्धिरपितत्
स्यतथैवनतुवृत्तिनियामकसंबन्धेनतेनासम्बन्धित्वाद्व्यापकत्वाच्चव्यक्तीभविष्यतिचैतदुपरिष्टात्। नन्वष्टद्रव्यातिरिक्तद्रव्यात्मककाल
मात्रवृत्तिधर्मस्यविशेषणताविशेषणताव्याप्यवृत्तिकिमपिव्यापकंनस्यात् स्वावच्छेदकसम्बन्धेनप्रतियोगिनोऽसम्बन्धिनिकालेवर्त्तमान
स्याभावस्यप्रतियोगितायांतत्सम्बन्धावच्छिन्नत्वस्यतेनसम्बन्धेनयत्तुप्रतियोगिसम्बन्धितदन्यत्वस्यचकालेऽसंभवात्। नचतादृशस
म्बन्धेनहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यवृत्तिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिसामान्यकत्वमेववक्तव्यं तथाचवृत्तिगगनाद्यभा
वद्वारिकैवनतत्सिद्धिः सत्ताद्यधिकरणकर्म्मादौसमवायेनज्ञानसामान्यस्यसंयोगसामान्यस्यचावृत्तेर्नातिप्रसंगः भूतत्वमूर्त्तत्वोभयत्व
विशिष्टगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टसत्तादिकन्तुनमनोगुणादिवृत्तिसंयोगसामान्यन्तुनकिंचिद्द्रव्यावृत्तीतिवाच्यंविशिष्टस्या राम:
नतिरिक्तत्वात् समवायेनजातेःसाध्यत्वेमेयत्वादावतिव्याप्तिः जातिमन्निष्ठतादृशाभावप्रतियोगितायाजातित्वेनानवच्छेदात् जा ३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशून्ये च तादृशसम्बन्धेन वृत्तेरप्रसिद्धेः संयोगादिसाध्यकगुणकर्मान्यत्वादौ चातिव्याप्तिः अद्रव्ये हेतुमति तादृशसम्बन्धेन वृत्तेरप्र
सिद्धेः द्रव्ये च संयोगादेरपि वृत्तेर्मैवम् साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चि
द्व्यक्त्यनुयोगिकत्वसामान्योभयाभावस्य विवक्षितत्वात्। धूमसंयोगे वह्न्यधिकरणायोगोलकानुयोगित्वस्य चैत्रान्यत्वविशिष्टे तद्दण्ड
संयोगे एतद्दण्डाधिकरणचैत्रानुयोगिकत्वस्य गुणकर्मान्यत्वविशिष्टसत्तासमवाये च जात्यधिकरणगुणानुयोगिकत्वस्य विरहान्ना
तिप्रसङ्गः स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे तु निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्न
त्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वं बोध्यम्। समवायसम्बन्धेन मेयसामान्याभावस्य सामान्या
दौ सत्त्वान्मेयत्वादेरप्यभावप्रतियोगितावच्छेदकत्वं सुलभम् अत एव समवायस्यैकत्वे नद्रव्यत्वादिप्रतियोगिकत्वगुणाद्यनुयोगि
त्वोभयसत्त्वेऽपि द्रव्यं ज्ञातेरित्यादौ वह्निधूमोभयवान् वह्नेरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि च नातिव्याप्ति
रित्यपि वदन्ति। प्रतियोगित्वादिश्च स्वरूपसम्बन्धविशेषो न सम्बन्धत्वेन निविष्टः सामानाधिकरण्येऽपि सम्बन्धः संयोगत्वादिनैव नि
विशते दर्शितञ्च नियमाघटितमपि सम्बन्धत्वम्। अभावत्वञ्च इदमिह नास्तीति इदमिदं न भवतीति प्रतीतिनियामको भावाभावसाधारणः
स्वरूपसम्बन्धविशेषः अतो नाभावसाध्यकव्यभिचारिण्यतिप्रसङ्गः तदपि वा नोपादेयप्रयोजनविरहात् विषयतातत्त्वादिवत् प्रतियो
गित्वाधिकरणत्वतत्त्वसम्बन्धत्वादयोऽप्यतिरिक्ता एव पदार्था इत्येकदेशिनः॥ इति शिरोमणिः अथ सिद्धान्तलक्षणं॥ श्रीगणेशाय नमः॥
वह्नित्वावच्छिन्नस्य सर्वस्यैव धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततद्व्यक्तित्वाद्यवच्छिन्नत्वादव्याप्तिरित्यन्यथा व्याच
ष्टे प्रतियोगितानवच्छेदको यो धर्म इति तथा च प्रतियोगितावच्छेदकेन्यस्य स्वभावप्रधाननिर्देशात्तयाऽवच्छिन्नपदस्यावच्छिन्नप्रतियो

...गादीशः सिद्धान्तलक्षणम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतियोगिताकभिन्न

व्या॰ सि॰ ४

भिन्नाकपरतयातादृशप्रतियोगितावच्छेदकत्वावच्छिन्नत्वं लभ्यते इति मूले नावच्छिन्नपदवैयर्थ्यमिति ध्येयम्। यद्यपि महानसीय
वन्हिर्नास्तीत्यादिप्रतीतिसिद्धस्य हेतुमन्निष्ठाभावस्य प्रतियोगितावच्छेदकमेव वन्हित्वमित्यव्याप्तितादवस्थ्यम् न च तादृशपर्याप्त्यधि
करणत्वं न वन्हित्वस्येत्यदोषः प्रत्येकमुभयपर्याप्तिसंबंधेनाऽसतोऽवच्छेदकत्वस्योभयत्र पर्याप्तिसंबंधेन सत्त्वायोगात् तथापि साध्यता
वच्छेदकतदितरोभयावच्छेद्यभिन्नाया एव प्रतियोगिताया अनवच्छेदकत्वविवक्षितत्वाददोषः न च प्रमेयप्रमेयवान् धूमादित्यादाव
व्याप्तिः साध्यतावच्छेदकेतरस्याप्रसिद्धेरिति वाच्यं तदितरपदे स्वावच्छिन्नप्रकारतावच्छेदकस्य विवक्षितत्वात् साध्यतावच्छेद
कभिन्नो यः साध्यनिष्ठो धर्मस्तदनवच्छेद्या प्रतियोगिता तु न निवेश्या तथा सति तादृशप्रतियोगिताशून्यसाध्यसामानाधिकरण्यस्यैव व्या
प्तित्वसंभवे साध्यतावच्छेदकस्य तादृशप्रतियोगितानवच्छेदकत्वानुसरणवैयर्थ्यापत्तेरिति ध्येयम्। अपि च प्रमेयवान्वाच्यत्वा
दित्यादावव्याप्तिः तथा हि साध्यतावच्छेदकातिरिक्तं साध्यवृत्ति यद्घटत्वादिकं तदनवच्छेद्यप्रतियोगिताकस्य हेतुसमानाधिकरणाभावस्य
प्रसिद्धेरिति तु नव्याः॥ द्रव्यत्वादिरूपेण धूमे वन्हिव्याप्यत्वस्य धूमसामान्ये वा तत्तद्वन्हिव्याप्यत्वस्य वारणार्थं विशेष्यलक्षणं निर्दिशति न तद्रू
पविशिष्टस्येत्यादिना तद्धर्मावच्छिन्नहेतुकतादृशधर्मावच्छिन्नविधेयकानुमितिजनकतायां विषयविधयावच्छेदिका इति तदर्थः ने
न व्याप्तिपदेन तादृशसामानाधिकरण्योक्त्यैव पौनरुक्त्यापत्तेः सामान्यरूपेणालाभाय यावदिति ननु दण्डिमान् दण्डिसंयोगादित्यत्राव्या
प्तिः चालनीन्यायेन दण्डमात्रस्यैव प्रतियोगितावच्छेदकत्वात् न च शुद्धसाध्यतावच्छेदकस्थले प्रतियोगितानवच्छेदकमित्यत्राव
च्छेदकत्वं निरवच्छिन्नमिव विशिष्टसाध्यतावच्छेदकस्थले येन रूपेण साध्यतावच्छेदकत्वं तत्तदितरोभयानवच्छिन्नप्रतियोगिताव
च्छेदकत्वं ग्राह्यम् अन्यथा पर्वते महानसीयवन्हिवृत्तित्वविशिष्टजातिमान्नास्तीत्यादिप्रतीत्या विशिष्टजातेस्तादृशाभावप्रतियोगि

रामः ४

CC-0. In Public Domain. Digitization by eGangotri

तावच्छेदकतया वन्हिमान् धूमादित्यादाविव जातिमत्त्वान् घटत्वादित्यादावव्याप्तिप्रसंगाच्च घटे पटसमवेतत्वविशिष्टजातिमान्नास्ती
त्यादिप्रतीत्या विशिष्टजातेस्तादृशाभावप्रतियोगितावच्छेदकत्वात् तथा च तद्दण्डवान्नास्तीति प्रतीत्या तत्तद्विशिष्टदण्डव्यक्तेरेवावच्छे
दकत्वावगाहनात् शुद्धदण्डव्यक्तीनां दण्डत्वतदितरोभयानवच्छिन्नं यद्धेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वं तदभावसत्त्वान्ना
व्याप्तिरिति वाच्यं प्रमेयदण्डवान्नास्तीत्यादौ प्रमेयत्वोपलक्षितस्यैव तद्दण्डवान्नास्तीत्यादावपि तत्त्वोपलक्षितदण्डमात्रस्यैवावच्छेदकत्व
कल्पनात् केवलस्यावच्छेदकत्वासंभव एव विशिष्टस्य तथात्वस्वीकारात् अन्यथा प्रमेयत्वविशिष्टदंडादेरपि तथात्वापत्तेरत आह दंडत्वा
विति हेतुमति दंडसामान्याभावसत्त्वात् दंडत्वमपि तादृशावच्छेदकमेवेत्यत उक्तं परम्परासम्बद्धमिति तथा च स्वाश्रयवत्त्वरूपपरम्परा
सम्बन्धेन दंडत्ववतो दण्डिनः साधनवत्त्वभावविरहान्नाव्याप्तिः साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्ना या एव हेतुमन्निष्ठाभावप्रति
योगितावच्छेदकतायाः प्रविष्टत्वात् अन्यथा विषयितया रूपत्वादिमतो ज्ञानस्य समवायेनाभावस्य हेतुमति सत्त्वात् रूपवान् पृथिवीत्वा
दित्यादावव्याप्तिप्रसंगादिति भावः यदि च शुद्धदंडव्यक्तेरवच्छेदकत्वावगाहिप्रत्ययांतरसत्त्वात् तद्दंडी नास्तीति प्रतीत्या तत्तद्विशिष्ट
दंडव्यक्तेरेवावच्छेदकत्वमुक्तं दंडी नास्तीति प्रतीत्यन्यथानुपपत्त्या दंडस्यावच्छेदकत्वसिद्धौ प्रमेयदंडवान्नास्तीत्यादेरपि तन्मात्रावच्छे
दकत्वेनैव सामंजस्ये विशिष्टस्य तत्रावच्छेदकत्वाकल्पनात् तथा च कथमुक्ताव्याप्तिरित्युच्यते तदा रूपत्वन्यूनवृत्तिजातिमत्त्वान् रूपादि
दा त्यादावेवाव्याप्तिः सर्वस्या एव नीलत्वपीतत्वा[illegible]रूपाया रूपत्वन्यूनवृत्तिजातेः साधनवन्निष्ठाभावप्रतियोगितायानिरवच्छिन्नावच्छेदकत्वा
रूप न[illegible]वति नीलो नास्तीत्यादिप्रत्ययादित्याशयेन दंडत्वादावित्यादिपदमुपात्तम् तथा च तत्रापि स्वन्यूनजात्याश्रयत्वसम्बन्धेन रूपत्वमेव वृत्ति
साध्यतावच्छेदकमिति भावः साध्यतावच्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः तथा चोक्तव्याप्तिज्ञानाद् दंड्यंशे दंडत्वप्रकारिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना. सि. ५ दिक।

दंडत्ववत्वानित्येवानुमितिः ननु दंडिमानिति दंडप्रकारिकापि तत्स्वव्यापकतावच्छेदकत्वेनाग्रहान् कारणबाधेन तदवच्छिन्नविधेयताकानुमित्य
संभवादिति भावः वस्तुतो दंडत्वस्य साध्यतावच्छेदकत्वे दंडिमानित्यनुमितिर्न स्यात् दंडानां व्यापकतानवच्छेदकत्वादित्यस्वरसादेव दंड
त्वादिकमित्यत्रादिपदसमुपात्तमतेन तत्तद्दंडव्यक्तीनामेव स्ववृत्तिदंडत्वावच्छिन्नवत्तालक्षणपरंपरासम्बन्धेन साध्यतावच्छेदकत्वलाभान्
दंडिमानित्यनुमितेर्नानुपपत्तिलेशोपीति ध्येयम् केचित्तु साध्यसाधनभेदेन व्याप्तिग्रहानुमित्योः कार्यकारणभावभेदात् यत्र दंडत्वादिवि
शिष्टं साध्यतावच्छेदकं तत्र हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतानवच्छेदको यो धर्मस्तद्विशिष्टावच्छिन्नसामानाधिकरण्यरूपै
व व्याप्तिस्तद्विशिष्टावच्छिन्नविधेयकानुमितिप्रयोजिका एवं यत्र परम्परया दंडत्वादिकमेवानुमितौ विधेयतावच्छेदकं तत्र हेतुमन्नि
ष्ठाभावप्रतियोगितानवच्छेदको यो धर्मः परम्परया तदवच्छिन्नसामानाधिकरण्यरूपैव व्याप्तिः प्रयोजकेति सामानाधिकरण्यांशे दंडादेः प्र
वेशाप्रवेशकृत एव दंडिमान् दंडत्ववत्वानित्यनुमित्योर्दंडादिविषयत्वनियम इत्याहुः यत्तु दंडत्वधर्मिकनिरुक्तानवच्छेदकत्वज्ञान व्या।
स्यैव कार्यतावच्छेदकं दंडावच्छिन्नविधेयताकानुमितित्वमित्यनुमितौ दंडप्रकारकत्वेनानुपपन्नमिति तत्तुच्छम् परम्परया दंडत्वाव
च्छिन्नविधेयकानुमितित्वस्यापि तादृशज्ञानकार्यतावच्छेदकतया सर्वत्र दंडिमान् दंडत्ववत्वानित्युभयाकारानुमित्यापत्तेरुभयधर्माव
च्छिन्नस्यैव सामग्रीसंभवादिति दिक् अपरे तु नोक्तव्याप्तिज्ञानं दंडिमान् दंडिसंयोगादित्याद्यनुमितौ हेतुः किंतु वक्ष्यमाणान्योन्याभावघटि
तव्याप्तिज्ञानं अत एव यथायथमित्यादिग्रंथोपि संगच्छते इत्याहुः नव्यास्तु दंडिमानित्यादौ न संयोगेन दंडस्यादेः प्रकारत्वं किंतु स्ववृत्तिपुरु
षत्वावच्छिन्नाधिकरणत्वसंबन्धेन न चैवमनुभवापलापापत्तिः दीधितिकृन्मतेपि दंडस्य साध्यतावच्छेदकधर्मविधया संयोगस्य साध्य राम: ५
तावच्छेदकताघटकसंसर्गविधयावगाहितापलापापत्तेरिति प्राहुः यद्रूपविशिष्टेत्यस्य फलमाह इत्थं चेति चोवधारणे इत्यादौ इत्यादि ।

७ [वन्हिसंयोगवान्ते]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यायस्थाली यद्धेतौ तथा चस्यापः पक्षतिर्देशं विना नास्त्यत इदं पदेन तन्निर्देशः एवमग्रेपि यत्तु द्रव्ये धर्मिणि तादात्म्येन गुणकर्मणोः सा
ध्यताभ्रमं निरसितुं इदमिति पक्षनिर्देशः तन्मन्दं एवमपि इदंत्वविशिष्टद्रव्ये गुणकर्मणोः साध्यताभ्रमस्यानिरासादिति गुणादाववृत्तेरिति गु
णादावभावादित्यर्थः तथा च हेतुतावच्छेदकावच्छिन्नाधिकरणत्वं न गुणस्येति भावः यद्यप्यवश्यं क्लृप्ताभिः पर्वतत्वचत्वरत्वादितत्तद्धर्म
विशिष्टतत्तद्धूमत्वाद्यवच्छिन्नाधिकरणताव्यक्तिभिरेव धूमवानिति प्रतीत्युपपत्तौ धूमत्वावच्छिन्नाधिकरणताया मानाभावात् वन्हि
मान् धूमादित्यादावव्याप्तिः हेतुतावच्छेदकीभूतधूमत्वावच्छिन्नाधिकरणताप्रसिद्धेः तथापि हेतुतावच्छेदकधर्मे स्वाश्रयाधिकरणीभू
तयन्निष्ठाधिकरणतानवच्छेदकत्वस्य सामान्यतोधिकरणतावच्छेदकत्वस्य च द्वयोर्व्यतिरेकस्तथाविधहेतुतावच्छेदकाश्रयाधिकरणमेव हेतु
तावच्छेदकावच्छिन्नाधिकरणं न्यनेन विवक्षितं वन्हिमान् धूमादित्यादौ च तादृशहेत्वधिकरणं धूमस्याधिकरणमात्रं द्रव्यं विशिष्टसत्वादि
त्यादौ च तादृशं हेत्वधिकरणं द्रव्यमेव न तु गुणादि विशिष्टसत्तात्वेन तन्निष्ठाधिकरणतानवच्छेदकत्वस्य सामान्यतोधिकरणतावच्छेद
कत्वस्य च द्वयोः सत्वादिति ध्येयम् साधनभेदेन व्याप्तेर्भेदात् यत्र साधनतावच्छेदकं नाधिकरणतावच्छेदकं तत्र तदाश्रयसमानाधि
करणत्वमेव निवेश्यमित्यपि वदंति ननु सामानाधिकरण्यस्य व्याप्तित्वे तस्य धूमं प्रति भिन्नत्वे धूमसामान्ये वन्हिसामान्यस्यैकव्याप्तिरि
तिव्यवहारोनुपपन्न इत्यत आह। सामानाधिकरण्येति तथा च वन्हित्वधूमत्वाद्यनुगमादेव तत्र व्याप्तेरैक्यव्यवहारो न तु वस्तुगत्यापि व्या
प्तेरैक्यमिति भावः नन्वेवं सामान्यलक्षणाऽस्वीकारे महानसीयवन्हिसामानाधिकरण्यस्यैतस्य पक्षवृत्तिधूमादावसत्वात् पर्वतो वन
न्हिसामानाधिकरण्यस्य च प्रागननुभवात् कुतः परामर्श इत्याशंकायामेकैव वन्हिसाव्याप्तिरिति परामर्शसिद्धान्तग्रन्थोसंगत इत्यत आह वस्तु
तस्त्विति रासभादीनि तथा च धूमव्यापकवन्हिसमानाधिकरणत्वासंभवात् पर्वतश्चेत्तिज्ञानादप्यनुमितिः स्यादिति भावः न च धूमादिव्या

धि
ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा.सिं ६

पकवह्निसमानाधिकरणधूमादिमत्तानिश्चयत्वेनैव परामर्शस्य धूमादिलिंगकानुमितौ हेतुत्वादुक्तव्याप्तेरसंभवादिसाधारण्येपिन
क्षतिरितिवाच्यं पक्षधर्मांशेविषयतयानुमितिजनकतावच्छेदकस्यैव व्याप्तिपदार्थतया धूमत्वादेस्तत्रनिवेशेनतद्घटितस्यैव व्याप्ति
त्वादितिभावः धूमत्वादिमत्तेति तथा चतस्येतिमूलस्थंतत्पदंलक्ष्येलक्षणेचोभयत्रएवान्वितमितिभावः ननुसाधननिष्ठसामानाधिक
रण्यस्यव्याप्तित्वेएकैवह्नीतिग्रंथानुपपत्तिस्तदवस्थैवतद्व्याविशिष्टसत्वव्यापकीभूतद्रव्यत्वसामानाधिकरण्यवतःसत्वस्यगुणादौपराम
र्शाद्गुणोपिद्रव्यत्वानुमितिःप्रमास्यादत आह तद्वृत्तीति तादृशसामानाधिकरण्यवृत्तीत्यर्थः तथा चतादृशसामानाधिकरण्यविशिष्टधूम
त्वंव्याप्तिस्तत्प्रकारिकैवपक्षधर्मताधीरनुमितिहेतुस्तत्रचनीलघटत्वप्रकारकबुद्धौघटत्वस्यैवस्वरूपत एव धूमत्वस्यभानेननुधूमत्व
त्वेनपतौगौरवमितिभावः आद्येति तथा चतामुपादायैवपर्वतीयवह्निधूमयोरसंनिकर्षात्तयोःकथंव्याप्तिग्रह इति परामर्शांशपूर्वपक्ष
ग्रंथ इतिभावः द्वितीयेतथा चतामभिप्रेत्यैवएकैवह्निसाध्याप्तिरिति परामर्शीयसिद्धान्तग्रंथ इतिभावः यत्रैकमेवसाध्याधिकरणंतत्रैवमद्रूप
वान् नद्दसादित्यादावद्यपि अभिन्नैव यत्र चद्रव्यत्वादौसाध्येरूपत्वव्याप्यजातिमत्तोहेतुत्वंतत्रहेतुतावच्छेदकीभूतानांनीलत्वादिजाती
नांनानात्वेनद्वितीयापिकचिद्भिन्नैवेतिमन्तव्यं कपिसंयोगित्येतत्पदार्थस्यसाध्यताभ्रमखण्डनार्थमयमितिपक्षनिर्देशः सांप्रदायिकमतेसं
योगसामान्याभावमात्रस्यद्रव्येऽभावात् कपीति वृक्षमात्रेकपिसंयोगाभावादेतदिति न साभावेहेतुसामानाधिकरण्यस्यैवहेत्वधिकरणे
निरवच्छिन्नवृत्तित्वरूपस्यनिवेशादुक्तव्याप्तिव्युदाससंभवात् प्रतियोगिव्यधिकरणत्वनिवेशोमूलकृतामनुचित इतिवाच्यम् अग्रेसमाधा
स्यमानत्वादितिभावः तद्वत्समानाधिकरणानं ननुशाखामूलादिसर्वावयवावच्छेदेनसर्वत्रद्रव्येगगनादिसंयोगस्यसत्वात्कुतस्तत्सामा
न्याभावस्यद्रव्येसंभवइत्यत आह संयोगस्येति वृक्षत्वेनिशाखाद्यवच्छेदेननतत्संयोगसत्वेपिवृक्षत्वावच्छेदेनकस्यापिसंयोगव्यक्ते

रामः ६

५/ [आद्या भिन्ना अनुमितेर्विषयविधया जनकतावच्छेदकाद्भिन्ना किन्तु व्यवहारौपयिकीति, द्वितीया त्वभिन्ना विषयतयाऽनुमितेजनकतावच्छेदकादभिन्नैवे-
त्यर्थ इत्यपि क्वचित्]

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व:, अ

रसत्वान्न तदवच्छेदेनैव संयोगसामान्याभावसंभवोऽवच्छेदकभेदे नैकत्र भावाभावयोः समावेशादिति भावः नन्वत्र द्रव्ये संयोगसामान्या
भावस्य कुतो नाध्यक्षमित्यत आह अत्र चेति । तत्र संयोगसामान्याभावे सत्त्वादित्यस्य प्रतियोगितासम्बन्धेनेत्यादिः तथा च संयोगसामा
भावः/ न्याभावस्यायोग्यप्रतियोगिकत्वान्नाध्यक्षत्वमिति । नन्वत्र प्रतियोगितावच्छेदकविशिष्टयत्किंचित्प्रतियोगिनो योग्यत्वमत्यन्ताभाव
ग्रहे तंत्रं न तु योग्यमात्रप्रतियोगिकत्वम् अन्यथा गुणेपि संयोगसामान्याभावस्य तादृशप्रत्यक्षं न स्यादित्याह परित इति परितः सर्वाव
यवावच्छेदेन प्रतियोगिग्रहात्मकदोषाद्यस्यार्थः न चैवमपि प्रतियोगिग्रहोत्पत्तिदशायां प्रत्यक्षं दुर्वारं प्रतियोग्युपलम्भ
अ कसामग्र्या अपि दोषत्वेनोपगमात् प्रतियोगिनउपलब्धिर्मा भूदिति प्रसज्यमानस्यैव प्रसञ्जनत्वादिति भावः प्रतियोग्युपलम्भदोषाभा
वस्य संयोगसामान्याभावप्रत्यक्षे कार्यसहभावेन हेतुत्वोपगमान्नोक्तदोष इत्यपि वदन्ति तन्न चेतिमानमिति परेणान्वयः योग्यदीपेति
योग्यजातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नयत्संबंधावच्छिन्नप्रतियोगिताकयावदभाववान् संतज्जात्यवच्छिन्न तत्सं
बंधावच्छिन्नप्रतियोगिताकाभाववानित्यर्थः तेन न स्वरूपासिद्धिर्न वासिद्धसाधनं ज्ञात्युपादानात् गुरुधर्मस्य प्रतियोगितावच्छे
दकत्वेपि तदवच्छिन्नाभावाप्रसिद्ध्यापि न व्यभिचारः नं च सत्वगुणत्वाद्यवच्छिन्नाभावमादाय स्वरूपासिद्धेर्वारकस्योभयावृत्तिप
दस्य वैयर्थ्यम् व्यभिचारवारकस्येवासिद्धिवारकस्यापि विशेषणस्य सार्थकतायाः पक्षधरमिश्रादिसंमतत्वात् अत एव नित्यत्वसा
ध्यकानुमाने सामान्यवत्त्वे सति विशेषगुणान्तरासमानाधिकरणैकमात्रवृत्तिगुणत्वहेतौ शब्देतरार्थकसान्तरपदस्य शब्दमण्या
लोके सार्थकत्वं तैः समर्थितम् यद्वा यद्दीपानां यद्धर्मावच्छिन्नप्रतियोगितानां यावतां विशेषाभाववान् प्रत्येकावच्छिन्न[illegible]तिसि
[illegible] भाववान् यः स तद्धर्मावच्छिन्नप्रतियोगिताकाभाववानित्यर्थः तथा च संयोगत्वावच्छिन्नप्रतियोगिताव्यक्तीनां प्रत्ये

प्रतियोगिताकयाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा॰सि॰ ७ कावच्छिन्नाभावकूटवत्त्वस्य पक्षे सत्त्वात्तात्सिद्धिर्नवाच्यं यं विशेषणत्वमिति ध्येयम्। योयद्धर्मन्यूनवृत्तिधर्मावच्छिन्नयावदभाव
वान् सतद्धर्मावच्छिन्नाभाववानित्यर्थः तत्संयोगत्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य घटावृत्तिसंयोगत्वाभि वृक्षान्यास
मवेतत्वाद्यवच्छिन्नाभावस्य यावदन्तर्गतस्य वृक्षादौ पक्षे स्वरूपासिद्धत्वात्तदुपादेयः संयोगयावद्विशेषाभावो इति नच सर्वविप
वात् वृक्षावच्छेदेन वृक्षे गगनादेरेकस्यैवसंयोगोल्लाघवादितिस्तस्य वा भावविरहात्संयोगयावद्विशेषाभाववत्त्वपक्षे स्वरूपासिद्धिमिति वा
च्यं अतिप्रसंगभंगाय शाखादितत्तदवयवावच्छिन्नवृत्तिकसंयोगं प्रति तत्तदवयवत्वेन हेतुत्वस्यावश्यकतया वृक्षे अव्याप्यवृत्ति
गगनसंयोगस्यासंभवादितिभावः प्राचां मते पक्षतदर्थयोरनुपमादाह एकावच्छेदेनेति। इदमुपाधेः साधनाव्यापकत्वरक्षायैनेवं
तत्तत्संयोगाभावस्य गुणेऽव्याप्यवृत्तित्वादेकावच्छिन्नत्वेन साध्यव्यापकत्वेदुर्घटं व्याप्यवृत्तेरवच्छेदकत्वानंगीकारादितिवाच्यं। ए
कावच्छेदेनेत्यनेन निरवच्छिन्नवृत्तिकत्वविशिष्टस्य विवक्षितत्वात् नचैतेन व्यापिकेपि संयोगसामान्याभाववति वृक्षे निरवच्छिन्न
वृत्तिकत्वविशिष्टस्य मही यया वद्वि शेषाभावस्यासत्त्वादुपाधेः साध्याव्यापकत्वमितिवाच्यं जात्यवच्छिन्नाभावस्यैवोक्तव्याप्तौ
साध्यविधयाप्रवेशात् कपिसंयोगाभावस्य चातत्त्वात्वेनेतत्प्रतीतदी यया वद्विशेषाभावस्योक्तरूपेणाव्यापकत्वेपि क्षत्यभावात् न
चाभिघातादिसामान्याभावस्य वृक्षे सत्त्वात्। तत्र चैनिरवच्छिन्नवृत्तिकत्वविशिष्टस्य यावद्विशेषाभावस्यासत्त्वादेवमुपाधेः साध्या
व्यापकत्वमितिवाच्यं गुणविभाजकजातेरेवहेतुसाध्ययोः प्रवेशान्न केचित्तु एकावच्छेदेनेत्यस्यावच्छेदकतासंबन्धेन तदभावा
धिकरणीभूतदेशस्यावच्छेद्यतासम्बन्धेनाभाववत्त्वेनेत्यर्थः नथा चैतद्विशिष्टयावद्विशेषाभाववत्त्वमुपाधिरित्याहुस्तच्चिंत्यमुपात्त्वे रामः
कावच्छेदेनेत्यस्य परस्परानवच्छेदकानवच्छिन्नवृत्तिकत्वविशिष्टेत्यर्थमाहुस्तन्नव्याप्यवृत्तिरूपादीनां विशेषाभावस्यावच्छे ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दकाप्रसिद्धानवदनवच्छेदकस्याप्यसंभवेनानेनैवसाध्याव्यापकत्वनादवस्यादितिदिक्। यत्तद्भ्यांविनाकृतमनुगनानुमानमाशं
कयनिषेधयति एनेनेति वक्ष्यमाणदोषेणेत्यर्थः व्यर्थेतिसंयोगसामान्याभावस्यत्वन्मतेकेवलान्वयितयानत्साध्यतायाम
भाववत्वादित्यस्यैवसम्यक्त्वादितिभावः अथात्वभाववत्वादितिनतर्हि हेतुरुत्तर आह। अप्रयोजकत्वादिति ननुनिरुपाधिकत्व
मेवप्रयोजकमत आह। निर्गुणत्वादेरिति आदिनाद्रव्यभिन्नत्वादेरुपग्रहः। अत्रयद्यपिनिर्गुणत्वोपाधेःस्वाभावेनसाध्याभावो
न्नायकतयानदोषस्त्वंसंयोगस्यैवसाध्याभावत्तयावृक्षादौनस्येष्टत्वात् नापिव्यभिचारोन्नायकतयातत एवतयापिस्वव्याप्यत्वे
नसाध्यस्यपक्षाद्वृत्तित्वोन्नायकतयादूषकत्वंबोध्यम् संयोगसामान्याभावोनवृक्षवृत्तिःनिर्गुणत्वव्याप्यत्वादित्यनुमानेनापिवृ
क्षः संयोगसामान्याभाववानित्यनुमितेःप्रतिरोधादितिध्येयम् ननुयोयद्धर्मस्यानवच्छेदकंसतद्भाववस्यावच्छेदकइतिव्याप्त
वृक्षत्वादेःसंयोगसामान्याभावावच्छेदकत्वंसेत्स्यतीत्याशंक्यनिराचष्टेनचेति गुणादौति तथाचव्यभिचारान्नोक्तव्याप्तिरितिभा
वः ननुवृक्षत्वंसंयोगसामान्याभावावच्छेदकंसंयोगसामान्यानवच्छेदकत्वादितिविशिष्यैवव्याप्तिर्वाच्याप्रमेयत्वसत्वादेःपक्ष
समत्वादतःस्वरूपासिद्धिमाह। यथाचेति प्रतिदंडमितिभिन्नत्वेपीतिपरेणान्वयः नन्वव्यवहितपूर्ववर्तितायाअवच्छेदकंनदं
डत्वमतिप्रसंगात् किंत्वव्यवहितपूर्ववर्तिजातीयतायाःसाचाभिन्ना अतःसंयोगस्यलएवानुरूपंदृष्टांतमाहवन्हीतिततत्सामा
न्यस्येति घटपूर्ववर्तित्वसामान्यस्यवन्हिसामानाधिकरण्यसामान्यस्यचेत्यर्थः केचित्तुकथितव्याप्तावप्रयोजकत्वमन्ययानद्भा
वानवच्छेदकत्वहेतुनानदवच्छेदकत्वमेवकुतोनवृक्षत्वादेःसाध्यतेवृक्षत्वाद्यवच्छेदेननत्संयोगव्यक्तीनामसत्वेपिसंयोगसामा
न्यस्यसंभवादित्यभिप्रायकोयंग्रंथइत्याहुःगुणस्येतिसामान्याभावइतिपरेणान्वयः नन्वाद्यक्षणेगुणोनास्तीतिप्रत्यक्षमसंभवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञा·सि सन्निकर्षाद्यभावात् प्रथमक्षणे घटे गुणो नास्तीत्यादिव्यवहारादिकं त्वसंदिग्धप्रामाण्यकमतः स्थलान्तरमाह। प्रलयावच्छेदेनेति
८ तदानींजन्यभावसत्त्वे प्रलय एव व्याहन्येतेति भावः ननु महाप्रलये मानाभावात् तदवच्छेदेनेत्यसंगतमत आह न चेति ननूक्तप्रतीतिः
हुताश पर्वतवृत्तिअर्मीनावच्छेदकत्वाभावं शिखरे शिखरावच्छिन्नपर्वतवृत्तित्वाभावं वा हुताशनेऽवगाहते ननु पर्वत एव हुताशनाभाव
मिति प्रतीतिर्भ्रमरूपा तदाप्याह वृत्तेरिति वृत्तेः संबन्धस्य वृत्तिमतः संबन्धवतः तथा च योपदवच्छेदेन यदीययत्संबंधाभाववान्स तदव
च्छेदेन तत्सम्बन्धावच्छिन्नतदभाववानिति व्याप्त्यापि शिखरावच्छेदेन संयोगसंबंधावच्छिन्नवह्न्यभावसिद्धिरिति भावः ननूक्तव्या
प्तावप्रयोजकत्वं अन्यथा तुल्यन्यायेन यो यदीययत्सम्बन्धवान् स तत्सम्बन्धेन तद्वानिति व्याप्त्यापि कुंडादिसंयोगिनो बदरादेः संयो
गेन कुंडादिमत्तापत्तेरित्युक्तावाह। एवमिति भेदो विशेषः घटवत्यपि काले इदानीं तंतौ न घट इति प्रतीत्या तत्त्वावच्छेदेनैव तत्काले
घटाभावः तथा घटवत्यपि कपाले घटनाशदशायामिदानीमिह कपाले न घट इत्यनुभवात् तत्कालावच्छेदेन घटसामान्याभावः सिद्ध्य
ति न चेदानीं तंतुषु न घट इत्यादिप्रतीतेरेतत्कालावच्छेदेन तंतुष्वेव घटाभावो विषयो न तु तत्त्वावच्छेदेनैतत्काले तथेति वाच्यं तंतुषु
घटाभावस्याव्याप्यवृत्तितयैतत्कालस्य तदवच्छेदकत्वावगाहने उक्तप्रतीतेर्भ्रमत्वापातात् न च तथाप्येतत्कालवृत्तिघटस्याभाव ए
व तंतुषु भासतां तत्रेति वाच्यम् कालस्य प्रतियोगिकुक्षावग्रहेपि तादृशप्रतीतेस्तत्त्वावच्छेदेन समये घटाभावावगाहित्वस्यानुभवि
कत्वादिति भावः तथा चेति गुणवृत्तिसंयोगवदाद्यव्यत्वाद्वह्निमान्धूमान् समये घटवानेतत्कालत्वात् कपालं घटवद्घटध्वंसादित्या
दावव्याप्तिवारणायेत्यर्थः तद्वतीति असमानाधिकरणं तद्दलमित्यर्थः नोपादेयमिति येन सम्बन्धेन येन रूपेण च यद्व्याप्यवृत्तित्वे रामः
न संबंधेन तेन रूपेण च तत्साध्यतायां नोपादेयमित्यर्थः तेन संयोगत्वेनाव्याप्यवृत्तेरपि संयोगस्य समवेतत्वेन रूपेण साध्यतायां ८

CC-0. In Public Domain. Digitization by eGangotri

९ नों पत्रा क मोज[illegible] यह फटा

कालिकतयाऽव्याप्यवृत्तेरपिद्रव्यत्वस्य समवायेन साध्यतायां च न प्रतियोगिव्यधिकरणपदमिति परंतु समवायेनव्याप्यवृत्ते
रपिद्रव्यत्वसत्वादेः कालिकेन साध्यतायां तु पादेयमेव अव्याप्यवृत्तिसाध्यके संयोगाभाववान् गुणत्वादित्यादौ क्वचिदेव न देय
म् व्याप्यवृत्तिसाध्यके तु प्रयोजनविरहात् सर्वत्रैव न देयमित्यावेदयितुं सर्वथैवेत्युक्तं साध्यसाधनभेदेनेति साध्यताघटकस
म्बन्धादेरप्युपलक्षणं यद्यपि व्याप्यवृत्तिसाध्यकस्थले तदप्रवेशे सत्तावान् जातेरित्यादावव्याप्तिः साधनवृत्तिसंदादौ समवा
येन सत्ताभावस्यापि कालिकादिसम्बन्धेन ...तेः न चाभावे हेत्वधिकरणवृत्तित्वस्य विशेषणतया विवक्षणान्नोक्तदोषः तथा सत्य
पि द्रव्यत्वशून्यं सत्वादित्यादावतिव्याप्तेः द्रव्यत्वरूपसाध्याभावस्य विशेषणतयावृत्तित्वविरहात् द्रव्यभिन्नत्वप्रकारकप्रमाविशे
ष्यत्वाभावस्यापि द्रव्यत्वानतिरिक्तत्वात् न चाभावप्रतीतेः प्रमात्वरक्षार्थमभावाभावस्यातिरिक्ततयोक्तातिव्याप्तिवारणमिति
वाच्यं अभावत्वं चेन्न्यग्मिमतं येन भावाभावसाधारणस्याभावत्वस्य निर्वचनविरोधापत्तेः घटत्वाद्यभावस्य कालिकसम्बन्धावच्छि
न्नाभावे स्वरूपसम्बन्धेन साध्ये गगनत्वादिहेतावव्याप्तेस्तथाप्यनुद्धाराच्च विशेषणतया गगननिष्ठस्य घटत्वाभावस्यैवतादृशघट
ता त्वाभावाभावाभावत्वकल्पनानावनैवाभावप्रतीतेः प्रमात्वसंभवात् अत एव साध्यताघटकसम्बन्धेन साध्यवत्वबुद्धेर्विषयविध
याप्रतिवन्धकतावच्छेदकीयः संबंधस्तेन संबंधेन हेतुसामानाधिकरण्यमभावस्य ग्राह्यमित्युक्तावपि न निस्तारः तथाविधसम्ब
धेन हेतुसामानाधिकरण्याप्रसिद्ध्या प्रागुक्तगगनत्वादिहेतौ द्रव्यत्वाभाववज्जातित्वादित्यादौ चाव्याप्तेः तथापि साध्यतावच्छेद
कसम्बन्धेन प्रतियोगिमत्ताबुद्धेर्विषयतया प्रतिबंधकतावच्छेदकीयः सम्बन्धस्तेन सम्बन्धेन हेत्वधिकरणवृत्तित्वमभावस्य विव
क्षितमित्यदोषः तथा च द्रव्यत्वाभाववतजातित्वादित्यादौ विशेषणताविशेषेण जातित्वाभाववबुद्धेर्विषयविधया प्रतिबंधकता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छेदकोयः स्वरूपसंबन्धस्तेन जातित्वस्वरूपाभावस्य प्रसिद्धेरिति भावः वस्तुतो व्याप्यवृत्तित्वमत्र साध्यतावच्छेदकसम्ब
न्धेन यस्याधिकरणं तद्वृत्त्यभावस्य तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाभावरूपं ग्रन्थकृतोभिप्रेतं तादृशसाध्यकस्त्वसमवाया
दिनात्मत्वादेः साध्यतायां ज्ञानवत्त्वादिकं समवायेनात्मत्ववतिसमवायावच्छिन्नात्मत्वाभावस्य केनापि सम्बन्धेनावृत्तेः तथाच
तादृशसाध्यक एवनोपादेयम् सत्तावान् जातेरित्यादौ पुनरुपादेयमेव सत्त्ववतिस्पन्दादौ समवायावच्छिन्नसत्त्वाद्यभावस्यापि का
लिकादिसम्बन्धेन वर्तमानतया सत्तादेर्निरुक्तव्याप्यवृत्तित्वाभावाद्व्याप्यवृत्तिताघटकस्य स्वाधिकरणवृत्तित्वस्य सम्बन्धसामान्ये
नपनिष्ठत्वात् एतल्लाभार्थमेव सर्वथैव व्याप्यवृत्तेरित्युक्तं तस्य सम्बन्धस्य विशेषानियन्त्रितत्वात् व्यभिचारादिस्तु सम्बन्धो न वृत्तिनि
यामकस्तेनात्मत्वादेरपि न व्याप्यवृत्तिताहानिरिति ध्येयम् सर्वथैव व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तिविशि
ष्टहेतुमत्तानिश्चयोत्तरानुमितौ नोपादेयम् प्रतियोग्यसमानाधिकरणांशो जनकतावच्छेदके नोपादेयः साध्यसाधनभेदेन कार्यका
रणभेदेन व्याप्तेः कारणतावच्छेदकघटकव्याप्तेर्भेदात् भिन्नत्वादित्यपि वदन्ति एकधर्मावच्छिन्नप्रतियोगितायाः प्रतियोगिव्यक्तीनां भेदे
प्यैक्यमिति नव्यमते वह्निमान्धूमादित्यादौ वह्न्यादिसामान्याभावमादाया व्याप्यसंभवादतिव्याप्तिवारणमेव प्रयोजनमाह तेनेति नच
विशिष्टसत्त्वस्य व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशादिदमयुक्तमिति वाच्यं जातौ विशिष्टसत्त्वव्यभिचारज्ञानदशा
यामपि विशिष्टसत्त्वधर्मिकजातिमन्निष्ठप्रतियोगिव्यधिकरणाभावाप्रतियोगित्वज्ञानाद्विशिष्टसत्त्वसाध्यकानुमितिप्रसंगस्यैव प्रकृतेऽतिप्रसं
गपदार्थत्वात् विशिष्टसत्त्वस्याप्युक्तरीत्या व्याप्यवृत्तित्वविरहाच्च विशिष्टस्यातिरिक्तत्वमते तत्रातिव्याप्त्यसंभवादाह भूतत्वेवेति प्रांचस्तु विशि
ष्टसत्त्वस्य व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशात् भूतत्वेत्यादिसाध्यान्तरम् तत्र भूतत्वं चात्मान्यत्वे सति वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषगुणवत्त्वम् मूर्तत्वमवच्छिन्नपरिमाणवत्त्वं तदुभयं चाव्याप्यवृत्त्येव घटादावुत्पत्तिकालावच्छेदेन तदुभयस्याभावसत्त्वादित्या
हुः सार्वभौममतमाशंकते नचेति वाच्यमित्यन्वयः तदेभावः भूतत्वमूर्तत्वोभयाभावः सहज इति प्रतियोगितावच्छेदकावच्छिन्न
त्वाप्रवेशेपीत्यर्थः। ननूभयत्वस्य विशिष्टत्वातिरिक्तत्वेपि सहजतः प्रतियोगिव्यधिकरणस्य विशिष्टत्वावच्छिन्नाभावस्य प्रतियोगि
तावच्छेदकमेवोभयत्वमतो नातिव्याप्तिः विशिष्टत्वावच्छिन्नाभावस्योभयाभावानतिरेकादत आह नवेति। तदवच्छिन्नाभावः उ
भयत्वावच्छिन्नाभावः तदवच्छिन्नाभावात् वैशिष्ट्यावच्छिन्नाभावात् वैशिष्ट्यावच्छिन्नाभावात् लिंगत्वस्य न्यायेनानातिरिक्त इत्यनु
षज्यते तथा चातिरिक्त एवेति भावः न चान्यत्रोभयाभावस्य विशिष्टाभावानतिरिक्तत्वेपि प्रकृते भूतत्वविशिष्टमूर्तत्वाभावस्यैव तदुभ
यत्वावच्छिन्नप्रतियोगिताकत्वं समनियताभावयोर्लाघवेनैकत्वादिति वाच्यं तावतापि हेतुमतो यादृशप्रतियोगिताश्रयानधिक
रणत्वं तादृशप्रतियोगितानवच्छेदकत्वस्य भूतत्वमूर्तत्वोभयत्वेऽनपायादतिव्याप्तितादवस्थ्यादिति भावः उभयत्वस्येति प्रत्यक्ष
नाविरुद्ध। सिद्धत्वादिति परेणान्वयः तथा च विरुद्धयोरिव समानाधिकरणयोरप्युभयत्वमतिरिक्तमेव विरुद्धाविरुद्धस्थलीयोभयत्वप्रतीत्योः उभयत्रैवो।
समानाकारत्वात् भूतत्वमूर्तत्वयोर्विरुद्धत्वभ्रमदशायामप्युभयत्वप्रत्ययाच्चेति भावः। नचेति वाच्यमिति परेणान्वयः तत्र भूत नम्।
त्वमूर्तत्वोभयवति नित्यत्रव्याप्तिरेवेति तथा च तत्स्थलस्य तयानुद्धारणप्रयासोनुचित इति भावः। तथात्वेपीति। उभयत्वाश्रयस्य मूर्त
त्वस्य मनसि सत्वेपीत्यर्थः तथा च हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणावच्छेदेन साध्यतावच्छेदकावच्छिन्नवत्तास्थल एवव्या
प्तिरतो नैतत्स्थलस्य मितिभावः। वृत्तिमति व्याप्यभावस्य व्यभिचारनियतत्वाद्व्यभिचारं ग्राहयति नोतीति अत्र मूर्तत्वाश्रयेमनसि तत्त्ववं लि/ स्थर्यः
न्ध्यादिभेदमादाय व्याप्तो प्रतियोग्यसमानाधिकरणपदेनैव वारणादत्यंतपदं व्यर्थमत आह अत्यंतापदं चेति अत्यन्ताभावत्वनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रूपकं यत्प्रतियोगित्वं तदाश्रयत्वैयधिकरण्यविवक्षायाः फलमाह अन्यथेति। तद्भेदस्य स्वसमानाधिकरणाभावांतरभेदस्य स्व
स्वरूपानतिरिक्ततयेति अनवस्थाभयेनेत्यादिः दुर्लभत्वापत्तेरिति हेतुसमानाधिकरणाभावमात्रस्यैव स्वात्मकभेदप्रतियोगित्व
दभावांतरं तत्समानाधिकरणत्वादिति भावः न च भावस्वरूपाभावस्यैव प्रतियोग्यसामानाधिकरण्यं सुलभमिति वाच्यं तस्यापि स्वस
मानाधिकरणाभावभिन्नत्वाद् भावमात्राधिकरणकद्वाभावमात्रप्रतियोगिकोविशिष्टाभावाद्यनात्मकोभावोधिकरणभिन्नोनेष्य
ते लाघवात् अग्रे विवक्षणीयस्य साध्यताघटकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यस्य वह्निमान्धूमादित्यादौ घटाभावे सत्त्वा
त्सर्वत्राप्रसिद्धिः किंतु स्वरूपसम्बन्धेनाभावस्य साध्यतायामेवेति सूचयितुमप्रसिद्धिमपहाय दुर्लभत्वमुक्तं अत्यन्ताभाववत्त्वनि
रूपकप्रतियोगितानवच्छेदकत्वविवक्षाया फलमाह सर्वेषामिति भावभेदस्यातिरिक्तत्वास्वीकारादाह अभावसाध्यकेति तथा च घ
टभिन्नं पटत्वादित्यादौ पटत्वसमानाधिकरणनिरूपितप्रतियोगिव्यधिकरणगोत्वाद्यभावस्य घटभेदभिन्नत्वात्तादृशभेदस्य च गो
त्वाभावरूपत्वात्तत्प्रतियोगितावच्छेदकमेव घटभेदत्वमित्यव्याप्तिरिति भावः संप्रदायइत्यस्वरसः तद्बीजं तूक्तविवक्षायां सर्वेषां हे
तुसमानाधिकरणात्यन्ताभावानामत्यन्ताभावत्वनिरूपकेन पूर्वक्षणादिवृत्तित्वविशिष्टस्याभावात्मकेन प्रतियोगिना सामानाधिक
रण्यादभावसाध्यकाव्याप्तितादवस्थ्यम् यादृशप्रतियोगितावच्छेदकविशिष्टस्यानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितानव
च्छेदकत्वप्रवेशे तु व्यर्थमेवात्यन्तपदमिति ध्येयं गोध्वंसवत्त्वेनेति प्राचीनमते गवात्यन्ताभावस्य गोध्वंसविरोधित्वादित्याशयः न
च दैशिकविशेषणतया यत्र गोध्वंसस्याधिकरणं तत्रैव गवात्यन्ताभावस्य विरोधित्वात् कालिकसम्बन्धेन गोध्वंसवत्यपि प्रलये तदत्य
न्ताभावसत्त्वे बाधकाभावान्नातिव्याप्तिरिति वाच्यं। प्राचां मते भूतलादिदेशस्येव कालस्यापि दैशिकविशेषणतया गोध्वंसवत्त्वात् अ

नएवत्वकृसंयुक्तकालेविशेषणतया वायुस्पर्शनाशस्यसाक्षात्कारः शब्दानित्यतायांमिश्रैरुक्तः यद्यप्येवमपिनातिव्याप्तिसंभवः
कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्यैवप्रलयेकालिकसंबन्धेनवर्तमानत्वात् ध्वंसादिमतिदैशिकसम्बन्धेनेवात्यन्ता
भावस्यानभ्युपगमात् तथापिप्रतियोगिवैयधिकरण्याघटितस्यव्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्यावश्यदैशिकविशेष
णतयाऽभावेहेतुसामानाधिकरण्यघटितत्वात् तस्यैवातिव्याप्तिर्वोध्या नचकालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्यदैशि
कसम्बन्धेनहेतुमन्निष्ठात्यन्ताभावस्याप्रसिद्ध्यातथापिनातिव्याप्तिरितिवाच्यं सृष्टिकालवृत्तित्वादिविशिष्टगोत्वाभावस्यैवतादृ
शप्रसिद्धत्वादितिभावः मिश्रमतंनिरसितुमाह संसर्गाभावेति। अत्यन्ताभावपदेनेत्यादि। तथाचप्रलयेगोत्वाद्यवच्छिन्नध्वंसव
त्वादेवनातिव्याप्तिरितिभावः नचगोध्वंसस्यगोत्वावच्छिन्नाप्रतियोगिताकत्वस्वीकारेपिसाध्यतावच्छेदकसम्बन्धीभूतकालिक
विशेषणतावच्छिन्नप्रतियोगिताकत्वविरहात् कुतस्तमादायातिव्याप्तिव्युदासइतिवाच्यंसाध्यतावच्छेदकसम्बन्धान्यसंबन्धा
नवच्छिन्नस्यैवहेतुसमानाधिकरणाभावप्रतियोगित्वस्यलक्षणेप्रवेशनीयत्वात्तस्यचध्वंसप्रतियोगितासाधारण्यादितिभावः य
त्तुस्पंदइति स्पंदवतिखंडप्रलयेसर्गान्तरीयद्व्यणुकप्रागभाववत्वेनद्व्यणुकत्वावच्छिन्नध्वंसविरहादतिव्याप्तिः खण्डप्रलयेस्पंदस
त्वेमानाभावः ब्रह्मणोवर्षशतमायुरित्यागमप्रसिद्धेरेवमानत्वात् नहिक्रियांविनामुहूर्तादिघटितस्यवर्षस्यसम्भवइति नतुमहाप्र
लयपूर्ववृत्तीयक्षणेद्व्यणुकत्वावच्छिन्नध्वंससत्वान्नातिव्याप्तिस्तदानीमपिचरमद्व्यणुकनाशानुगुणस्यपरमाणुस्पंदस्यसत्वात्त
त्कालोत्पन्नपरमाण्वन्तरसंयोगेनप्रलयपूर्वक्षणएवपश्चात्तस्यविनष्टत्वात् नादृशपरमाण्वन्तरसंयोगस्यकार्यद्रव्येणाणुकेन
सहैवस्वीकारादनित्यत्वे आश्रयनाशादेवतन्नाशसंभवादत आह। यदादृष्टमिति केचित्तुस्वमतेद्व्यणुकस्याभावात् स्पंदस्यखंडप्र

लये वृत्तौ बलवत्तरप्रमाणाभावात्स्वदादृष्टमित्युक्तमित्याहुः नत्विदं नित्यज्ञानमादायसहेतुवारणायजन्यमिति नित्यसुखाभिव्यक्ते
र्मोक्षत्वमते सहेतुत्वमाशंक्य साध्यान्तरमाह। दुःखेति ननु कार्यमात्रं प्रत्यदृष्टस्य हेतुत्वात् प्रलयप्रागक्षणेपि तस्य सत्त्वं तथा च तदा
नीमेव दुःखत्वावच्छिन्नध्वंसत्वान्नातिव्याप्तिः दुःखादेः स्वसाक्षात्कारनाश्यनियमात्तदानीमसंभवात् उत्तरक्षणे साक्षात्कारासंभवाद्वि
दिति प्रमाणाभावाच्च किंच यावद्ब्रह्मांडानां युगपत्प्रलयानभ्युपगमेन ब्रह्मांडान्तरवर्त्तिदुःखमादाय सहेतुरेवायमत आह। यदात्मस्येति
अत्र च तदीयसुषुप्त्यादिसमये न तदीयज्ञानविरहाद्व्यभिचारः स्फुट एव द्व्यणुकत्वादेरिति खंडप्रलये केषांचित्ध्वंसस्य केषांचित्प्राग
भावस्य सत्त्वात्तस्य प्रतियोगितानतिरिक्तवृत्तित्वेनानवच्छेदकत्वादिति भावः ननु द्व्यणुकत्वावच्छिन्नानधिकरणकालवृत्तित्वविशि
ष्टस्यैव तद्ध्वंसस्य प्रतियोगितावच्छेदकमेव द्व्यणुकत्वं अवच्छेदकत्वं चान्यूनवृत्तित्वमेवेत्यत आह। नहीति। ध्वंसादिप्रतियोगि
तायां गोत्वादिधर्मावच्छिन्नत्वे मानाभावः गौर्नष्टेत्यादिप्रतीतेर्गोप्रतियोगिकध्वंसावगाहितयैवोपपत्तेः बाधनिश्चयादिप्रतिबंधक
त्वाद्यनुरोधेनैव भेदात्यन्ताभावयोर्गोत्वावच्छिन्नप्रतियोगिकत्वोपगमात् न चैवं तद्गोत्वावच्छिन्नवत्ताबुद्धिं प्रति तद्गोत्वावच्छिन्नाभा
ववत्तानिश्चयत्वेन विरोधितया तद्गवात्यन्ताभावस्येव तद्गोध्वंसस्यापि तद्गोत्वावच्छिन्नप्रतियोगिकत्वमावश्यकमिति वाच्यं एकस
त्वस्ये न तद्गवात्यन्ताभावग्रहेपि स्वस्वान्तरेण तद्गोत्वावच्छिन्नवत्ताबुद्ध्युत्पादात्तस्य स्वस्य विशेषमन्तर्भाव्यैवात्यन्ताभावग्रहस्य प्रति
बंधकतया ध्वंसग्रहस्य साधारण्याभावात् ध्वंसत्वस्याभावत्वाघटितत्वेन तदवगाहिबुद्धेरत्यन्ताभावसाधारण्यायोगाच्चेत्याशयेनाह म
तेपीति ननु प्रतियोगिमत्तद्वेत्यसिद्धं तत्रात्यन्ताभावानुपगमादत आह अन्यथेति अत्यन्ताभावस्येति गोत्वादिना गवात्यन्ताभाव
स्येत्यर्थः तेन गगनाद्यभावस्य गोविशिष्टगोत्वाद्यभावस्य वा प्रलयवृत्तित्वेपि न क्षतिः कालमात्रेति अत्र गवात्यन्ताभावस्य दैशिकवि

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शेषणेन तया कालमात्रावृत्तित्वं प्राच्यैरिष्यत एव सदानेनत्वव्यवहारस्य कालिकविशेषणतयैव संभवादिति भावनीयम्। ननु प्रति
योगिविशिष्टेऽपि काले तदत्यन्ताभावसत्त्वेन वाद्यधिकरणावच्छेदेनेदानीं गौर्नास्तीत्यपि प्रतीतिः कथं न स्यादत आह इयं त्विति
एकस्य प्रतियोगिमतः कालस्य देशभेदः प्रतियोग्यनधारदेशः तथात्वे अत्यन्ताभाववत्त्वं अपरस्येति ध्वंसादिमतः कालस्येत्यर्थः स्व
रूपावच्छिन्नमिति निरवच्छिन्नमित्यर्थः तथात्वमिति पूर्वेणान्वयः नन्विदानीमश्वेन गोत्वमित्यादिप्रतीतेः कालवृत्तितयाऽव्यवृत्ति
तया च गोत्वाभावावगाहितयैवोपपत्तौ देशस्य कालवृत्तितावच्छेदकत्वे मानाभाव इत्यत आह देशइति इवार्थे सादृश्यं तच्चानुभ
समानत्वेन तथा चानुभवे एव देशस्य कालवृत्तितावच्छेदकत्वे मानं अन्यथा गृहेनेदानीं गौरित्यादिप्रत्ययबलात्। गृहादिदेशस्य
गवात्यन्ताभाववत्तायामपि कालो नावच्छेदकः स्यात् तत्र गवाभावे गृहवृत्तित्वेन कालवृत्तित्वोभयावगाहिनायाः सुवचत्वादिति भा
वः नन्वेवमपि प्रतियोगिवैयधिकरण्यघटितसाध्यवृत्तिसाध्यकस्य लीयलक्षणस्य गोमान्गोत्वादित्यादावतिव्याप्तिर्गवाद्यभावस्य
सृष्टिकाले प्रतियोगिसमानाधिकरणतया लक्षणाघटकत्वादाह। तच्छून्ये इति गवादिशून्ये चेत्यर्थः। तथा च यत्किंचिद्वृत्त्यधिकरणाव
च्छेदेन प्रतियोगिवैयधिकरण्यं यदग्रे वाच्यं तस्य गवाद्यभावेऽपि सत्त्वान्न तत्रातिव्याप्तिरिति भावः न चेति वाच्यमित्यन्वयः संसर्गाभा
वविशेषइति सदाननसंसर्गाभाव इत्यर्थः संसर्गेति स्वप्रतियोगितावच्छेदकसंसर्गेण यत्प्रतियोग्यारोपस्तज्जन्यप्रतीतिविष
योऽभावस्तत्त्वमित्यर्थः संसर्गस्तु तादात्म्यभिन्नो ग्राह्यस्तेन भेदव्युदासः ध्वंसप्रागभावयोरप्युत्तरकालपूर्वकालावेव प्रतियोगिता
वच्छेदकसम्बन्धावच्छिन्नितिनाभ्यामेव संबन्धाभ्यां प्रतियोग्यारोपः प्रागभावध्वंसयोः प्रत्यक्षहेतुरतस्तयोर्नाव्याप्तिरिति प्राचामाशयः घ
टितमिति तथा च चक्रकादिप्रसंग इति भावः तत्र जन्यत्वे नियमांतरस्य साध्यसंबंधितावच्छेदकरूपवत्त्वादिस्वरूपस्येत्यर्थः इति

CC-0. In Public Domain. Digitization by eGangotri

जा॰सि॰ केचित्तु। नन्वभाववद्वृत्तौ प्रतियोग्यारोपस्य हेतुतास्वीकारे मानाभावादुक्तसंसर्गाभावत्वघटितव्याप्तिलक्षणस्यासंभवः कथं चिद
१२ भावलौकिकप्रत्यक्षं प्रत्यारोपस्य हेतुतास्वीकारेप्यतीन्द्रियसाध्यके व्यभिचारिण्यतिव्याप्तिः तत्र हेतुसमानाधिकरणसाध्याभाव
स्यातीन्द्रियतया निरुक्तसंसर्गाभावत्वविरहादत आह वक्ष्यते चेति। भेदभिन्नाभावत्वं संसर्गाभावत्वं सदातनत्वविशिष्टं च तदेवा
त्यन्ताभावत्वं भेदत्वं संसर्गविधया तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वमनुयोगिताविशेषो वेत्याशयः यत्तु भेदत्वादिव
त्संसर्गाभावत्वमप्यखण्डोपाधिरिति तत्तुच्छं भेदत्वादिवदखण्डस्य संसर्गाभावत्वस्यानुभवेनाविषयीकरणात् तान्त्रिकव्य
वहारस्य भेदभिन्नाभावत्वादिनाप्युपपत्तेः वैसुगतमनुरुध्याह अनुपदमिति विवेचयिष्यत इति तदपि वा नोपादेयमित्यादि
ग्रन्थेनेति शेषः साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यघटितलक्षणमभिप्रेत्याह प्रयोजनविरह इति धूमसमा
नाधिकरणस्य वह्न्यादिभेदस्य प्रतियोगिसमानाधिकरणत्वादेव तादृशव्याप्तिविरहादिति भावः व्याप्यवृत्तिसाध्यकस्थली
यलक्षणस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताघटितत्वात् तदभिप्रेत्याह अव्याप्तिश्चेति तादात्म्येन गवादेः साध्य
तायां तत्संबंधावच्छिन्नात्यन्ताभावाप्रसिद्ध्या साध्याभाववत्त्वादाव्याप्तिरित्यर्थः इदमप्यभाववृत्तिरभावो नाधिकरणस्वरूपो न वा धर्मात्य
न्ताभाव एव धर्मिणो भेद इति मतेनोक्तम् यथा पटात्यन्ताभावस्वरूपस्य घटात्यन्ताभावभेदस्य तादात्म्यसम्बन्धावच्छिन्नत्वात्पटत्यन्ताभा
वस्य पटभेदस्वरूपस्य वा पटनिष्ठप्रतियोगिताया तादात्म्यसम्बंधावच्छिन्नत्वादव्याप्तिविरहादिति ध्येयम् ननु विषयतायां वृत्य
नियामकत्वमतेनाभावस्य गगनादौ सहजं एव प्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिरत आह विशेषगुण इति अत्र व्यभिचारनि राम:
रूपकः कालादिः तत्र कालिकसम्बन्धेन दिशि दैशिकसम्बन्धेन विशेषगुणस्य सत्त्वात्तदभावो न प्रतियोगिव्यधिकरण इति १२

अन्यथा पटभेदस्वरूपस्य पटभेदत्वात्यन्ताभावस्य पटत्वात्यन्ताभावस्य च पटनिष्ठप्रतियोगिताया एव तादात्म्यसम्बन्धावच्छिन्न
त्वादव्याप्तिविरहादिति ध्येयम् ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवत्यतिव्याप्तिः विशेषपदं व्यभिचारत्वरक्षायै द्रव्यत्वादिन्युक्तौ सम्बन्धसामान्येन विशेषगुणस्य मनस्यसत्वान्नातिव्याप्तिसंभवः कालोपाधित्ववद्दिगुपाधित्वस्यापि मनस्यसत्वादव्यावर्त्तकत्वादन्यथा मनसः कालोपाधित्वमपि स्यादत उक्तं मनोन्येति यत्तु मूर्त्तस्य दिगुपाधित्वं महादिग्वृत्तिताया अवच्छेदकत्वं न त्वधिकरणत्वमिति प्राचां मते सम्बन्धसामान्येनैव तत्स्य विशेषगुणानधिकरणत्वान्मनोन्यपदमिति तन्मन्दं एवमप्यवच्छेदकतासम्बन्धेनैव मनसो विशेषगुणवत्तायाः संभवेन मनोन्यपदवैयर्थ्यापत्तेः। ननु स्वमते दिक्कालयोरपीश्वरानतिरिक्तत्वादत्राव्याप्तिरेवेत्यत आह जातीति न च जातेर्व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशादेव नातिव्याप्तिरिति वाच्यं समवायेनाव्यापकत्वग्रहदशायामपि सम्बन्धसामान्येन प्रतियोगिवैयधिकरण्यघटितव्यापकत्वज्ञानात् समवायेन जात्यनुमित्यापत्तेरेव प्रकृतेः तिव्याप्तिपदार्थत्वात् जात्यादेरपि प्रागुक्तव्याप्यवृत्तित्वविरहाच्च अतिव्याप्तिं योजयति साध्यशून्येति विशेषणतादिकृता कालिकी च एकार्थेति समवायस्यापि स्वात्मक एव स्वरूपसम्बन्ध इति॥ तत्रापि जात्येकार्थसमवायोस्तीत्याशयः जातिः सतीति वत्समवायः सतिप्रतीतेरविशेषात् भावत्वात्समवेतत्वादित्यपि केचित् प्रतियोगितेति न यावज्ज्ञानाभावस्य तादृशेन समवायसंबन्धेन घटादौ प्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिः न च तादृशयत्किंचित्संबन्धेन प्रतियोगिसामानाधिकरण्याभावोक्तौ वह्निसामान्याभावस्यापि धूमवत्पर्वतावच्छेदेन महानसीयसंयोगेन प्रतियोग्यसमानाधिकरणत्वात् वह्निमान्धूमादित्यादावव्याप्तिः स्वप्रतियोगितावच्छेदकसम्बन्धसामान्येन तथात्वोक्तौ च जातिमान् जातित्वादित्यादावतिव्याप्तिः समवायेन जात्यभावस्यैव तादात्म्येन जातिमद्भेदत्वात् स्य च स्वप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन यज्जातिसंबंधितद्वृत्तित्वेन प्रतियोगिव्यधिकरणाभावादिति वाच्यं स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नं तादृशसम्बंधेन यत्प्रतियोगिसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैधितद्वृत्तित्वाभावस्योक्तत्वात् संयोगसामान्यावच्छिन्नवन्ह्यभावप्रतियोगितायां महानसीयसंयोगत्वादिविशिष्टानवच्छेद्य
तयावन्ह्यभावस्य पर्वतादौ महानसीयसंयोगसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेप्यव्याप्त्यभावादिति ध्येयम् ननु सम
वायावच्छिन्नवन्ह्यभावमादाय धूमादावव्याप्तिवारणार्थमग्रे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन प्रतियोगित्वं निवेशनीयं
तथा च कपिसंयोगवत्तादात्म्येन साध्यतायामव्याप्तिः भेदमात्रस्यैव स्वप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन प्रतियोग्यधिक
रणप्रसिद्धेरत आह सम्बन्धिवेति। न च तादात्म्येन वस्तुमात्रस्यैवाव्याप्यवृत्तित्वात्तादृशसम्बन्धेन साध्यतायां प्रतियोगिवैयधि
करण्याप्रवेशादिदमयुक्तमिति वाच्यं मूलावच्छेदेन कपिसंयोगवद्भेदस्य वृक्षादौ स्वयमङ्गीकारात्तादात्म्येन कपिसंयोगवतोऽप्यव्या
प्यवृत्तित्वात् नन्वेवं प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावेत्यग्रिमनिष्कर्षेप्यप्रतीकारः प्रतियोगितावच्छेदकसम्बन्धेन यः प्रतियो
गिसम्बन्धिनस्तत्तद्व्यक्तित्वावच्छिन्नभेदकूटविशिष्टहेतुमद्वृत्तित्वस्यैव तत्र वक्तव्यत्वात् वस्तुनस्तु तादात्म्यसम्बन्धेनापि न कस्य
चित्प्रागुक्तव्याप्यवृत्तित्वमतोपर्याप्तमेव सम्यक् केचित्तु प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितायां यद्धर्मावच्छिन्न
त्वयत्सम्बन्धावच्छिन्नत्वोभयाभाव इत्यादिवक्ष्यमाणनिष्कर्षस्य तादात्म्येन साध्यतायां व्यभिचारिण्यतिव्याप्तिरतः प्रतियोग्यनधि
करणत्वं परित्यज्य प्रतियोग्यसम्बन्धित्वं चावश्यं तत्र निवेश्यमित्याशयेन सम्बन्धित्वमुक्तमित्याहुः ननु कपिसंयोगाभावस्यापि गुणा
दौ प्रतियोग्यसमानाधिकरणत्वात् कपिसंयोगि एतत्त्वादित्यादावव्याप्तिरत आह तद्विशिष्टस्येति प्रतियोगिसामानाधिकरण्याभाव
विशिष्टस्येत्यर्थः तथा च हेतुमति वृक्षादौ संयोगवद्वृत्तित्वाभावविशिष्टः संयोगाभावो नास्तीति नाव्याप्तिः विशिष्टनिरूपिताधेयत्व
मप्यतिरिक्तमित्याशयेनेदं यद्वा तद्विशिष्टेत्यस्य हेत्वधिकरणेऽन्वयः तत्र च षष्ठ्यर्थोऽधिकरणत्वं तेन प्रतियोगिसामानाधिकरण्याभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वविशिष्टस्याधिकरणं यद्धेत्वधिकरणं तद्वृत्तित्वमभावे वाच्यमित्यर्थः यद्यपि प्रतियोग्यसमानाधिकरणत्वं हेतुविशेषणीकृत्य
प्रतियोग्यसामानाधिकरण्यविशिष्टो यो हेतुस्तदधिकरणवृत्त्यभावस्य प्रतियोगितानवच्छेदकत्वं वाच्यं तावतैव संयोग्येतत्त्वादित्या
दौ नाव्याप्तिसंभावना वृक्षस्य प्रतियोगिवैयधिकरण्यावच्छिन्नहेत्वधिकरणत्वाभावात् तथापि कर्मणि च संयोगाभावः प्रतियोग्य
समानाधिकरण इत्यग्रिममूलस्वरसेन हेतुसमानाधिकरणाभावस्यैव विशेषणं प्रतियोग्यसमानाधिकरणादलमत एतावान्वया
सङ्गत्यवधेयम् ननु भेदस्य व्याप्यवृत्तितया प्रतियोगिसमानाधिकरणभिन्नत्वोक्तौ च प्रागुक्ताव्याप्तिवारणासंभवेन तद्विशिष्टस्येत्या
दिकं विफलमत आह तद्वृत्तीति प्रतियोगिमद्वृत्तिभिन्नत्वमित्यर्थः अत्रेति अस्वरसादित्यन्वयः तदभाववत्त्वमिति तथा च संयो
गी सत्त्वादित्यादावतिव्याप्तिरिति भावः ननु संयोगाभावे गुणे न संयोगसामानाधिकरण्यमिति प्रतीतिबलादेव गुणावच्छेदेन सं
योगाभावे प्रतियोगिसामानाधिकरण्याभावसत्त्वान्नातिव्याप्तिरत आह प्रतीतेरिति उक्तप्रतीतेः संयोगाभावनिष्ठस्य संयोगसमा
नाधिकरण्यस्यावच्छेदकत्वाभावमेव गुणादौ संयोगानधिकरणीभूतगुणवृत्तित्वमेव वा संयोगाभावादाववगाहनादिति भावः वस्तु तत्र
तिमूलकारः तच्चेत्तदपि हेत्वधिकरण इति तेन कपिसंयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकीभूतगुणाद्यवच्छिन्नत्वे
पिकसंयोगी एतत्त्वादित्यादौ नाव्याप्तिः ननु हेत्वधिकरणे प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं प्रतियोगिसामानाधिकर
ण्यानवच्छेदकीभूतहेत्वधिकरणवृत्तित्वं तच्च व्याप्यवृत्तेरवच्छेदकत्वविरहादप्रसिद्धम् गुरुतरं चेत्यत आह प्रतियोग्यनधिकरणे
ति कस्यचिदिति अनधिकरणत्वमिति परेणान्वयः तद्व्यक्तेतरेति प्रतियोगिव्यक्त्यन्तरेत्यर्थः स्वमते संयोगसामान्याभावस्य केवला
न्वयित्वात् तत्साध्यकं सत्त्वादित्यादिकं सद्धेतुरेवेत्यतः साध्यान्तरमाह द्रव्यत्वाभावेति यद्यपि द्रव्यत्वाभावस्याव्याप्यवृत्तित्वात्तत्साध्य
द्वे

CC-0. In Public Domain. Digitization by eGangotri

केप्रतियोगिवैयधिकरण्याप्रवेशादिदमसंगतम्। नचात्रकालिकसम्बन्धावच्छिन्नद्रव्यत्वाभावः साध्यः सचगुणाद्यवच्छेदेनका
लएवाव्याप्यवृत्तिरितिवाच्यं तथासतितस्यकेवलान्वयित्वात्तत्साध्यकसत्त्वादेः सद्धेतुत्वेनतत्रातिव्याप्तेरुपन्यासस्यानौचित्या
त्। तथापिसत्त्वहेतौद्रव्यत्वाभावस्यव्यभिचारधीदशायामपिप्रतियोगिसामान्यानधिकरणसत्त्ववन्निष्ठाभावप्रतियोगितानव
च्छेदकंद्रव्यत्वाभावत्वमित्याकारकव्यापकत्वज्ञानादनुमित्यापत्तिरेवात्रातिव्याप्तिशब्दार्थः वस्तुतोद्रव्यत्वाभावस्यापिनप्रागुक्त
व्याप्यवृत्तित्वमितिध्येयम् प्रथमसाध्येतिव्याप्तिंग्राहयति साध्याभाववतइति तत्प्रतियोगीतितत्स्यसंयोगात्मनः साध्याभावस्यपः
प्रतियोगीसंयोगविशेषाभावस्तद्वत्त्वादित्यर्थः द्वितीयेतिव्याप्तिंप्रयोजयतिनित्यत्वादीति नित्यत्वादिविशिष्टंयद्द्रव्यत्वंतदभावा
त्मकोयः साध्याभावस्यप्रतियोगीतदधिकरणत्वात् साध्याभाववतोद्रव्यस्येतिपूर्वेणान्वयः ननुविशिष्टद्रव्यत्वाभावोनद्रव्यत्वस्व
रूपस्यसाध्याभावस्यप्रतियोगीकिंतुनित्यत्वादिविशिष्टद्रव्यत्वस्यैवेतिद्रव्यत्वंप्रतियोगिव्यधिकरणमेवेत्यतआह स्वाभावेति स्वं
नित्यवृत्तित्वविशिष्टद्रव्यत्वं नचनित्यत्वविशिष्टद्रव्यत्वाभावस्याभावोनित्यवृत्तित्वविशिष्टद्रव्यत्वंविशिष्टस्यानतिरिक्ततयाजन्यद्र
व्येपिनित्यवृत्तित्वविशिष्टद्रव्यत्वस्याभावोनास्तीतिप्रतीतिप्रसंगात् किंतुनित्यैकत्वादिकमेवेतिनातिव्याप्तिरितिवाच्यंविशिष्टाधिक
रणतायाः प्रतीतिनियामकतयैवातिप्रसंगभंगेद्रव्यत्वमपेक्ष्यनित्यानंतत्वसंख्यापरिमाणादौतादृशाभावत्वकल्पनायांगौरवात् अभा
वाभावस्यैवप्रतियोगित्वमितिसिद्धांतप्रवादाच्च नन्वेवमपिनिखिलाभावस्यैवस्वाश्रयतत्तद्व्यक्तिवृत्तित्वविशिष्टंयत्स्वंतदभावात्म
कस्वप्रतियोगिनासहसमानाधिकरण्यात्प्रतियोगिव्यधिकरणाभावाप्रसिद्धेर्वनातिव्याप्तिः एकव्यक्तिमात्रवृत्तीनांगुणाद्यात्मका रामः
भावानामपिपूर्वक्षणावृत्तित्वविशिष्टस्यस्वस्ययोभावस्तादृशप्रतियोगिनासार्द्धंसामानाधिकरण्यात् नचवक्ष्यमाणखंडशः प्रसि १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्धा गगनाभाव एव प्रतियोगिव्यधिकरणस्तस्यापि नित्यवृत्तित्वविशिष्टो योगगनाभावस्तदभावात्मकेन स्वप्रतियोगिना समं समाना
धिकरणत्वात् गगनाभावस्यैव संयोगादिसम्बन्धेनाभावत्वावच्छिन्नाभावतया खंडशः प्रसिद्धापि तस्य प्रतियोगिव्यधिकरणत्वासं
भवाच्च एतेन नित्यत्वादिविशिष्टस्य गगनाद्यभावस्य योभावस्तदभावत्वेन गगनाभावस्य तस्य केवलान्वयितया जन्येपि नित्यवृत्तित्वविशि
ष्टस्य गगनाभावस्याभावो नास्तीति प्रतीतिप्रसंगात् किंतु नित्यत्वादेरेव तथात्वमित्युक्तावपि न निस्तार इति चेदत्र नव्याः यथाश्रुतस्य
प्रागुक्तक्रमेण प्रतियोगिव्यधिकरणाभावस्याप्रसिद्धा वन्हिमान्धूमादित्यादौ सर्वत्रासंभवः स्यादतो यत्किंचित्स्वप्रतियोगित्वं य
त्संबंधावच्छिन्नं तादृशसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं यत्साधनाधिकरणं तन्निष्ठाभावस्य सा
ध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव लक्षणे प्रवेशनीयं तथा च सद्धेतुस्थले द्रव्यत्वाभाववान् स
त्वादित्यत्रापि संयोगेन घटाद्यभाव एव प्रतियोगिव्यधिकरणः तदीयं हि घटनिष्ठप्रतियोगित्वं यादृशसंयोगसम्बन्धेनावच्छिन्नं ता
दृशसंयोगसम्बन्धेन साधनवतो द्रव्यस्य तदीयप्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणत्वमक्षतमेव न चैवमपि तदी
यस्य साध्यतावच्छेदकीभूतस्वरूपसम्बन्धावच्छिन्नप्रतियोगित्वस्याप्रसिद्धा न संगतिरिति पूर्वलक्षणवृत्तित्वादिविशिष्टस्य घटाद्य
भावस्याभाव एव तत्प्रसिद्धिरित्याहुः स्वावच्छेदकसम्बन्धावच्छिन्नस्वरूपकाभावप्रतियोगिसामान्यानधिकरणाहेत्वधिकरणा
वृत्यभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभाव इत्यग्रिमलक्षणाभिप्रायेणेदं संयोगेन घटाभा
वस्यैव प्रतियोगिवैयधिकरण्यसौलभ्यादित्यपि वदंति प्राचां मते संयोगसामान्याभावसाध्यकमात्मत्वं विरुद्धमतः कपिसंयोगसा
मान्याभाव उक्तः वृक्षादावुत्पत्तिकालावच्छेदे न गुणसामान्याभावसत्वाद्वृक्षत्वादिकं परित्यज्यात्मत्वं हेतुरुक्तः यद्यपि वृक्षादेः स्वस

CC-0. In Public Domain. Digitization by eGangotri

मवेन कपिसंयोगप्रतियोगिनः समवेतसामान्याभावस्य द्रव्यमात्रसमवेताभावस्य चानधिकरणत्वाद् वृक्षत्वादेरपि हेतुतायामव्या
प्तिः सम्भवत्येव, तथापि सत्ताद्रव्यत्वयोरेव समवेताभावद्रव्यमात्रसमवेताभावयोरभावत्वं लाघवात्कपिसंयोगाद्यात्मकसमवेत
मात्रस्य न तथात्वं गौरवादित्याशयः। गुणसामान्याभावस्य संयोगप्रतियोगित्वमाविष्कर्तुं गुणानामित्युक्तं नन्वप्रतियोगिनेति संयि
संयोगीयप्रतियोगितावच्छेदकेत्यर्थः। न च गुणसामान्याभावस्याभावे द्रव्यत्वमेव लाघवान्न गुणो गौरवादतः संयोगप्रतियोगि
त्वं न गुणसामान्याभावस्येति वाच्यं, घटादावुत्पत्तिदशायां गुणसामान्याभावसत्त्वेन द्रव्यत्वस्य तदभावत्वासम्भवाद् भावाभाव
स्य प्रतियोगित्वनियमाच्चेति भावः। यादृशेति। तथा च गुणसामान्याभावनिष्ठप्रतियोगिताया अवच्छेदकं यद्गुणसामान्याभावत्वं हेतु
मतस्तदवच्छिन्नानधिकरणत्वेपि संयोगाभावत्वस्य तादृशप्रतियोगितानवच्छेदकत्वान्न रूपेण साध्यतायामात्मत्वहेतौ नाव्याप्तिः
द्रव्यत्वाभाववान् सत्त्वादित्यादौ तु द्रव्यत्वाभावत्वावच्छिन्नानधिकरणत्वं यद्धेतुमतस्तन्निष्ठाभावस्य तादृशप्रतियोगितावच्छेदक
मेव द्रव्यत्वाभावत्वमतो नातिव्याप्तिरिति भावः। न च वह्निमान् तत्पर्वतत्वादित्यादौ तत्र वह्निसंयोगसम्बन्धेन साध्यतायामव्याप्तिः त
त्सम्बन्धावच्छिन्नघटाद्यभावप्रतियोगिनः तेन सम्बन्धेनाधिकरणाप्रसिद्धेरिति वाच्यं, यत्प्रतियोगितावच्छेदकसम्बन्धावच्छि
न्नाधिकरणतानिरूपितस्वरूपसम्बन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्त्वं हेतुमतस्तेन स
म्बन्धेन तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात्, घटत्वावच्छिन्नाधिकरणतासामान्यस्यैव तत्तद्वह्निनिरूपितसंयोग
सम्बन्धावच्छिन्नाधिकरणतानिरूपितस्वरूपसम्बन्धेनाभावस्य हेतुमति सत्त्वेन तादृशसम्बन्धेन घटाद्यभावस्यैव प्रतियोगित्वाधि
करणत्वसम्भवात्, तादृशाभाववत्त्वं च हेतुमतो निरवच्छिन्नविशेषणतयैव वाच्यमतः कपिसंयोगाधिकरणत्वाभावस्य वृक्षवृत्तित्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिनाव्याप्तिः अत्र प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वं साध्यतावच्छेदकताघटकसम्बन्धेनैव ग्राह्यं तेनायः पिंडस्य कालिका
दिसम्बन्धेन यद्धूमत्वविशिष्टतृणादिकं संयोगेन तस्याधिकरणत्वेपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः प्रतियोगितावच्छेदकता
घटकसम्बन्धेन तदवच्छिन्नत्वनिवेशे तु प्रतियोगितानवच्छेदकत्वमित्यत्रावच्छेदकत्वं साध्यतावच्छेदकताघटकसम्बन्धेनैव
ग्राह्यम् । अन्यथा विषयितासम्बन्धेन रूपत्वावच्छिन्नस्य ज्ञानादेः पृथिव्यादौ समवायेनाभावस्य सत्वाद्रूपावच्छिन्नपृथिवीत्वादि
त्यादावव्याप्तिप्रसंगात् वस्तुतः साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नं यत्प्रतियोगितावच्छेदकत्वं तन्निरूपितस्वरूपसम्बन्धे
नैव निरुक्तप्रतियोगितावच्छेदकत्वस्याभावः साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नं यत्प्रतियोगितावच्छेदकत्वं तन्निरू
पितस्वरूपसम्बन्धेनैव निरुक्तप्रतियोगितावच्छेदकत्वस्याभावः साध्यतावच्छेदकधर्मे वक्तव्यः तेन वह्निमान्धूमादित्यादौ य
त्र वह्नित्वादिनिरूपितसमवायादिसम्बन्धेन वह्नित्वादेः साध्यतावच्छेदकत्वं तत्र तादृशसंबंधावच्छिन्नस्य प्रतियोगिव्यधिक
रणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्याप्रसिद्धावपि न क्षतिरिति ध्येयं अत्र यादृशप्रतियोगितावच्छेदकधर्मेण तादृशप्र
तियोगिताश्रयाधिकरणीभूत यद्यद्व्यक्तिनिष्ठाधिकरणतावच्छेदकत्वस्याधिकरणतावच्छेदकत्वस्य च द्वयोर्व्यतिरेकस्तत्तद्व्यक्ति
भेदकूटवत्त्वमेव यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वमित्यस्यार्थो बोध्यः तेन धूमवद्वह्नेरित्यादिप्रतीतेर्वश्यक्लृप्ताभिः
पर्वतत्वादितद्धर्मविशिष्टतत्तद्धूमत्वावच्छिन्नाधिकरणताव्यक्तिभिरेवोपपत्तौ धूमत्वाद्यखंडधर्मावच्छिन्नाधिकरणतायां माना
भावात् धूमादिसामान्याभावप्रतियोगितावच्छेदकं यद्धूमत्वादिकं तदवच्छिन्नाधिकरणत्वाप्रसिद्धावपि धूमवान्वह्नेरित्यादौ ना
तिव्याप्तिः धूमाधिकरणतत्तद्व्यक्तिभेदकूटवत्त्वमादायैव धूमसामान्याभावस्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यसंभवादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा.सि निध्येयं नन्वत्र प्रतियोगित्वं नातिरिक्तः पदार्थः प्रतियोगित्वादिकं तु स्वरूपसम्बन्धविशेष इत्याद्युत्तरग्रंथविरोधात् किंतु स्वरू
१६ पसम्बन्धविशेषः स च यदि प्रतियोगिस्वरूपः तदा वन्हिमान् धूमादित्यादौ सर्वत्रासंभवः पटादिस्वरूपस्यैकस्यैव पटाद्यभावप्रति
योगित्वस्य घटत्वसमवेतत्वज्ञेयत्वावच्छिन्नतया तादृशावच्छेदकीभूतज्ञेयत्वावच्छिन्नस्य हेतुमति सत्वात् प्रतियोगिव्यधिक
रणाप्रसिद्धेः न च प्रतियोगितावच्छेदकरूपमेव प्रतियोगित्वमित्यदोषः समवायेन वन्हेः साध्यत्वे धूमादावतिव्याप्तिप्रसंगात् स
मवायावच्छिन्नवन्ह्यभावस्य वन्हित्वरूपं प्रतियोगित्वं समवायवत्संयोगस्यापि तदवच्छेदकसम्बन्धतयास्यावच्छेदकीभूततादृ
शसम्बन्धेन साधनवतः प्रतियोग्यनधिकरणत्वाभावात् प्रतियोगितावच्छेदकीभूतयत्किंचित्संबंधेन प्रतियोग्यनधिकरणत्वो
क्त्या तद्वारणे तु संयोगेन वन्हिसाध्यके धूमादावव्याप्तिः समवायावच्छिन्नवन्ह्यभावस्यैव समवायेन प्रतियोगिव्यधिकरणस्य वन्हि
त्वस्वरूपं यत्प्रतियोगित्वं तस्यैव संयोगेनाप्यवच्छिन्नत्वादिति चेत् अत्र वदंति प्रतियोगिस्वरूपं तदवच्छेदकस्वरूपं वा यत्प्रतियो
गित्वं तदपि कस्यचिदभावस्य केनचिद्धर्मेण सम्बन्धेन वावच्छिन्नं व्यवहारबलात् न तु सर्वेण सम्बन्धेन धर्मेण वा समवायावच्छि
न्नवन्ह्यभावप्रतियोगित्वं न संयोगावच्छिन्नमित्यादिव्यवहारात् तथा च यदभावीययत्प्रतियोगितावच्छेदकसम्बन्धेन यदभावी
ययत्प्रतियोगितानिरूपितावच्छेदकीभूतधर्मावच्छिन्नासम्बन्धित्वं हेतुमतस्तदभावीयत्प्रतियोगितानिरूपितावच्छेदकताशून्यत्वं
साध्यतावच्छेदके निवेश्यमित्यदोषः तत्प्रतियोगितेत्यपहाय यादृशप्रतियोगितेत्यभिधानादेव तादृशार्थलाभात् न च प्रतियोगितावच्छे
दकरूपं यदि प्रतियोगित्वं तदा यदभावीययादृशप्रतियोगितावच्छेदकसंबंधेन तदभावीयतादृशप्रतियोगित्वावच्छिन्नस्यानधिक राम:
रणत्वं हेतुमत इत्येव सम्यक् प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वप्रवेशो व्यर्थ इति वाच्यं वन्हिधूमोभयवान् वन्हेरित्या १६

दावति व्याप्त्यापत्तेः हेतुमन्मात्रस्यैव वह्निधूमोभयत्वावच्छिन्नाभावप्रतियोगित्वावच्छिन्नाधिकरणत्वादित्यस्मद्गुरुचरणाः ग्राह्य
सामानाधिकरण्यमिति परामर्शविषयसामानाधिकरण्यमित्यर्थः सम्बन्धविशेषेणैव साध्यसाधनयोः सामानाधिकरण्यज्ञानादनु
मितिस्तत्प्रतिबंधकतयैव विरोधस्य हेत्वाभासत्वमिति मतेनेदं यदि च येन केनापि सम्बन्धेन साध्यसाधनयोः सामानाधिकरण्य
ज्ञानादनुमितिः स्वव्यापकसाध्यसंबंधितामात्रं वा व्याप्तिः व्यापकत्वदले साध्यसाधनयोः संबंधविशेषप्रवेशनादेवातिप्रसंगभंगा
दिति विभाव्यते तदा परामर्शेन साधनस्यानुमित्या च साध्यस्य ग्राह्यं यत्पक्षतावच्छेदकेन सार्द्धं सामानाधिकरण्यं तत्र प्रविष्टो यादृ
शः संबंध इत्यर्थो बोध्यः धूमवान्वह्नेरित्यादौ महानसीयसंयोगेन सद्धेतौ संयोगमात्रेण हेतुमत्तामादाय व्याप्तिः एवं द्र
व्यत्वसाध्यके घटानुयोगिकसमवायेन सत्त्वादिहेतौ समवायमात्रेण तद्धेतुमत्तामादाय यापीत्यतो यत्सम्बन्ध इत्यपहाय यादृशसंबंध इ
त्युक्तं साध्यस्य चेति ग्राह्यसामानाधिकरण्ये प्रविष्ट इत्यन्वयः धूमाधिकरणे तत्तत्संयोगेन वह्न्यभावसत्त्वाद्वह्निमान्धूमादित्यादाव
व्याप्तिरतो यादृश इत्युक्तं तेन संबंधेन यो हेतुमानित्यस्य फलमाह धूमसमवायीति प्रतियोगितया इति अवच्छेदकत्वेपि वह्नित्वस
त्त्वे न क्षतिरित्यन्वयः साध्यस्य चेत्यादेः फलमाह धूमसंयोगीत्यादि ननु तादात्म्येन गवादेः साध्यत्वे सास्नादौ व्याप्तिस्तत्र साधनव
न्निष्ठान्योन्याभावप्रतियोगितायाः साध्यतावच्छेदकतादात्म्यसंबंधावच्छिन्नत्वे मानाभावस्स्वयमेव बाधाधिकारटिप्पण्यामु
त०ए क्तत्वादेवं धनी चैत्र इत्यादौ वृत्त्यनियामकस्वामित्वादिसंबन्धेन धनादेः साध्यतायामपि तादृशसंबंधावच्छिन्नप्रतियोगितासि त्वाप्र
द्धेरत आह यद्वेति यत्तु प्रतियोगितावच्छेदकसम्बन्धेन तद्वैयधिकरण्यप्रवेशः पुनः प्रतियोगितायाः साध्यतावच्छेदकसम्बन्धा
वच्छिन्नत्वविवक्षायां गौरवमतो यद्वेत्यादिकल्प इति तन्न उक्तसम्बन्धान्तरावच्छिन्नतत्तन्नत्वाभावप्रतियोगितावच्छेदकभेदकूटघ

CC-0. In Public Domain. Digitization by eGangotri

[नचोक्तमते द्रव्य एवं पर्वता द्यनुयोगिकसंयोगादिना वह्न्यादेः साध्यतायां तत्तद्रूपेऽव्याप्तिः तादृशप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिनो यदाश्रयकरणो नद्व्यतत्त्वं साध्यतावच्छेदकसम्बन्धेन यत्प्रतियोगिसम्बन्धि तदन्यत्वस्य च हेतुमत्त्वमित्येकं नीते वाच्यम्। तादृशप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानिरूपित विशेषणताविशेषेण साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानिरूपितविशेषणताविशेषेण वा तादृशप्रतियोग्यधिकरणत्वसामान्याभावस्योक्तत्वात्। अन्यथा कालिकादिसम्बन्धेन सर्वस्यैव हेतुमतः प्रतियोग्यधिकरणतावत्त्वा प्रतियोग्यनधिकरणहेत्वधिकरणाप्रसिद्धेः]

जा॰ सि॰ टिनत्वेन यद्येत्यादिकल्पस्यैव गुरुतरत्वादित्याहुः संबंधभेदेन साध्यतावच्छेदकसंबंधेन तत्तत्संबंधविशेषेण साध्यसाधनयोः सा
१७ मानाधिकरण्यप्रवेशे तादात्म्येन हेतुसाध्यभावे ऽव्याप्तिः तादृशसम्बन्धेन हेतुसाध्ययोरधिकरणाप्रसिद्धेरत आह। एवं स्थित इ
ति संबंधविशेषस्यात्र निवेशे स्थिते इत्यर्थः सामानाधिकरण्याद्याविनत्यादिपदेन हेतुसामानाधिकरण्यप्रविष्टहेत्वधिकरणस्य परि
ग्रहः प्रयोजनमाह तथा चेति धर्मिणोपीति तादात्म्येन व्याप्यत्वं व्यापकत्वं च निर्वहतीत्यर्थः अन्यथा तादात्म्ये न हेतोः साध्यस्य चा
धिकरणाप्रसिद्ध्या न तन्निर्वाह इति भावः योन्योन्याभाव इति यो भाव इति वक्तुमुचितं अन्योन्याभावत्वनिवेशे वैयर्थ्यादिति ध्येयम् त
न्दत्त्वावच्छेदकवह्निमत्त्वेति वह्निमत्त्वं च वह्न्यधिकरणत्वं न त्वाधिकरण्यकीनां भेदेप्यभिन्नमित्याशयेनेदं अत्र साध्यसाधनयोरि
वत्तदीयसंबंधयोरपि भेदे न व्याप्तेर्भेदात् तादात्म्ये न हेतुसाध्यकस्थले हेतुमन्निष्ठाभावाप्रतियोगिसाध्यतादात्म्यमेव व्याप्तिर्वक्तुमुचि
ता लाघवादिति वदंति एवमिति सामानाधिकरण्यादौ सम्बंधित्वनिवेशे कृते इत्यर्थः धर्मिण इति वस्तुन इत्यर्थः तथा च गोः सास्नाव
त्वाद्वह्निमान्धूमवत इत्यादौ तादात्म्यसंबंधेन व्यापकता व्याप्यतापि संगच्छत इति भावः ननु तादात्म्ये न धर्मिणो धर्मव्याप्यता याम पसि
द्धान्त इत्यत आह अत एवेति धर्मिणो धर्मव्याप्यत्वादेवेत्यर्थः नत्र तत्र व्यतिरेकेग्रंथे इत्यादि ननु समवायेन जलादौ पृथिवीत्वाभावव्या का। कृ।
त्वा प्यपरतयैव तद्ग्रंथसंगतिरित्याशंक्य न यासति पृथिव्यां जलादिभेदसाधनार्थं तदुपन्यासो न स्याद्व्यापकताघटकसंबंधावच्छिन्नव्या
पकाभावेन व्याप्यताघटकसम्बन्धावच्छिन्नव्याप्याभावस्यैव सिद्धेरित्यन्वयिनि दृष्टांतपूर्वकं परिहरति यथा चेति पक्षविशिष्टेति पक्ष
विषयक इत्यर्थः प्राचां मते पक्षविशेष्यकज्ञानस्यैव पक्षप्रकारकज्ञानस्यापि कारणत्वात् धूमावयवइति न वह्निधीरित्यन्वयः कथमि रामः
ति नियमो पपद्यत इति परेणान्वयः न संयोगावच्छिन्नाभावो नुमितौ भासत इति तदर्थः निवर्तते चेति धूम इति पूर्वेणान्वयः तादात्म्ये १७

(महानसे संयोगेनोत। नानिवर्तत इत्यन्वयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैवेति समवायेन व्याप्यतायां तु समवायेन जलस्यात्यन्ताभावः सिध्येदिति जलभेदसाधनार्थं तद्ग्रंथावतारो न स्यादिति भावः नन्वे
तावतापि तादात्म्यसंबंधावच्छिन्नजलाभावः सिद्धो न तु जलान्योन्याभाव इति तद्दोषतादवस्थ्यमत आह स एव वेति धर्मिणो धर्मव्या
प्यत्वे प्राचां संवादमुपन्यस्य धर्मिणो धर्मव्यापकत्वेन माह इत्थमेव वेति धर्मिणो धर्मव्यापकत्वे युक्तिमप्याह अत एवेति धर्मिणो ध
र्मव्यापकत्वादेवेत्यन्वियं गौरित्यनुमितिर्गवेतरावृत्तित्वरूपायां शुद्धगोत्वनिरूपितव्याप्तेर्ज्ञानात् समवायेन निरवच्छिन्नगोत्वसा
ध्यकैर्भविष्यति साध्यवदन्यवृत्तित्वस्वरूपाया अपि व्याप्तेरनुमितिहेतुत्वस्याग्रे वाच्यत्वादनत्तादृशानुमित्यनुरोधात् धर्मिणो धर्म
व्यापकत्वस्वीकारोऽनुचित इत्यत उक्तं गोत्वत्वेति गोत्वत्वं गवेतरावृत्तित्वं तथा च गवेतरावृत्तित्वरूपायां गोत्वव्याप्तेर्ज्ञानात् तादृशायामनु
त्पन्नायाम् इयं गौरित्यनुमितेर्गोत्वविधेयत्वासंभवाद्गोविधेयत्वमेवेति तदनुरोधादवश्यं धर्मिणो व्यापकत्वं वाच्यमिति ननु गोः साध्यत्वे
पि गोत्वं हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकमित्याकारकव्याप्तिधियोऽनुमितिहेतुत्वात् तत्र च धर्मितावच्छेदकविधया गोत्वत्वग्र
हस्यापेक्षितत्वात् तदग्रहे गोविधेयकानुमितिरप्यनुपपन्नेत्यत आह आदीति आदिना पक्षधर्मतापरिग्रहः तथा च गवेतरावृत्ति
त्वव्याप्तेः सास्नाव्यापकतावच्छेदकग्रहे धर्मितावच्छेदकतयोपस्थितिध्रौव्येपि तद्विशिष्टस्य यत्र न पक्षधर्मताधीस्तत्रैवायं गौरित्यनु
मितेर्गोविधेयकत्वमावश्यकमिति तदनुरोधेनैव तादात्म्ये नैव व्यापकत्वं वाच्यमित्याशयः यत्तु शुद्धगोत्वावच्छिन्नानुमिति
प्रति गोत्वनिष्ठनिरवच्छिन्नविशेष्यताकमेव प्रतियोगितानवच्छेदकत्वज्ञानं हेतुरतो गोत्वत्वाग्रहे गोत्वे सास्नादिव्यापकतावच्छे
दकत्वग्रहसंभवाद्गोसाध्यकानुमितेर्नानुपपत्तिर्भाव लौकिकप्रत्यक्ष एवाधिकरणतावच्छेदकरूपेणानदुपस्थितेर्हेतुत्वादि
ति तन्न च्छेव्यभिचारज्ञानाऽप्रतिबध्यतयानादृशव्यापकताग्रहस्यानुमित्यहेतुत्वादन्यथानुत्पयुक्त्या शुद्धगोत्वविधेयकानुमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिनिरवच्छिन्नगोत्वविशेष्यताकस्य प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावाप्रतियोगित्वज्ञानस्य हेतुत्वादयं गौरित्यनुमितेर्गो
त्वत्वाद्यनुपस्थितावपि गोत्वरूपधर्मसाध्यकत्वस्य दुर्वारत्वापत्तेरिति दिक् प्राचां तु गोतादात्म्यस्य सास्नाव्यापकत्वग्रहादेव गो
स्नातादात्म्येन सिद्धिसम्भवान्न तदनुरोधेन गोस्नातादात्म्येन व्यापकत्वस्वीकारो युक्तः संबंधगतव्यापकत्वग्रहादेव सम्बंधिनोऽनुमितेर्सि
आदिसमतत्वात् अत उक्तं गोत्वत्वाग्रहदशायामिति गोतादात्म्यत्वाद्यग्रहदशायामिति तदर्थ इत्याहुः तच्चिंत्यं गोत्वत्वाद्यग्रहदशा
मित्यस्य गोत्वत्वेनाग्रहो यस्मादिति व्युत्पत्त्या गोत्ववाधनिश्चयदशायामित्यर्थः तथा च तदानीमयं गौरित्यनुमित्यर्थं धर्मिणो धर्मव्या
पकत्वमवश्यं स्वीकार्यमित्यपि वदंति गौरिति सिद्ध्यतीति परेणान्वयः गोर्व्यतिरेकादिति तादात्म्येनेत्यनुषज्यते एवं चेति सामानाधि
करण्यादौ सम्बन्धित्वप्रवेशे चेत्यर्थः संयोगत्वेन संयोगमात्रस्य प्रतियोगितावच्छेदकत्वे वृत्त्यनियामकसंयोगस्यापि तत्वे संबंधसिद्धमतो
मात्रपदं सम्बन्धरूपत्वे इति अन्यथा तादृशप्रतियोगिताकाभावाप्रसिद्ध्या गगनादेः पृथिवीत्वव्यापकत्वं दुर्घटमेव स्यादिति भावः
तादृशसम्बन्धस्य प्रतियोगितानवच्छेदकत्वेपि द्वितीयकल्पानुसारेण व्यापकत्वं संपादयति साध्यतावच्छेदकसंबंधेनेति। तथा
च संबंधान्तरावच्छिन्नघटाद्यभावमादायैव लक्षणसमन्वय इति भावः द्रव्यत्वस्य गगनासंयुक्तविश्वान्तरे तद्व्यभिचारात् हेत्वन्तरमाह पृ
थिवीत्वादिति व्यापकत्वमिति गगनादेरिति पूर्वेणान्वयः ननूत्पत्तिकाले जन्यस्य प्रलयकाले नित्यस्य पृथिवीमात्रस्य गगनाभावव
त्वात् कथं तस्य पृथिवीत्वव्यापकत्वमत आह तदभाववतोपि गगनादेरभाववतोपि संयोगेनेति वृत्त्यनियामकसंयोगेन तत्संबंधित्वा
गगनादिसंबंधित्वात्। नन्वेवं निरुक्तव्याप्तिज्ञानात् घटो गगनवानित्यनुमितिः प्रमा स्यादत आह सिद्धिरपीति तथैव वृत्त्यनियाम
कसंयोगेनैव तथा च तादृशसंबंधेन गगनानुमितेः प्रमात्वमिष्टमेवेति भावः तेनासंबंधित्वादिति येन संबंधेन साध्यसामानाधिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रण्यंपरामर्शेभासतेनैवसम्बन्धेनसाध्यानुमितेःफलत्वादितिभावःसामानाधिकरण्यधियोहेतुत्वस्यनदंशेसंबंधविशेषनिवेश
स्यत्वानंगीकारमतेप्याह अव्यापकत्वाच्चेति। तेनेत्यनुषज्यते तथाचयादृशसम्बन्धेनसाध्यस्यहेतुव्यापकत्वंगृह्यते तेनैवस
म्बन्धेनसाध्यसिद्धिःफलमतोवृत्तिनियामकसम्बन्धेनसाध्यस्यहेतुव्यापकत्वासंभवादेवनतेनसाध्यस्यप्रमानुमितिरितिभावः
ननुवृत्तिनियामकसंयोगेनापिगगनस्यपृथिवीत्वादिव्यापकत्वंदुर्वारंनादृशसंबन्धेनगगनसंबन्धप्रसिद्ध्यागगनाभावस्यप्रति
योगिव्यधिकरणत्वाभावात् नादृशाभावांतरप्रतियोगित्वस्यचगगनादावसत्वादत आह॥ व्यक्तीत्यादि इदंवृत्तिनियामकसम्ब
न्धेनगगनादेरव्यापकत्वं तथाचनिरुक्तप्रतियोगिकत्वेत्यादिनावक्ष्यमाणंप्रतियोग्यसामानाधिकरण्यंवृत्तिनियामकसम्बन्धेनग
गनाभावेपिस्या[illegible]तीतिभावः॥ कालिकसम्बन्धेनगोत्वादौसाध्येघटादिकालोपाधिमात्र[illegible]तिघटत्वादिहेतौनाव्याप्तिःभिन्नकाली
ननतद्व्यक्तित्वावच्छिन्नाभावस्यैवघटादौप्रतियोगिवैयधिकरण्यसंभवादत उक्तमष्टद्रव्यातिरिक्तेति पृथिव्यादिचतुर्द्रव्यातिरिक्ते
तितुल्यार्थःगगनादेःकालत्वविरहादेवतद्व्युदासइतिध्येयं कर्मात्मकखंडकालस्यापिभिन्नकालीनतद्व्यक्तित्वावच्छिन्नाभावप्रति
योग्यनधिकरणत्वप्रसिद्ध्यातन्मात्रवृत्तिस्पंदत्वादिहेतौनाव्याप्तिरतस्त्वरमंद्रव्यपदं तथाविधकालत्वादावप्युक्तदिशानाव्याप्तिरतो
मात्रपदं समवायसंबंधेनहेतुतालाभायधर्मपदं अन्यथाकालिकेनमहाकालत्वाद्यधिकरणघटादौप्रतियोगिव्यधिकरणतोतत्त
द्व्यक्तित्वावच्छिन्नाभावप्रसिद्ध्यानाव्याप्तिरितिध्येयम्॥ नादृशधर्मस्यमहाकालत्वादेःसमवायादिनाव्यापकत्वंसंयोगाद्यव्याप्यवृत्तेः
सुघटमित्यत उक्तं विशेषणेनेति कालिकविशेषणतेत्यर्थःव्याप्यवृत्तिप्रमेयत्वादेःप्रतियोगिवैयधिकरण्याघटितमेवकालिकसम्बन्धा
वच्छिन्नव्यापकत्वंसंभवतीत्यत उक्तं अव्याप्यवृत्तीति नादृशंसाध्यंघटादिकंद्रव्यत्वादिकंचनद्वृत्तोपिकालस्यतदनधिकरणदेशावच्छे

जा॰सि देन कालिकसंबंधावच्छिन्नतदभाववत्वात् नह्येवंविधो वाच्यत्वादिस्तदनधिकरणदेशाप्रसिद्ध्या तदवच्छेदेन कालिकसंबंधाव
१९ च्छिन्नवाच्यत्वाभावस्य कालेऽसंभवादिति भावः नस्यादिति न या च कालो घटवान्महाकालत्वादित्यादौ व्याप्तिलक्षणाव्याप्तिरिति भा
वः प्रथमविवक्षानुसारेणादोषं संगमयति स्वावच्छेदकेति प्रतियोगितावच्छेदकसम्बन्धेनेत्यर्थः काले महाकाले तत्संबन्धावच्छि
ता| न्नस्य साध्यतावच्छेदकीभूतकालिकसंबन्धावच्छिन्नत्वस्यासंभवदिति परेणान्वयः द्वितीयविवक्षानुसारेणाह तेन सम्बन्धेनेति साध्यता यः|
वच्छेदकीभूतकालिकसम्बन्धेनेत्यर्थः नतु महाकालान्यत्वविशिष्टघटाभाव एवं प्रतियोगिव्यधिकरणः सुलभः न चात्र विशेषणविशे ता|
षशब्देन महाकालनिरूपितविशेषणताया एव विवक्षितत्वात्तादृशसम्बन्धेन निरुक्तप्रतियोगिवैयधिकरण्याप्रसिद्ध्यैवोक्ताभाव
स्यापि प्रतियोगिवैयधिकरण्यासंभवदिति वाच्यं तथा सति कालवृत्तिधर्मस्य तादृशविशेषणतया किमपि व्यापकं नस्यादित्यस्यैव
सम्यक्त्वे ऽष्टद्रव्यातिरिक्तत्वाभिधानस्य संदर्भविरोधापत्तेः स्वरूपसंबंधेन गगनादेर्वृत्तिमत्वेतु इत्यग्रिमविरोधाच्च महाकालीयविशे ग्रन्थ|
षणतया गगनादेर्वृत्तिमत्वेपि तादृशसंबन्धसामान्ये महाकालान्यत्वविशिष्टघटत्वावच्छिन्नप्रतियोगिताकत्वविरहात् तादृशघटत्वा
वच्छिन्नाभावस्यैव निरुक्तक्रमेण प्रतियोगिव्यधिकरणत्वसंभवेन पूर्वमतस्यैव सम्यक्त्वादिति चेन्न तदानीं महाकालान्यत्ववि
ष्टो घटः कालो यं महाकालान्यत्वविशिष्टघटवानित्यादिप्रतीत्या महाकालस्यापि तत्कालोपाध्यवच्छेदेन महाकालान्यत्वविशिष्ट
घटवत्वात् अन्यथोक्तप्रतीत्या खंडकाल एव विशिष्टघटवत्वावगाहने वस्तुमात्रस्यैव महाकालेऽसत्वप्रसंगात् इदानीं तदानी
मित्यादिप्रतीतिव्यतिरेकेण महाकालविषयिण्याः प्रतीतेः स्वरसतः कुत्राप्यसत्वात् न चैवं खंडकालस्याधिकरणत्वे मानाभा राम:
वः पटध्वंसविशिष्टः कालः पटवदन्य इत्यादिप्रतीतेः प्रमात्वानुरोधेनैव खंडकालस्यापि तथात्वादिति सिद्धांतानुसारिपंथाः परे तु १९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महानसीयवह्नित्वेनवह्निघटोभयत्वेनवाऽवच्छिन्नप्रतियोगिताकस्यधूमसमानाधिकरणाभावस्यप्रतियोगितावच्छेदक
त्वंवह्नित्वेप्यस्तीत्यव्याप्तिर्भियाऽवश्यंसाध्यतावच्छेदकताऽघटकोपिःसाध्यवृत्तिर्धर्मःतदनवच्छिन्नत्वंहेतुसमानाधिकर
णाभावप्रतियोगितालक्षणेप्रवेशनीयाप्रत्येकमुभयत्रपर्याप्तिसम्बन्धेनासतोधर्मस्यतादृशसम्बन्धेनोभयवृत्तित्वासंभवेन
हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणभिन्नत्वनिवेशायोगात् एवंचप्रकृतेमहाकालान्यत्वविशिष्टघटत्वाव
च्छिन्नाभावस्यप्रतियोगितायाःसाध्यतावच्छेदकताघटकेनमहाकालान्यत्ववैशिष्ट्यरूपधर्मेणानवच्छिन्नत्वात्तादृशप्रतियोगि
ताकाभावमादायनप्रतियोग्यधिकरणाभावस्यप्रसिद्धिसंभावनापीतिप्राहुःतच्चिन्त्यंप्रमेयवान्वाच्यत्वादित्यादौहेतुसमानाधिक
रणतादृशप्रतियोगिताकाभावाऽप्रसिद्ध्याऽव्याप्तिप्रसंगात् वस्तुतोयादृशप्रतियोगितावच्छेदकविशिष्टस्यानधिकरणत्वंहेतु
मनेत्यत्रावच्छेदकवैशिष्ट्यमवश्यंसाध्यतावच्छेदकताघटकसम्बन्धेनैववाच्यं अन्यथातप्तायःपिंडस्यापिकालिकसम्बन्धेनय
धूमत्वविशिष्टवह्न्यादिकंसंयोगसम्बन्धेनतदधिकरणतयाधूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेः एवंचयत्रसमवायेनघटत्व
विशिष्टस्यकालिकसंबंधेनसाध्यतातत्रमहाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्यसाध्यतावच्छेदकताघटकसम्बन्धे
नप्रतियोगितावच्छेदकानवच्छिन्नत्वमप्रसिद्धंस्वरूपसमवायाभ्यामेवतत्रतथात्वात् विशिष्टनिरूपितसमवायस्यचानभ्यु
पगमात्तत्तादृशाभावमादायनप्रसिद्धिसंभवइतिध्येयं केचित्तुसाध्यभेदेनव्याप्तेर्भेदाद्विशिष्टसाध्यकस्थलेएवयादृशप्रति
योगितावच्छेदकावच्छिन्नानधिकरणत्वंहेतुमनइतिवक्तव्यं अविशिष्टसाध्यकस्थलेतुप्रतियोगिताश्रयानधिकरणत्वंहेतुम
नइत्येवलाघवात् वक्तव्यं तथाचशुद्धघटस्यसाध्यतायांमहाकालान्यत्वविशिष्टघटाभावोपिप्रतियोगिसमानाधिकरणएव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·सि
२०

प्रतियोगिनाच प्रतियोगितावच्छेदकस्वरूपौलाघवात् ननु प्रतियोगिस्वरूपानेषां नानात्वेन गौरवादतोनेकप्रतियोग्यनधि
करणतामादाय संयोगित्वादित्यादावव्याप्तिरित्याहुः तच्चिंत्यं कालो घटोवान्महाकालत्वादित्यादावव्याप्तिवारणार्थमेव मविशि
ष्टसाध्यकस्थलेपि प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वप्रवेशस्य प्रामाणिकतया गौरवस्य किंचित्करत्वादिति सार्व
भौममतमाशंक्य निराचष्टे नचेति वाच्यमिति परेणान्वयः तादृशसंबंधेनेति साध्यतावच्छेदकसम्बन्धेनेत्यर्थः इदं चावृत्तीत्यस्य
प्रतियोगिन्यावृत्त्यान्वितं तादृशपदस्य प्रतियोगितावच्छेदकसम्बन्धपरत्वे पुनरग्रे प्रतियोगितासाध्यतावच्छेदकसम्बन्धाव
च्छिन्ना ग्राह्या तादृशसंबंधेनेत्यस्य फलमाह सत्त्वादीति विषयतापावृत्त्य नियामकत्वमते सत्त्ववति घटादौ ज्ञानाभावस्य सहज
न एव प्रतियोगिवैयधिकरण्यं संभवतीत्यतः संयोगसामान्यस्येति नातिप्रसंग इति ज्ञानवान् संयोगवान् वा सत्त्वादित्यादौ ना
तिप्रसंग इत्यर्थः सत्तावद्वृत्तित्वसामान्याभावस्य संयोगादावभावादुक्तातिव्याप्तिवारणमेव यत्किंचित्सदस्यापि प्रयोजनमित्यव
धेयं प्रतियोगितावच्छेदकविशिष्टेत्यस्य फलमाह भूतत्वेत्यादि स्वयं मनसः खंडनात् भूतत्वमूर्तत्वोभयसाध्यकमूर्तत्वस्य सद्धे
तुतामाशंक्याह गुणकर्मान्यत्वेत्यादि विशिष्टांतद्वयं मनोगुणयोः क्रमेणान्वितं इदं च विशिष्टस्यानतिरिक्तत्वं विशिष्टधर्मावच्छि
न्नाधेयत्वस्यातिरिक्तत्वमित्यभ्युपेत्य अन्यथा सार्वभौममते उभयत्वस्यैकविशिष्टापरत्वे भूतत्वमूर्तत्वोभयगुणकर्मान्यत्वस
त्वयोरतिरिक्ततया तयोः सहजत एव मनोगुणाद्यवृत्तितया प्रतियोगितावच्छेदकविशिष्टेत्यभिधानस्यासंगतिरिति ध्येयं सामा
न्यपदस्य फलमाह संयोगसामान्यं न्विति तथा च संयोगी द्रव्यत्वादित्यादावव्याप्तिवारणार्थमेव सामान्यपदमिति भावः विशिष्ट
स्येति विशिष्टनिरूपिताधेयत्वस्येत्यर्थः। तथा च विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरिति भावः ननु तादृशसंबन्धाव

रा·सः
२०

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नयत्किंचिद्धेत्वधिकरणनिष्ठाधिकरणतानिरूपकतानवच्छेदकप्रतियोगितावच्छेदककत्वं सामान्यकांतेन विवक्षि
तमतो नोक्तदोष इत्यत आह समवायेनेति। ननु समवायेन जातेर्व्याप्यवृत्तित्वात्तत्साध्यके प्रतियोगिवैयधिकरण्यमेव न देयं
देयं चाव्याप्यवृत्तिसाध्यकस्थलीयनिरुक्तौ साध्यतावच्छेदके व्याप्यवृत्तितानवच्छेदकविशेषणमतो न तत्रान्यलक्षणस्यातिव्या
प्तिरत आह संयोगादीति गुणकर्मान्यत्वेति एकैकोपादाने तत्र प्रतियोगिवैयधिकरण्यं प्रसिद्धमत उभयोपादानं अद्रव्यगुणादौ स
मवायेन वृत्तेः प्रसिद्ध्य तत आह। हेतुमतीति अत्र विशिष्टनिरूपिताधेयत्वस्यातिरिक्तत्वोपगमे स्वप्रतियोगितावच्छेदकावच्छि
न्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभाववद्धेत्वधिकरणयत्किंचिद्व्यक्तिवृत्तित्वसामान्यकत्वस्य विवक्षिणान्नोक्तदो
ष इत्यस्मद्गुरुचरणाः नव्यास्तु साध्यतावच्छेदकसंबंधेन प्रतियोग्यधिकरणयावद्धेत्वधिकरणाकोयोयस्तदन्यत्वं प्रतियोगि
वैयधिकरण्यं वाच्यमतो गगनाभावमादायैव प्रसिद्धेर्नऽकोपि दोषः न चैवं यद्यत्संबंधेन यद्धर्मावच्छिन्नानधिकरणं हेत्वधिक
रणं तत्तत्संबंधावच्छिन्नसाध्यतावच्छेदकसम्बन्धेन तद्धर्मावच्छिन्नसामानाधिकरण्यमेव लाघवाद्व्याप्तिरस्तु तथा च घटवान् महा
कालत्वादित्यादौ समवायेन घटाद्यभावोपि प्रतियोगिव्यधिकरणः संभवतीति वाच्यं घटवृत्तित्वविशिष्टद्रव्यत्ववान् घटत्वा
दित्यादावव्याप्तेः केनापि सम्बन्धेन हेतुमतः साध्यतावच्छेदकावच्छिन्नानधिकरणत्वासंभवात् तादात्म्येन मेयाविधानधिकरण
त्वसंभवेपि दधित्वविशिष्टप्रमेयवान् अंत्यावयविभिन्नस्थूलदधित्वादित्यादावव्याप्तिरिति प्राहुः तादृशसंबंधसामान्य इत्यस्य पूर्व
वदर्थो बोध्यः कुत्रचित्साध्यतावच्छेदकसंबंधसामान्य इत्येव पाठः विवक्षितत्वादिति अभावांतमत्र ग्रंथेनेत्यादि तथा च साध्य
तावच्छेदकसंबंधसामान्ये यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्वसामान्योभयाभाववत्ताद्दृशप्रतियोगितानवच्छेदकीभूतसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यर्थः संबं
धसामान्ये इत्युक्तौ कालिकसंबंधे धूमप्रतियोगिकत्वायःपिंडानुयोगिकत्वोभयसत्त्वाद्धूमवान् वन्हेरित्यादावतिव्याप्तिरतः सा
ध्यतावच्छेदके नित्समवायिनः संयोगेन साध्यतायां जातिमत्त्वादावतिव्याप्तिः साध्यतावच्छेदकीभूतसमवायात्मकधर्मे समवायि
त्वावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणगुणाद्यनुयोगिकत्वोभयसत्त्वेन साध्याभावस्य लक्षणघटकत्वादतः सम्बन्धपदं यद्धर्माव
च्छिन्नसंसर्गताकप्रकृतसाध्यकानुमितिः फलं तद्धर्मावच्छिन्नसंबंधसामान्य इति फलितार्थः घटीयसंयोगे पर्वतीयसंयोगे वा हेतुमन्महान
सानुयोगिकत्ववन्हित्वावच्छिन्नप्रतियोगिकत्वोभयाभाववत्त्वाद्वन्हिमान् धूमादित्यादावव्याप्तिरतः प्रथमं सामान्यपदं तथा
च महानसीयवन्हिसंयोग एव नादृशोभयाभावविरहान्नाव्याप्तिः संयोगसामान्य एव हेतुमदयोगोलकानुयोगिकत्वधूमत्वाव
च्छिन्नप्रतियोगिकत्वोभयाभाववत्त्वाद्धूमवान्वन्हेरित्यादौ नातिव्याप्तिः संयोगसामान्य एव समवायनिष्ठपर्वतानुयोगिकत्वसंव
न्हित्वावच्छिन्नप्रतियोगिकत्वस्य च द्वयोरभावसत्त्वात्तथैवाव्याप्तिरतः सामान्योभयेति सामान्यपदमुभयत्रान्वितमिति भावः तादृ
शोभयाभावश्च स्वरूपसंबंधेन वोध्यः तेन समवायादिना तदुभयाभावस्य सम्बन्धमात्रे सत्त्वेपि सद्धेतौ नाव्याप्तिरेतद्घटवान् तद्घ
टत्वादित्यादौ एतद्घटत्वावच्छिन्नप्रतियोगिकत्वविशिष्टतद्घटानुयोगिकत्वाप्रसिद्धेरभावान्तरमादायातिव्याप्तिः गगनप्रति
योगिकत्वविशिष्टमहाकालानुयोगिकत्वाप्रसिद्ध्या गगनाभावमादाय प्रकृताव्याप्तिवारणासंभवश्च स्यादतो निरुक्तप्रतियोगि
कत्वविशिष्टयत्किंचिद्धेत्वधिकरणानुयोगिकत्वसामान्याभावं परित्यज्य तदुभयसामान्याभाव उक्तः न च यादृशप्रतियोगि
तावच्छेदकावच्छिन्नप्रतियोगिकत्वविशिष्टसंबंधसामान्ये हेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वविशिष्टसाध्यताव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च्छेदकसंबंधत्वस्य तथाविधसंबंधसामान्येवा यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वस्य व्यतिरेकः नादृशप्रति
योगितानवच्छेदकत्वमेव साध्यतावच्छेदकस्य कथनेनोक्तमिति वाच्यं द्रव्यं वा प्रमेयत्वादित्यादौ संयोगेन साध्यतायामतिव्या
प्त्यापत्तेः प्रमेयानुयोगिकसंयोगसामान्यस्यैव द्रव्यत्वावच्छिन्नप्रतियोगिकत्वेन साध्याभावस्य लक्षणाघटकत्वादिति ध्येयं एवं च
कालिकसंबंधसामान्ये महाकालानुयोगिकत्वसत्वेपि गगनप्रतियोगिकत्वविरहाद्गगनाभाव एव घटवान्महाकालात्वादित्या
दौ प्रतियोगिव्यधिकरणतया प्रसिद्ध इति भावः ननु हेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वं यदि तद्वृत्तित्वं तदा धूमवा
न्वह्नेरित्यादावतिव्याप्तिः धूमप्रतियोगिकस्यापि संयोगस्य कालिकसंबंधेनायोगोलकवृत्तित्वात् यदि च साध्यतावच्छेदक
संबंधस्य संसर्गतानियामकोयः संबन्धस्तेन हेत्वधिकरणवृत्तित्वमेव तदनुयोगिकत्वं प्राच्यं तदा संयोगेन द्रव्यस्य साध्यता
यां द्रव्यं जात्यन्यतरत्वादावतिव्याप्तिः जातौ समवायेन वृत्त्यप्रसिद्धेः न च साध्यतावच्छेदकसंबंधावच्छिन्नाधिकरणतासा
मान्ये निरुक्तोभयाभाववत्त्वं विवक्षितं तत्र च हेत्वधिकरणवृत्तित्वं स्वरूपसम्बन्धेनैव वाच्यमिति सांप्रतं अत एवेत्यादिवक्ष्यमा
णग्रंथासंगतिप्रसंगात् समवायस्यैकत्वेपि तदवच्छिन्नाधिकरणतायां निरुक्तोभयाभावसत्वे न द्रव्यं जातेरित्यादावतिव्याप्त्यभावा
दिति चेन्न संयोगः पर्वते वह्नेः संबंधो न तु वह्नौ पर्वतस्येत्यादिप्रतीत्या हि किंचित्प्रतियोगिककिंचिदनुयोगिकसम्बन्धत्वमनुभ
वसिद्धं कुत्रचिदेव संयोगादौ न तु सर्वत्र न च स्वरूपसंबंधविशेषो निरिक्तो वेत्यन्यदेतत् तथा च साध्यतावच्छेदकसंबंधसामान्ये
निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकसम्बन्धत्वोभयाभावस्य विवक्षणाद्धूमसंयो
गस्यायोगोलकानुयोगिकसंसर्गत्वविरहादेव नातिप्रसंगः तत्र यथार्थविशिष्टधीनियामकस्यैव तदनुयोगिकसम्बन्धत्वात्

त्वोभयाभावविरहेण वह्निसामान्याभावस्य लक्षणाघटकत्वादित्यासमग्रः पर्वतवह्निसंयोगस्य हेतुमद्वह्निवृत्तित्वेऽपि वह्न्यनुयोगिकं

जा.सि. २२ एतेन वह्निमान्वह्निरूपादित्यादावतिव्याप्तिः पर्वतवह्निसंयोग एव वह्निप्रतियोगिकत्वहेत्वधिकरणीभूतवह्न्यनुयोगिकसं
बंधत्वविरहेणान्तत्रतादृशोभयाभावसत्त्वात् इदं त्ववधेयं यत्रैकसंयोगव्यक्त्या यत्पदार्थयोः परस्परं विशिष्टधीः प्रमा तत्र तयोरेक
स्मिन्संयोगेन साध्ये नदीयरूपादौ व्यभिचारिण्यतिव्याप्तिः तदुभयसंयोगस्य निरुक्तोभयाभावविरहादिति यत्किंचिदित्यस्य
फलमाह धूमसंयोग इति अन्यथा वह्न्यधिकरणमहानसानुयोगिकत्वधूमप्रतियोगिकत्वोभयस्यैव धूमसंयोगे सत्त्वेन धूमाभा
वस्य प्रतियोगिवैयधिकरण्याभावाद्धूमवान्वह्नेरित्यादावतिप्रसंगस्स्यादिति भावः। षष्ठ्यंतत्रयं विरहादित्यन्तमपि निरुक्तपदस्य
कृत्यतः फलमाह। चैत्रान्यत्वेति। निरुक्तपदानुक्तौ चैत्रान्यत्वविशिष्टेन दंडवानेतद्दंडादित्यत्र चैत्रवृत्त्येतद्दंडसंयोग एव चैत्रान्यत्व
विशिष्टेनदंडाभावप्रतियोगी प्रतियोगिकत्वहेत्वधिकरणीभूतचैत्रानुयोगिकत्वोभयाभावविरहात्तादृशदंडाभावस्य लक्षणाघटक
तयातिव्याप्तिः स्यात् तदुपादाने तु चैत्रान्यत्वविशिष्टेन दंडत्वावच्छिन्नप्रतियोगिकत्वस्याभावादेतत्रोभयाभावसंभव इति नाति
व्याप्तिरिति भावः। यदि च प्रतियोगिताप्रत्याश्रयं नानैव तत्त्वेकेति मते तदा चैत्रान्यत्वविशिष्टदंडत्वावच्छिन्नं यच्चैत्रावृत्तिदंडनिष्ठं प्रतियो
गित्वं तदाश्रयप्रतियोगिकत्वहेत्वधिकरणीभूतचैत्रानुयोगिकत्वोभयाभावस्य संयोगसामान्ये एव सत्त्वान्निरुक्तपदं विनापि नातिव्या
प्तिः संभवतीति तन्मतसाधारण्येनातिव्याप्तिरक्षणार्थमुक्तमेतदिति यद्यनुयोगितापत्याश्रयं नानैव तत्त्वेकेति मतं तदा दंडसामान्य
स्य हेतुत्वे एतद्दंडप्रतियोगिकसंयोगसामान्य एव दंडान्तरस्याधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वाभावादेवोभयाभावसत्त्वादि
तिव्याप्तिविरहः स्यादतो हेतावेतदिति संयोगेन साध्यतायां निरुक्तपदव्यावृत्तिमुक्त्वा समवायेन साध्यतायामाह गुणकर्मान्यत्वे एम: २२
ति इदं च समवायस्य नानात्वमभिप्रेत्य तस्यैकत्वे तु तत्र गुणानुयोगिकत्वविशिष्टसत्ताप्रतियोगिकत्वोभयसत्त्वेनातिव्याप्तिनारव

स्यात् यदपि यादृशप्रतियोगितावच्छेदकावच्छिन्नेनाद्युक्तौ वह्निधूमोभयवान् धूमादित्यत्राव्याप्तिः संयोगसामान्य एव वह्निधू
मोभयत्वावच्छिन्नप्रतियोगिकत्वधूमाधिकरणपर्वतानुयोगिकत्वोभयाभावसत्वात् न च निरुक्तप्रतियोगितावच्छेदकावच्छिन्नव
त्ताप्रमायां सांसर्गिकविषयत्वमेव निरुक्तप्रतियोगिप्रतिकृत्वं वक्तव्यं तच्च पर्वते वह्निधूमयोः प्रत्येकसंयोगस्याप्यस्तीति नाव्याप्तिः
अन्यथा संयोगेन पर्वतः वह्निधूमोभयवानित्यादिप्रमायाद्दुर्घटत्वापत्तेरिति वाच्यं तथा सत्यत एवेत्यादिना वक्ष्यमाणायां वह्निधू
मोभयवान्वन्हेरित्यत्रातिव्याप्तेरसंगत्यापत्तेः वह्निधूमोभयवत्ताप्रमानियामकसंयोगमात्रस्यैव हेत्वधिकरणीभूतायोगोलकानु
योगिकत्वाभावेन वह्निधूमोभयत्वावच्छिन्नाभावमादायैवातिव्याप्त्यसंभवात् तथापि साध्यसाधनभेदेन व्याप्तिभेदाव्यासज्यवृत्ति
धर्मेण साध्यतायां निरुक्तपदसमपहाय यादृशप्रतियोगिताश्रयप्रतियोगिकत्वघटितस्यैव प्रवेशान्नोक्तस्थलाव्याप्तिः न चैवमुभयत्वे
न साध्यतायां व्यभिचारिण्यतिव्याप्तिः [illegible]दोषस्यात एवेत्यादिना वह्निः धूमोभयवान्वन्हेरित्यादौ ग्रंथकृतैवाग्रे वक्ष्यमाणत्वादिति वस्तु
तः सम्बन्धस्यैकप्रतियोगिकत्वापरानुयोगिकत्वनियमेन वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकसंबंधत्वाप्रसिद्धेर्वतदुभयत्वा
वच्छिन्नाभावस्य लक्षणाघटकत्वान्नाव्याप्तिः अत एवाग्रे वह्निधूमोभयवान्वन्हेरित्यादावतिव्याप्तिर्दोस्यते न च वह्निधूमोभयत्वा
वच्छिन्नप्रकारित्वादावेव तादृशोभयत्वावच्छिन्नप्रतियोगिकसंबंधत्वप्रसिद्धिसंभवः प्राचां मते प्रकारित्वादेः संबंधत्वाभावात्।
विशिष्टधीनियामकस्यैव तथात्वादिति ध्येयम् न चैवमपि घटवान्नित्यज्ञानत्वादित्यत्राव्याप्तिः विषयितासंबंधेन गगनीयत्वनित्य
ज्ञानानुयोगिकत्वोभयवत्वेन गगनत्वेन गगनाभावमादाय प्रसिद्धसंभवादिति वाच्यम् तादृशसंबंधेन घटादेर्व्याप्यवृत्तितया तस्मा
ध्यके प्रतियोगिवैयधिकरण्यस्याप्रवेशादित्याशयादिति ध्येयं अत्र ब्रूमः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकृतसाध्याधिकरण

नानिरूपितस्वरूपसंबन्धेन यद्भावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्त्वं हेतुमतस्तद्भावप्रतियोगिता
नवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षणेनैव सामंजस्येति निरुक्तप्रतियोगिकत्वेत्यादिरवंइशः प्रसिद्धिर्विफला कालो घटवा
न्महाकालत्वादित्यादौ कालिकसंबंधावच्छिन्नघटाधिकरणतानिरूपितस्वरूपसंबंधेन पटत्वावच्छिन्नाधिकरणत्वसामान्याभा
वस्यैव हेतुमति सत्त्वेन पटत्वावच्छिन्नाभावस्यैव निरुक्तप्रतियोगिव्यधिकरणस्य सुलभत्वादिति ध्येयम् एवं यादृशप्रतियोगितावच्छेद
कावच्छिन्नप्रतियोगिकसंबंधसामान्ये साध्यतावच्छेदकसंबंधत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकसंबंधत्वोभयाभावस्ता
दृशप्रतियोगिताकथं नोक्तेति चिंतनीयं कालस्य जगदाधारत्वप्रवादमनुसृत्याह स्वरूपसंबंधेनेति कालिकविशेषणतयेत्यर्थः। गगनादे
रवृत्तित्वप्रवादस्तु संयोगसमवायपरः तथा चाप्रणाल्यापि गगनाभावो न प्रतियोगिव्यधिकरण इति घटवान्महाकालत्वादित्यादाव
व्याप्तिस्तदवस्थेति भावः निरुक्तेति प्रतियोगितावच्छेदकसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नासंबंधित्वं हेतुमतस्तादृश
प्रतियोगितासामान्य इत्यर्थः तथा च संयोगादिना घटाद्यभावमादायैव घटवान्महाकालत्वादित्यत्र संगतिः घटाभावप्रतियोगितायां
धूमत्वावच्छिन्नत्वसंयोगसम्बन्धावच्छिन्नत्वोभयाभावसत्त्वेन धूमादेर्वन्ह्यादिव्यापकत्वावारणाय सामान्येति तथा च धूमनिष्ठता
दृशप्रतियोगितायामेव तदुभयसत्त्वाद्दोषः यत्संबंधेति समवायिनः संयोगेन साध्यतायां घटत्वादिहेतावव्याप्तिः साधनवन्निष्ठस्य
समवायेन संयोगिसामान्याभावस्य प्रतियोगितायां संयोगसमवायोभयावच्छेद्यतासत्त्वात् नो धर्मसंबंधयोरुपादानं तथा च तद्
भावप्रतियोगितायां धर्मविधया समवायेन संबन्धविधया संयोगेन वावच्छेद्यत्वाभावान्नातिव्याप्तिरिति भावः अत्र च क्वचिद्यादृश
संबंधावच्छिन्नेत्यपि दृष्टं शब्दे कस्यानुपादेयत्वात् तेन धूमवति न तत्संयोगसंबन्धेन वह्निसामान्याभावे सत्त्वेपि नाव्याप्तिः न तत्संयो

गाद्यवच्छिन्नप्रतियोगितायाः संयोगसामान्यानवच्छिन्नत्वात् संयोगत्वसंबंधविधयावच्छेदकतावच्छेदकत्वेपि एवंतत्वात् ए
वंयद्धर्मावच्छिन्नेत्यत्रापि क्वचिद्यादृशधर्मावच्छिन्नेति बोध्यं तेन दंडिमान्दण्डसंयोगादित्यादौ तादृशप्रतियोगितायांतद्दण्डाव
च्छेद्यत्वसंयोगावच्छेद्यत्वोभयाभावसत्वेपि नाव्याप्तिः प्रमेयत्वावच्छेद्यत्वविशिष्टस्वरूपसंबंधावच्छिन्नत्वाप्रसिद्ध्या प्रमेयवा
न्वाच्यत्वादित्यादावव्याप्तिरतो विशिष्टाभावमपहाय तादृशोभयाभाव उक्तः न च निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभा
वीययद्धर्मावच्छिन्नप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वाभावस्तत्संबंधेन तद्धर्मावच्छिन्नं व्यापकमित्यस्तु धर्मान्तरावच्छि
न्नाभावाप्रवेशेन लाघवादिति वाच्यं घटवृत्तित्वविशिष्टद्रव्यत्ववान् घटत्वादित्यादावव्याप्तेः तादृशव्यत्वभेदमादाय कथंचित्तत्र
लक्षणसमन्वयेपि दधित्वविशिष्टप्रमेयवान् स्थूलदधित्वादित्यत्राव्याप्तिः केनापि सम्बन्धेन हेतुमतः साध्यतावच्छेदकावच्छि
न्नानधिकरणत्वासंभवात् तत्रापि दध्यंतरानुयोगिकसमवायादिसंबन्धेन हेतुमतः प्रकृतसाध्यानधिकरणत्वेनूक्तक्रमेणापि
व्यापकत्वंसुवचमिति तु विभावनीयमिति तेन सम्बन्धेनेति न चैवं संयोगेनापि रूपस्य पृथिवीत्वव्यापकतापत्तिः तेन संबंधेन रू
पाभावप्रतियोग्यधिकरणाप्रसिद्धेरिति वाच्यं तथात्वेपि तेन सम्बंधेन रूपसामानाधिकरण्याप्रसिद्ध्यैव व्याप्तिलक्षणातिव्याप्तिवि
रहात् यद्धर्मेत्यत्र धर्मस्य साध्यतावच्छेदकसंबन्धावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वेनापि विशेषणीयत्वाद्वानं च वृ
त्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः तादृशसंबन्धस्य प्रतियोगितानवच्छेदकतया तत्सम्बन्धावच्छिन्नत्वस्याप्रसिद्धेः ता
दृशसंबंधस्यापि प्रतियोगितावच्छेदकत्वपक्ष एवैतन्निरुक्त्यादरात् निरुक्तप्रतियोगितासामान्ये यत्संबंधातिरिक्तसंबंधानवच्छि
न्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तत्संबंधेन तद्धर्मावच्छिन्नस्य व्यापकत्वमिति तु नव्युक्तम् वृत्त्यनियामकसम्बन्धेन साध्यतायां

ज्ञा·सि
२४
व्यभिचारिण्यतिव्याप्त्यापत्तेः यद्धर्मावच्छेदकताघटकसम्बन्धेन यादृशप्रतियोगितावच्छेदकानधिकरणं हेत्वधिकरणं ता
दृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नावच्छेदकत्वयत्सम्बन्धावच्छिन्नावच्छेदकताकत्वोभयाभावस्तेन संबन्धेन तद्धर्माव
च्छिन्नस्य व्यापकत्वं विवक्षितं नियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वाभावेपि प्रतियोगितावच्छेदकताघटकसंब
न्धत्वं सर्वसंमतमेवं चैत्रो न पचतीत्यादौ वृत्त्यनियामकानुकूलत्वसम्बन्धेन पाकविशिष्टायाः कृतेरभावस्य चैत्रादावन्वयद
र्शनात् व्यभिचारिणि तु साध्यवत्सामान्याभावप्रतियोगितायामेवं तादृशोभयाभावविरहान्नातिव्याप्तिरिति तु नव्याः नतु व्याप्य
वृत्तिसाध्यकस्थलेषु क्रमेण व्यापकत्वं निर्वाच्यम् अन्यथा दंडिमानित्यादौ दंडित्वादिप्रकारेण व्यापकत्वानुपपत्तेः तथा च
प्रमेयवान्वाच्यत्वादित्यादावव्याप्तेः प्रमेयत्वावच्छिन्नत्वस्याप्रसिद्धेः न च प्रकारित्वादौ तत्प्रसिद्धिः प्रतियोगितानिष्ठाया एवाव
च्छेद्यतायाः प्रकृते निवेशनीयत्वात् अन्यथा प्रकारित्वप्रतियोगित्वसाधारणैकावच्छेद्यत्वविरहेण व्यभिचारिण्यतिव्याप्त्यापत्ते
रत आह समवायेनेति ननु स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वेपि प्रकृतसाध्यीयसाध्यतावच्छेदकसंबंधसामान्ये तादृशोभयाभा
वविवक्षयैव सर्वसामञ्जस्ये कृतं विवक्षान्तरेण घटवान्महाकालत्वादित्यत्र घटीयतादृशविशेषणतायां पटत्वावच्छिन्नप्रतियोगि
कत्वविरहेण पटाभावस्यैव प्रतियोगित्वे व्यधिकरणत्वसंभवात् कालः प्रमेयवान्महाकालत्वादित्यत्र च कालिकसम्बन्धेन प्रमेयसामा
न्यस्य व्याप्यवृत्तितया तत्प्रतियोगित्वे व्यधिकरणस्यैवानुपदेयत्वेन निर्दोषादतः पूर्वकल्पे दोषान्तरमाह। अत एवेति। यद्यपि संयो
गमात्रस्यैव वह्नित्वावच्छिन्नप्रतियोगिकत्वविरहाद्वह्निधूमोभयत्वावच्छिन्नाभावमादायैव नातिव्याप्तिसंभावना तथापि वह्निधूमोभ रामः
यवान्वह्नेरित्यादौ संयोगस्य वह्नित्वावच्छिन्नप्रतियोगिकत्वविरहेपि समवायस्यैकत्वेन द्रव्यत्वप्रतियोगिकत्वगुणानुयोगिकत्वोभयत्वे २४

CC-0. In Public Domain. Digitization by eGangotri

नद्रूव्यंजातेरित्यादौनातिव्याप्तिरितियोजनाविरहेपिचेतिचकारस्तुप्रामादिकइतिप्रांचः वस्तुतस्तुसंयोगस्यसंबन्धमात्रस्यहित्वाव
च्छिन्नप्रतियोगिकत्वाप्रसिद्धावपीत्यर्थःतथाचसंबंधमात्रस्यैकप्रतियोगिकापरानुयोगिकसंबंधत्वनियमेनवन्हिधूमोभयत्वावच्छि
न्नप्रतियोगिकसम्बन्धस्याप्रसिद्ध्यानादृशप्रतियोगिकत्वस्यलक्षणाघटकत्वेपिवन्हिधूमोभयवान्वन्हेरित्यादौनातिव्याप्तिःप्रकारि
त्वादेःसम्बंधत्वेमानाभावादितितुप्रागेवप्रपंचितमस्माभिःकेचित्तुवन्हेरित्यत्रधूमादितिनातिव्याप्तिरित्यनन्तरंचाव्याप्तिर्वेतिपाठक
ल्पयंतोद्रव्यंजातेरित्यादावतिव्याप्तिंवन्हिधूमोभयवान्धूमादित्यत्रचाव्याप्तिमेवपूर्वलक्षणेदोषंसंगमयंति ननुस्वरूपसंबन्धात्म
कप्रतियोगित्वस्यविशिष्टधीजनकत्वरूपेसंबन्धताघटकनियमघटितत्वादात्माश्रयत्वमतआह प्रतियोगित्वादिरिति आदिनावच्छे
दकत्वपरिग्रहःनसम्बन्धेनेतिप्रतियोगितात्वादिधर्मीतरप्रकारेणहेतुमन्निष्ठाभावीयत्वप्रकारेणैववातत्प्रवेशादितिभावःसंयोगा
त्वादिनैवेति ननुप्रतियोगितात्वमपिस्वरूपसम्बन्धएवेत्युक्तदोषतादवस्थ्यम् किंचवृत्त्यनियामकसम्बन्धेनहेतुनास्थलेतेनस
म्बन्धेनहेतुसम्बन्धित्वस्यावश्यंप्रवेशएवेत्यतःसम्बन्धत्वेननिवेशेपिनक्षतिरित्याशयेनाह। दर्शितंचेति। विशेष्यविशेषणत्वान्य
विशिष्टधीविषयत्वमेवसंबन्धत्वमितिभावःभावभिन्नस्वरूपस्याभावत्वस्यप्रवेशेघटत्वाभाववान्द्रव्यत्वादित्यादावतिव्याप्तिरित्या
ह। अभावत्वंचेति। इदमिहेत्यादिइदंचात्यन्तान्योन्याभावत्वयोरभावत्वागर्भतामभिप्रेत्यतयोस्तद्गर्भतायांत्वाह। तदपिवेति। अभावत्व
मपिवेत्यर्थः। अपेरभावोर्थः। अतिरिक्तविषयतापक्षस्यकेनचित्स्वीकारात् दृष्टांततात्वादीनिविषयतात्वादीत्यर्थः आदिनाप्रकारित्व
ग्रहःकेचित्तुतत्त्वंतत्ता आदिनाचेदंत्वस्योपग्रहः तत्वेदंत्वयोःपदार्थान्तरत्वंविनादुर्वचत्वात्तत्रैवपर्यवसानादित्याहुःतत्वेतिप्रति
योगितात्वाधिकरणतावेत्यर्थः॥ इतिजागदीश्यन्तर्गतसिद्धान्तलक्षणंसम्पूर्णम् ॥ श्रीशुभम् ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·सि
२५

जागदीशीसिद्धान्तलक्षणं

श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशकेपास दाऊजी अग्निहोत्रीकेसिद्धविनायक यंत्र मेजागदीशीसिद्धान्तलक्षणं छापागया जिसैलेनाहोयउसैढुंढिराजगणेशकेपासदाऊजी अग्निहोत्रीकेदुकानपरमिलेगा लि·रामदास छापनेवालावचनू संवत् १९४७ ॥ ❁ ॥

पहिलीवार ३०० प्रोप्राईटरगणेशप्रसादवाजपेयीसिद्धविनायकप्रेसवनारस ता:२०·जून सन १८९०

रामः
२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu